# Taittirīya-Āraṇyaka

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 1

[[1-0-0]]

भ॒द्रं कर्णे॑भिः शृ॒णु॒याम॑ दे॒वाः ।
भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः ।
स्थि॒रैरङ्गै᳚स्तुष्टु॒वाग्ँस॑स्त॒नूभिः॑ ।
व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ ।
स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः ।
स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः ।
स्व॒स्तिन॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः ।
स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ।
ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

((bha̱draṃ karṇe̍bhiḥ śṛ̱ṇu̱yāma̍ devāḥ |
bha̱draṃ pa̍śyemā̱kṣabhi̱ryaja̍trāḥ |
sthi̱rairaṅgai̎stuṣṭu̱vām̐sa̍sta̱nūbhi̍ḥ |
vyaśe̍ma de̱vahi̍ta̱ṃ yadāyu̍ḥ |
sva̱sti na̱ indro̍ vṛ̱ddhaśra̍vāḥ |
sva̱sti na̍ḥ pū̱ṣā vi̱śvave̍dāḥ |
sva̱stina̱stārkṣyo̱ ari̍ṣṭanemiḥ |
sva̱sti no̱ bṛha̱spati̍rdadhātu |
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ ||))

[[1-1-1]]

ॐ भ॒द्रं कर्णे॑भिः शृ॒णु॒याम॑ दे॒वाः ।
भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः ।
स्थि॒रैरङ्गै᳚स्तुष्टु॒वाग्ँस॑स्त॒नूभिः॑ ।
व्यशे॑म दे॒वहि॑तं॒ यदायुः॑ ।
स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः ।

स्व॒स्ति न॑ः पू॒षा वि॒श्ववे॑दाः।
स्व॒स्तिन॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः।
स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु।
आप॑मापाम॒पः सर्वा᳚ः।
अ॒स्माद॒स्मादि॒तोऽमुत॑ः॥ १॥

((āūṃ bha̱draṃ karṇe̍bhiḥ śṛṇu̱yāma̍ devāḥ |
bha̱draṃ pa̍śyemā̱kṣabhi̱ryaja̍trāḥ |
sthi̱rairaṅgai̎stuṣṭu̱vāṁ̎sa̍sta̱nūbhi̍ḥ |
vyaśe̍ma de̱vahi̍ta̱ṃ yadāyu̍ḥ |
sva̱sti na̱ indro̍ vṛ̱ddhaśra̍vāḥ |
sva̱sti na̍ḥ pū̱ṣā vi̱śvave̍dāḥ |
sva̱stina̱stārkṣyo̱ ari̍ṣṭanemiḥ |
sva̱sti no̱ bṛha̱spati̍rdadhātu |
āpa̍māpāma̱paḥ sarvā̎ḥ |
a̱smāda̱smādi̱to'muta̍ḥ || 1 ||))

[[1-1-2]]
अ॒ग्निर्वा॒युश्च॒ सूर्य᳚श्च।
स॒ह सं॑चस्क॒रर्द्धि॑या।
वा॒य्वश्वा॑ रश्मि॒पत॑यः।
मरी᳚च्यात्मानो॒ अद्रु॑हः।
दे॒वीर्भु॑वन॒सूव॑रीः।
पु॒त्र॒व॒त्वाय॑ मे सुत।
महानाम्नीर्म᳚हामा॒नाः।
म॒ह॒सो म॑हस॒स्स्व॑ः।
दे॒वीः प॑र्जन्य॒सूव॑रीः।
पु॒त्र॒व॒त्वाय॑ मे सुत॥ २॥

((a̱gnirvā̱yuśca̱ sūrya̍śca |
sa̱ha sa̍ṃcaska̱rarddhi̍yā |
vā̱yvaśva̍ raśmi̱pata̍yaḥ |
mari̎cyātmāno̱ adru̍haḥ |
de̱vīrbhu̍vana̱sūva̍rīḥ |
pu̱tra̱va̱tvāya̍ me suta |
mahānāmnīrma̍hāmā̱nāḥ |
ma̱ha̱so ma̍hasa̱ssva̍ḥ |
de̱vīḥ pa̍rjanya̱sūva̍rīḥ |

pu̱tra̱va̱tvāya̍ me suta || 2 ||))

[[1-1-3]]

अ॒पाश्न्यु॑ष्णिम॒पा रक्ष॑ः ।
अ॒पाश्न्यु॑ष्णिम॒पारघम्᳚ ।
अपा᳚घ्रा॒मप॑ चा॒वर्ति᳚म् ।
अप॑दे॒वीरि॒तो हि॑त ।
वज्रं॑ दे॒वीरजी॑ताꣳश्च ।
भुव॑नं देव॒सूव॑रीः ।
आ॒दि॒त्यानदि॑तिं दे॒वीम् ।
योनि॑नोर्ध्वमु॒दीष॑त ।
शि॒वान॒श्शन्त॑मा भवन्तु ।
दि॒व्या आप॒ ओष॑धयः ।
सु॒मृ॒डी॒का सर॑स्वती ।
मा ते॒ व्यो॑म सं॒दृशि॑ ॥ ३ ॥
अ॒मुत॑ः सु॒तौष॑धयो॒ द्वे च॑ ॥ १ ॥

((a̱pāśnyu̍ṣṇima̱pā rakṣa̍ḥ |
a̱pāśnyu̍ṣṇima̱pāragha̎m |
apā̎ghrā̱mapa̍ cā̱varti̎m |
apa̍de̱vīri̱to hi̍ta |
vajra̍ṃ de̱vīraji̍tām̐śca |
bhuva̍naṃ deva̱sūva̍rīḥ |
ā̱di̱tyānadi̍tiṃ de̱vīm |
yoni̍nordhvamu̱dīṣa̍ta |
śi̱vāna̱śśanta̍mā bhavantu |
di̱vyā āpa̱ oṣa̍dhayaḥ |
su̱mṛ̱ḍī̱kā sara̍svatī |
mā te̱ vyo̍ma sa̱ṃdṛśi̍ || 3 ||
a̱muta̍ḥ su̱tauṣa̍dhayo̱ dve ca̍ || 1 ||))

[[1-2-1]]

स्मृति॑ः प्र॒त्यक्ष॑मैति॒ह्य᳚म् ।
अनु॑मानश्चतु॒ष्टय॑म् ।
ए॒तैरादि॑त्यमण्डलम् ।
सर्वै॑रे॒व विधा᳚स्यते ।
सूर्यो॒ मरी॑चि॒माद॑त्ते ।

सर्वस्माद्भुवनादधि।
तस्याः पाकविशेषेण।
स्मृतं कालविशेषणम्।
नदीव प्रभवात्काचित्।
अक्षय्यात्स्यन्दते यथा॥ ४॥

((smṛtiḥ pratyakṣamaitihyam |
anumānaścatuṣṭayam |
etairādityamaṇḍalam |
sarvaireva vidyāsyate |
sūryo marīcimādatte |
sarvasmādbhuvanādadhi |
tasyāḥ pākaviśeṣeṇa |
smṛtaṃ kālaviśeṣaṇam |
nadīva prabhavātkācit |
akṣayyātsyandate yathā || 4 ||))

[[1-2-2]]
तान्नद्योऽभिसमायन्ति।
सोरुस्सती न निवर्तते।
एवन्नानासमुत्थानाः।
कालास्संवत्सरꣳ श्रिताः।
अणुशश्च महशश्च।
सर्वे समवयन्त्रितम्।
सतैस्सर्वैस्समाविष्टः।
ऊरुस्सन्न निवर्तते।
अधिसंवत्सरं विद्यात्।
तदेव लक्षणे॥ ५॥

((tānnadyo'bhisamāyanti |
sorussatī na nivartate |
evannānāsamutthānāḥ |
kālāssaṃvatsaraṃ śritāḥ |
aṇuśaśca mahaśaśca |
sarve samavayantritam |
sataissarvaissamāviṣṭaḥ |
ūrussanna nivartate |
adhisaṃvatsaraṃ vidyāt |

tadevá lakṣa̱ṇe̱ || 5 ||))

[[1-2-3]]

अणुभिश्च म॑हद्भि॒श्च।
स॒मारू॑ढः प्र॒दृश्य॑ते।
संवत्सरः प्र॑त्यक्षे॒ण।
ना॒धिस॑त्त्वः प्र॒दृश्य॑ते।
प॒टरो॑ विक्लि॑धः पि॒ङ्गः।
ए॒तद्व॑रुण॒लक्ष॑णम्।
यत्रै॑त॑दुप॒दृश्य॑ते।
स॒हस्रं॑ तत्र॒ नीय॑ते।
एकꣳहि शिरो ना॑ना मु॒खे।
कृ॒त्स्नं त॑दृतु॒लक्ष॑णम्॥ ६॥

((aṇubhiśca máhadbhi̱śca |
sa̱mārū́ḍhaḥ pra̱dṛśyáte |
saṃvatsaraḥ prátyakṣe̱ṇa |
nā̱dhisáttvaḥ pra̱dṛśyáte |
pa̱ṭaró viklídhaḥ pi̱ṅgaḥ |
e̱tadváruṇa̱lakṣáṇam |
yatraitádupa̱dṛśyáte |
sa̱hasráṃ tatra̱ nīyáte |
ekam̐hi śiro nánā mu̱khe |
kṛ̱tsnaṃ tádṛtu̱lakṣáṇam || 6 ||))

[[1-2-4]]

उभयतस्सप्तैन्द्रिया॒णि।
ज॒ल्पितं॑ त्वेव॒ दिह्य॑ते।
शुक्लकृष्णे संव॑त्सर॒स्य।
दक्षिणवाम॑योः पा॒र्श्वयोः।
तस्यै॒षा भव॑ति।
शु॒क्रं ते॑ अ॒न्यद्य॑ज॒तं ते॑ अ॒न्यत्।
विषु॑रूपे॒ अह॑नी॒ द्यौरि॑वासि।
विश्वा॒ हि मा॒या अव॑सि स्वधावः।
भ॒द्रा ते॑ पूषन्नि॒ह रा॒तिर॒स्त्विति॑।

नात्र भुवनम्।
न पूषा।
न पशवः।
नादित्यस्संवत्सर एव प्रत्यक्षेण प्रियतमं विद्यात्।
एतद्वै संवत्सरस्य प्रियतमꣳ रूपम्।
योऽस्य महानर्थ उत्पत्स्यमानो भवति।
इदं पुण्यं कुरुष्वेति।
तमाहरणं दद्यात्॥ ७॥
यथा लक्षण ऋतुलक्षणं भुवनꣳ सप्त च॥ २॥

((ubhayatassaptĕndriyāṇi |
jalpitaṃ tveva dihyate |
śuklakṛṣṇe saṃvatsarasya |
dakṣiṇavāmayoḥ pārśvayoḥ |
tasyaiṣā bhavati |
śukraṃ te anyadyajataṃ te anyat |
viṣurūpe ahanī dyaurivāsi |
viśvā hi māyā avasi svadhāvaḥ |
bhadrā te pūṣanniha rātirastviti |
nātra bhuvanam |
na pūṣā |
na paśavaḥ |
nādityassaṃvatsara eva pratyakṣeṇa priyatamaṃ vidyāt |
etadvai saṃvatsarasya priyatamam̐ rūpam |
yo'sya mahānartha utpatsyamāno bhavati |
idaṃ puṇyaṃ kuruṣveti |
tamāharaṇaṃ dadyāt || 7 ||
yathā lakṣaṇa ṛtulakṣaṇaṃ bhuvanam̐ sapta ca || 2 ||))

[[1-3-1]]
साकंजानाꣳ सप्तथमाहुरेकजम्।
षडुद्यमा ऋषयो देवजा इति।
तेषामिष्टानि विहितानि धामशः।
स्थात्रे रेजन्ते विकृतानि रूपशः।
को नु मर्या अमिथितः।
सखा सखायमब्रवीत्।
जहाको अस्मदीषते।

यस्तित्याज सखिविदꣳ सखायाम्।
न तस्य वाच्यपि भागो अस्ति।
यदीꣳ शृणोत्यलकꣳ शृणोति॥ ८॥

((sākamjānāmँ saptathamāhurekajam ।
ṣaḍudyamā ṛṣayo devajā iti ।
teṣāmiṣṭāni vihitāni dhāmaśaḥ ।
sthātre rejante vikṛtāni rūpaśaḥ ।
ko nu maryā amithitaḥ ।
sakhā sakhāyamabravīt ।
jahāko asmadīṣate ।
yastityāja sakhividamँ sakhāyām ।
na tasya vācyapi bhāgo asti ।
yadīmँ śṛṇotyalakamँ śṛṇoti ॥ 8 ॥))

[[1-3-2]]

न हि प्रवेद सुकृतस्य पन्थामिति।
ऋतुर्ऋतुना नुद्यमानः।
विननादाभिधावः।
षष्टिश्च त्रिꣳशका वल्गाः।
शुक्लकृष्णौ च षाष्टिकौ।
सारागवस्त्रैर्जरदक्षः।
वसन्तो वसुभिस्सह।
संवत्सरस्य सवितुः।
प्रैषकृत्प्रथमः स्मृतः।
अमूनादयतेत्यन्यान्॥ ९॥

((na hi praveda sukṛtasya panthāmiti ।
ṛturṛtunā nudyamānaḥ ।
vinanādābhidhāvaḥ ।
ṣaṣṭiśca trimँśakā valgāḥ ।
śuklakṛṣṇau ca ṣāṣṭikau ।
sārāgavastrairjaradakṣaḥ ।
vasanto vasubhissaha ।
samvatsarasya savituḥ ।
praiṣakṛtprathamaḥ smṛtaḥ ।
amūnādayatetyanyān ॥ 9 ॥))

[[1-3-3]]

अ॒मूꣳश्च॑ परि॒रक्ष॑तः ।
ए॒ता वा॒चः प्र॑युज्य॒न्ते ।
यत्रैत॑दुप॒दृश्य॑ते ।
ए॒तदे॒व वि॑जानी॒यात् ।
प्र॒माणं॑ का॒लपर्य॑ये ।
वि॒शे॒ष॒णं तु॑ वक्ष्या॒मः ।
ऋ॒तूनां᳚ तन्नि॒बोध॑त ।
शु॒क्लवासा॑ रु॒द्रगणः ।
ग्री॒ष्मेणा॑ऽऽवर्त॒ते स॑ह ।
नि॒जह॑न्पृथि॑वीꣳ स॒र्वाम् ॥ १० ॥

((a̱mūm̐śca̍ pari̱rakṣa̍taḥ |
e̱tā vā̱caḥ pra̍yujya̱nte |
yatraita̍dupa̱dṛśya̍te |
e̱tade̱va vi̍jānī̱yāt |
pra̱māṇa̍m kāla̱parya̍ye |
vi̱śe̱ṣa̱ṇam tu̍ vakṣyā̱maḥ |
ṛ̱tūnā̎m tanni̱bodha̍ta |
śuklavāsa̍ rudra̱gaṇaḥ |
grī̱ṣmeṇa̍''varta̱te sa̍ha |
ni̱jaha̍npṛthi̍vīm̐ sa̱rvām || 10 ||))

[[1-3-4]]
ज्यो॒तिषा᳚ऽप्रति॒ख्येन॑ सः ।
वि॒श्वरू॒पाणि॑ वासा॒ꣳसि ।
आ॒दि॒त्याना᳚ नि॒बोध॑त ।
संवत्सरी॒णं॑ कर्म॒फलम् ।
वर्षाभि॑र्द᳚दता॒ꣳ सह ।
अदुःखो॑ दुःखच॑क्षुरि॒व ।
तद्मा॑ पीत इ॒व दृश्य॑ते ।
शीतेना᳚व्यथ॑यन्नि॒व ।
रु॒रुद॑क्ष इ॒व दृश्य॑ते ।
ह्लादय॑ते ज्वल॑तश्चै॒व ।
शा॒म्यत॑श्चास्य॒ चक्षु॑षी ।

या वै प्रजा भ्र॑ꣳश्य॒न्ते।
संवत्सरात्ता भ्र॑ꣳश्य॒न्ते।
या॒ः प्रति॑तिष्ठ॒न्ति।
संवत्सरे ताः प्रति॑तिष्ठ॒न्ति।
व॒र्षाभ्य॑ इत्य॒र्थः॥ ११॥
शृ॒णो॒त्य॒न्यान्स॒र्वामे॒व षट्च॑॥ ३॥

((jyo̱tiṣa̎'prati̱khyena̍ saḥ |
vi̱śva̱rū̱pāṇi̍ vāsā̱m̐si |
ā̱di̱tyānā̎ṃ ni̱bodha̍ta |
saṃvatsarīṇa̍ṃ karma̱phalam |
varṣābhi̍rda̍datā̱m̐ saha |
aduḥkho̍ duḥkhaca̍kṣuri̱va |
tadma̍ pīta iva̱ dṛśya̍te |
śītenā̎vyatha̍yanni̱va |
ru̱ruda̍kṣa iva̱ dṛśya̍te |
hlādayate̎ jvala̍taścai̱va |
śā̱myata̍ścāsya̱ cakṣu̍ṣī |
yā vai prajā bhra̍m̐śya̱nte |
saṃvatsarāttā bhra̍m̐śya̱nte |
yā̱ḥ prati̍tiṣṭha̱nti |
saṃvatsare tāḥ prati̍tiṣṭha̱nti |
va̱rṣābhya̍ itya̱rthaḥ || 11 ||
śṛ̱ṇo̱tya̱nyānsa̱rvāme̱va ṣaṭca̍ || 3 ||))

[[1-4-1]]
अक्षि॑दुःखोत्थि॑तस्यै॒व।
वि॒प्रस॑न्ने क॒नीनि॑के।
आङ्क्ते॑ चाद्ग॑णं ना॒स्ति।
ऋ॒भूणाॎ तन्नि॒बोध॑त।
क॒न॒का॒भानि॑ वासा॒ꣳसि।
अ॒हता॑नि नि॒बोध॑त।
अन्नमश्नीत॑ मृज्मी॒त।
अ॒हं वोॎ जीव॒नप्र॑दः।
ए॒ता वा॒चः प्र॑युज्य॒न्ते।
श॒रद्य॑त्रोप॒दृश्य॑ते॥ १२॥

((akṣi̍du̱ḥkhotthi̍tasyai̱va |

viprasanne kanīnike |
āṅkte cādgaṇaṃ nāsti |
ṛbhūṇām̐ tannibodhata |
kanakābhāni vāsām̐si |
ahatāni nibodhata |
annamaśnīta mṛjmīta |
ahaṃ vo jīvanapradaḥ |
etā vācaḥ prayujyante |
śaradyatropadṛśyate || 12 ||))

[[1-4-2]]

अभिधून्वन्तोऽभिघ्नन्त इव।

वातवन्तो मरुद्गणाः।

अमुतो जेतुमिषुमुखमिव।

सन्नद्धास्सह ददृशे ह।

अपध्वस्तैर्वस्तिवर्णैरिव।

विशिखासः कपर्दिनः।

अक्रुद्धस्य योत्स्यमानस्य।

क्रुद्धस्येव लोहिनी।

हेमतश्चक्षुषी विद्यात्।

अक्ष्णयोः क्षिपणोरिव॥ १३॥

((abhidhūnvanto'bhighnanta iva |
vātavanto marudgaṇāḥ |
amuto jetumiṣumukhamiva |
sannaddhāssaha dadṛśe ha |
apadhvastairvastivarṇairiva |
viśikhāsaḥ kapardinaḥ |
akruddhasya yotsyamānasya |
kruddhasyeva lohinī |
hematascakṣuṣī vidyāt |
akṣṇayoḥ kṣipaṇoriva || 13 ||))

[[1-4-3]]

दुर्भिक्षं देवलोकेषु।

मनूनामुदकं गृहे।

एता वाचः प्रवदन्तीः।

वैद्युतो यान्ति शैशिरीः।

ता अ॒ग्निः पव॑माना॒ अन्वै᳚क्षत।

इ॒ह जी॑वि॒कामप॑रिपश्यन्।

तस्यै॒षा भव॑ति।

इ॒हे॒ह व॑स्स्वत॒पसः।

मरु॑त॒स्सूर्य᳚त्वचः।

शर्म᳚ स॒प्रथा॒ आवृ॑णे॥ १४॥

दृश्य॑त इ॒वाऽऽवृ॑णे॥ ४॥

((durbhikṣaṃ deválokeṣ̱u |
ma̱nūnā́mudạkaṃ gṛ́he |
ẹtā vā̱caḥ právadạntīḥ |
vaịdyutó yānti̱ śaiśíriīḥ |
tā a̱gniḥ pavámānā̱ anvaíkṣata |
i̱ha jívi̱kāmapáripaśyan |
tasyai̱ṣā bhaváti |
i̱heha vássvata̱pasaḥ |
marúta̱ssūryátvacaḥ |
śarmá sa̱prathā̱ āvṛ́ṇe || 14 ||
dṛśyáta i̱vā''vṛ́ṇe || 4 ||))

[[1-5-1]]

अति॑ता॒म्राणि॑ वासा॒ꣳसि।

अ॒ष्टिव॑ज्रिश॒तघ्नि॑ च।

विश्वे॑ देवा विप्र॑हर॒न्ति।

अ॒ग्निजि॑ह्वा अ॒सश्च॑त।

नैव देवो॑ न म॒र्त्यः।

न राजा व॑रुणो॒ विभुः।

नाग्निर्नेन्द्रो᳚ न पव॑मा॒नः।

मा॒तृक्कि॑च्चन॒ विद्य॑ते।

दि॒व्यस्यैका॒ धनु॑रार्त्निः।

पृ॒थि॒व्यामप॑रा श्रि॒ता॥ १५॥

((atítā̱mrāṇí vāsā̱ṃ́si |
a̱ṣṭivájriśa̱taghní ca |
viśve devā vipráhara̱nti |
a̱gnijíhvā a̱saścáta |
naiva devó na ma̱rtyaḥ |

na rājā várunọ̱ vibhuḥ ।
nāgnirnendro na pávamā̱naḥ ।
mā̱tṛkkáccana̱ vidyáte ।
di̱vyasyaikā̱ dhanúrārtniḥ ।
pṛ̱thi̱vyāmapárā śri̱tā ॥ 15 ॥))

[[1-5-2]]

तस्येन्द्रो वम्रिरूपे̱ण।
ध̱नुर्ज्यामच्छि̱नत्स्वयम्।
तदिन्द्र̱धनुरित्य̱ज्यम्।
अ̱भ्रवर्णे̱षु चक्षते।
एतदेव शंयोर्बार्हस्पत्य̱स्य।
ए̱तद्रुद्रस्य̱ धनुः।
रु̱द्रस्य त्वेव̱ धनुरार्त्निः।
शिर̱ उत्पिपेष।
स प्रव̱र्ग्यो॑ऽभवत्।
तस्मा̱द्यस्सप्रव̱र्ग्येण यज्ञे̱न यजते।
रु̱द्रस्य̱ स शिर̱ः प्रतिदधाति।
नैनꣳ रु̱द्र आरुको भवति।
य ए̱वं वेद॥ १६॥
श्रि̱ता यजत̱े त्रीणि च॥ ५॥

((tasyendro vamrirūpe̱ṇa ।
dha̱nurjyāmacchi̱nathsváyam ।
tadindra̱dhanúritya̱jyam ।
a̱bhravárṇe̱ṣu̱ cakṣáte ।
etadeva śaṃyorbārháspatya̱sya ।
e̱tadrúdrasya̱ dhanuḥ ।
ru̱drasyá tveva̱ dhanúrārtniḥ ।
śira̱ utpipeṣa ।
sa práva̱rgyó'bhavat ।
tasmā̱dyassapráva̱rgyeṇá yajñena̱ yajáte ।
ru̱drasya̱ sa śira̱ḥ pratidadhāti ।
nainaṃ̐ ru̱dra āruko bhavati ।
ya e̱vaṃ vedá ॥ 16 ॥
śri̱tā yajáte̱ trīṇi ca ॥ 5 ॥))

[[1-6-1]]

अत्यूर्ध्वाक्षोऽतिरश्चात्।
शिशिरः प्रदृश्यते।
नैव रूपं न वासाꣳसि।
न चक्षुः प्रतिदृश्यते।
अन्योन्यं तु न हिꣳस्रातः।
सतस्तद्देवलक्षणम्।
लोहितोऽक्ष्णि शारशीर्ष्णिः।
सूर्यस्योदयनं प्रति।
त्वं करोषिन्यञ्जलिकाम्।
त्वं करोषि निजानुकाम्॥ १७॥

((atyūrdhvākṣo'tiraścāt |
śiśiraḥ pradṛśyate |
naiva rūpaṃ na vāsāꣳsi |
na cakṣuḥ pratidṛśyate |
anyonyaṃ tu na hiꣳsrātaḥ |
satastaddevalakṣaṇam |
lohito'kṣṇi śāraśīrṣṇiḥ |
sūryasyodayanaṃ prati |
tvaṃ karoṣinyañjalikām |
tvaṃ karoṣi nijānukām || 17 ||))

[[1-6-2]]
निजानुका मेँन्यञ्जलिका।
अमी वाचमुपासतामिति।
तस्मै सर्व ऋतवो नमन्ते।
मर्यादाकरत्वात्प्रपुरोधाम्।
ब्राह्मण आप्नोति।
य एवं वेद।
स खलु संवत्सर एतैस्सेनानीभिस्सह।
इन्द्राय सर्वान्कमानभिवहति।
स द्रप्सः।
तस्यैषा भवति॥ १८॥

((nijānukā mĕnyañjalikā |

amī vācamupāsa̍tāmi̱ti |
tasmai sarva ṛtavo̍ nama̱nte |
maryādākaratvātpra̍puro̱dhām |
brāhmaṇa̍ āpno̱ti |
ya e̍vaṃ ve̱da |
sa khalu saṃvatsara etaissenānī̎bhissa̱ha |
indrāya sarvānkamānā̍bhiva̱hati |
sa dra̱psaḥ |
tasyai̱ṣā bhava̍ti || 18 ||))

[[1-6-3]]

अव॑द्र॒प्सो अ॑ꣳशु॒मती॑मतिष्ठत्।
इ॒या॒नः कृ॒ष्णो द॒शभि॑ः स॒हस्रै॓ः।
आव॒र्तमिन्द्र॒ः शच्या॒ धम॑न्तम्।
उपस्नुहि तं नृमणामथ॑द्रामि॒ति।
एतयैवेन्द्रः सलावृ॑क्या स॒ह।
असुरान्प॑रिवृ॒श्चति।
पृथि॑व्य॒ꣳशुम॑ती।
ताम॒न्वव॑स्थितः संवत्स॒रो दि॒वं च॑।
नैवंविदुषाऽऽचार्या॓न्तेवा॒सिनौ।
अन्योन्यस्मै॓ द्रुह्या॒ताम्।
यो द्रु॒ह्यति।
भ्रश्यते स्व॑र्गाल्लो॒कात्।
इत्यृतुम॑ण्डला॒नि।
सूर्यमण्डला॓न्याख्या॒यिकाः।
अत ऊर्ध्वꣳ स॑निर्व॒चनाः॥ १९॥
नि॒ जानु॑का॒ं भव॑ति द्रुह्या॒तां पञ्च॑ च॥ ६॥

((ava̍dra̱pso a̱ꣳśu̱matī̍matiṣṭhat |
i̱yā̱naḥ kṛ̱ṣṇo da̱śabhi̍ḥ sa̱hasrai̎ḥ |
āva̱rtamindra̱ḥ śacyā̱ dhama̍ntam |
upasnuhi taṃ nṛmaṇāmatha̍drāmi̱ti |
etayaivendraḥ salāvṛ̍kyā sa̱ha |
asurānpa̍rivṛ̱ścati |
pṛthi̍vya̱ꣳśuma̍tī |
tāma̱nvava̍sthitaḥ saṃvatsa̱ro di̱vaṃ ca̍ |
naivaṃviduṣā''cāryā̎ntevā̱sinau |
anyonyasmai̎ druhyā̱tām |

yo dru̱hyati |
bhraśyate sva̍rgāllo̱kāt |
ityṛtuma̍ṇḍalā̱ni |
sūryamaṇḍalā̱̍nyākhyā̱yikāḥ |
ata ūrdhva̱̍m sa̍nirva̱canāḥ || 19 ||
ni̱ jānu̍kā̱m bhava̍ti druhyā̱tā̱m pañca̍ ca || 6 ||))

[[1-7-1]]
आरो॒गो भ्राजः पट॑रः पत॒ङ्गः।
स्वर्ण॑रो ज्योतिषिमा॑न् विभा॒सः।
ते अ॒स्मै सर्वे॑ दिवमा॑तप॒न्ति।
ऊर्जं॑ दुहाना अनपस्फुर॑न्त इ॒ति।
कश्य॑पोऽष्ट॒मः।
स म॑हामेरुं न॑ जहा॒ति।
तस्यै॒षा भव॑ति।
यत्ते॒ शिल्पं॑ कश्यप रोच॒नाव॑त्।
इ॒न्द्रि॒याव॑त्पुष्क॒लं चि॒त्रभा॑नु।
यस्मि॒न्सूर्या॒ अर्पि॑तास्स॒प्त सा॒कम्॥ २०॥

((ārogo bhrājaḥ paṭara̍ḥ pata̱ṅgaḥ |
svarṇa̍ro jyotiṣimā̍n vibhā̱saḥ |
te asmai sarve divamā̍tapa̱nti |
ūrjaṃ duhānā anapasphura̍nta i̱ti |
kaśya̍po'ṣṭa̱maḥ |
sa mahāmeruṃ na̍ jahā̱ti |
tasyai̱ṣā bhava̍ti |
yatte̱ śilpa̱̍m kaśyapa roca̱nāva̍t |
i̱ndri̱yāva̍tpuṣka̱laṃ ci̱trabhāa̍nu |
yasmi̱nsūryā̱ arpi̍tāssa̱pta sā̱kam || 20 ||))

[[1-7-2]]
तस्मि॑न्राजानमधिविश्रये॑ममि॒ति।
ते अ॒स्मै सर्वे॑ कश्यपाज्ज्योति॑र्लभ॒न्ते।
तान्सोमः कश्यपाद॑धिनिर्द्ध॒मति।
भ्रस्ताकर्म॑कृद्दि॒वैवम्।
प्राणो जीवानीन्द्रि॑यजीवा॒नि।
सप्त शीर्ष॑ण्याः प्रा॒णाः।

सूर्या इत्याचार्याः।
अपश्यमहमेतन्सप्त सूर्यानिति।
पञ्चकर्णो वात्स्यायनः।
सप्तकर्णश्च प्लाक्षिः॥ २१॥

((tasminrājānamadhiviśrayemamiti ।
te asmai sarve kaśyapājjyotirlabhante ।
tānsomaḥ kaśyapādadhinirddhamati ।
bhrastākarmakṛdivaivam ।
prāṇo jīvānīndriyajīvāni ।
sapta śīrṣaṇyāḥ prāṇāḥ ।
sūryā ityācāryāḥ ।
apaśyamahametansapta sūryāniti ।
pañcakarṇo vātsyāyanaḥ ।
saptakarṇaśca plākṣiḥ ॥ 21 ॥))

[[1-7-3]]
आनुश्रविक एव नौ कश्यप इति।
उभौ वेदयिते।
न हि शेकुमिव महामेरुं गन्तुम्।
अपश्यमहमेतत्सूर्यमण्डलं परिवर्तमानम्।
गार्ग्यः प्राणत्रातः।
गच्छन्त महामेरुम्।
एकं चाजहतम्।
भ्राजपटरपतङ्गा निहने।
तिष्ठन्नातपन्ति।
तस्मादिह तप्त्रितपाः॥ २२॥

((ānuśravika eva nau kaśyapa iti ।
ubhau vedayite ।
na hi śekumiva mahāmerum gantum ।
apaśyamahametatsūryamaṇḍalaṃ parivartamānam ।
gārgyaḥ prāṇatrātaḥ ।
gacchanta mahāmerum ।
ekaṃ cājahatam ।
bhrājapaṭarapataṅgā nihane ।
tiṣṭhannātapanti ।
tasmādiha taptritapāḥ ॥ 22 ॥))

[[1-7-4]]

अमुत्रेतरे।
तस्मादिहातप्त्रितपाः।
तेषामेषा भवति।
सप्त सूर्या दिवमनुप्रविष्टाः।
तानन्वेति पथिभिर्दक्षिणावान्।
ते अस्मै सर्वे घृतमातपन्ति।
ऊर्जं दुहाना अनपस्फुरन्त इति।
सप्तर्त्विजस्सूर्या इत्याचार्याः।
तेषामेषा भवति।
सप्त दिशो नानासूर्याः॥ २३॥

((amutretare |
tasmādihātaptritapāḥ |
teṣāmeṣā bhavati |
sapta sūryā divamanupraviṣṭāḥ |
tānanveti pathibhirdakṣiṇāvān |
te asmai sarve ghṛtamātapanti |
ūrjaṃ duhānā anapasphuranta iti |
saptartvijassūryā ityācāryāḥ |
teṣāmeṣā bhavati |
sapta diśo nānāsūryāḥ || 23 ||))

[[1-7-5]]

सप्त होतार ऋत्विजः।
देवा आदित्या ये सप्त।
तेभिः सोमाभीरक्षण इति।
तदप्याम्नायः।
दिग्भ्राज ऋतूँन् करोति।
एतयैवावृता सहस्रसूर्यताया इति वैशंपायनः।
तस्यैषा भवति।
यद्याव इन्द्र ते शतꣳशतं भूमीः।
उत स्युः।
नत्वा वज्रिन्सहस्रꣳ सूर्याः॥ २४॥

((sa̱pta hotā́ra ṛ̱tvijā́ḥ ।
devā ādityā́ ye sa̱pta ।
tebhiḥ somābhīrakṣā́ṇa i̱ti ।
tadā́pyāmnā̱yaḥ ।
digbhrāja ṛ̱tū̎n karo̱ti ।
etā́yaivā̱vṛtā sahasrasūryatāyā iti vaiśaṃpā̱yanaḥ ।
tasyai̱ṣā bhavā́ti ।
yaddyāvā́ indra te śa̱taṁ̍śa̱taṃ bhūmī̎ḥ ।
u̱ta syuḥ ।
natvā́ vajrinsa̱hasra̱ṁ̍ sūryā̎ḥ ॥ 24 ॥))

[[1-7-6]]

अनुनजातमष्ट रोदसी इ̱ति।
नानालिङ्गत्वादृतूनां नानासूर्य̱त्वम्।
अष्टौ तु व्यवसिता इ̱ति।
सूर्यमण्डलान्यष्टात ऊ̱र्ध्वम्।
तेषामेषा̱ भवति।
चि̱त्रं दे̱वाना̱मुदगा̱दनीकम्।
चक्षुर्मि̱त्रस्य̱ वरुणस्या̱ग्नेः।
आप्रा̱ द्यावापृथि̱वी अ̱न्तरिक्षम्।
सूर्य आत्मा जगतस्तस्थुषश्चे̱ति॥ २५॥
सा̱कं प्ला̱क्षिस्तप्त्रितपा̱ नानासूर्या̱ः सूर्या̱ नव च॥ ७॥

((anunajātamaṣṭa rodā́sī i̱ti ।
nānāliṅgatvādṛtūnāṃ nānā́sūrya̱tvam ।
aṣṭau tu vyavasitā i̱ti ।
sūryamaṇḍalānyaṣṭā́ta ū̱rdhvam ।
teṣā́meṣā̱ bhavā́ti ।
ci̱traṃ de̱vānā̱mudā́gā̱danīkam ।
cakṣúrmi̱trasya̱ varúṇasyā̱gneḥ ।
āprā̱ dyāvā́pṛthi̱vī a̱ntarikṣam ।
sūrya ātmā jagatastasthúṣaśce̱ti ॥ 25 ॥
sā̱kaṃ plā̱kṣistaptritapā̱ nānā́sūryā̱ḥ sūryā̱ navā́ ca ॥ 7 ॥))

[[1-8-1]]

क्वेदमभ्रन्निवि̱शते।
क्वायꣳ संवत्स̱रो मिथः।
क्वाहः क्वेयन्देव रा̱त्री।
क्व मासा ऋ̱तव̱ः श्रिताः।

अर्धमासा मुहूर्ताः।
निमेषास्त्रुटिभिस्सह।
क्वेमा आपो निविशन्ते।
यदीतो यान्ति संप्रति।
काला अप्सु निविशन्ते।
आपस्सूर्ये समाहिताः॥ २६॥

((kvedamabhrannivisate |
kvāyam̐ saṃvatsaro mithaḥ |
kvāhaḥ kveyandeva rātrī |
kva māsā ṛtavaḥ śritāḥ |
ardhamāsā muhūrtāḥ |
nimeṣāstruṭibhissaha |
kvemā āpo niviśante |
yadīto yānti saṃprati |
kālā apsu niviśante |
āpassūrye samāhitāḥ || 26 ||))

[[1-8-2]]
अभ्राण्यपः प्रपद्यन्ते।
विद्युत्सूर्ये समाहिता।
अनवर्णे इमे भूमी।
इयं चासौ च रोदसि।
किꣳस्विदत्रान्तरा भूतम्।
येनेमे विधृते उभे।
विष्णुना विधृते भूमी।
इति वत्सस्य वेदना।
इरावती धेनुमती हि भूतम्।
सूयवसिनी मनुषे दशस्ये॥ २७॥

((abhrāṇyapaḥ prapadyante |
vidyutsūrye samāhitā |
anavarṇe ime bhūmī |
iyaṃ cāsau ca rodasi |
kim̐svidatrāntarā bhūtam |
yeneme vidhṛte ubhe |
viṣṇunā vidhṛte bhūmī |
iti vatsasya vedanā |

irāvatī dhenumatī hi bhūtam |
sūyavasinī manuṣe daśasye || 27 ||))

[[1-8-3]]

व्यष्टभ्नाद्रोदसी विष्णवेते।
दाधर्थ पृथिवीमभितो मयूखैः।
किन्तद्विष्णोर्बलमाहुः।
का दीप्तिः किं परायणम्।
एको यद्धारयद्देवः।
रेजती रोदसी उभे।
वाताद्विष्णोर्बलमाहुः।
अक्षराद्दीप्तिरुच्यते।
त्रिपदाद्धारयद्देवः।
यद्विष्णोरेकमुत्तमम्॥ २८॥

((vyaṣṭabhnādrodasī viṣṇavete |
dādhartha pṛthivīmabhito mayūkhaiḥ |
kintadviṣṇorbalamāhuḥ |
kā dīptiḥ kiṃ parāyaṇam |
eko yaddhārayaddevaḥ |
rejati rodasī ubhe |
vātādviṣṇorbalamāhuḥ |
akṣarāddīptirucyate |
tripadāddhārayaddevaḥ |
yadviṣṇorekamuttamam || 28 ||))

[[1-8-4]]

अग्नयो वायवश्चैव।
एतदस्य परायणम्।
पृच्छामि त्वा परं मृत्युम्।
अवमं मध्यमञ्चतुम्।
लोकञ्च पुण्यपापानाम्।
एतत्पृच्छामि संप्रति।
अमुमाहुः परं मृत्युम्।
पवमानं तु मध्यमम्।
अग्निरेवावमो मृत्युः।

चन्द्रमाँश्चतुरुच्यते॥ २९॥

((agnayo vāyavaścaiva |
etadasya parāyaṇam |
pṛcchāmi tvā paraṃ mṛtyum |
avamaṃ madhyamañcatum |
lokañca puṇyapāpānām |
etatpṛcchāmi saṃprati |
amumāhuḥ paraṃ mṛtyum |
pavamānaṃ tu madhyamam |
agnirevāvamo mṛtyuḥ |
candramāścaturucyate || 29 ||))

[[1-8-5]]

अनाभोगाः परं मृत्युम्।
पापास्संयन्ति सर्वदा।
आभोगास्त्वेव संयन्ति।
यत्र पुण्यकृतो जनाः।
ततो मध्यममायन्ति।
चतुमग्निं च संप्रति।
पृच्छामि त्वा पापकृतः।
यत्र यातयते यमः।
त्वं नस्तद्ब्रह्मन् प्रब्रूहि।
यदि वेत्थासतो गृहान्॥ ३०॥

((anābhogāḥ paraṃ mṛtyum |
pāpāssaṃyanti sarvadā |
ābhogāstveva saṃyanti |
yatra puṇyakṛto janāḥ |
tato madhyamamāyanti |
catumagniṃ ca saṃprati |
pṛcchāmi tvā pāpakṛtaḥ |
yatra yātayate yamaḥ |
tvaṃ nastadbrahman prabrūhi |
yadi vetthāsato gṛhān || 30 ||))

[[1-8-6]]

कश्यपादुदितास्सूर्याः।
पापान्निर्घ्नन्ति सर्वदा।

रोदस्योरन्तर्देशेषु।
तत्र न्यस्यन्ते वासवैः।
तेऽशरीराः प्रपद्यन्ते।
यथाऽपुण्यस्य कर्मणः।
अपाण्यपादकेशासः।
तत्र तेऽयोनिजा जनाः।
मृत्वा पुनर्मृत्युमापद्यन्ते।
अद्यमानास्स्वकर्मभिः॥ ३१॥

((kaśyapādudit̲āssūryāḥ ।
pāpānnirghnanti sarvadā ।
rodasyorantardeśeṣu ।
tatra nyasyante vāsavaiḥ ।
te'śarīrāḥ prapadyante ।
yathā'puṇyasya karmaṇaḥ ।
apāṇyapādakeśāsaḥ ।
tatra te'yonijā janāḥ ।
mṛtvā punarmṛtyumāpadyante ।
adyamānāssvakarmabhiḥ ॥ 31 ॥))

[[1-8-7]]
आशातिकाः क्रिमय इव।
ततः पूयन्ते वासवैः।
अपैतं मृत्युं जयति।
य एवं वेद।
स खल्वैवंविद्ब्राह्मणः।
दीर्घश्रुत्तमो भवति।
कश्यपस्यातिथिस्सिद्धगमनस्सिद्धागमनः।
तस्यैषा भवति।
आ यस्मिन्थ्सप्त वासवाः।
रोहन्ति पूर्व्या रुहः॥ ३२॥

((āśātikāḥ krimaya iva ।
tataḥ pūyante vāsavaiḥ ।
apaitaṃ mṛtyuṃ jayati ।
ya evaṃ veda ।
sa khalvaivaṃvidbrāhmaṇaḥ.

dīrghaśrúttamo bhaváti |
kaśyápaṣyātíthissiddhagámanassiddhāgámanaḥ |
tasyaiṣā bhaváti |
ā yasmínthsapta vásavāḥ |
rohánti pūrvyá ruháḥ || 32 ||))

[[1-8-8]]

ऋषिर्हि दीर्घश्रुत्तमः।

इन्द्रस्य घर्मो अतिथिरिति।

कश्यपः पश्यको भवति।

यत्सर्वं परिपश्यतीति सौक्ष्म्यात्।

अथाग्नेरष्टपुरुषस्य।

तस्यैषा भवति।

अग्ने नय सुपथा राये अस्मान्।

विश्वानि देव वयुनानि विद्वान्।

युयोध्यस्मज्जुहुराणमेनः।

भूयिष्ठान्ते नम उक्तिं विधेमेति॥ ३३॥

समाहिता दशस्ये उत्तममुच्यते गृहान्त्स्वकर्मभिः पूर्व्यो रुह इति॥ ८॥

((ṛṣirha dīrghaśruttámaḥ |
indrasya gharmo atíthiriti |
kaśyapaḥ paśyáko bhavati |
yatsarvaṃ paripaśyatíti saukṣmyāt |
athāgnérastapúruṣasya |
tasyaiṣā bhaváti |
agne nayá supathá rāye asmān |
viśváni deva vayunáni vidvān |
yuyodhyásmajjúhurāṇamenáḥ |
bhūyiṣṭhānte nama uktiṃ vidhemeti || 33 ||
samāhítā daśasyé uttámamucyáte gṛhāntsvakarmábhiḥ pūrvyá ruhá iti || 8 ||))

[[1-9-1]]

अग्निश्च जातवेदाश्च।

सहोजा अजिराप्रभुः।

वैश्वानरो नर्यापाश्च।

पङ्क्तिराधाश्च सप्तमः।

विसर्पेवाऽष्टमोऽग्नीनाम्।

एतेऽष्टौ वसवः क्षिता इति।
यथर्त्वेवाग्नेरर्चिर्वर्णविशेषाः।
नीलार्चिश्च पीतकार्चिश्चेति।
अथ वायोरेकादशपुरुषस्यैकादशस्त्रीकस्य।
प्रभ्राजमाना व्यवदाताः॥ ३४॥

((agniśca jātavedāśca |
sahojā ajirāprabhuḥ |
vaiśvānaro naryāpāśca |
paṅktirādhāśca saptamaḥ |
visarpevā'ṣṭamo'gnīnām |
ete'ṣṭau vasavaḥ kṣitā iti |
yathartvevāgnerarcirvarṇaviśeṣāḥ |
nīlārciśca pītakārciśceti |
atha vāyorekādaśapuruṣasyaikādaśastrīkasya |
prabhrājamānā vyavadātāḥ || 34 ||))

[[1-9-2]]
याश्च वासुकिवैद्युताः।
रजताः परुषाः श्यामाः।
कपिला अतिलोहिताः।
ऊर्ध्वा अवपतन्ताश्च।
वैद्युत इत्येकादश।
नैनं वैद्युतो हिनस्ति।
य एवं वेद।
स होवाच व्यासः पाराशर्यः।
विद्युद्वधमेवाहं मृत्युमैच्छमिति।
न त्वकामꣳ हन्ति॥ ३५॥

((yāśca vāsukivaidyutāḥ |
rajatāḥ paruṣāḥ śyāmāḥ |
kapilā atilohitāḥ |
ūrdhvā avapatantāśca |
vaidyuta ityekādaśa |
nainaṃ vaidyuto hinasti |
ya evaṃ veda |
sa hovāca vyāsaḥ pārāśaryaḥ |
vidyudvadhamevāhaṃ mṛtyumaicchamiti |

na tvakā̍mam̐ ha̱nti || 35 ||))

[[1-9-3]]
य ए॒वं वे॒द।
अथ ग॑न्धर्व॒गणाः।
स्वान॒भ्राट्।
अङ्घा॑रि॒र्बम्भा॑रिः।
हस्त॒स्सुह॑स्तः।
कृशा॑नुर्वि॒श्वाव॑सुः।
मूर्धन्वान्थ्सू॒र्यव॒र्चाः।
कृतिरित्येकादश ग॑न्धर्व॒गणाः।
देवाश्च म॑हादे॒वाः।
रश्मयश्च देवा॑ गर॒गिरः॥ ३६॥

((ya e̍vaṃ ve̱da |
atha ga̍ndharva̱gaṇāḥ |
svāana̱bhrāṭ |
aṅghā̍ri̱rbambhā̍riḥ |
hasta̱ssuha̍staḥ |
kṛśā̍nurvi̱śvāva̍suḥ |
mūrdhanvānthsū̱ryava̱rcāḥ |
kṛtirityekādaśa ga̍ndharva̱gaṇāḥ |
devāśca ma̍hāde̱vāḥ |
raśmayaśca devā̍ gara̱giraḥ || 36 ||))

[[1-9-4]]
नैनं गरो॑ हि॒नस्ति।
य ए॒वं वे॒द।
गौ॒रीर्मि॑माय स॒लि॒लानि॒ तक्ष॑ती।
एक॑पदी द्वि॒पदी॒ सा चतु॑ष्पदी।
अ॒ष्टाप॑दी॒ नव॑पदी बभू॒वुषी॑।
सहस्राक्षरा परमे व्यो॑मन्नि॒ति।
वाचो॑ वि॒शेषणम्।
अथ निगद॑व्याख्या॒ताः।
ताननुक्र॑मिष्या॒मः।

व॒राह॑वस्स्वत॒पसः॥ ३७॥

((nainaṃ garo̍ hina̱sti ।
ya e̍vaṃ ve̱da ।
gau̱rīmi̍māya sali̱lāni̱ takṣa̍tī ।
eka̍padī dvi̱padī̱ sā catu̍ṣpadī ।
a̱ṣṭāpa̍dī̱ nava̍padī babhū̱vuṣī̎ ।
sahasrākṣarā parame vyo̍manni̱ti ।
vāco̍ viśe̱ṣaṇam ।
atha nigada̍vyākhyā̱tāḥ ।
tānanukra̍miṣyā̱maḥ ।
va̱rāhava̍ssvata̱pasaḥ ॥ 37 ॥))

[[1-9-5]]
वि॒द्युन्म॑हसो॒ धूप॑यः।
श्वापयो गृहमेधा᳚श्चेत्ये॒ते।
ये॒ चेमेऽशि॑मिवि॒द्विषः।
पर्जन्यास्सप्त पृथिवीमभिव॑र्ष॒न्ति।
वृष्टि॑भिरि॒ति।
एतयैव विभक्तिवि॑परी॒ताः।
स॒प्तभि॒र्वातै॑रु॒दी॒रिताः।
अमूँल्लोकानभिव॑र्ष॒न्ति।
तेषा॑मे॒षा भव॑ति।।
स॒मा॒नमे॒तदुद॑कम्॥ ३८॥

((vi̱dyunma̍haso̱ dhūpa̍yaḥ ।
śvāpayo gr̥̱hamedhā̎ścetye̱te ।
ye̱ ceme'śi̍mivi̱dviṣaḥ ।
parjanyāssapta pr̥̱thivīmabhiva̍rṣa̱nti ।
vr̥ṣṭi̍bhiri̱ti ।
etayaiva vibhaktivi̍parī̱tāḥ ।
sa̱ptabhi̱rvātai̍rudī̱ritāḥ ।
amūm̐llokānabhiva̍rṣa̱nti ।
teṣā̍meṣā̱ bhava̍ti. ।
sa̱mā̱name̱tadudа̍kam ॥ 38 ॥))

[[1-9-6]]
उ॒च्चैत्य॑व॒चाह॑भिः।
भूमिं॑ प॒र्जन्या॒ जिन्व॑न्ति।

दिवं जिन्वन्त्यग्नय इति।
यदक्षरं भूतकृतम्।
विश्वे देवा उपासते।
महर्षिमस्य गोप्तारम्।
जमदग्निमकुर्वत।
जमदग्निराप्यायते।
छन्दोभिश्चतुरुत्तरैः।
राज्ञस्सोमस्य तृप्तासः॥ ३९॥

((uccaityavacāhabhiḥ ।
bhūmiṃ parjanyā jinvanti ।
divaṃ jinvantyagnaya iti ।
yadakṣaraṃ bhūtakṛtam ।
viśve devā upāsate ।
maharṣimasya goptārām ।
jamadagnimakurvata ।
jamadagnirāpyāyate ।
chandobhiścaturuttaraiḥ ।
rājñassomasya tṛptāsaḥ ॥ 39 ॥))

[[1-9-7]]
ब्रह्मणा वीर्यावता।
शिवा नः प्रदिशो दिशः।
तच्छंयोरावृणीमहे।
गातुं यज्ञाय।
गातुं यज्ञपतये।
दैवीस्स्वस्तिरस्तु नः।
स्वस्तिर्मानुषेभ्यः।
ऊर्ध्वं जिगातु भेषजम्।
शन्नो अस्तु द्विपदे।
शं चतुष्पदे।
सोमपा३ असोमपा३ इति निगदव्याख्याताः॥ ४०॥
व्यवदाता हन्ति गरगिरस्ततपस उदकं तृप्तासश्चतुष्पद एकं च॥ ९॥

((brahmaṇā vīryavatā ।

śi̱vā na̍ḥ pra̱diśo̱ diśa̍ḥ ।
taccha̱ṃyorāvṛ̍ṇīmahe ।
gā̱tuṃ ya̱jñāya̍ ।
gā̱tuṃ ya̱jñapa̍taye ।
daivī̎svastira̍stu naḥ ।
sva̱stirmānu̍ṣebhyaḥ ।
ū̱rdhvaṃ ji̍gātu bheṣa̱jam ।
śanno̍ astu dvi̱pade̎ ।
śaṃ catu̍ṣpade ।
somapā3 asomapā3 iti nigada̍vyākhyā̱tāḥ ॥ 40 ॥
vya̱va̱dā̱tā ha̱nti ga̍ra̱girastata̱pasa uda̍kaṃ tṛ̱ptāsa̱ścatu̍ṣpada̱ eka̍ṃ ca ॥ 9 ॥))

[[1-10-1]]

स॒ह॒स्र॒वृदि॑यं भू॒मिः।
प॒रं व्यो॑म स॒हस्र॑वृत्।
अ॒श्विना॑ भुज्यू॑ नास॒त्या।
वि॒श्वस्य॑ जग॒तस्प॑ती।
जाया भूमिः प॑तिर्व्यो॒म।
मि॒थुन॑न्ता अ॒तुर्य॑थुः।
पुत्रो बृहस्प॑ती रु॒द्रः।
स॒रमा॑ इति॑ स्त्रीपु॒मम्।
शु॒क्रं वा॑म॒न्यद्य॑ज॒तं वा॑म॒न्यत्।
विषु॑रूपे॒ अह॑नी॒ द्यौरि॑व स्थः॥ ४१॥

((sa̱ha̱sra̱vṛ̱di̍yaṃ bhū̱miḥ ।
pa̱raṃ vyo̍ma sa̱hasra̍vṛt ।
a̱śvinā̍ bhujyū̍ nāsa̱tyā ।
vi̱śvasya̍ jaga̱taspa̍tī ।
jāyā bhūmiḥ pa̍tirvyo̱ma ।
mi̱thuna̍ntā a̱turya̍thuḥ ।
putro bṛ̱haspa̍tī ru̱draḥ ।
sa̱ramā̍ iti̍ strīpu̱mam ।
śu̱kraṃ vā̍ma̱nyadya̍ja̱taṃ vā̍ma̱nyat ।
viṣu̍rūpe̱ aha̍nī̱ dyauri̍va sthaḥ ॥ 41 ॥))

[[1-10-2]]

विश्वा॒ हि मा॒या अव॑थः स्वधावन्तौ।
भ॒द्रा वां॑ पूषणावि॒ह रा॒तिर॑स्तु।
वासा॑त्यौ चि॒त्रौ जग॑तो नि॒धानौ॑।

द्यावा॑भूमी च॒रथः॑ स॒ꣳ सखा॑यौ।
ताव॒श्विना॑ रा॒सभा॒॑श्वा॒ हवं॑ मे।
शु॒भ॒स्प॒ती॒ आ॒गत॑ꣳ सू॒र्यया॑ स॒ह।
त्युग्रो॑ह भु॒ज्युम॑श्विनोद॒मे॒घे।
र॒यिन्न क॑श्चिन्मम॒ृवां २ अवा॑हाः।
तमू॑हथु॒र्नौ॒भिरा॒॑त्म॒न्वती॑भिः।
अ॒न्त॒रि॒क्ष॒प्रु॒द्भि॒रपो॑दकाभिः॥ ४२॥

((viśva̱ hi ma̱yā avathaḥ svadhāvantau |
bha̱drā vā̱ṃ pūṣaṇāvi̱ha ra̱tirastu |
vāsātyau ci̱trau jagato ni̱dhānaü |
dyāvabhūmī ca̱rathaḥ sa̱ṃ sakhayau |
tāva̱śvina rā̱sabhāśva̱ havaṃ me |
śu̱bha̱spa̱tī̱ ā̱gatam̐ sū̱ryaya sa̱ha |
tyugroha bhu̱jyumaśvinodame̱ghe |
ra̱yinna kaścinmamr̥̱vāṃ 2 avahāḥ |
tamūhathurnau̱bhirātma̱nvatībhiḥ |
a̱nta̱ri̱kṣa̱pru̱dbhi̱rapodakābhiḥ || 42 ||))

[[1-10-3]]

ति॒स्रः क्ष॒प॒स्त्रि॒रहा॑ऽति॒व्रज॑द्भिः।
नास॑त्या भु॒ज्युमू॑हथुः प॒तङ्गैः।
स॒मु॒द्रस्य॒ धन्व॑न्ना॒र्द्रस्य॑ पा॒रे।
त्रि॒भीर॒थैः॑श्श॒तप॑द्भिः षड॑श्वैः।
स॒वि॒तार॒ं वित॑न्वन्तम्।
अनु॑बध्नाति शाम्ब॒रः।
आपपूरुषम्ब॑रश्चै॒व।
स॒विता॑ऽरे॒पसो॑ भवत्।
त्यꣳ सुतृप्तं वि॑दित्वै॒व।
ब॒हुसो॑म गि॒रं व॑शी॥ ४३॥

((ti̱sraḥ kṣapa̱strirahā'ti̱vrajadbhiḥ |
nāsatyā bhu̱jyumūhathuḥ pata̱ṅgaiḥ |
sa̱mu̱drasya̱ dhanvannā̱rdrasya pā̱re |
tri̱bhīrathaiśśa̱tapadbhi̱ḥ ṣa̱ḍaśvaiḥ |
sa̱vi̱tāra̱ṃ vitanvantam |
anubadhnāti śāmba̱raḥ |

āpapūruṣambaraścaiva |
savita'repaso bhavat |
tyam̐ sutṛptaṃ viditvaiva |
bahusoma giraṃ vaśī || 43 ||))

[[1-10-4]]
अन्वेति तुग्रो वक्रियान्तम्।
आयसूयान्थ्सोमतृप्सुषु।
स संग्रामस्तमोद्योऽत्योतः।
वाचो गाः पिपाति तत्।
स तद्गोभिस्स्त्वाऽत्येत्यन्ये।
रक्षसाऽनन्विताश्च ये।
अन्वेति परिवृत्यास्तः।
एवमेतौ स्थो अश्विना।
ते एते द्युःपृथिव्योः।
अहरहर्गर्भन्दधाथे॥ ४४॥

((anveti tugro vakriyāntam |
āyasūyānthsomatṛpsuṣu |
sa saṃgrāmastamodyo'tyotaḥ |
vāco gāḥ pipāti tat |
sa tadgobhisstvā'tyetyanye |
rakṣasa'nanvitāśca ye |
anveti parivṛtyāstaḥ |
evametau stho aśvinā |
te ete dyuḥpṛthivyoḥ |
aharahargarbhandadhāthe || 44 ||))

[[1-10-5]]
तयोरितौ वथ्सावहोरात्रे।
पृथिव्या अहः।
दिवो रात्रिः।
ता अविसृष्टौ।
दम्पती एव भवतः।
तयोरितौ वथ्सौ।
अग्निश्चादित्यश्च।
रात्रेर्वथ्सः।

श्वेत आदित्यः ।
अह्नोऽग्निः ॥ ४५ ॥

((tayóretau vathsāváhorātre ।
pṛthivyā aháḥ ।
divo rātriḥ ।
tā avisṛṣṭau ।
dampátī eva bhávataḥ ।
tayóretau vathsau ।
agniścádityaśca ।
rātrervathsaḥ ।
śveta ádityaḥ ।
ahno'gniḥ ॥ 45 ॥))

[[1-10-6]]
ताम्रो अरुणः ।
ता अविसृष्टौ ।
दम्पती एव भवतः ।
तयोरेतौ वथ्सौ ।
वृत्रश्च वैद्युतश्च ।
अग्नेर्वृत्रः ।
वैद्युत आदित्यस्य ।
ता अविसृष्टौ ।
दम्पती एव भवतः ।
तयोरेतौ वथ्सौ ॥ ४६ ॥

((tāmro áruṇaḥ ।
tā avisṛṣṭau ।
dampátī eva bhávataḥ ।
tayóretau vathsau ।
vṛtraśca vaidyutaśca ।
agnervṛtraḥ ।
vaidyuta ādityasyá ।
tā avisṛṣṭau ।
dampátī eva bhávataḥ ।
tayóretau vathsau ॥ 46 ॥))

[[1-10-7]]
उष्मा च नीहारश्च ।

वृ॒त्रस्यो॒ष्मा।
वै॒द्यु॒तस्य॑ नीहा॒रः।
तौ ता॒वे॒व प्रति॑पद्येते।
सेयꣳ रात्री॑ ग॒र्भिणी॑ पु॒त्रेण॒ संव॑सति।
तस्या॒ वा ए॒तदु॒ल्बण॑म्।
यद्रात्रौ॑ र॒श्मय॑ः।
यथा॒ गोर्ग॒र्भिण्या॑ उ॒ल्बण॑म्।
ए॒वमे॒तस्या॑ उ॒ल्बण॑म्।
प्रजयिष्णुः प्रजया च पशु॒भि॑श्च भ॒वति।
य ए॑वं वे॒द।
एतमुद्यन्तमपिय॑न्तं चे॒ति।
आदित्यः पुण्य॑स्य व॒थ्सः।
अथ पवि॑त्राङ्गि॒रसः॥ ४७॥
स्थोऽपो॑दकाभिर्वशी दधाथे अ॒ग्निस्तयो॑रे॒तौ व॒थ्सौ भ॒वति च॒त्वारि॑ च॥ १०॥

((u̱ṣmā ca̍ nīhā̱raśca̍ |
vṟtrasyo̱ṣmā |
vai̱dyu̱tasya̍ nīhā̱raḥ |
tau tāve̱va prati̍padyete |
seyam̐ rātri̍ ga̱rbhiṇi̍ pu̱treṇa̱ saṃva̍sati |
tasyā̱ vā e̱tadu̱lbaṇa̎m |
yadrātrau̍ ra̱śmaya̍ḥ |
yathā̱ gorga̱rbhiṇya̍ u̱lbaṇa̎m |
e̱vame̱tasya̍ u̱lbaṇa̎m |
prajayiṣṇuḥ prajayā ca paśubhi̍śca bha̱vati |
ya e̍vaṃ ve̱da |
etamudyantamapiya̍ntaṃ ce̱ti |
ādityaḥ puṇya̍sya va̱thsaḥ |
atha pavi̍trāṅgi̱rasaḥ || 47 ||
stho'po̍dakābhirvaśī dadhāthe a̱gnistayo̍re̱tau va̱thsau bha̱vati ca̱tvāri̍ ca || 10 ||))

[[1-11-1]]
प॒वित्र॑वन्तः परि॒वाज॒मास॑ते।
पि॒तैषा॑ प्र॒त्नो अ॒भिर॑क्षति व्र॒तम्।
म॒हस्स॑मु॒द्रं वरु॑णस्ति॒रोद॑धे।
धीरा॑ इच्छेकु॒र्धरु॑णेष्वा॒रभ॑म्।

प॒वित्रं॑ ते॒ वित॑तं॒ ब्रह्म॑णस्पते᳚।
प्र॒भु॒र्गात्रा॑णि॒ पर्ये᳚षि वि॒श्वत॑ः।
अत॑प्ततनू॒र्न तदा॒मो अ॑श्नुते।
श्रृ॒तास॒ इद्वह॑न्त॒स्तत्समा॑शत।
ब्र॒ह्मा दे॒वाना᳚म्।
अस॑तस्स॒द्ये तत॑क्षुः॥ ४८॥

((pa̱vitra̍vanta̱ḥ pari̱vāja̱māsa̍te |
pi̱taiṣa̎ṃ pra̱tno a̱bhira̍kṣati vra̱tam |
ma̱hassa̍mu̱draṃ varu̍ṇasti̱roda̍dhe |
dhīra̍ icche̱ku̱rdharu̍ṇeṣvā̱rabha̎m |
pa̱vitra̍ṃ te̱ vita̍ta̱ṃ brahma̍ṇaspate̎ |
prabhu̱rgātrā̍ṇi̱ parye̍ṣi vi̱śvata̍ḥ |
ata̍ptatanū̱rna tadā̱mo a̍śnute |
śṛ̱tāsa̱ idvaha̍nta̱statsamā̍śata |
bra̱hmā de̱vāna̎m |
asa̍tassa̱dye tata̍kṣuḥ || 48 ||))

[[1-11-2]]
ऋ॒षय॑स्स॒प्तात्रि॑श्च॒ यत्।
सर्वे᳚ऽत्रयो॒ अ॑गस्त्य॒श्च।
नक्ष॑त्रै॒श्शंकृ॑तोऽवसन्।
अथ॑ सवि॒तुः श्यावाश्व॒स्यावर्ति॑कामस्य।
अ॒मी य ऋक्षा॒ निहि॑तास उ॒च्चा।
नक्तं॒ ददृ॑श्रे॒ कुह॑चि॒द्दिवे॑युः।
अद॑ब्धानि॒ वरु॑णस्य व्र॒तानि॑।
वि॒चा॒कश॑च्च॒न्द्रमा॒ नक्ष॑त्रमेति।
तत्स॑वि॒तुर्वरे᳚ण्यम्।
भर्गो᳚ दे॒वस्य॑ धीमहि॥ ४९॥

((ṛ̱ṣa̍yassa̱ptātri̍śca̱ yat |
sarve'trayo a̍gastya̱śca |
nakṣa̍trai̱śśaṃkṛ̍to'vasan |
atha̍ savitu̱ḥ śyāvāśva̱syāvarti̍kāmasya |
a̱mī ya ṛkṣā̱ nihi̍tāsa u̱ccā |
nakta̱ṃ dadṛ̍śre̱ kuha̍ci̱ddive̍yuḥ |
ada̍bdhāni̱ varu̍ṇasya vra̱tāni̍ |
vi̱cā̱kaśa̍cca̱ndramā̱ nakṣa̍trameti |

tatsávi̱turvarḗṇyam ।
bhargó de̱vasyá dhīmahi ॥ 49 ॥))

[[1-11-3]]
धियो̱ यो नः॑ प्रचो̱दया॒॑त्।
तत्स॑वि̱तुर्वृ॒॑णीमहे।
व̱यन्दे̱वस्य̱ भोज॑नम्।
श्रेष्ठꣳ॑ सर्व̱धात॑मम्।
तु̱रं भग॑स्य धीमहि।
अपा॑गूहत सविता̱ तृभीन्॑।
सर्वा॒॑न्दि̱वो अन्ध॑सः।
नक्त̱न्तान्य॑भवन्दृ̱शे।
अस्थ्य̱स्थ्ना संभ॑विष्यामः।
नाम̱ नामै̱व ना̱म मे॒॑॥ ५० ॥

((dhiyo̱ yo náḥ praco̱dayā̋t ।
tatsávi̱turvṛ́ṇīmahe ।
va̱yande̱vasya̱ bhojánam ।
śreṣṭhaḿ̐sarva̱dhātámam ।
tura̱ṃ bhagásya dhīmahi ।
apā́gūhata savitā̱ tṛbhīń ।
sarvā̋ndi̱vo andhásaḥ ।
nakta̱ntānyábhavandṛ̱śe ।
asthya̱sthnā saṃbhávisyāmaḥ ।
nāma̱ nāmai̱va nā̱ma mḗ ॥ 50 ॥))

[[1-11-4]]
नपुꣳस॑कं̱ पुमा̱ꣳस्त्र्य॑स्मि।
स्थाव॑रोऽस्म्यथ̱ जङ्ग॑मः।
य̱जेऽयक्षि̱ यष्टा̱हे च॑।
मया॑ भू̱तान्य॑यक्षत।
प̱शवो॑ मम॑ भू̱तानि।
अनूबन्ध्योऽस्म्य॑हं वि̱भुः।
स्त्रिय॑स्स̱तीः।
ता उ॑ मे पु̱ꣳस आ॑हुः।
पश्य॑दक्ष̱ण्वान्नविचे॑तद̱न्धः।

क॒विर्यः पु॒त्रस्स इ॒मा चि॑केत॥ ५१ ॥

((napuṁsa̍ka̱ṃ pumā̱ṁstrya̍smi ।
sthāva̍ro'smyatha̱ jaṅga̍maḥ ।
ya̱je'yakṣi̱ yaṣṭā̱he ca̍ ।
maya̍ bhū̱tānya̍yakṣata ।
pa̱śavo̍ mama̍ bhūtā̱ni ।
anūbandhyo'smya̍haṃ vi̱bhuḥ ।
striya̍ssa̱tīḥ ।
tā u̍ me pu̱ṁsa ā̍huḥ ।
paśya̍dakṣa̱nvānnavice̍tada̱ndhaḥ ।
ka̱viryaḥ pu̱trassa i̱mā ci̍keta ॥ 51 ॥))

[[1-11-5]]

यस्ता वि॑जा॒नाथ्स॑वि॒तुः पि॒ता स॑त्।

अ॒न्धो म॒णिम॑विन्दत्।

तम॑नङ्गु॒लिरा॑व॑यत्।

अ॒ग्री॒वः प्रत्य॑मुञ्चत्।

तमजि॑ह्वा अ॒सश्च॑त।

ऊर्ध्वमू॑लम॑वाक्छा॒खम्।

वृ॒क्षं यो॑ वे॒द सम्प्र॑ति।

न स जातु जन॑ः श्रद्द॒ध्यात्।

मृ॒त्युर्मा॑ मार॒यादि॑तिः।

हसितꣳ रुदि॑तङ्गी॒तम्॥ ५२ ॥

((yastā vi̍jā̱nāthsa̍vi̱tuḥ pi̱tā sa̍t ।
a̱ndho ma̱ṇima̍vindat ।
tama̍naṅguli̱rāva̍yat ।
a̱grī̱vaḥ pratya̍muñcat ।
tamaji̍hvā a̱saśca̍ta ।
ūrdhvamūlama̍vākchā̱kham ।
vṛ̱kṣaṃ yo̍ veda̱ sampra̍ti ।
na sa jātu jana̍ḥ śradda̱dhyāt ।
mṛ̱tyurmā̍ māra̱yādi̍tiḥ ।
hasitaṁ rudi̍taṅgī̱tam ॥ 52 ॥))

[[1-11-6]]

वीणा॑पणव॒लासि॑तम्।

मृ॒तञ्जी॒वं च॑ यत्कि॒ञ्चि॑त्।

अङ्गानि स्नेव विद्धि तत्।
अतृंष्यङ्ँस्तृष्यं ध्यायत्।
अस्माज्जाता मे मिथू चरन्।
पुत्रो निर्ऋत्या वैदेहः।
अचेता यश्च चेतनः।
स तं मणिमविन्दत्।
सोऽनङ्गुलिरावयत्।
सोऽग्रीवः प्रत्यमुञ्चत्॥ ५३॥

((vīṇapaṇavalāsitam |
mṛtañjīvaṃ ca yatkiṃcit |
aṅgāni sneva viddhi tat |
atṛṣyaṃstṛṣya dhyāyat |
asmājjātā me mithū caraṅ |
putro nirṛtya vaidehaḥ |
acetā yaśca cetanaḥ |
sa taṃ maṇimavindat |
so'naṅgulirāvayat |
so'grīvaḥ pratyamuñcat || 53 ||))

[[1-11-7]]
सोऽजिह्वो असश्चत।
नैतमृषिं विदित्वा नगरं प्रविशेत्।
यदि प्रविशेत्।
मिथौ चरित्वा प्रविशेत्।
तथ्सम्भवस्य व्रतम्।
आतमग्ने रथन्तिष्ठ।
एकाश्वमेकयोजनम्।
एकचक्रमेकधुरम्।
वातध्राजिगतिं विभो।
न रिष्यति न व्यथते॥ ५४॥

((so'jihvo asaścata |
naitamṛṣiṃ viditvā nagaraṃ praviśet |
yadi praviśet |
mithau caritvā praviśet |
tathsambhavasya vratam |

ātamágne ra̱thantiṣṭha ।
ekā̎śvameka̱yojánam ।
ekacakrámeka̱dhuram ।
vā̱tadhrā̎jiga̱tiṃ vibho ।
na̱ ri̱ṣyati na vya̱thate ॥ 54 ॥))

[[1-11-8]]

ना̱स्याक्षो॑ याꣳतु॒ सज्ज॑ति।
यच्छ्वे॒ता॑न्रोहि॑ताꣳश्चा॒ग्नेः।
र॒थे यु॑क्त्वाऽधि॒ति॒ष्ठ॑ति।
एकया च दशभिश्च॑ स्वभू॒ते।
द्वाभ्यामिष्टये विꣳ॑शत्या॒ च।
तिसृभिश्च वहसे त्रिꣳ॑शता॒ च।
नियुद्भिर्वायविहिता॑ विमु॒ञ्च॥ ५५॥
तत॑क्षुर्धीमहि ना॒म मे॑ चिकेत गी॒तं प्रत्य॑मुञ्चद्व्य॒थते स॒प्त च॑॥ ११॥

((na̱syākṣó yātu̱ sajjáti ।
yacchvetā̎nrohitāṁ̎ścā̱gneḥ ।
ra̱the yúktvā'dhi̱tiṣṭháti ।
ekayā ca daśabhiścá svabhū̱te ।
dvābhyāmiṣṭaye viṁ̎śatyā̱ ca ।
tisṛbhiśca vahase triṁ̎śatā̱ ca ।
niyudbhirvāyavihitá vimu̱ñca ॥ 55 ॥
tatákṣurdhīmahi nā̱ma mé ciketa gī̱taṃ pratyámuñcadvya̱thate sa̱pta cá ॥ 11 ॥))

[[1-12-1]]

आत॑नुष्व॒ प्रत॑नुष्व।
उ॒द्धमाऽऽध॑म॒ सन्ध॑म।
आदित्ये चन्द्रवर्णा॒नाम्।
गर्भ॒माधे॑हि॒ यः पुमान्॑।
इ॒तस्सि॒क्तꣳ सूर्य॑गतम्।
च॒न्द्रम॑से॒ रस॑ङ्कृधि।
वारादञ्जन॑याग्रे॒ऽग्निम्।
य एको॑ रु॒द्र उच्य॑ते।
अ॒सं॒ख्या॒तास्स॑हस्रा॒णि।
स्म॒र्यते॑ न च॒ दृश्य॑ते॥ ५६॥

((ātȧnuṣva̱ pratȧnuṣva ।
u̱ddhamā''dhȧma̱ sandhȧma ।
āditye candrȧvarṇā̱nām ।
garbha̱mādhėhi̱ yaḥ pumāṅ ।
i̱tassi̱ktam̐ sūryȧgatam ।
ca̱ndramȧse̱ rasȧṅkṛdhi ।
vārādañjanȧyāgre̱'gnim ।
ya ekȯ rudra̱ ucyȧte ।
a̱sa̱ṃkhyā̱tāssȧhasrā̱ṇi ।
sma̱ryatė na ca̱ dṛśyȧte ॥ 56 ॥))

[[1-12-2]]

ए॒वमे॒तन्निबोधत।
आम॒न्द्रैरिन्द्र॒ हरिभिः।
या॒हि म॒यूररोमभिः।
मा त्वा केचिन्नियेमुरिन्न पा॒शिनः।
द॒ध॒न्वेव॒ ता इहि।
मा म॒न्द्रैरिन्द्र॒ हरिभिः।
या॒मि म॒यूररोमभिः।
मा मा केचिन्न्येमुरिन्न पा॒शिनः।
नि॒ध॒न्वेव॒ तां २ इमि।
अणुभिश्च महद्भि॒श्च॥ ५७॥

((e̱vame̱tannibodhata ।
āma̱ndrairindra̱ haribhiḥ ।
yā̱hi ma̱yūrȧromabhiḥ ।
mā tvā kecinniyemurinna pā̱śinaḥ ।
da̱dha̱nveva̱ tā ihi ।
mā ma̱ndrairindra̱ haribhiḥ ।
yā̱mi ma̱yūrȧromabhiḥ ।
mā mā kecinnyemurinna pā̱śinaḥ ।
ni̱dha̱nveva̱ tāṃ 2 imi ।
aṇubhiśca mȧhadbhi̱śca ॥ 57 ॥))

[[1-12-3]]

नि॒घृष्वैरस॒मायुतैः।
कालैर्हरित्वमाप॒न्नैः।
इन्द्रायाहि स॒हस्रयुक्।
अ॒ग्निर्वि॒भ्राष्टिवसनः।

वा॒युश्श्वेत॑सिकद्रु॒कः।
सं॒व॒थ्स॒रो वि॑षू॒वर्णै॓ः।
नित्या॒स्तेऽनुच॑रास्त॒व।
सुब्रह्मण्योꣳ सुब्रह्मण्योꣳ सु॑ब्रह्म॒ण्योम्।
इन्द्रागच्छ हरिव आगच्छ मे॑धाति॒थेः।
मेष वृषणश्व॑स्य मे॒ने॥ ५८॥

((ni̠ghṛṣvai̍rasa̠māyu̍taiḥ ।
kālairharitva̍māpa̠nnaiḥ ।
indrāya̍hi sa̠hasra̍yuk ।
a̠gnirvi̠bhrāṣṭi̍vasanaḥ ।
vā̠yuśśveta̍sikadru̠kaḥ ।
sa̠ṃva̠thsa̠ro vi̍ṣū̠varṇai̎ḥ ।
nityā̠ste'nuca̍rāsta̠va ।
subrahmaṇyom̐ subrahmaṇyom̐ su̍brahma̠ṇyom ।
indrāgaccha hariva āgaccha me̍dhāti̠theḥ ।
meṣa vṛṣaṇaśva̍sya me̠ne ॥ 58 ॥))

[[1-12-4]]
गौरावस्कन्दिन्नहल्या॑यै जा॒र।
कौशिकब्राह्मण गौतम॑ब्रुवा॒ण।
अ॒रु॒णाश्वा॑ इ॒हाग॑ताः।
वस॑वः पृथिवि॒क्षित॑ः।
अ॒ष्टौ दि॒ग्वास॑सो॒ऽग्नय॑ः।
अग्निश्च जातवेदा॓श्चेत्ये॒ते।
तम्राश्वा॓स्ताम्र॒रथाः।
ताम्रवर्णा॓स्तथा॒ऽसिताः।
दण्ड॒हस्ता॓ः खादु॒ग्दतः।
इतो॑ रुद्रा॓ः परा॒ङ्गताः॥ ५९॥

((gaurāvaskandinnahalya̍yai jā̠ra ।
kauśikabrāhmaṇa gautama̍bruvā̠ṇa ।
a̠ru̠ṇāśva̍ i̠hāga̍tāḥ ।
vasa̍vaḥ pṛthivi̠kṣita̍ḥ ।
a̠ṣṭau di̠gvāsa̍so̠'gnaya̍ḥ ।
agniśca jātaveda̎ścetye̠te ।
tamrāśva̎stāmra̠rathāḥ ।
tāmravarṇa̎statha̠'sitāḥ ।

daṇḍahastā̎ḥ khādagdataḥ |
ito rudrā̎ḥ parāṅgatāḥ || 59 ||))

[[1-12-5]]

उक्तꣳ स्थानं प्रमाणञ्च पुर इत।
बृहस्पतिश्च सविता च।
विश्वरूपैरिहागताम्।
रथेनोदकवर्त्मना।
अप्सुषा इति तद्द्वयोः।
उक्तो वेषो वासाꣳसि च।
कालावयवानामितः प्रतीच्या।
वासात्या इत्यश्विनोः।
कोऽन्तरिक्षे शब्दङ्करोतीति।
वासिष्ठो रौहिणो मीमाꣳसाञ्चक्रे।
तस्यैषा भवति।
वाश्रेव विद्युदिति।
ब्रह्मण उदरणमसि।
ब्रह्मण उदीरणमसि।
ब्रह्मण आस्तरणमसि।
ब्रह्मण उपस्तरणमसि॥ ६०॥
दृष्यते च मेने पराङ्गताश्चक्रे षट् च॥ १२॥

( अपक्रामत गर्भिण्यः )

((uktam̐ sthānaṃ pramāṇañca pura ita |
bṛhaspatiśca savitā ca |
viśvarūpairihāgatām |
rathenodakavartmanā |
apsuṣā iti taddvayoḥ |
ukto veṣo vāsām̐si ca |
kālāvayavānāmitaḥ pratīcyā |
vāsātyā ityaśvinoḥ |
ko'ntarikṣe śabdaṅkarotīti |
vāsiṣṭho rauhiṇo mīmām̐sāñcakre |
tasyaiṣā bhavati |
vāśreva vidyuditi |
brahmaṇa udaraṇamasi |

brahmáṇa udīraṇámasi |
brahmáṇa āstaráṇamasi |
brahmáṇa upastaráṇamasi || 60 ||
dṛṣyáte ca mene párāṅgatāścakre ṣaṭ cá || 12 ||

( apákrāmata garbhiṇyáḥ )))

[[1-13-1]]

अष्टयोनीमष्टपुत्राम्।
अष्टपत्नीमिमां महीम्।
अहं वेद न मे मृत्युः।
नचामृत्युरघाऽहरत्।
अष्टयोन्यष्टपुत्त्रम्।
अष्टपदिदमन्तरिक्षम्।
अहं वेद न मे मृत्युः।
नचामृत्युरघाऽहरत्।
अष्टयोनीमष्टपुत्राम्।
अष्टपत्नीममून्दिवम्॥ ६१॥

((aṣṭayónīmaṣṭapútrām |
aṣṭapátnīmimāṃ mahīm |
ahaṃ veda na mé mṛtyuḥ |
nacāmṛ́tyuraghā'harat |
aṣṭayónyaṣṭapúttram |
aṣṭapádidamantaríkṣam |
ahaṃ veda na mé mṛtyuḥ |
nacāmṛ́tyuraghā'harat |
aṣṭayónīmaṣṭapútrām |
aṣṭapátnīmamūndivām || 61 ||))

[[1-13-2]]

अहं वेद न मे मृत्युः।
नचामृत्युरघाऽऽहरत्।
सुत्रामाणं महीमूषु।
अदितिर्द्यौरदितिरन्तरिक्षम्।
अदितिर्माता स पिता स पुत्रः।
विश्वे देवा अदितिः पञ्चजनाः।

अदि॑तिर्जा॒तमदि॑ति॒र्जनि॑त्वम् ।
अ॒ष्टौ पु॒त्रासो॒ अदि॑तेः ।
ये जा॒तास्त॒न्व॑ः परि॑ ।
दे॒वां २ उप॑प्रैत्स॒प्तभि॑ः ॥ ६२ ॥

((a̱haṃ veda̱ na me̍ mṛtyuḥ |
nacāmṛ̍tyura̱ghā''ha̍rat |
su̱trāmā̍ṇaṃ ma̱hīmū̱ṣu |
adi̍ti̱rdyauradi̍tira̱ntari̍kṣam |
adi̍tirmā̱tā sa pi̱tā sa pu̱traḥ |
viśve̍ de̱vā adi̍ti̱ḥ pañca̱janā̎ḥ |
adi̍tirjā̱tamadi̍ti̱rjani̍tvam |
a̱ṣṭau pu̱trāso̱ adi̍teḥ |
ye jā̱tāsta̱nva̍ḥ pari̍ |
de̱vāṃ 2 upa̍praitsa̱ptabhi̍ḥ || 62 ||))

[[1-13-3]]
प॒रा मा॒र्ता॒ण्डमास्य॑त् ।
स॒प्तभि॑ः पु॒त्रैरदि॑तिः ।
उ॒प॒प्रैत्पूर्व्य॒॑ं युगा॒॑म् ।
प्र॒जायै॑ मृ॒त्यवे॒ त॑त् ।
प॒रा मा॒र्ता॒ण्डमाभ॑र॒दिति॑ ।
ताननु॒क्र॑मिष्या॒मः ।
मि॒त्रश्च॒ वरु॑णश्च ।
धा॒ता चा॒॑र्य॒मा च॑ ।
अ॒ꣳशश्च॒ भग॑श्च ।
इन्द्रश्च विवस्वा॒ꣳश्चेत्ये॒ते ।
हि॒र॒ण्य॒ग॒र्भो ह॒ꣳसश्शु॒चि॒षत् ।
ब्रह्म॑जज्ञानं तदि॒त्पद॒मिति॑ ।
ग॒र्भः प्रा॑जाप॒त्यः ।
अथ॒ पुरु॑षः स॒प्तपु॑रुषः ॥ ६३ ॥
अ॒मूँन्दिव॒ꣳ स॒प्तभि॑रि॒ते च॒त्वारि॒ च ॥ १३ ॥
( य॒था॒स्था॒नं ग॑र्भि॒ण्य॑ः )

((pa̱rā̱ mā̱rtā̱ṇḍamāsya̍t |
sa̱ptabhi̍ḥ pu̱trairadi̍tiḥ |

upa̠praitpū̠rvyám̐ yugä̍m ।
pra̠jāyai̠ mr̥tyave tát ।
pa̠rā̠ mā̠rtā̠ṇḍamābhára̠diti̠ ।
tānanukrámiṣyā̠maḥ ।
mi̠traśca̠ varúṇaśca ।
dhā̠tā cä̍rya̠mā cá ।
am̐śáśca̠ bhagáśca ।
indraśca vivasvām̐ścetye̠te ।
hi̠ra̠ṇya̠ga̠rbho ha̠m̐saśśúci̠ṣat ।
brahmája̠jñā̠nam̐ taditpa̠damiti̠ ।
ga̠rbhaḥ prä̠jāpa̠tyaḥ ।
atha̠ purúṣaḥ sa̠ptapurúṣaḥ ॥ 63 ॥
a̠mūndivam̐ sa̠ptabhi̠re̠te ca̠tvāri̠ ca ॥ 13 ॥
( ya̠thā̠sthā̠nam̐ gárbhi̠ṇyáḥ )))

[[1-14-1]]

योऽसौ त॒पन्नु॒देति॑।
स सर्वे॑षां भू॒ताना॑ᳶ प्रा॒णाना॒दा॒यो॒देति॑।
मा मे॑ प्र॒जया॒ मा प॒॑शूनाम्।
मा मम॑ प्रा॒णाना॒दा॒योद॑गाः।
अ॒सौ यो॑ऽस्त॒मेति॑।
स सर्वे॑षां भू॒ताना॑ᳶ प्रा॒णाना॒दा॒या॒स्तमेति॑।
मा मे॑ प्र॒जया॒ मा प॒॑शूनाम्।
मा मम॑ प्रा॒णाना॒दा॒याऽस्त॑ङ्गाः।
अ॒सौ य आ॒पूर्य॑ति।
स सर्वे॑षां भू॒ताना॑ᳶ प्रा॒णैरा॒पूर्य॑ति॥ ६४॥

((yo'saú ta̠pannu̠deti̠ ।
sa sarvéṣām̐ bhū̠tānä̍m̐ prā̠ṇānā̠dāyo̠deti̠ ।
mā mä̍ pra̠jayā̠ mā páśū̠nām ।
mā mamá prā̠ṇānā̠dāyodágāḥ ।
a̠sau yö̍'sta̠meti̠ ।
sa sarvéṣām̐ bhū̠tānä̍m̐ prā̠ṇānā̠dāyā̠stameti̠ ।
mā mä̍ pra̠jayā̠ mā páśū̠nām ।
mā mamá prā̠ṇānā̠dāyā'stáṅgāḥ ।
a̠sau ya ā̠pūryáti ।
sa sarvéṣām̐ bhū̠tānä̍m̐ prā̠ṇairā̠pūryáti ॥ 64 ॥))

[[1-14-2]]

मा मे॑ प्र॒जया॒ मा प॒॑शूनाम्।

मा मम॑ प्रा॒णैरा॒पूरि॑ष्ठाः।
अ॒सौ यो॑ऽप॒क्षीय॑ति।
स सर्वे॑षां भू॒ताना᳚ं प्रा॒णैरप॑क्षीयति।
मा मे᳚ प्र॒जया॒ मा प॑शू॒नाम्।
मा मम॑ प्रा॒णैरप॑क्षेष्ठाः।
अ॒मूनि॒ नक्ष॑त्राणि।
सर्वे॑षां भू॒ताना᳚ं प्रा॒णैरप॑प्रसर्पन्ति॒ चोथ्स॑र्पन्ति च।
मा मे᳚ प्र॒जया॒ मा प॑शू॒नाम्।
मा मम॑ प्रा॒णैरप॑प्रसृपत॒ मोथ्सृ॑पत॥ ६५॥

((mā me̎ pra̱jayā̱ mā pa̍śū̱nām |
mā mama̍ prā̱ṇairā̱pūri̍ṣṭhāḥ |
a̱sau yo̍'pa̱kṣīya̍ti |
sa sarve̍ṣāṃ bhū̱tānā̎ṃ prā̱ṇairapa̍kṣīyati |
mā me̎ pra̱jayā̱ mā pa̍śū̱nām |
mā mama̍ prā̱ṇairapa̍kṣeṣṭhāḥ |
a̱mūni̱ nakṣa̍trāṇi |
sarve̍ṣāṃ bhū̱tānā̎ṃ prā̱ṇairapa̍prasarpanti̱ cothsa̍rpanti ca |
mā me̎ pra̱jayā̱ mā pa̍śū̱nām |
mā mama̍ prā̱ṇairapa̍prasṛpata̱ mothsṛ̍pata || 65 ||))

[[1-14-3]]
इ॒मे मासा᳚श्चार्धमा॒साश्च॑।
सर्वे॑षां भू॒ताना᳚ं प्रा॒णैरप॑प्रसर्पन्ति॒ चोथ्स॑र्पन्ति च।
मा मे᳚ प्र॒जया॒ मा प॑शू॒नाम्।
मा मम॑ प्रा॒णैरप॑प्रसृपत॒ मोथ्सृ॑पत।
इ॒म ऋ॒तव॑ः।
सर्वे॑षां भू॒ताना᳚ं प्रा॒णैरप॑प्रसर्पन्ति॒ चोथ्स॑र्पन्ति च।
मा मे᳚ प्र॒जया॒ मा प॑शू॒नाम्।
मा मम॑ प्रा॒णैरप॑प्रसृपत॒ मोथ्सृ॑पत।
अ॒यꣳ सं॑वथ्स॒रः।
सर्वे॑षां भू॒ताना᳚ं प्रा॒णैरप॑प्रसर्पति॒ चोथ्स॑र्पति च॥ ६६॥

((i̱me māsā̎ścārdhamā̱sāśca̍ |
sarve̍ṣāṃ bhū̱tānā̎ṃ prā̱ṇairapa̍prasarpanti̱ cothsa̍rpanti ca |
mā me̎ pra̱jayā̱ mā pa̍śū̱nām |

mā mamá prā̱ṇairapápraśṛpata̱ mothsṛ̱pata ।
i̱ma ṛ̱tavá̱ḥ ।
sarvé̱ṣāṃ bhū̱tānā̐̐ṃ prā̱ṇairapápraśarpanti̱ cothsárpanti ca ।
mā mē̐ pra̱jayā̱ mā páśū̱nām ।
mā mamá prā̱ṇairapápraśṛpata̱ mothsṛ̱pata ।
a̱yam̐ sáṃvathsa̱raḥ ।
sarvé̱ṣāṃ bhū̱tānā̐̐ṃ prā̱ṇairapápraśarpati̱ cothsárpati ca ॥ 66 ॥))

[[1-14-4]]

मा मे̐ प्र॒जया॒ मा प॑शू॒नाम्।
मा मम॑ प्रा॒णैरप॑प्रसृप॒ मोथ्सृ॑प।
इ॒दमह॑ः।
सर्वे॑षां भू॒ताना॒ँ प्रा॒णैरप॑प्रसर्पति॒ चोथ्स॑र्पति च।
मा मे̐ प्र॒जया॒ मा प॑शू॒नाम्।
मा मम॑ प्रा॒णैरप॑प्रसृप॒ मोथ्सृ॑प।
इ॒यꣳरात्रि॑ः।
सर्वे॑षां भू॒ताना॒ँ प्रा॒णैरप॑प्रसर्पति॒ चोथ्स॑र्पति च।
मा मे̐ प्र॒जया॒ मा प॑शू॒नाम्।
मा मम॑ प्रा॒णैरप॑प्रसृप॒ मोथ्सृ॑प।
ओं भुर्भुव॒स्स्व॑ः।
एतद्वो मिथुनं मानो मिथु॑नꣳ री॒ढ्वम्॥ ६७॥
प्रा॒णारा॒पूर्य॑ति॒ मोथ्सृ॑पत॒ चोथ्स॑र्पति॒ च॒ मोथ्सृ॑प॒ द्वे च॑॥ १४॥

योऽसौ॒ षोड॑शा॒मूनि॒ द्वाद॑शा॒यञ्च॒तुर्द॑श॥
उ॒दे॒य॑स्त॒मेत्या॒पूर्य॑त्यप॒क्षीय॑त्य॒मूनि॒ नक्ष॑त्राणी॒मे मासा॑ इ॒म ऋ॒तवो॒ऽयꣳ सं॑वथ्स॒र इ॒दमह॑रि॒यꣳ रात्रि॒र्द॑श॥

((mā mē̐ pra̱jayā̱ mā páśū̱nām ।
mā mamá prā̱ṇairapápraśṛpa̱ mothsṛ̱pa ।
i̱damahá̱ḥ ।
sarvé̱ṣāṃ bhū̱tānā̐̐ṃ prā̱ṇairapápraśarpati̱ cothsárpati ca ।
mā mē̐ pra̱jayā̱ mā páśū̱nām ।
mā mamá prā̱ṇairapápraśṛpa̱ mothsṛ̱pa ।
i̱yam̐rātrí̱ḥ ।
sarvé̱ṣāṃ bhū̱tānā̐̐ṃ prā̱ṇairapápraśarpati̱ cothsárpati ca ।
mā mē̐ pra̱jayā̱ mā páśū̱nām ।
mā mamá prā̱ṇairapápraśṛpa̱ mothsṛ̱pa ।

om̐ bhurbhuvassvaḥ |
etadvo mithunam̐ māno mithunam̐ rīḍhvam || 67 ||
prāṇāirāpūryati mothsṛpata cothsarpati ca mothsṛpa dve ca || 14 ||

yo'sau ṣoḍaśāmūni dvādaśāyañcaturdaśa ||
udeyāstametyāpūryatyapakṣīyatyamūni nakṣatrāṇīme māsā ima ṛtavo'yam̐ saṃvathsara idamahariyam̐ rātrirdaśa ||))

[[1-15-1]]

अथादित्यस्याष्टपुरुषस्य।
वसूनामादित्यानाꣳ स्थाने स्वतेजसा भानि।
रुद्राणामादित्यानाꣳ स्थाने स्वतेजसा भानि।
आदित्यानामादित्यानाꣳ स्थाने स्वतेजसा भानि।
सताꣳसत्यानाम्।
आदित्यानाꣳ स्थाने स्वतेजसा भानि।
अभिधून्वतामभिघ्नताम्।
वातवतां मरुताम्।
आदित्यानाꣳ स्थाने स्वतेजसा भानि।
ऋभूणामादित्यानाꣳ स्थाने स्वतेजसा भानि।
विश्वेषान्देवानाम्।
आदित्यानाꣳ स्थाने स्वतेजसा भानि।
संवथ्सरस्य सवितुः।
आदित्यस्य स्थाने स्वतेजसा भानि।
ओं भुर्भुवस्स्वः।
रश्मयो वो मिथुनं मा नो मिथुनꣳ रीढ्वम्॥ ६८॥
ऋभूणामादित्यानाꣳ स्थाने स्वतेजसा भानि षट् च॥ १५॥

((athādityasyāṣṭapuruṣasya |
vasūnāmādityānām̐ sthāne svatejasā bhāni |
rudrāṇāmādityānām̐ sthāne svatejasā bhāni |
ādityānāmādityānām̐ sthāne svatejasā bhāni |
satām̐satyānām |
ādityānām̐ sthāne svatejasā bhāni |
abhidhūnvatāmabhighnatām |
vātavatāṃ marutām |
ādityānām̐ sthāne svatejasā bhāni |
ṛbhūṇāmādityānām̐ sthāne svatejasā bhāni |

viśveṣā̐ndevā̱nām |
ādityānā̐m sthāne svateja̍sā bhā̱ni |
saṃvathsara̍sya sa̱vituḥ |
ādityasya sthāne svateja̍sā bhā̱ni |
oṃ bhurbhuva̱ssva̍ḥ |
raśmayo vo mithunaṃ mā no mithu̍nā̐m rī̱ḍhvam || 68 ||
ṛbhūṇāmādityānā̐m sthāne svateja̍sā bhā̱ni ṣaṭ ca̍ || 15 ||))

[[1-16-1]]

आरोगस्य स्थाने स्वतेज॑सा भा॒नि।

भ्राजस्य स्थाने स्वतेज॑सा भा॒नि।

पटरस्य स्थाने स्वतेज॑सा भा॒नि।

पतङ्गस्य स्थाने स्वतेज॑सा भा॒नि।

स्वर्णरस्य स्थाने स्वतेज॑सा भा॒नि।

ज्योतिषीमतस्य स्थाने स्वतेज॑सा भा॒नि।

विभासस्य स्थाने स्वतेज॑सा भा॒नि।

कश्यपस्य स्थाने स्वतेज॑सा भा॒नि।

ओं भुर्भुव॒स्स्व॑ः।

आपो वो मिथुनं मा नो मिथु॑नꣳ री॒ढ्वम्॥ ६९॥

आरोगस्य द॒श॑॥ १६॥

((ārogasya sthāne svateja̍sā bhā̱ni |
bhrājasya sthāne svateja̍sā bhā̱ni |
paṭarasya sthāne svateja̍sā bhā̱ni |
pataṅgasya sthāne svateja̍sā bhā̱ni |
svarṇarasya sthāne svateja̍sā bhā̱ni |
jyotiṣīmatasya sthāne svateja̍sā bhā̱ni |
vibhāsasya sthāne svateja̍sā bhā̱ni |
kaśyapasya sthāne svateja̍sā bhā̱ni |
oṃ bhurbhuva̱ssva̍ḥ |
āpo vo mithunaṃ mā no mithu̍nā̐m rī̱ḍhvam || 69 ||
ārogasya da̱śa̍ || 16 ||))

[[1-17-1]]

अथ वायोरेकाद॒शपुरुषस्यैकाद॒श॑स्त्रीकस्य।

प्रभ्राजमानानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि।

व्यवद्॒अतानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि।

वासुकिवैद्युतानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि।

रजतानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि।
परुषाणाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि।
श्यामानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि।
कपिलानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि।
अतिलोहितानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि।
ऊर्ध्वानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि॥ ७०॥

((atha vāyorekādaśapuruṣasyaikādaśastrīka̱sya ।
prabhrājamānānāmँ rudrāṇāmँ sthāne svatejásā bhā̱ni ।
vyavadātānāmँ rudrāṇāmँ sthāne svatejásā bhā̱ni ।
vāsukivaidyutānāmँ rudrāṇāmँ sthāne svatejásā bhā̱ni ।
rajatānāmँ rudrāṇāmँ sthāne svatejásā bhā̱ni ।
paruṣāṇāmँ rudrāṇāmँ sthāne svatejásā bhā̱ni ।
śyāmānāmँ rudrāṇāmँ sthāne svatejásā bhā̱ni ।
kapilānāmँ rudrāṇāmँ sthāne svatejásā bhā̱ni ।
atilohitānāmँ rudrāṇāmँ sthāne svatejásā bhā̱ni ।
ūrdhvānāmँ rudrāṇāmँ sthāne svatejásā bhā̱ni ॥ 70 ॥))

[[1-17-2]]
अवपतन्तानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि।
वैद्युतानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि।
प्रभ्राजमानीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि।
व्यवदातीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि।
वासुकिवैद्युतीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि।
रजतानाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि।
परुषाणाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि।
श्यामानाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि।
कपिलानाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि।
अतिलोहितीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि।
ऊर्ध्वानाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि।
अवपतन्तीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि।
वैद्युतीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि।
ओं भुर्भुव॒स्स्वः।
रूपाणि वो मिथुनं मा नो मिथु॑नꣳ री॒ढ्वम्॥ ७१॥

ऊर्ध्वा॑नाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒न्यतिलो॑हितीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि पञ्च॑ च॥ १७॥

((avapatantānām̐ rudrāṇām̐ sthāne svateja̍sā bha̱ni ।
vaidyutānām̐ rudrāṇām̐ sthāne svateja̍sā bha̱ni ।
prabhrājamānīnām̐ rudrāṇīnām̐ sthāne svateja̍sā bha̱ni ।
vyavadātīnām̐ rudrāṇīnām̐ sthāne svateja̍sā bha̱ni ।
vāsukivaidyutīnām̐ rudrāṇīnām̐ sthāne svateja̍sā bha̱ni ।
rajatānām̐ rudrāṇīnām̐ sthāne svateja̍sā bha̱ni ।
paruṣāṇām̐ rudrāṇīnām̐ sthāne svateja̍sā bha̱ni ।
śyāmānām̐ rudrāṇīnām̐ sthāne svateja̍sā bha̱ni ।
kapilānām̐ rudrāṇīnām̐ sthāne svateja̍sā bha̱ni ।
atilohitīnām̐ rudrāṇīnām̐ sthāne svateja̍sā bha̱ni ।
ūrdhvānām̐ rudrāṇīnām̐ sthāne svateja̍sā bha̱ni ।
avapatantīnām̐ rudrāṇīnām̐ sthāne svateja̍sā bha̱ni ।
vaidyutīnām̐ rudrāṇīnām̐ sthāne svateja̍sā bha̱ni ।
oṃ bhurbhuva̱ssva̍ḥ ।
rūpāṇi vo mithunaṃ mā no mithu̍nam̐ rī̱dhvam ॥ 71 ॥
ūrdhvānām̐ rudrāṇām̐ sthāne svateja̍sā bha̱nyatilohitīnām̐ rudrāṇīnām̐ sthāne svateja̍sā bha̱ni pañca̍ ca ॥ 17 ॥))

[[1-18-1]]
अथाग्नेर॑ष्टपु॑रु॒षस्य।
अग्नेः पूर्वदि॑श्यस्य स्थाने स्वतेज॑सा भा॒नि।
जातवेद॑स उपदिश्यस्य स्थाने स्वतेज॑सा भा॒नि।
सहोजसो द॑क्षिणदिश्यस्य स्थाने स्वतेज॑सा भा॒नि।
अजिराप्रभव उप॑दिश्यस्य स्थाने स्वतेज॑सा भा॒नि।
वैश्वानरस्यापरदि॑श्यस्य स्थाने स्वतेज॑सा भा॒नि।
नर्या॑पस उपदिश्यस्य स्थाने स्वतेज॑सा भा॒नि।
पङ्क्तिराधस उदग्दि॑श्यस्य स्थाने स्वतेज॑सा भा॒नि।
विसर्पि॑ण उपदिश्यस्य स्थाने स्वतेज॑सा भा॒नि।
ओं भुर्भु॒वस्स्वः॑।
दिशो वो मिथुनं मा नो मिथु॑नꣳ री॒ढ्वम्॥ ७२॥
स्वरे॑कं च॥ १८॥

एतद्रश्मय आपो रूपाणि दिशः पञ्च॑॥

((athāgne̍raṣṭapu̍ruṣa̱sya ।

agneḥ pūrvadiśyasya sthāne svatejȧsā bha̱ni ।
jātavedasa upadiśyasya sthāne svatejȧsā bha̱ni ।
sahojaso dakṣiṇadiśyasya sthāne svatejȧsā bha̱ni ।
ajirāprabhava upadiśyasya sthāne svatejȧsā bha̱ni ।
vaiśvānarasyāparadiśyasya sthāne svatejȧsā bha̱ni ।
naryāpasa upadiśyasya sthāne svatejȧsā bha̱ni ।
paṅktirādhasa udagdiśyasya sthāne svatejȧsā bha̱ni ।
visarpiṇa upadiśyasya sthāne svatejȧsā bha̱ni ।
oṃ bhurbhuva̱ssvȧḥ ।
diśo vo mithunaṃ mā no mithu̇naṁ rī̱ḍhvam ॥ 72 ॥
svȧrekȧñca ॥ 18 ॥

etadraśmaya āpo rūpāṇi diśaḥ pañcȧ ॥))

[[1-19-1]]
दक्षिणपूर्वस्यान्दिशि विसर्पी न॒रकः।
तस्मान्नः परिपा॒हि।
दक्षिणाऽपरस्यान्दिश्यविसर्पी न॒रकः।
तस्मान्नः परिपा॒हि।
उत्तरपूर्वस्यान्दिशि विषादी न॒रकः।
तस्मान्नः परिपा॒हि।
उत्तरपरस्यान्दिश्यविषादी न॒रकः।
तस्मान्नः परिपा॒हि।
आयस्मिन्थ्सप्त वासवा इन्द्रियाणि शतक्रतवित्ये॒ते॥ ७३॥
दक्षिणपूर्वस्यां नव॥ १९॥

((dakṣiṇapūrvasyāndiśi visȧrpī na̱rakaḥ ।
tasmānnaḥ pȧripa̱hi ।
dakṣiṇā'parasyāndiśyavisȧrpī na̱rakaḥ ।
tasmānnaḥ pȧripa̱hi ।
uttarapūrvasyāndiśi viṣȧ̇dī na̱rakaḥ ।
tasmānnaḥ pȧripa̱hi ।
uttaraparasyāndiśyaviṣȧ̇dī na̱rakaḥ ।
tasmānnaḥ pȧripa̱hi ।
āyasminthsapta vāsavā indriyāṇi śatakratȧvitye̱te ॥ 73 ॥
dakṣiṇapūrvasyāṃ navȧ ॥ 19 ॥))

[[1-20-1]]
इ॒न्द्र॒घो॒षा वो॒ वसु॑भिः पु॒रस्ता॒दुप॑दधताम्।
मनो॑जवसो वः पि॒तृभि॑र्दक्षि॒णत उप॑दधताम्।

प्रचे॑ता वो रु॒द्रैः प॒श्चादुप॑दधताम्।
वि॒श्वक॑र्मा व आदि॒त्यैरु॑त्तर॒त उप॑दधताम्।
त्वष्टा॑ वो रू॒पैरु॒परि॑ष्टा॒दुप॑दधताम्।
संज्ञानं वः प॑श्चादि॒ति।
आ॒दि॒त्यस्सर्वो॒ऽग्निः पृ॑थि॒व्याम्।
वा॒यु॒र॒न्तरि॑क्षे।
सूर्यो॑ दि॒वि।
च॒न्द्रमा॑ दि॒क्षु।
नक्ष॑त्राणि॒ स्वलो॒के।
ए॒वा ह्ये॑व।
ए॒वा ह्य॑ग्ने।
ए॒वा हि वा॑यो।
ए॒वा ही॑न्द्र।
ए॒वा हि पू॑षन्।
ए॒वा हि दे॑वाः॥ ७४॥
दि॒क्षु स॒प्त च॑॥ २०॥

((i̱ndra̱gho̱ṣā vo̱ vasu̍bhiḥ pu̱rastā̱dupa̍dadhatām |
mano̍javaso vaḥ pi̱tṛbhi̍rdakṣiṇa̱ta upa̍dadhatām |
prace̍tā vo ru̱draiḥ pa̱ścādupa̍dadhatām |
vi̱śvaka̍rmā va ādi̱tyairu̍ttara̱ta upa̍dadhatām |
tvaṣṭa̍ vo rū̱pairu̱pari̍ṣṭā̱dupa̍dadhatām |
saṃjñānaṃ vaḥ pa̍ścādi̱ti |
ā̱di̱tyassarvo̱'gniḥ pṛ̍thi̱vyām |
vā̱yura̱ntari̍kṣe |
sūryo̍ di̱vi |
ca̱ndrama̍ di̱kṣu |
nakṣa̍trāṇi̱ svalo̱ke |
e̱vā hye̍va |
e̱vā hya̍gne |
e̱vā hi va̍yo |
e̱vā hi̍ndra |
e̱vā hi pu̍ṣan |
e̱vā hi de̍vāḥ || 74 ||
di̱kṣu sa̱pta ca̍ || 20 ||))

[[1-21-1]]

आप॑मापाम॒पः सर्वाः᳚ ।
अ॒स्माद॒स्मादि॒तो॑ऽमुतः॑ ।
अ॒ग्निर्वा॒युश्च॒ सूर्य॑श्च ।
स॒ह स॑ञ्चस्क॒रर्द्धि॑या ।
वा॒य्वश्वा॑ रश्मि॒पत॑यः ।
मरी᳚च्यात्मानो॒ अद्रु॑हः ।
दे॒वीर्भु॑वन॒सूव॑रीः ।
पु॒त्र॒व॒त्त्वाय॑ मे सुत ।
महानाम्नीर्म॑हामा॒नाः ।
म॒ह॒सो म॑हस॒स्स्व॑ः ॥ ७५ ॥

((āpa̍māpāma̱paḥ sarvā̎ḥ |
a̱smāda̱smādi̱to'muta̍ḥ |
a̱gnirvā̱yuśca̱ sūrya̍śca |
sa̱ha sa̍ñcaska̱rarddhi̍yā |
vā̱yvaśva̍ raśmi̱pata̍yaḥ |
marī̎cyātmāno̱ adru̍haḥ |
de̱vīrbhu̍vana̱sūva̍rīḥ |
pu̱tra̱va̱ttvāya̍ me suta |
mahānāmnīrma̍hāmā̱nāḥ |
ma̱ha̱so ma̍hasa̱ssva̍ḥ || 75 ||))

[[1-21-2]]
दे॒वीः प॑र्जन्य॒सूव॑रीः ।
पु॒त्र॒व॒त्त्वाय॑ मे सुत ।
अ॒पाऽश्न्यु॑ष्णिम॒पारक्षः॑ ।
अ॒पाऽश्न्यु॑ष्णिम॒पारघम्᳚ ।
अपा᳚ग्रामप॑चा॒ऽवर्ती᳚म् ।
अप॑दे॒वीरि॒तो॑ हि॑त ।
वज्र॑न्दे॒वीरजी॑ताꣳश्च ।
भुव॑नन्दे॒वसूव॑रीः ।
आ॒दि॒त्यानदि॑तिन्दे॒वीम् ।
योनि॑नोर्ध्वमु॒दीष॑त ॥ ७६ ॥

((de̱vīḥ pa̍rjanya̱sūva̍rīḥ |

putravattvāya me suta |
apā'śnyuṣṇimapārakṣaḥ |
apā'śnyuṣṇimapāragham |
apāghrāmapacā'vartim |
apādevīrito hita |
vajrāndevīrajitāṃśca |
bhuvanandevasūvarīḥ |
ādityānaditindevīm |
yoninordhvamudīṣata || 76 ||))

[[1-21-3]]
भद्रं कर्णेभिः श्रृणुयाम देवाः।
भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः।
व्यशेम देवहितं यदायुः।
स्वस्ति न इन्द्रो वृद्धश्रवाः।
स्वस्ति नः पूषा विश्ववेदाः।
स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः।
स्वस्ति नो बृहस्पतिर्दधातु।
केतवो अरुणासश्च।
ऋषयो वातरशनाः।
प्रतिष्ठाꣳ शतधा हि।
समाहितासो सहस्रधायसम्।
शिवा नश्शन्तमा भवन्तु।
दिव्या आप ओषधयः।
सुमृडीका सरस्वति।
मा ते व्योम संदृशि॥ ७७॥
स्वरुदीषत वातरशनाः षड्च॥ २१॥

((bhadraṃ karṇebhiḥ śṛṇuyāma devāḥ |
bhadraṃ paśyemākṣabhiryajatrāḥ |
sthiraiṅgaistuṣṭuvāṃsastanūbhiḥ |
vyaśema devahitaṃ yadāyuḥ |
svasti na indro vṛddhaśravāḥ |
svasti naḥ pūṣā viśvavedāḥ |
svastinastārkṣyo ariṣṭanemiḥ |
svasti no bṛhaspatirdadhātu |

ke̱tavo̱ arúṇāsaśca ।
ṛ̱ṣa̱yo vātáraśa̱nāḥ ।
pra̱ti̱ṣṭhām̐ śa̱tadhá hi ।
sa̱māhítāso sahasra̱dhāyásam ।
śi̱vā na̱śśantámā bhavantu ।
di̱vyā āpa̱ oṣádhayaḥ ।
su̱mṛ̱ḍī̱kā sarásvati ।
mā te̱ vyóma sa̱mdṛśí ॥ 77 ॥
svárudīṣáta̱ vātáraśa̱nāḥ ṣaṭcá ॥ 21 ॥))

[[1-22-1]]

योऽपां पुष्पं वेद ।
पुष्पवान्प्रजावान्पशुमान्भवति ।
चन्द्रमा वा अपां पुष्पम् ।
पुष्पवान्प्रजावान्पशुमान्भवति ।
य एवं वेद ।
योऽपामायतनं वेद ।
आयतनवान्भवति ।
अग्निर्वा अपामायतनम् ।
आयतनवान्भवति ।
योऽग्नेरायतनं वेद ॥ ७८ ॥

((yó'pāṃ puṣpa̱ṃ vedá ।
puṣpávānpra̱jāvā̎npaśu̱mānbhávati ।
ca̱ndramā̱ vā a̱pāṃ puṣpä̎m ।
puṣpávānpra̱jāvā̎npaśu̱mānbhávati ।
ya e̱vaṃ vedá ।
yó'pāmā̱yatána̱ṃ vedá ।
ā̱yatánavānbhavati ।
a̱gnirvā a̱pāmā̱yatánam ।
ā̱yatánavānbhavati ।
yö̎'gnerā̱yatana̱ṃ vedá ॥ 78 ॥))

[[1-22-2]]

आयतनवान्भवति ।
आपो वा अग्नेरायतनम् ।
आयतनवान्भवति ।
य एवं वेद ।

योऽपामायतनं वेद।
आयतनवान्भवति।
वायुर्वा अपामायतनम्।
आयतनवान्भवति।
यो वायोरायतनं वेद।
आयतनवान्भवति॥ ७९॥

((āyatánavānbhavati |
āpo vā agnerāyatánam |
āyatánavānbhavati |
ya evaṃ vedá |
yó'pāmāyatánaṃ vedá |
āyatánavānbhavati |
vāyurvā apāmāyatánam |
āyatánavānbhavati |
yo vāyorāyatánaṃ vedá |
āyatánavānbhavati || 79 ||))

[[1-22-3]]
आपो वै वायोरायतनम्।
आयतनवान्भवति।
य एवं वेद।
योऽपामायतनं वेद।
आयतनवान्भवति।
असौ वै तपन्नपामायतनम्।
आयतनवान्भवति।
योऽमुष्य तपत आयतनं वेद।
आयतनवान्भवति।
आपो वा अमुष्य तपत आयतनम्॥ ८०॥

((āpo vai vāyorāyatánam |
āyatánavānbhavati |
ya evaṃ vedá |
yó'pāmāyatánaṃ vedá |
āyatánavānbhavati |
asau vai tapánnapāmāyatánam |
āyatánavānbhavati |
yó'muṣya tapáta āyatánaṃ vedá |

āyatánavānbhavati ।
āpo̱ vā a̱muṣya̱ tapáta ā̱yatánam ॥ 80 ॥))

[[1-22-4]]
आ̱यत॑नवान्भवति।
य ए̱वं वेद॑।
यो॑ऽपामा̱यत॑न̱ं वेद॑।
आ̱यत॑नवान्भवति।
च̱न्द्रमा̱ वा अ̱पामा̱यत॑नम्।
आ̱यत॑नवान्भवति।
यश्च̱न्द्रम॑स आ̱यत॑न̱ं वेद॑।
आ̱यत॑नवान्भवति।
आपो̱ वै च̱न्द्रम॑स आ̱यत॑नम्।
आ̱यत॑नवान्भवति॥ ८१ ॥

((ā̱yatánavānbhavati ।
ya e̱vaṃ vedá ।
yó'pāmā̱yatána̱ṃ vedá ।
ā̱yatánavānbhavati ।
ca̱ndramā̱ vā a̱pāmā̱yatánam ।
ā̱yatánavānbhavati ।
yaśca̱ndramása ā̱yatána̱ṃ vedá ।
ā̱yatánavānbhavati ।
āpo̱ vai ca̱ndramása ā̱yatánam ।
ā̱yatánavānbhavati ॥ 81 ॥))

[[1-22-5]]
य ए̱वं वेद॑।
यो॑ऽपामा̱यत॑न̱ं वेद॑।
आ̱यत॑नवान्भवति।
नक्ष॑त्राणि̱ वा अ̱पामा̱यत॑नम्।
आ̱यत॑नवान्भवति।
यो नक्ष॑त्राणामा̱यत॑न̱ं वेद॑।
आ̱यत॑नवान्भवति।
आपो̱ वै नक्ष॑त्राणामा̱यत॑नम्।
आ̱यत॑नवान्भवति।

य ए॒वं वेद॑॥ ८२॥

((ya e̱vaṃ veda̍ ।
yo̍'pāmā̱yata̍na̱ṃ veda̍ ।
ā̱yata̍navānbhavati ।
nakṣa̍trāṇi̱ vā a̱pāmā̱yata̍nam ।
ā̱yata̍navānbhavati ।
yo nakṣa̍trāṇāmā̱yata̍na̱ṃ veda̍ ।
ā̱yata̍navānbhavati ।
āpo̱ vai nakṣa̍trāṇāmā̱yata̍nam ।
ā̱yata̍navānbhavati ।
ya e̱vaṃ veda̍ ॥ 82 ॥))

[[1-22-6]]
यो॑ऽपामा॒यत॑नं॒ वेद॑।
आ॒यत॑नवान्भवति।
प॒र्जन्यो॒ वा अ॒पामा॒यत॑नम्।
आ॒यत॑नवान्भवति।
यः प॒र्जन्य॑स्या॒ऽऽयत॑नं॒ वेद॑।
आ॒यत॑नवान्भवति।
आपो॒ वै प॒र्जन्य॑स्या॒ऽऽयत॑नम्।
आ॒यत॑नवान्भवति।
य ए॒वं वेद॑।
यो॑ऽपामा॒यत॑नं॒ वेद॑॥ ८३॥

((yo̍'pāmā̱yata̍na̱ṃ veda̍ ।
ā̱yata̍navānbhavati ।
pa̱rjanyo̱ vā a̱pāmā̱yata̍nam ।
ā̱yata̍navānbhavati ।
yaḥ pa̱rjanya̍syā̱''yata̍na̱ṃ veda̍ ।
ā̱yata̍navānbhavati ।
āpo̱ vai pa̱rjanya̍syā̱''yata̍nam ।
ā̱yata̍navānbhavati ।
ya e̱vaṃ veda̍ ।
yo̍'pāmā̱yata̍na̱ṃ veda̍ ॥ 83 ॥))

[[1-22-7]]
आ॒यत॑नवान्भवति।
सं॒व॒थ्स॒रो वा अ॒पामा॒यत॑नम्।

आ॒यत॑नवान्भवति।
यस्सं॑वथ्स॒रस्या॒यत॑नं॒ वेद॑।
आ॒यत॑नवान्भवति।
आपो॒ वै सं॑वथ्स॒रस्या॒ऽऽयत॑नम्।
आ॒यत॑नवान्भवति।
य ए॒वं वेद॑।
योँऽप्सु नाव॒ं प्रति॑ष्ठिता॒ं वेद॑।
प्रत्ये॒व ति॑ष्ठति॥ ८४॥

((āyatánavānbhavati |
saṃvathsaro vā āpāmāyatánam |
āyatánavānbhavati |
yassáṃvathsarasyāyatánaṃ vedá |
āyatánavānbhavati |
āpo vai saṃvathsarasyā''yatánam |
āyatánavānbhavati |
ya evaṃ vedá |
yŏ'psu nāvaṃ pratíṣṭhitāṃ vedá |
pratyeva tíṣṭhati || 84 ||))

[[1-22-8]]
इ॒मे वै लो॒का अ॒प्सु प्रति॑ष्ठिताः।
तदे॒षाऽभ्यनू॑क्ता।
अ॒पाꣳ रस॒मुद॑यꣳ सन्।
सूर्ये॑ शु॒क्रꣳ स॒माभृ॑तम्।
अ॒पाꣳ रस॑स्य॒ यो रस॑ः।
तं वो॑ गृह्णाम्युत्तममिति॑।
इ॒मे वै लो॒का अ॒पाꣳ रस॑ः।
तेऽमुष्मि॑न्नादि॒त्ये स॒माभृ॑ताः।
जा॒नुद॒घ्नीमु॑त्तरवे॒दीङ्खा॒त्वा।
अ॒पां पू॑रयि॒त्वा गु॑ल्फद॒घ्नम्॥ ८५॥

((ime vai lokā apsu pratíṣṭhitāḥ |
tadeṣā'bhyanū́ktā |
apāṁ rasamudáyaṁ san |
sūryé śukraṁ samābhṛ́tam |
apāṁ rasásya yo rasáḥ |

taṃ vȯ gṛhṇāmyuttamamitī ।
ime vai lokā apām̐ rasȧḥ ।
tė'muṣmīnnāditye samābhṛ̇tāḥ ।
jānudaghnīmuttaravedīṅkhātvā ।
apāṃ pūrayitvā gulphadaghnam ॥ 85 ॥))

[[1-22-9]]
पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्च सङ्ँस्तीर्य।
तस्मिन्विहायसे।
अग्निं प्रणीयोपसमाधाय।
ब्रह्मवादिनो वदन्ति।
कस्मात्प्रणीतेऽयमग्निश्चीयते।
साप्रणीतेऽयमप्सु ह्ययञ्चीयते।
असौ भुवनेऽप्यनाहिताग्निरेताः।
तमभित एता अबीष्टका उपदधाति।
अग्निहोत्रे दर्शपूर्णमासयोः।
पशुबन्धे चातुर्मास्येषु॥ ८६ ॥

((puṣkaraparṇaiḥ puṣkaradaṇḍaiḥ puṣkaraiśca sam̐stīrya ।
tasminvihāyase ।
agniṃ praṇīyopasamādhāya ।
brahmavādino vadanti ।
kasmātpraṇīte'yamagniścīyate ।
sāpraṇīte'yamapsu hyayañcīyate ।
asau bhuvane'pyanāhitāgniretāḥ ।
tamabhita etā abīṣṭakā upadadhāti ।
agnihotre darśapūrṇamāsayoḥ ।
paśubandhe cāturmāsyeṣu ॥ 86 ॥))

[[1-22-10]]
अथो आहुः।
सर्वेषु यज्ञक्रतुष्विति।
एतद्ध स्म वा आहुश्शण्डिलाः।
कमग्निञ्चिनुते।
सत्रियमग्निञ्चिन्वानः।
संवथ्सरं प्रत्यक्षेण।
कमग्निञ्चिनुते।

सा॒वि॒त्रम॒ग्निञ्चि॑न्वा॒नः।
अ॒मुमा॑दि॒त्यं प्र॒त्यक्षे॑ण।
कम॒ग्निञ्चि॑नुते॥ ८७॥

((atho̍ āhuḥ |
sarve̍ṣu yajñakra̱tuṣviti̍ |
e̱taddha̍ sma̱ vā a̍huśśaṇḍi̱lāḥ |
kama̱gniñci̍nute |
sa̱tri̱yama̱gniñci̍nvā̱naḥ |
sa̱ṃva̱thsa̱raṃ pra̱tyakṣe̍ṇa |
kama̱gniñci̍nute |
sā̱vi̱trama̱gniñci̍nvā̱naḥ |
a̱mumā̍di̱tyaṃ pra̱tyakṣe̍ṇa |
kama̱gniñci̍nute || 87 ||))

[[1-22-11]]
ना॒चि॒के॒तम॒ग्निञ्चि॑न्वा॒नः।
प्रा॒णान्प्र॒त्यक्षे॑ण।
कम॒ग्निञ्चि॑नुते।
चा॒तु॒र्हो॒त्रि॒यम॒ग्निञ्चि॑न्वा॒नः।
ब्रह्म॑ प्र॒त्यक्षे॑ण।
कम॒ग्निञ्चि॑नुते।
वै॒श्व॒सृ॒जम॒ग्निञ्चि॑न्वा॒नः।
शरी॑रं प्र॒त्यक्षे॑ण।
कम॒ग्निञ्चि॑नुते।
उ॒पा॒नु॒वा॒क्य॑मा॒शुम॒ग्निञ्चि॑न्वा॒नः॥ ८८॥

((nā̱ci̱ke̱tama̱gniñci̍nvā̱naḥ |
prā̱ṇānpra̱tyakṣe̍ṇa |
kama̱gniñci̍nute |
cā̱tu̱ho̱tri̱yama̱gniñci̍nvā̱naḥ |
brahma̍ pra̱tyakṣe̍ṇa |
kama̱gniñci̍nute |
vai̱śva̱sṛ̱jama̱gniñci̍nvā̱naḥ |
śarī̍raṃ pra̱tyakṣe̍ṇa |
kama̱gniñci̍nute |
u̱pā̱nu̱vā̱kya̍mā̱śuma̱gniñci̍nvā̱naḥ || 88 ||))

[[1-22-12]]

इ॒माँल्लो॒कान्प्र॒त्यक्षे॑ण।
कम॒ग्निञ्चि॑नुते।
इ॒मम॑रुणकेतुकम॒ग्निञ्चि॑न्वा॒नः इति॑।
य ए॒वासौ।
इ॒तश्चा॒मुत॑श्चाऽव्यतीपा॒ती।
तमिति॑।
यो॑ऽग्नेर्मि॑थू॒या वेद॑।
मि॒थु॒नवान्भ॑वति।
आपो॒ वा अ॒ग्नेर्मि॑थू॒याः।
मि॒थु॒नवान्भ॑वति।
य ए॒वं वेद॑॥ ८९॥
वेद॑ भवत्या॒यत॑नमा॒यत॑नवान्भवति॒ वेद॒ य ए॒वं वेद॒ वेद॑ तिष्ठति गुल्फद॒घ्नं चा॑तुर्मा॒स्येष्व॒मुमा॑दि॒त्यं प्र॒त्यक्षे॑ण॒ कम॒ग्निञ्चि॑नुत उपानुवा॒क्य॑मा॒शुम॒ग्निञ्चि॑न्वा॒नो मि॑थू॒या मि॑थु॒नवान्भ॑व॒त्येक॑ञ्च॥ २२॥

पुष्प॑म॒ग्निर्वा॒युर॒सौ वै तप॑ञ्च॒न्द्रमा॒ नक्ष॑त्राणि प॒र्जन्य॑स्संवत्त्स॒रस्ति॑ष्ठति सत्रि॒यꣳ सं॑वथ्स॒रꣳ सा॑वि॒त्रम॒मुन्ना॑चिके॒तं प्रा॒णाꣳश्चा॑तुर्हो॑त्रि॒यं ब्रह्म॑ वैश्वसृ॒जꣳ शरी॑रमुपानुवा॒क्य॑मा॒शुमि॒माँल्लो॒कानि॒मम॑रुनकेतु॒कं य ए॒वासौ॥

((i̱māmँllo̱kānpra̱tyakṣe̍ṇa |
kama̱gniñci̍nute |
i̱mama̍ruṇaketukama̱gniñci̍nvā̱naḥ iti̍ |
ya e̱vāsau |
i̱taścā̱muta̍ścā'vyatīpā̱tī |
tamiti̍ |
yo̍'gnermi̍thū̱yā veda̍ |
mi̱thu̱navānbha̍vati |
āpo̱ vā a̱gnermi̍thū̱yāḥ |
mi̱thu̱navānbha̍vati |
ya e̱vaṃ veda̍ || 89 ||
veda̍ bhavatyā̱yata̍namā̱yata̍navānbhavati̱ veda̱ ya e̱vaṃ veda̱ veda̍ tiṣṭhati gulphada̱ghnaṃ cā̍turmā̱syeṣva̱mumā̍di̱tyaṃ pra̱tyakṣe̍ṇa̱ kama̱gniñci̍nuta upānuvā̱kya̍mā̱śuma̱gniñci̍nvā̱no mi̍thū̱yā mi̍thuna̱vānbha̍va̱tyekā̍ñca || 22 ||

puṣpa̍ma̱gnirvā̱yura̱sau vai tapa̍ñca̱ndramā̱ nakṣa̍trāṇi pa̱rjanya̍ssaṃvattsa̱rastiṣṭhati satri̱yamँ sa̍ṃvathsa̱ramँ sa̍vi̱trama̱munnā̍ciketa̱ṃ prā̱ṇāmँścā̍turhotri̱yaṃ brahma̍ vaiśvasṛ̱jamँ śari̍ramupānuvā̱kya̍mā̱śumi̱māmँllo̱kāni̱mama̍runaketuka̱ṃ ya e̱vāsau ||))

[[1-23-1]]

आपो॒ वा इ॒दमा॑सन्थ्सलि॒लमे॒व।
स प्र॒जाप॑ति॒रेकः॑ पुष्करप॒र्णे सम॑भवत्।
तस्या॒न्त॒र्मन॑सि का॒मस्सम॑वर्तत।
इ॒दꣳ सृ॑जेय॒मिति॑।
तस्मा॒द्यत्पुरु॑षो॒ मन॑साऽभि॒गच्छ॑ति।
तद्वा॒चा वद॑ति।
तत्कर्म॑णा करो॑ति।
तदे॒षाऽभ्यनू᳚क्ता।
का॒मस्तदग्रे॒ सम॑वर्त॒ताधि॑।
मन॑सो॒ रेतः॑ प्रथ॒मं यदासी᳚त्॥ ९०॥

((āpo̱ vā i̱damá̱santhsali̱lame̱va |
sa pra̱jāpáti̱rekáḥ puṣkarapa̱rṇe samábhavat |
tasyānta̱rmanási kāma̱ssamávartata |
i̱daṁ sṛ́jeya̱mití |
tasmā̱dyatpurúṣo̱ manásā'bhi̱gacchákti |
tadvā̱cā vádati |
tatkarmáṇā karoti |
tade̱ṣā'bhyanṻktā |
kāma̱stadagre̱ samávarta̱tādhí |
manáso̱ retáḥ pratha̱mam yadāsı̈t || 90 ||))

[[1-23-2]]

स॒तो बन्धु॒मस॑ति॒ निर॑विन्दन्।
हृ॒दि प्र॒तीष्या॑ क॒वयो॑ मनी॒षेति॑।
उपै॑न॒न्तदुप॑नमति।
यत्का॑मो॒ भव॑ति।
य ए॒वं वेद॑।
स तपो॑ऽतप्यत।
स तप॑स्त॒प्त्वा।
शरी॑रमधूनुत।
तस्य॒ यन्मा॒ꣳ॒समासी॑त्।
ततो॑ऽरु॒णाः के॒तवो॒ वात॑रश॒ना ऋष॑य॒ उद॑तिष्ठन्॥ ९१॥

((sa̱to bandhu̱masa̍ti̱ ni̍ravindan ।
hṛ̱di pra̱tīṣyā̍ ka̱vayo̍ manī̱ṣeti̍ ।
upai̍na̱ntadupa̍namati ।
yatkā̍mo̱ bhava̍ti ।
ya e̱vaṃ veda̍ ।
sa tapo̍'tapyata ।
sa tapa̍sta̱ptvā ।
śarī̍ramadhūnuta ।
tasya̱ yanmā̱m̐samāsī̎t ।
tato̍'ru̱ṇāḥ ke̱tavo̱ vāta̍raśa̱nā ṛ̱ṣa̍ya̱ uda̍tiṣṭhan ॥ 91 ॥))

[[1-23-3]]

ये नखा̎ः।

ते वै̍खा̱नसाः।

ये वाला̎ः।

ते वा̍लखि̱ल्याः।

यो रस̍ः।

सो̍ऽपाम्।

अ̱न्त̱र̱तः कू̱र्मं भू̱तꣳ सर्प̍न्तम्।

तम̍ब्रवीत्।

मम̱ वैत्वङ्मा̱ꣳसा।

सम̍भूत्॥ ९२॥

((ye nakhā̎ḥ ।
te vai̍khāna̱sāḥ ।
ye vālā̎ḥ ।
te vā̍lakhi̱lyāḥ ।
yo rasa̍ḥ ।
so̍'pām ।
a̱nta̱ra̱taḥ kū̱rmaṃ bhū̱tam̐ sarpa̍ntam ।
tama̍bravīt ।
mama̱ vaitvaṅmā̱m̐sā ।
sama̍bhūt ॥ 92 ॥))

[[1-23-4]]

नेत्य̍ब्रवीत्।

पूर्व̎मे̱वाह॒मि̱हास̱मिति̍।

तत्पुरु̍षस्य पुरुष̱त्वम्।

स स॒ह॒स्रंशीर्षा॒ पुरु॑षः।
स॒ह॒स्रा॒क्षस्स॒हस्र॑पात्।
भू॒त्वोद॑तिष्ठत्।
तम॑ब्रवीत्।
त्वं वै पूर्व॒ꣳ सम॑भूः।
त्वमि॒दं पूर्वः॑ कुरु॒ष्वेति॑।
स इ॒त आ॒दायापः॑॥ ९३॥

((netyábravīt |
pūrvámevāhamihāsamiti |
tatpurúṣasya puruṣatvam |
sa sahasráśīrṣā purúṣaḥ |
sahasrākṣassahasrápāt |
bhūtvodátiṣṭhat |
tamábravīt |
tvaṃ vai pūrvam̐ samábhūḥ |
tvamidaṃ pūrváḥ kuruṣveti |
sa ita ādāyāpáḥ || 93 ||))

[[1-23-5]]
अ॒ञ्ज॒लिना॑ पु॒रस्ता॑दु॒पाद॑धात्।
ए॒वाह्ये॒वेति॑।
तत॑ आदि॒त्य उद॑तिष्ठत्।
सा प्राची॒ दिक्।
अथा॑रु॒णः के॒तुर्द॑क्षिण॒त उ॒पाद॑धात्।
ए॒वाह्य॑ग्न इति॑।
तत॒ो वा अ॒ग्निरुद॑तिष्ठत्।
सा द॑क्षि॒णा दिक्।
अथा॑रु॒णः के॒तुः प॒श्चादु॒पाद॑धात्।
ए॒वाहि॒ वायो॒ इति॑॥ ९४॥

((añjaliná purastádupādádhāt |
evāhyeveti |
tatá ādityа udátiṣṭhat |
sā prācī dik |
athárunaḥ keturdákṣiṇata upādádhāt |
evāhyagna iti |

tato vā agnirudátiṣṭhat ।
sā dákṣiṇā dik ।
athā́ruṇaḥ ketuḥ paścādupādádhāt ।
evāhi vāyo ití ॥ 94 ॥))

[[1-23-6]]

ततो॑ वा॒युरुद॑तिष्ठत्।

सा प्र॒तीची॒ दिक्।

अथा॑रु॒णः के॒तुरु॑त्तर॒त उ॒पाद॑धात्।

ए॒वाहीन्द्रेति॑।

ततो॒ वा इन्द्र॒ उद॑तिष्ठत्।

सोदी॑ची॒ दिक्।

अथा॑रु॒णः के॒तुर्मध्य॑ उ॒पाद॑धात्।

ए॒वाहि पू॒षन्निति॑।

ततो॒ वै पू॒षोद॑तिष्ठत्।

सेयन्दिक्॥ ९५॥

((tató vāyurudátiṣṭhat ।
sā pratīcī dik ।
athā́ruṇaḥ keturúttarata upādádhāt ।
evāhīndretí ।
tato vā indra udátiṣṭhat ।
sodī́cī dik ।
athā́ruṇaḥ keturmadhyá upādádhāt ।
evāhi pūṣanniti ।
tato vai pūṣodátiṣṭhat ।
seyandik ॥ 95 ॥))

[[1-23-7]]

अथा॑रु॒णः के॒तुरु॒परि॑ष्टादु॒पाद॑धात्।

ए॒वाहि दे॒वा इति॑।

ततो॑ देवमनु॒ष्याः पि॒तर॑ः।

ग॒न्ध॒र्वा॒प्स॒र॒स॒श्चोद॑तिष्ठन्।

सोर्ध्वा दिक्।

या वि॒प्रुषो॑ वि॒परा॑पतन्।

ताभ्योऽसु॑रा॒ रक्षा॑ꣳसि पिशा॒चाश्चोद॑तिष्ठन्।

तस्मा॒त्ते परा॑भवन्।

वि॒प्रुड्भ्यो॒ हि ते सम॑भवन्।
तदे॒षाऽभ्यनू᳚क्ता॥ ९६॥

((atha̍ru̱ṇaḥ ke̱turu̱pari̍ṣṭādu̱pāda̍dhāt |
e̱vāhi de̱vā iti̍ |
tato̍ devamanu̱ṣyāḥ pi̱tara̍ḥ |
ga̱ndha̱rvāpsa̱rasa̱ścoda̍tiṣṭhan |
sordhvā dik |
yā vi̱pruṣo̍ vi̱parā̎patan |
tābhyo'su̍rā̱ rakṣām̐̎si piśā̱cāścoda̍tiṣṭhan |
tasmā̱tte parā̎bhavan |
vi̱pruḍbhyo̱ hi te sama̍bhavan |
tade̱ṣā'bhyanū̎ktā || 96 ||))

[[1-23-8]]
आपो॑ ह॒ यद्बृ॑ह॒तीर्गर्भ॒माय॑न्।
दक्ष॒न्दधा॑ना ज॒नय॑न्तीस्स्वय॒म्भुम्।
तत॑ इ॒मेऽध्यसृ॑ज्यन्त॒ सर्गाः᳚।
अ॒द्भ्यो॒ वा इ॒दꣳ सम॑भूत्।
तस्मा॑दि॒दꣳ सर्वं॒ ब्रह्म॑ स्वय॒म्भ्विति॑।
तस्मा॑दि॒दꣳ सर्व॒ꣳ॒ शिथि॑लमि॒वाद्ध्रुव॑मिवाभवत्।
प्र॒जाप॑ति॒र्वाव तत्।
आ॒त्मना॒त्मानं॑ वि॒धाय॑।
तदे॒वानु॒प्रावि॑शत्।
तदे॒षाऽभ्यनू᳚क्ता॥ ९७॥

((āpo̍ ha̱ yadbṛ̍ha̱tīrgarbha̱māyan̍ |
dakṣa̱ndadhā̍nā ja̱naya̍ntīssvaya̱mbhum |
tata̍ i̱me'ddhyasṛ̍jyanta̱ sargā̎ḥ |
adbhyo̱ vā i̱dam̐ sama̍bhūt |
tasmā̍di̱dam̐ sarva̱m brahma̍ svaya̱mbhviti̍ |
tasmā̍di̱dam̐ sarva̱m̐ śithi̍lami̱vāddhruva̍mivābhavat |
pra̱jāpa̍ti̱rvāva tat |
ā̱tmanā̱tmāna̍m vi̱dhāya̍ |
tade̱vānu̱prāvi̍śat |
tade̱ṣā'bhyanū̎ktā || 97 ||))

[[1-23-9]]
वि॒धाय॑ लो॒कान्वि॒धाय॑ भू॒तानि॑।

वि॒धाय॒ सर्वा᳚ः प्र॒दिशो॒ दिश॑श्च।
प्र॒जाप॑तिः प्रथम॒जा ऋ॒तस्य॑।
आ॒त्मना॒त्मान॑म॒भिसंवि॑वे॒शेति॑।
सर्व॑मे॒वेदमा॒प्त्वा।
सर्व॑मव॒रुध्य॑।
तदे॒वानु॒प्रवि॑शति।
य ए॒वं वेद॑॥ ९८॥
आसी॑दतिष्ठन्नभू॒दपो॒ वायो॒ इति॒ सेयन्दिग॒भ्यनू᳚क्ता॒ऽभ्यनू᳚क्ता॒ऽष्टौ च॑॥ २३॥

((vi̱dhāya̍ lo̱kānvi̱dhāya̍ bhū̱tāni̍ |
vi̱dhāya̱ sarvā̎ḥ pra̱diśo̱ diśa̍śca |
pra̱jāpa̍tiḥ prathama̱jā r̥̱tasya̍ |
ā̱tmanā̱tmāna̍ma̱bhisaṃvi̍ve̱śeti̍ |
sarva̍me̱vedamā̱ptvā |
sarva̍mava̱ruddhya̍ |
tade̱vānu̱pravi̍śati |
ya e̱vaṃ veda̍ || 98 ||
āsī̍datiṣṭhannabhū̱dapo̱ vāyo̱ iti̱ seyandiga̱bhyanū̎ktā̱'bhyanū̎ktā̱'ṣṭau ca̍ || 23 ||))

[[1-24-1]]
चतु॑ष्टय्य॒ आपो॑ गृह्णाति।
च॒त्वारि॒ वा अ॒पाꣳ रू॒पाणि॑।
मे॒घो॑ वि॒द्युत्।
स्त॒न॒यि॒त्नुर्वृ॒ष्टिः।
तान्ये॒वाव॑रुन्धे।
आ॒तप॑ति॒ वर्ष्या᳚ गृह्णाति।
ताः पु॒रस्ता॒दुप॑दधाति।
ए॒ता वै ब्र॑ह्मवर्च॒स्या आप॑ः।
मु॒ख॒त ए॒व ब्र॑ह्मवर्च॒सम॑वरुन्धे।
तस्मा᳚न्मुख॒तो ब्र॑ह्मवर्च॒सित॑रः॥ ९९॥

((catu̍ṣṭayya̱ āpo̍ gr̥hṇāti |
ca̱tvāri̱ vā a̱pām̐ rū̱pāṇi̍ |
me̱gho̍ vi̱dyut |
sta̱na̱yi̱tnurvr̥̱ṣṭiḥ |
tānye̱vāva̍rundhe |
ā̱tapa̍ti̱ varṣyā̎ gr̥hṇāti |

tāḥ purastādupadadhāti |
etā vai brahmavarcasyā āpaḥ |
mukhata eva brahmavarcasamavarundhe |
tasmānmukhato brahmavarcasitaraḥ || 99 ||))

[[1-24-2]]
कूप्या गृह्णाति।
ता दक्षिणत उपदधाति।
एता वै तेजस्विनीरापः।
तेज एवास्य दक्षिणतो दधाति।
तस्माद्दक्षिणोऽर्धस्तेजस्वितरः।
स्थावरा गृह्णाति।
ताः पश्चादुपदधाति।
प्रतिष्ठिता वै स्थावराः।
पश्चादेव प्रतितिष्ठति।
वहन्तीर्गृह्णाति॥ १००॥

((kūpyā gṛhṇāti |
tā dakṣiṇata upadadhāti |
etā vai tejasvinīrāpaḥ |
teja evāsya dakṣiṇato dadhāti |
tasmāddakṣiṇo'rdhastejasvitaraḥ |
sthāvarā gṛhṇāti |
tāḥ paścādupadadhāti |
pratiṣṭhitā vai sthāvarāḥ |
paścādeva pratitiṣṭhati |
vahantīrgṛhṇāti || 100 ||))

[[1-24-3]]
ता उत्तरत उपदधाति।
ओजसा वा एता वहन्तीरिवोद्यतीरिव आकूजतीरिव धावन्तीः।
ओज एवास्यौत्तरतो दधाति।
तस्मादुत्तरोऽर्ध ओजस्वितरः।
संभार्या गृह्णाति।
ता मध्य उपदधाति।
इयं वै संभार्याः।
अस्यामेव प्रतितिष्ठति।

पल्वल्या गृह्णाति।
ता उपरिष्टादुपादधाति॥ १०१॥

((tā uttarata upādadhāti ।
ojasā vā etā vahantīrivodgatīriva ākūjatīriva dhāvantīḥ ।
oja evāsyottarato dadhāti ।
tasmāduttaro'rdha ojasvitaraḥ ।
saṃbhāryā gṛhṇāti ।
tā madhya upādadhāti ।
iyaṃ vai saṃbhāryāḥ ।
asyāmeva pratitiṣṭhati ।
palvalyā gṛhṇāti ।
tā upariṣṭādupādadhāti ॥ 101 ॥))

[[1-24-4]]
असौ वै पल्वल्याः।
अमुष्यामेव प्रतितिष्ठति।
दिक्षूपदधाति।
दिक्षु वा आपः।
अन्नं वा आपः।
अद्भ्यो चा अन्नञ्जायते।
यदेवद्भ्योऽन्नञ्जायते।
तदवरुन्धे।
तं वा एतमरुणाः केतवो वातरशना ऋषयोऽचिन्वन्।
तस्मादारुणकेतुकः॥ १०२॥

((asau vai palvalyāḥ ।
amuṣyāmeva pratitiṣṭhati ।
dikṣūpadadhāti ।
dikṣu vā āpaḥ ।
annaṃ vā āpaḥ ।
adbhyo cā annañjāyate ।
yadevadbhyo'nnañjāyate ।
tadavarundhe ।
taṃ vā etamaruṇāḥ ketavo vātaraśanā ṛṣayo'cinvan ।
tasmādāruṇaketukaḥ ॥ 102 ॥))

[[1-24-5]]
तदेषाऽभ्यनूक्ता।

के॒तवो॒ अरु॑णासश्च।
ऋ॒ष॒यो वात॑रश॒नाः।
प्र॒ति॒ष्ठाꣳ श॒तधा॑हि।
स॒माहि॑तासो सहस्र॒धाय॑स॒मिति॑।
श॒तश॑श्चै॒व स॒हस्र॑शश्च॒ प्रति॑तिष्ठति।
य ए॒तम॒ग्निञ्चि॑नु॒ते।
य उ॑च्चैनमे॒वं वेद॑॥ १०३॥
ब्र॒ह्म॒व॒र्च॒सित॑रो॒ वह॑न्तीर्गृह्णाति॒ ता उ॒परि॑ष्टादु॒पाद॑धात्यारुणके॒तुको॒ऽष्टौ च॑॥ २४॥

((tade̱ṣā'bhyanū̎ktā |
ke̱tavo̱ arúṇāsaśca |
ṛ̱ṣa̱yo vātáraśa̱nāḥ |
pra̱ti̱ṣṭhāꣳ śa̱tadháhi |
sa̱māhítāso sahasra̱dhāyása̱mití |
śa̱taśáścai̱va sa̱hasráśaśca̱ pratítiṣṭhati |
ya e̱tama̱gniñcínu̱te |
ya úcainame̱vaṃ vedá || 103 ||
bra̱hma̱va̱rca̱sitáro̱ vahántīrgṛhṇāti̱ tā u̱pariṣṭādu̱pādádhātyāruṇake̱tuko̱'ṣṭau cá || 24 ||))

[[1-25-1]]
जा॒नु॒द॒घ्नीमु॑त्तरवे॒दीङ्खा॒त्वा।
अ॒पां पू॑रयति।
आ॒पꣳ स॑र्व॒त्वाय॑।
पु॒ष्क॒र॒प॒र्णꣳ रु॒क्मं पु॑रु॒षमित्यु॒प॑दधाति।
त॒पो॒ वै पु॑ष्करप॒र्णम्।
स॒त्यꣳ रु॒क्मः।
अ॒मृतं॒ पु॑रु॒षः।
ए॒ताव॒द्वावा᳚स्ति।
याव॑दे॒तत्।
याव॑दे॒वास्ति॑॥ १०४॥

((jā̱nu̱da̱ghnīmúttarave̱dīṅkhā̱tvā |
a̱pāṃ pūrayati |
ā̱paꣳ sárva̱tvāyá |
pu̱ṣka̱ra̱pa̱rṇaꣳ ru̱kmaṃ purúṣa̱mityupádadhāti |
tapo̱ vai púṣkarapa̱rṇam |

satyaṁ rukmaḥ |
amṛtaṃ puruṣaḥ |
etāvadvāvāsti |
yāvādetat |
yāvādevāsti || 104 ||))

[[1-25-2]]

तदवरुन्धे।

कूर्ममुपदधाति।

अपामेव मेधमवरुन्धे।

अथो स्वर्गस्य लोकस्य समष्ट्यै।

आपमापामपस्सर्वाः।

अस्मादस्मादितोऽमुतः।

अग्निर्वायुश्च सूर्यश्च।

सहसञ्चस्करर्द्धिया इति।

वाय्वश्वा रश्मिपतयः।

लोकं पृणच्छिद्रं पृण॥ १०५॥

((tadavarundhe |
kūrmamupadadhāti |
apāmeva medhamavarundhe |
athō svargasya lokasya samaṣṭyai |
āpamāpāmapassarvāḥ |
asmādasmādito'mutaḥ |
agnirvāyuśca sūryaśca |
sahasañcaskararddhiyā iti |
vāyvaśvā raśmipatayaḥ |
lokaṃ pṛṇacchidraṃ pṛṇa || 105 ||))

[[1-25-3]]

यास्तिस्रः परमजाः।

इन्द्रघोषा वो वसुभिरेवाह्येवेति।

पञ्चचितय उपदधाति।

पाङ्क्तोऽग्निः।

यावनेवाग्निः।

तञ्चिनुते।

लोकंपृणया द्वितीयामुपदधाति।

पञ्च॑पदा॒ वै वि॒राट्।
तस्या॒ वा इ॒यं पाद॑ः।
अ॒न्तरि॑क्षं॒ पाद॑ः।
द्यौः पाद॑ः।
दि॒शः पाद॑ः।
प॒रोर॑जाः॒ पाद॑ः।
वि॒राज्ये॒व प्रति॑तिष्ठति।
य ए॒तम॒ग्निञ्चि॑नु॒ते।
य उ॑ चैनमे॒वं वेद॑॥ १०६॥
अस्ति॑ पृणा॒न्तरि॑क्षं॒ पाद॒ः षट्च॑॥ २५॥

((yāsti̱sraḥ pa̍rama̱jāḥ |
i̱ndra̱gho̱ṣā vo̱ vasu̍bhire̱vāhye̱veti̍ |
pañca̱cita̍ya̱ upa̍dadhāti |
pāṅkto̱'gniḥ |
yāva̍ne̱vāgniḥ |
tañci̍nute |
lo̱kampṛ̍ṇayā dvi̱tīyā̱mupa̍dadhāti |
pañca̍padā̱ vai vi̱rāṭ |
tasyā̱ vā i̱yaṃ pāda̍ḥ |
a̱tnari̍kṣa̱ṃ pāda̍ḥ |
dyauḥ pāda̍ḥ |
diśa̱ḥ pāda̍ḥ |
pa̱rora̍jā̱ḥ pāda̍ḥ |
vi̱rājye̱va prati̍tiṣṭhati |
ya e̱tama̱gniñci̍nu̱te |
ya u̍ cainame̱vaṃ veda̍ || 106 ||
asti̍ pṛṇā̱ntari̍kṣa̱ṃ pāda̱ḥ ṣaṭca̍ || 25 ||))

[[1-26-1]]
अ॒ग्निं प्र॒णीयो॑पसमा॒धाय॑।
तम॒भित॑ ए॒ता अ॒बीष्ट॑का॒ उप॑दधाति।
अ॒ग्नि॒हो॒त्रे द॑र्शपूर्णमा॒सयो॑ः।
प॒शु॒बन्धे॒ चातु॑र्मा॒स्ये॑षु।
अथो॑ आहुः।
सर्वे॑षु यज्ञक्र॒तुष्विति॑।
अथ॑ ह स्माहारु॒णस्स्वा॑यंभु॒वः।

सा॒वि॒त्रस्सर्वो॒ऽग्निरित्यन॑नुषङ्गं मन्यामहे।
नाना॒ वा ए॒तेषा॑ँ वी॒र्या॑णि।
कम॒ग्निञ्चि॑नुते॥ १०७॥

((a̱gnim pra̱ṇīyo̍pasamā̱dhāya̍ ।
tama̱bhita̍ e̱tā a̱bīṣṭa̍kā̱ upa̍dadhāti ।
a̱gni̱ho̱tre da̍rśapūrṇamā̱sayo̎ḥ ।
pa̱śu̱ba̱ndhe cā̍turmā̱syeṣu̍ ।
atho̍ āhuḥ ।
sarve̍ṣu yajñakra̱tuṣviti̍ ।
atha̍ hasmāhāru̱ṇassva̍yam̱bhuva̍ḥ ।
sā̱vi̱trassarvo̱'gnirityana̍nuṣaṅgam manyāmahe ।
nānā̱ vā e̱teṣā̎m vī̱rya̍ṇi ।
kama̱gniñci̍nute ॥ 107 ॥))

[[1-26-2]]

स॒त्रि॒यम॒ग्निञ्चि॑न्वा॒नः।
कम॒ग्निञ्चि॑नुते।
सा॒वि॒त्रम॒ग्निञ्चि॑न्वा॒नः।
कम॒ग्निञ्चि॑नुते।
ना॒चि॒के॒तम॒ग्निञ्चि॑न्वा॒नः।
कम॒ग्निञ्चि॑नुते।
चा॒तु॒र्हो॒त्रि॒यम॒ग्निञ्चि॑न्वा॒नः।
कम॒ग्निञ्चि॑नुते।
वै॒श्व॒सृ॒जम॒ग्निञ्चि॑न्वा॒नः।
कम॒ग्निञ् चि॑नुते॥ १०८॥

((sa̱tri̱yama̱gniñci̍nvā̱naḥ ।
kama̱gniñci̍nute ।
sā̱vi̱trama̱gniñci̍nvā̱naḥ ।
kama̱gniñci̍nute ।
nā̱ci̱ke̱tama̱gniñci̍nvā̱naḥ ।
kama̱gniñci̍nute ।
cā̱tu̱rho̱tri̱yama̱gniñci̍nvā̱naḥ ।
kama̱gniñci̍nute ।
vai̱śva̱sṛ̱jama̱gniñci̍nvā̱naḥ ।
kama̱gniñ ci̍nute ॥ 108 ॥))

[[1-26-3]]

उ॒पा॒नु॒वा॒क्य॑मा॒शुम॒ग्निञ्चि॑न्वा॒नः ।
कम॒ग्निञ्चि॑नुते ।
इ॒ममा॑रुणकेतुकम॒ग्निञ्चि॑न्वा॒न इति॑ ।
वृषा॒ वा अ॒ग्निः ।
वृषा॑णो॒ सꣳस्फा॑लयेत् ।
ह॒न्येता᳚स्य य॒ज्ञः ।
तस्मा॒न्नानु॒षज्यः॑ ।
सोत्त॑रवे॒दि॑षु क्र॒तुषु॑ चिन्वीत ।
उ॒त्त॒र॒वे॒द्याꣳ᳚ ह्य॑ग्निश्ची॒यते᳚ ।
प्र॒जाका॑मश्चिन्वीत ॥ १०९ ॥

((u̱pā̱nu̱vā̱kya̍mā̱śuma̱gniñci̍nvā̱naḥ |
kama̱gniñci̍nute |
i̱mamā̍ruṇaketukama̱gniñci̍nvā̱na iti̍ |
vṛṣā̱ vā a̱gniḥ |
vṛṣā̍ṇo̱ saṁ̐sphā̍layet |
ha̱nyetā̎sya ya̱jñaḥ |
tasmā̱nnānu̱ṣajya̍ḥ |
sotta̍rave̱diṣu̍ kra̱tuṣu̍ cinvīta |
u̱tta̱ra̱ve̱dyāṁ̐ hya̍gniścī̱yate̎ |
pra̱jākā̍maścinvīta || 109 ||))

[[1-26-4]]
प्रा॒जा॒प॒त्यो वा ए॒षो᳚ऽग्निः ।
प्रा॒जा॒प॒त्याः प्र॒जाः ।
प्र॒जावा᳚न्भवति ।
य ए॒वं वेद॑ ।
प॒शुका॑मश्चिन्वीत ।
सं॒ज्ञानं॒ वा ए॒तत्प॑शू॒नाम् ।
यदापः॑ ।
प॒शू॒नामे॒व सं॒ज्ञाने॒ऽग्निञ्चि॑नुते ।
प॒शुमान्भ॑वति ।
य ए॒वं वेद॑ ॥ ११० ॥

((prā̱jā̱pa̱tyo vā e̱ṣo̎'gniḥ |

prājāpatyāḥ prajāḥ ।
prajāvānbhavati ।
ya evaṃ veda ।
paśukāmaścinvīta ।
saṃjñānaṃ vā etatpaśūnām ।
yadāpaḥ ।
paśūnāmeva saṃjñāne'gniñcinute ।
paśumānbhavati ।
ya evaṃ veda ॥ 110 ॥))

[[1-26-5]]

वृष्टिकामश्चिन्वीत।

आपो वै वृष्टिः।

पर्जन्यो वर्षुको भवति।

य एवं वेद।

आमयावी चिन्वीत।

आपो वै भेषजम्।

भेषजमेवास्मै करोति।

सर्वमायुरेति।

अभिचरꣳश्चिन्वीत।

वज्रो वै आपः॥ १११॥

((vṛṣṭikāmaścinvīta ।
āpo vai vṛṣṭiḥ ।
parjanyo varṣuko bhavati ।
ya evaṃ veda ।
āmayāvī cinvīta ।
āpo vai bheṣajam ।
bheṣajamevāsmai karoti ।
sarvamāyureti ।
abhicaraꣳścinvīta ।
vajro vai āpaḥ ॥ 111 ॥))

[[1-26-6]]

वज्रमेव भ्रातृव्येभ्यः प्रहरति।

स्तृणुत एनम्।

तेजस्कामो यशस्कामः।

ब्रह्मवर्चसकामस्स्वर्गकामश्चिन्वीत।

ए॒ताव॒द्वा वा᳚स्ति।

याव॑दे॒तत्।

याव॑दे॒वास्ति॑।

तदव॑रुन्धे।

तस्यै॒तद्व्र॒तम्।

वर्ष॑ति॒ न धा॑वेत्॥ ११२॥

((vajrá̍me̱va bhrātṛ̍vyebhya̱ḥ prahá̍rati ।
stṛ̱ṇu̱ta é̍nam ।
tejá̍skāmo̱ yaśá̍skāmaḥ ।
bra̱hma̱va̱rca̱sakā̍massva̱rgakā̍maścinvīta ।
e̱tāva̱dvā vā᳚sti ।
yāvá̍de̱tat ।
yāvá̍de̱vāsti̍ ।
tadavá̍rundhe ।
tasyai̱tadvra̱tam ।
varṣá̍ti̱ na dhā̍vet ॥ 112 ॥))

[[1-26-7]]

अ॒मृतं॒ वा आपः॑।

अ॒मृत॒स्यान॑न्तरित्यै।

नाप्सु मूत्र॑पुरी॒षङ्कु॑र्यात्।

न निष्ठी॑वेत्।

न वि॒वस॑नस्स्नायात्।

गुह्यो॒ वा ए॒षो᳚ऽग्निः।

ए॒तस्या॒ग्नेरन॑तिदाहाय।

न पु॑ष्करप॒र्णानि॒ हिर॑ण्यं॒ वाऽधि॒तिष्ठे᳚त्।

ए॒तस्या॒ग्नेरन॑भ्यारोहाय।

न कू॒र्मस्याश्नी॑यात्।

नोद॒कस्या॒घातु॑का॒न्येन॑मोद॒कानि॑ भवन्ति।

अ॒घातु॑का॒ आपः॑।

य ए॒तम॒ग्निञ्चि॑नु॒ते।

य उ॑ चैन॒मेवं वेद॑॥ ११३॥

चि॒नु॒ते चि॒नु॒ते प्र॒जाका॑मश्चिन्वी॒त य ए॒वं वे॒दापो॑ धावे॒दश्नी॑याच्च॒त्वारि॑ च॥ २६॥

((a̱mṛta̱ṃ vā āpa̍ḥ ।
a̱mṛta̱syānā̍ntarityai ।
nāpsu mūtra̍purī̱ṣaṅku̍ryāt ।
na niṣṭhī̍vet ।
na vi̱vasa̍nassnāyāt ।
guhyo̱ vā e̱ṣo̎'gniḥ ।
e̱tasyā̱gneranā̍tidāhāya ।
na pu̍ṣkarapa̱rṇāni̱ hira̍ṇya̱ṃ vā'dhi̱tiṣṭhe̎t ।
e̱tasyā̱gnerana̍bhyārohāya ।
na kūrma̱syāśnī̍yāt ।
noda̱kasyā̱ghātu̍kā̱nyenā̍moda̱kāni̍ bhavanti ।
a̱ghātu̍kā̱ āpa̍ḥ ।
ya e̱tama̱gniñci̍nu̱te ।
ya u̍cainame̱vaṃ veda̍ ॥ 113 ॥
ci̱nu̱te̱ ci̱nu̱te̱ pra̱jākā̍maścinvīta̱ ya e̱vaṃ vedāpo̍ dhāve̱daśnī̍yāccatvāri̍ ca ॥ 26 ॥))

[[1-27-1]]

इ॒मानु॑कं॒ भुव॑ना सीषधेम।
इन्द्र॑श्च॒ विश्वे॑ च दे॒वाः।
य॒ज्ञञ्च॑ नस्त॒न्वञ्च॑ प्र॒जाञ्च॑।
आ॒दि॒त्यैरिन्द्र॑स्स॒ह सी॑षधातु।
आ॒दि॒त्यैरिन्द्र॒स्सग॑णो म॒रुद्भिः॑।
अ॒स्माकं॑ भूत्ववि॒ता त॒नूना᳚म्।
आप्ल॑वस्व॒ प्रप्ल॑वस्व।
आ॒ण्डी भ॑व ज॒ मा मु॒हुः।
सुखादीन्दुः॑खनि॒धनाम्।
प्रति॑मुञ्चस्व॒ स्वां पु॒रम्॥ ११४॥

((i̱mānu̍ka̱ṃ bhuva̍nā sīṣadhema ।
indra̍śca̱ viśve̍ ca de̱vāḥ ।
ya̱jñañca̍ nasta̱nvañca̍ pra̱jāñca̍ ।
ā̱di̱tyairindra̍ssa̱ha sī̍ṣadhātu ।
ā̱di̱tyairindra̱ssaga̍ṇo ma̱rudbhi̍ḥ ।
a̱smāka̍ṃ bhūtvavi̱tā ta̱nūnā̎m ।
āpla̍vasva̱ prapla̍vasva ।
ā̱ṇḍī bha̍va ja̱ mā mu̱huḥ ।
sukhādīndu̍ḥkhani̱dhanām ।
prati̍muñcasva̱ svāṃ pu̱ram ॥ 114 ॥))

[[1-27-2]]

मरी॑चयस्स्वायंभु॒वाः।

ये श॑री॒राण्य॑कल्पयन्।
ते ते॑ दे॒हङ्क॑ल्पयन्तु।
मा च॑ ते॒ ख्या स्म॑ तीरिषत्।
उत्ति॑ष्ठत॒ मा स्व॑प्त।
अ॒ग्निमि॑च्छध्वं॒ भार॑ताः।
राज्ञ॒स्सोम॑स्य तृ॒प्तास॑ः।
सूर्ये॑ण स॒युजो॑षसः।
युवा॑ सु॒वासाँ॑ः।
अ॒ष्टाच॑क्रा॒ नव॑द्वारा॥ ११५॥

((mar̍icayassvāyaṃbhu̱vāḥ |
ye śa̍rī̱rāṇya̍kalpayan |
te te̍ de̱haṅka̍lpayantu |
mā ca̍ te̱ khyā sma̍ tīriṣat |
utti̍ṣṭhata̱ mā sva̍pta |
a̱gnimi̍cchadhva̱ṃ bhāra̍tāḥ |
rājña̱ssoma̍sya tṛ̱ptāsa̍ḥ |
sūrye̍ṇa sa̱yujo̍ṣasaḥ |
yuva̍ su̱vāsā̈ḥ |
a̱ṣṭāca̍krā̱ nava̍dvārā || 115 ||))

[[1-27-3]]
दे॒वानां॒ पूर॑यो॒ध्या।
तस्या॑ꣳ हिरण्म॑यः को॒शः।
स्व॒र्गो लो॒को ज्योति॒षाऽऽवृ॑तः।
यो वै ताँ ब्रह्म॑णो वे॒द।
अ॒मृते॑नाऽऽवृ॒तां पु॑रीम्।
तस्मै॑ ब्रह्म च॑ ब्र॒ह्मा॒ च।
आ॒युः कीर्तिं॑ प्र॒जान्द॑दुः।
वि॒भ्राज॑माना॒ꣳ हरि॑णीम्।
य॒शसा॑ संप॒रीवृ॑ताम्।
पुर॑ꣳ हिरण्म॑यीं ब्र॒ह्मा॥ ११६॥

((de̱vānā̱ṃ pūra̍yo̱dhyā |
tasyā̍ṃ̐ hiraṇma̍yaḥ ko̱śaḥ |
sva̱rgo lo̱ko jyoti̱ṣā''vṛ̍taḥ |

yo vai tā̐ṃ brahmaṇo veda |
amṛtenā''vṛtāṃ purīm |
tasmai brahma ca brahmā ca |
āyuḥ kīrtiṃ prajāndaduḥ |
vibhrājamānāṃ hariṇīm |
yaśasā saṃparīvṛtām |
puraṃ hiraṇmayīṃ brahmā || 116 ||))

[[1-27-4]]

विवेशाऽपराजिता।
पराङेत्यज्यामयी।
पराङेत्यनाशकी।
इह चामुत्र चान्वेति।
विद्वान्देवासुरानुभयान्।
यत्कुमारी मन्द्रयते।
यद्योषद्यत्पतिव्रता।
अरिष्टं यत्किञ्च क्रियते।
अग्निस्तदनुवेधति।
अश्रृतासश्श्रृतासश्च॥ ११७॥

((viveśā'parājitā |
parāṅetyajyāmayī |
parāṅetyanāśakī |
iha cāmutra cānveti |
vidvāndevāsurānubhayān |
yatkumārī mandrayate |
yadyoṣadyatpativratā |
ariṣṭaṃ yatkiñca kriyate |
agnistadanuvedhati |
aśṛtāsaśśṛtāsaśca || 117 ||))

[[1-27-5]]

यज्वानो येऽप्ययज्वनः।
स्वर्यन्तो नापेक्षन्ते।
इन्द्रमग्निञ्च ये विदुः।
सिकता इव संयन्ति।
रश्मिभिस्समुदीरिताः।
अस्माल्लोकादमुष्माच्च।

ऋषिभिरदात्पृश्निभिः।
अपेत वीत वि च सर्पतातः।
येऽत्र स्थ पुराणा ये च नूतनाः।
अहोभिरद्भिरक्तुभिर्व्यक्तम्॥ ११८॥

((yajvāno ye'pyayajvanaḥ |
svaryanto nāpekṣante |
indramagniñca ye viduḥ |
sikatā iva saṃyanti |
raśmibhissamudīritāḥ |
asmāllokādamuṣmācca |
ṛṣibhiradātpṛśnibhi |
apeta vīta vi ca sarpatātaḥ |
ye'tra stha purāṇā ye ca nūtanāḥ |
ahobhiradbhiraktubhirvyaktam || 118 ||))

[[1-27-6]]
यमो ददात्ववसानमस्मै।
नृ मुणन्तु नृ पात्वर्यः।
अकृष्टा ये च कृष्टजाः।
कुमारीषु कनीनीषु।
जारिणीषु च ये हिताः।
रेतःपीता आण्डपीताः।
अङ्गारेषु च ये हुताः।
उभयान्पुत्रपौत्रकान्।
युवेऽहं यमराजगान्।
शतमिन्नु शरदः॥ ११९॥

((yamo dadātvavasānamasmai |
nṛ muṇantu nṛ pātvaryaḥ |
akṛṣṭā ye ca kṛṣṭajāḥ |
kumāriṣu kanīniṣu |
jāriṇiṣu ca ye hitāḥ |
retaḥpītā āṇḍapītāḥ |
aṅgāreṣu ca ye hutāḥ |
ubhayānputrapautrakān |
yuve'haṃ yamarājagān |
śataminnu śaradaḥ || 119 ||))

[[1-27-7]]

अदो॒ यद्ब्रह्म॑ विल॒बम्।
पि॒तृ॒णाञ्च॑ य॒मस्य॑ च।
वरु॑ण॒स्याश्वि॑नोर॒ग्नेः।
म॒रुता॓ञ्च वि॒हाय॑साम्।
का॒म॒प्र॒यव॑णं मे अस्तु।
स ह्ये॑वास्मि॑ स॒नात॑नः।
इति नाको ब्रह्मिश्रवो॑ रायो॒ धनम्।
पु॒त्रानापो॑ दे॒वीरि॒हाहि॑ता॥ १२०॥
पु॒रन्नव॑द्वारा ब्र॒ह्मा च व्यक्त॑ꣳ श॒रदो॒ऽष्टौ च॑॥ २७॥

((ado̱ yadbrahma̍ vila̱bam ।
pi̱tṛ̱ṇāñca̍ ya̱masya̍ ca ।
varu̍ṇa̱syāśvi̍nora̱gneḥ ।
ma̱rutā̎ñca vi̱hāya̍sām ।
kā̱ma̱pra̱yava̍ṇaṃ me astu ।
sa hye̍vāsmi̍ sa̱nāta̍naḥ ।
iti nāko brahmiśravo̍ rāyo̱ dhanam ।
pu̱trānāpo̍ de̱vīri̱hāhi̍tā ॥ 120 ॥
pu̱rannava̍dvārā bra̱hmā ca vya̍ktam̐ śa̱rado̱'ṣṭau ca̍ ॥ 27 ॥))

[[1-28-1]]

विशी॓र्ष्णी॒ग्ं॒ गृध्र॑शीर्ष्णीञ्च।
अपेतो॑ निर्ऋ॒तिꣳ ह॑थः।
परि॑बाधꣳ श्वेत॑कु॒क्षम्।
नि॒जङ्घ॑ꣳ शब॒लोद॑रम्।
स॒ तान्वा॒च्याय॑या स॒ह।
अग्ने॒ नाश॑य सं॒दृशः॑।
ई॒र्ष्या॒सू॒ये बु॑भु॒क्षाम्।
म॒न्युं कृ॒त्याञ्च॑ दीधिरे।
रथे॑न किꣳशु॒काव॑ता।
अग्ने॒ नाश॑य सं॒दृशः॑॥ १२१॥
विशी॑र्ष्णी॒ग्ं॒ दश॑॥ २८॥

((viśī̎rṣṇī̱m̱ gṛdhra̍śīrṣṇīñca ।

apetȯ nirr̠tim̐ hȧthaḥ ।
paribādham̐ śvėtakuk̠ṣam ।
nijaṅgham̐ śaba̠lodȧram ।
sa̠ tānvā̠cyāyȧyā sa̠ha ।
agne̠ nāśȧya sam̠dr̥śȧḥ ।
ī̠rṣyā̠sū̠ye bu̇bhuk̠ṣām ।
ma̠nyuṃ kr̠tyāñcȧ dīdhire ।
rathėna kim̐śu̠kāvȧtā ।
agne̠ nāśȧya sam̠dr̥śȧḥ ॥ 121 ॥
viśi̇rṣṇīm̠ daśȧ ॥ 28 ॥))

[[1-29-1]]

प॒र्जन्या॑य प्रगा॑यत।
दि॒वस्पु॒त्राय॑ मी॒ढुषे॓।
स नो॑ य॒वस॑मिच्छतु।
इ॒दं वच॑ः प॒र्जन्या॑य स्व॒राजे॓।
हृ॒दो अ॒स्त्वन्त॑र॒न्तद्यु॑योत।
म॒यो॒भूर्वातो॑ वि॒श्वकृ॑ष्टयस्सन्त्व॒स्मे।
सु॒पि॒प्प॒ला ओष॑धीर्दे॒वगो॑पाः।
यो गर्भ॒मोष॑धीनाम्।
गवा॓ङ्कृ॒णोत्यर्व॑ताम्।
प॒र्जन्य॑ः पु॒रु॒षीणा॓म्॥ १२२॥
विशी॑र्ष्णीम्प॒र्जन्या॑य॒ दश॑दश॥ २९॥

((pa̠rjanyȧya̠ pragȧyata ।
di̠vaspu̠trāyȧ mī̠ḍhuṣe̎ ।
sa nȯ ya̠vasȧmicchatu ।
i̠daṃ vacȧḥ pa̠rjanyȧya sva̠rāje̎ ।
hr̠do a̠stvantȧra̠ntadyu̇yota ।
ma̠yo̠bhūrvātȯ vi̠śvakṙ̥ṣṭayassantva̠sme ।
su̠pi̠ppa̠lā oṣȧdhīrde̠vagȯpāḥ ।
yo garbha̠moṣȧdhīnām ।
gavā̎ṅkr̠ṇotyarvȧtām ।
pa̠rjanyȧḥ puru̠ṣīṇā̎m ॥ 122 ॥
viśi̇rṣṇīmpa̠rjanyȧya̠ daśȧdaśa ॥ 29 ॥))

[[1-30-1]]

पुन॑र्मामैत्विन्द्रि॒यम्।
पु॒नरा॒युः पु॒नर्भग॑ः।

पुन॒र्ब्राह्म॑णमैतु मा।
पुन॒र्द्रवि॑णमैतु मा।
यन्मे॒ऽद्य रेत॑ः पृथि॒वीमस्का॑न्।
यदोष॑धीर॒प्यस॑र॒द्यदाप॑ः।
इ॒दन्तत्पुन॒राद॑दे।
दी॒र्घा॒यु॒त्त्वाय॒ वर्च॑से।
यन्मे॒ रेत॒ः प्रसि॑च्यते।
यन्म॒ आजा॑यते॒ पुन॑ः।
तेन॑ माम॒मृत॑ङ्कुरु।
तेन॑ सुप्र॒जस॑ङ्कुरु॥ १२३॥
पुन॒र्द्वे च॑॥ ३०॥

((puna̍rmāmaitvindri̱yam |
puna̱rāyu̱ḥ puna̱rbhaga̍ḥ |
puna̱rbrāhma̍ṇamaitu mā |
puna̱rdravi̍ṇamaitu mā |
yanme̱'dya reta̍ḥ pṛthi̱vīmaskā̍n |
yadoṣa̍dhīra̱pyasa̍ra̱dyadāpa̍ḥ |
i̱dantatpuna̱rāda̍de |
dī̱rghā̱yu̱ttvāya̱ varca̍se |
yanme̱ reta̱ḥ prasi̍cyate |
yanma̱ ājā̍yate̱ puna̍ḥ |
tena̍ māma̱mṛta̍ṅkuru |
tena̍ supra̱jasa̍ṅkuru || 123 ||
puna̱rdve ca̍ || 30 ||))

[[1-31-1]]
अ॒द्भ्यस्तिरो॒धाऽजा॑यत।
तव॑ वैश्र॒वणस्स॑दा।
तिरो॑धेहि सप॒त्नान्न॑ः।
ये अपो॒ऽश्नन्ति॑ के॒चन।
त्वा॒ष्ट्रीं मा॒यां वैश्र॒वणः।
रथ॑ꣳ सहस्र॒वन्धु॑रम्।
पु॒रु॒श्च॒क्रꣳ सह॑स्राश्वम्।
आस्था॒याया॑हि नो ब॒लिम्।

यस्मै॑ भू॒तानि॑ ब॒लिमाव॑हन्ति।
धन॒ङ्गावो॒ ह॒स्ति॒हिर॑ण्य॒मश्वान्॑॥ १२४॥

((a̱dbhyastiro̱dhā'jā̍yata ।
tavā̍ vaiśravaṇa̱ssā̍dā ।
tiro̍dhehi sapa̱tnānnā̍ḥ ।
ye apo̱'śnanti̍ keca̱na ।
tvā̱ṣṭrīm̱ māyām̱ vai̎śrava̱ṇaḥ ।
ratham̐ sahasra̱vandhu̍ram ।
pu̱ru̱ścakram̐ saha̍srāśvam ।
āsthā̱yāyā̍hi no ba̱lim ।
yasmai̍ bhū̱tāni̍ ba̱limāvahanti ।
dhana̱ṅgāvo̱ hasti̱hira̍ṇya̱maśvān̍ ॥ 124 ॥))

[[1-31-2]]
असा॑म सु॒मतौ य॒ज्ञिय॑स्य।
श्रिय॒ं बिभ्र॑तिऽन्न॑मुखीं वि॒राज॑म्।
सु॒द॒र्श॒ने च॑ क्रो॒ञ्चे च॑।
मै॒ना॒गे च॑ म॒हागि॑रौ।
स॒तद्वा॒ट्टार॑गम॒न्ता।
स॒ꣳहार्य॒न्नग॑रं॒ तव॑।
इति मन्त्रा॑ः।
कल्पो॑ऽत ऊ॒र्ध्वम्।
यदि॒ ब॒लि॒ꣳ हरे॑त्।
हि॒र॒ण्य॒ना॒भये॑ वितु॒दये॑ कौबे॒राया॒यं ब॑लिः॥ १२५॥

((asā̍ma suma̱tau ya̱jñiyā̍sya ।
śriya̱m̱ bibhra̱ti'nnā̍mukhīm̱ vi̱rājā̎m ।
su̱da̱rśa̱ne ca̍ kro̱ñce ca̍ ।
mai̱nā̱ge ca̍ ma̱hāgi̍rau ।
sa̱tadvā̱ṭṭārā̍gama̱ntā ।
sa̱m̐hārya̱nnagā̍ra̱m̱ tavā̍ ।
iti mantrā̎ḥ ।
kalpo̍'ta ū̱rdhvam ।
yadi̱ bali̱m̐ harē̎t ।
hi̱ra̱ṇya̱nā̱bhaye̍ vitu̱daye̍ kaube̱rāyā̱yam̱ ba̍liḥ ॥ 125 ॥))

[[1-31-3]]
सर्व॑भूताधिपतये॒ नम॑ इ॒ति।

अथ ब॒लिꣳ हृ॒त्वोप॑तिष्ठे॒त।
क्ष॒त्त्रं क्ष॒त्त्रं वै॑श्रव॒णः।
ब्राह्मणा॑ वय॒ꣳ॒स्मः।
नम॑स्ते अस्तु॒ मा मा॑ हिꣳसीः।
अस्मात्प्रविश्यान्न॑मद्धी॒ति।
अथ तमग्निमा॑दधी॒त।
यस्मिन्नेतत्कर्म प्र॑युञ्जी॒त।
ति॒रोधा॒ भूः।
ति॒रोधा॒ भुव॑ः॥ १२६॥

((sarvabhūtadhipataye náma i̱ti ।
atha balim̐ hṛtvopátiṣṭhe̱ta ।
kṣa̱ttram kṣa̱ttram vaíśrava̱ṇaḥ ।
brāhmaṇá vaya̱m̱̐smaḥ ।
namáste astu̱ mā má him̐sīḥ ।
asmātpraviśyānnámaddhī̱ti ।
atha tamagnimádadhī̱ta ।
yasminnetatkarma práyuñjī̱ta ।
ti̱rodhā̱ bhūḥ ।
ti̱rodhā̱ bhuváḥ ॥ 126 ॥))

[[1-31-4]]
ति॒रोधा॒स्स्व॑ः।
ति॒रोधा॒ भूर्भुव॒स्स्व॑ः।
सर्वे॑षां लोकानामाधिपत्ये॑ सीदे॒ति।
अथ तमग्नि॑मिन्धी॒त।
यस्मिन्नेतत्कर्म प्र॑युञ्जी॒त।
ति॒रोधा॒ भूस्स्वाहा॑।
ति॒रोधा॒ भुव॒स्स्वाहा॑।
ति॒रोधा॒ स्व॑स्स्वाहा॑।
ति॒रोधा॒ भूर्भुव॒स्स्व॑स्स्वाहा॑।
यमिन्नस्य काले सर्वा॑ आहुतीर्हु॑ता॑ भवे॒युः॥ १२७॥

((ti̱rodhā̱ssváḥ ।
ti̱rodhā̱ bhūrbhuva̱ssváḥ ।
sarveṣāṃ lokānāmādhipatyé sīde̱ti ।

atha tamagni̍mindhī̱ta ।
yasminnetatkarma̱ pra̍yuñjī̱ta ।
ti̱rodhā̱ bhūssvāhā̎ ।
ti̱rodhā̱ bhuva̱ssvāhā̎ ।
ti̱rodhā̱ sva̍ssvāhā̎ ।
ti̱rodhā̱ bhūrbhuva̱ssva̍ssvāhā̎ ।
yaminnasya kāle sarvā āhutīrhuta̍ bhave̱yuḥ ॥ 127 ॥))

[[1-31-5]]

अपि॒ ब्राह्मण॑मुखी॒नाः।
तस्मि॒न्नह्नः काले॒ प्र॑युञ्जी॒त।
पर॑स्सु॒प्तज॑नाद्वे॒पि।
मास्म प्रमाद्यन्त॑माध्या॒पयेत्।
सर्वा॒र्थाः॑ सिद्ध्य॒न्ते।
य ए॒वं वे॒द।
क्षुध्यन्नि॒द॑मजा॒नताम्।
सर्वा॒र्था न॑ सिद्ध्य॒न्ते।
यस्ते॑ वि॒घातु॑को भ्रा॒ता।
ममान्तर्हृ॑दये॒ श्रितः॥ १२८॥

((api brāhmaṇa̍mukhī̱nāḥ ।
tasminnahnaḥ kāle pra̍yuñjī̱ta ।
para̍ssu̱ptaja̍nādve̱pi ।
māsma pramādyanta̍mādhyā̱payet ।
sarvārthā̎ḥ siddhya̱nte ।
ya e̍vaṃ ve̱da ।
kṣudhyannida̍majā̱natām ।
sarvārthā na̍ siddhya̱nte ।
yaste̍ vi̱ghātu̍ko bhrā̱tā ।
mamāntarhṛ̍daye̱ śritaḥ ॥ 128 ॥))

[[1-31-6]]

तस्मा॑ इ॒ममग्र॒पिण्ड॑ञ्जुहोमि।
सम॒ऽर्था॒न्मा विव॑धीत्।
मयि॒ स्वाहा॑।
रा॒जा॒धि॒रा॒जाय॑ प्रसह्यसा॒हिने॑।
नमो॑ व॒यं वै॑श्रव॒णाय॑ कुर्महे।
स मे॒ कामा॒न्काम॒कामा॑य॒ मह्य॑म्।

का॒मे॒श्व॒रो वै᳚श्रव॒णो द॑दातु।
कु॒बे॒राय॑ वैश्रव॒णाय॑।
म॒हा॒रा॒जाय॒ नम॑ः।
के॒तवो॒ अरु॑णासश्च।
ऋ॒ष॒यो वात॑रश॒नाः।
प्र॒ति॒ष्ठाꣳ श॒तधा॑ हि।
स॒माहि॑तासो सहस्र॒धाय॑सम्।
शि॒वा न॒श्शन्त॑मा भवन्तु।
दि॒व्या आप॒ ओष॑धयः।
सु॒मृ॒डी॒का सर॑स्वति।
मा ते॒ व्यो॑म सं॒दृशि॑॥ १२९॥
अश्वा᳚न्बलि॒र्भुवो॑ भवे॒युश्श्रितश्च॑ स॒प्त च॑॥ ३१॥

((tasmā̍ i̱mamagra̱piṇḍā̍ñjuhomi |
same̎'rthā̱nmā vivā̍dhīt |
mayi̱ svāhā̎ |
rā̱jā̱dhi̱rā̱jāya̍ prasahyasā̱hine̎ |
namo̍ va̱yaṃ vai̎śrava̱ṇāya̍ kurmahe |
sa me̱ kāmā̱nkāma̱kāmā̍ya̱ mahyā̎m |
kā̱me̱śva̱ro vai̎śrava̱ṇo da̍dātu |
ku̱be̱rāya̍ vaiśrava̱ṇāya̍ |
ma̱hā̱rā̱jāya̱ nama̍ḥ |
ke̱tavo̱ aru̍ṇāsaśca |
ṛ̱ṣa̱yo vāta̍raśa̱nāḥ |
pra̱ti̱ṣṭhām̐ śa̱tadhā̍ hi |
sa̱māhi̍tāso sahasra̱dhāya̍sam |
śi̱vā na̱śśanta̍mā bhavantu |
di̱vyā āpa̱ oṣa̍dhayaḥ |
su̱mṛ̱ḍī̱kā sara̍svati |
mā te̱ vyo̍ma sa̱ṃdṛśi̍ || 129 ||
aśvā̎nbali̱rbhuvo̍ bhave̱yuśśritaśca̍ sa̱pta ca̍ || 31 ||))

[[1-32-1]]
संवत्सरमेत॑द्व्रत॒ञ्चरेत्।
द्वौ᳚ वा मा॒सौ।
नियमस्स॑मासेन।
तस्मिन्नियम॑विशे॒षाः।

त्रिषवणमुदकोपस्पर्शी।
चतुर्थकालपानंभक्तस्स्यात्।
अहरहर्वा भैक्षंमश्नीयात्।
औदुम्बरीभिः समिद्भिरग्निं परिचरेत्।
पुनर्मा मैत्त्विन्द्रियमित्येतेनाऽनुवाकेन।
उद्धृतपरिपूताभिरद्भिः कार्यंङ्कुर्वीत॥ १३०॥

((saṃvatsarametádvratañcaret |
dvaú vā māsau |
niyamassámāsena |
tasminniyamáviśeṣāḥ |
triṣavaṇamudakópasparśī |
caturthakālapānábhaktassyāt |
aharaharvā bhaikṣámaśnīyāt |
audumbarībhiḥ samidbhiragníṃ paricaret |
punarmā maittvindriyamityetenā'núvākena |
uddhṛtaparipūtābhiradbhiḥ kāryáṅkurvīta || 130 ||))

[[1-32-2]]
अंसञ्चयवान्।
अग्नये वायवे सूर्याय।
ब्रह्मणे प्रजापतये।
चन्द्रमसे नक्षत्रेभ्यः।
ऋतुभ्यस्संवथ्सराय।
वरुणायारुणायेति व्रतहोमाः।
प्रवर्ग्यवंदादेशः।
अरुणाः काण्डऋषयः।
अरण्येऽधीयीरन्।
भद्रं कर्णेभिरिति द्वे जपित्वा॥ १३१॥

((ásañcayavān |
agnaye vāyavé sūryāya |
brahmaṇe prájāpataye |
candramase nákṣatrebhyaḥ |
ṛtubhyassaṃváthsarāya |
varuṇāyāruṇāyeti vrátahomāḥ |
pravargyavádādeśaḥ |
aruṇāḥ kāṇḍarṣayaḥ |

araṇye'dhīyīran |
bhadraṃ karṇebhiriti dve japitvā || 131 ||))

[[1-32-3]]
महानाम्नीभिरुदकꣳ संꣳस्पृश्य।
तमाचार्यो दद्यात्।
शिवा नश्शन्तमेत्योषधीरालभते।
सुमृडीकेति भूमिम्।
एवमपवर्गे।
धेनुर्दक्षिणा।
कꣳसं वासश्च क्षौमम्।
अन्यद्वाशुक्लम्।
यथाशक्ति वा।
एवꣳ स्वाध्यायधर्मेण।
अरण्येऽधीयीत।
तपस्वी पुण्यो भवति तपस्वी पुण्यो भवति॥ १३२॥
कुर्वीत जपित्वा स्वाध्यायधर्मेण द्वे च॥ ३२॥

भद्रꣳ स्मृतिस्साकञ्ज्ञानामक्ष्यतिताम्राण्यत्यूर्ध्वाक्ष आरोगः क्वेदमग्निश्च सहस्रवृत्पवित्रवन्त आतनुष्वाष्टयोनीं योऽसावथादित्यस्यारोगस्याथ वायोरथाग्नेर्दक्षिणापूर्वस्यामिन्द्रघोषा व आपमापां योऽपामापो वै चतुष्टय्यो जानुदघ्नीमग्निं प्रणीयेमा नुकं विशीर्ष्णी पर्जन्याय पुनरद्भ्यः संवथ्सरं द्वात्रिꣳशत्॥ ३२॥

भद्रं ज्योतिषा तस्मिन्राजानङ्कश्यपाꣳथ्सहस्रवृदियन्नपुꣳ सकमष्टयोनीमवपतन्तानामायतनवान्भवति सतो बन्धुं ता उत्तरतो वृष्टिकामो विशीर्ष्णीमसञ्चयवान्द्वात्रिꣳशदुत्तरशतम्॥ १३२॥

भद्रं तपस्वी पुण्यो भवति तपस्वी पुण्यो भवति॥

((mahānāmnībhirudakaṁ saṁ̐sparśya |
tamācāryo dadyāt |
śivā naśśantametyoṣadhīrālabhate |
sumṛḍīketi bhūmim |
evamapavarge |
dhenurdakṣiṇā |

kam̐saṃ vāsáśca kṣaumam ।
anyádvāśuklam ।
yáthāśakti vā ।
evam̐ svāddhyāyádharmeṇa ।
araṇyé'dhīyīta ।
tapasvī puṇyo bhavati tapasvī púṇyo bhavati ॥ 132 ॥
kurvīta jápitvā svāddhyāyádharmeṇa dve cá ॥ 32 ॥

bhadram̐ smṛtissākañjānāmakṣyatitāmrāṇyátyūrdhvākṣa ārogaḥ kvedamagniśca sáhasravṛtpavitrávanta ātánuṣvāṣṭayónīm yo'sāvathādityasyārogasyātha vāyorathāgnerdakṣiṇāpūrvasyāmindraghoṣā va āpámāpām yó'pāmāpo vai catúṣṭayyo jānudaghnīmagnim praṇīyemā núkam viśīrṣṇīm parjanyáya punáradbhyaḥ saṃvathsaram dvāatrim̐ śat ॥ 32 ॥

bhadraṃ jyotiṣā tasminrājānaṅkaśyapāthsahasravṛdiyannapum̐ sákamaṣṭayónīmavapatantānāmāyatánavānbhavati sato bandhum tā úttarato vṛṣṭikāmo viśīrṣṇīmásañcayavāndvātrim̐śadúttaraśatam॥ 132 ॥

bhadraṃ tapasvī puṇyo bhavati tapasvī púṇyo bhavati ॥))

[[1-0-0]]
भद्रं कर्णेभिः शृणुयाम देवाः ।
भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः ।
व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः ।
स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः ।
स्वस्ति नो बृहस्पतिर्दधातु ।
ॐ शान्तिः शान्तिः शान्तिः ॥

((bhadraṃ karṇébhiḥ śṛṇuyāmá devāḥ ।
bhadraṃ páśyemākṣabhiryajátrāḥ ।
sthirairaṅgaístuṣṭuvām̐sástanūbhiḥ ।
vyaśéma devahitam yadāyúḥ ।
svasti na indró vṛddhaśrávāḥ ।
svasti náḥ pūṣā viśvavédāḥ ।
svastinastārkṣyo ariṣṭanemiḥ ।
svasti no bṛhaspatirdadhātu ।
āūṃ śāntiḥ śāntiḥ śāntiḥ ॥))

# Taittirīya-Āraṇyaka

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 2

[[2-0-0]]

नमो॒ ब्रह्म॑णे॒ नमो॑ अस्त्व॒ग्नये॒ नम॑ः पृथि॒व्यै नम॒ ओष॑धीभ्यः ।
नमो॑ वा॒चे नमो॑ वा॒चस्पत॑ये॒ नमो॒ विष्ण॑वे बृह॒ते क॑रोमि ॥
ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

((namo̱ brahmáṇe̱ namó astva̱gnaye̱ namáḥ pṛthi̱vyai nama̱ oṣádhībhyaḥ |
namó vā̱ce namó vā̱caspatáye̱ namo̱ viṣṇáve bṛha̱te kár̍omi ||
āūṃ śānti̱ḥ śānti̱ḥ śāntíḥ ||))

[[2-1-1]]

सह॒ वै दे॒वाना॒ञ्चासु॑राणाञ्च य॒ज्ञौ प्रत॑तावास्तां व॒यꣳ स्व॒र्गं लो॒कमे॑ष्यामो व॒यमे॑ष्याम॒ इति॒
तेऽसु॑रास्स॒ंनह्य॒ सह॑सै॒वाच॑रन्ब्रह्म॒चर्ये॑ण॒ तप॑सैव दे॒वास्तेऽसु॑रा अमुह्य॒ꣳ॒स्ते न प्राजा॑न॒ꣳ॒स्ते
परा॑भव॒न्ते न स्व॒र्गं लो॒कमा॑य॒न्प्रसृ॑तेन॒ वै य॒ज्ञेन॑ दे॒वास्स्व॒र्गं
लो॒कमा॑य॒न्नप्रसृ॑ते॒नासु॑रा॒न्परा॑ऽभावय॒न्प्रसृ॑तो ह॒ वै य॑ज्ञोपवी॒तिनो॑ य॒ज्ञोऽप्र॑सृ॒तोऽनु॑पवी॒तिनो॒ यत्किञ्च॑
ब्रा॒ह्मणो य॑ज्ञोपवी॒त्यधी॑ते॒ यज॑त ए॒व तत्तस्मा॑द्यज्ञोपवी॒त्ये॑वाधी॑यीत या॒जये॒द्यजे॑त वा य॒ज्ञस्य॒ प्रसृ॑त्या॒
अजि॑न॒ं वासो॑ वा दक्षिण॒त उ॑प॒वीय॒ दक्षि॑णं बा॒हुमुद्ध॑र॒तेऽव॑धत्ते स॒व्यमिति॑ यज्ञोपवी॒तमे॒तदे॒व विप॑रीतं
प्राचीनावी॒तꣳ स॒ंवीत॑ं मानु॒षम् ॥ १ ॥ ॥ १ ॥

((saha̱ vai de̱vānā̱ñcāsúrāṇāñca ya̱jñau pratátāvāstāṃ va̱yam̐ sva̱rgaṃ lo̱kamëṣyāmo va̱yamëṣyāma̱ iti̱ te'súrāssa̱ṃnahya̱ sahásai̱vācáranbrahma̱caryéṇa̱ tapásaiva de̱vāste'súrā amuhya̱m̐ste na prājána̱m̐ste parábhava̱nte na sva̱rgaṃ lo̱kamáya̱nprasṛ́tena̱ vai ya̱jñená de̱vāssva̱rgaṃ lo̱kamáya̱nnaprasṛ́te̱nāsúrā̱nparā́'bhāvaya̱nprasṛ́to ha̱ vai yájñopavī̱tinó ya̱jño'prásṛ̱to'núpavī̱tino̱ yatkiñcá brāhma̱ṇo yájñopavī̱tyadhī́te̱ yajáta e̱va tattasmā̈dyajñopavī̱tyévādhī́yīta yā̱jaye̱dyajéta vā ya̱jñasya̱ prasṛ́tyā̱ ajínaṃ̱ vāsó vā dakṣiṇa̱ta úpa̱vīya̱ dakṣíṇaṃ bā̱humuddhára̱te'vádhatte sa̱vyamití yajñopavī̱tame̱tade̱va vipárītaṃ prācīnāvī̱tam̐ sa̱ṃvītaṃ mānu̱ṣam || 1 || || 1 ||))

[[2-2-1]]

रक्षा॑ꣳसि॒ हवा॑ पुरोनुवा॒के तपो॒ग्र॑मतिष्ठन्त॒ तान्प्र॒जाप॑तिर्व॒रेणो॒पाम॑न्त्रयत॒ तानि॒ वर॑मवृणीतादि॒त्यो नो॒ योद्धा॒ इति॒ तान्प्र॒जप॑तिरब्रवी॒द्योध॑यध्व॒मिति॒ तस्मा॒दुत्ति॒ष्ठन्त॒ꣳ हवा॒ तानि॒ रक्षा॑ꣳस्यादि॒त्यं योध॑यन्ति॒ याव॑दस्त॒मन्व॑गा॒त्तानि॑ ह॒ वा ए॒तानि॒ रक्षा॑ꣳसि गायत्रि॒याऽभि॑मन्त्रिते॒नाम्भ॑सा शाम्यन्ति॒ तदु॑ ह॒ वा ए॒ते ब्र॑ह्मवा॒दिन॑ः पू॒र्वाभि॑मु॒खास्स॒न्ध्याया॑ꣳ गयत्रि॒याऽभि॑मन्त्रिता॒ आप॑ ऊ॒र्ध्वं वि॒क्षि॑पन्ति॒ ता ए॒ता आपो॑ व॒ज्रीभू॒त्वा तानि॒ रक्षा॑ꣳसि म॒न्देहाऽरु॑ने द्वी॒पे प्र॒क्षि॑पन्ति॒ यत्प्र॑दक्षि॒नं प्रक्र॑मन्ति॒ तेन॑ पा॒प्मान॒मव॑ धून्वन्त्यु॒द्यन्त॑मस्त॒ꣳयन्त॑मादि॒त्यम॑भि॒ध्या॒यन्कु॒र्वन्ब्रा᳚ह्म॒णो वि॒द्वान्थ्स॒कल॑ꣳ भ॒द्रम॑श्नुते॒ऽसावा॑दि॒त्यो ब्र॒ह्मेति॒ ब्रह्मै॒व सन्ब्रह्मा॒प्येति॒ य ए॒वं वेद॑॥ २॥ ॥ २॥

((rakṣām̐si̱ havā́ puronuvā̱ke tapogrā́matiṣṭhanta̱ tānpra̱jāpā́tirva̱reṇo̱pāmā́ntrayata̱ tāni̱ varā́mavṛṇītādi̱tyo no̱ yoddhā̱ iti̱ tānpra̱japā́tirabravī̱dyodhā́ya̱dhvamiti̱ tasmā̱duttiṣ̱ṭhanta̱m̐ havā̱ tāni̱ rakṣā́m̐syādi̱tyam̐ yodhā́yanti̱ yāvā́dasta̱manvā́gā̱ttāni̍ ha̱ vā e̱tāni̱ rakṣā́m̐si gāyatri̱yā'bhi̍mantrite̱nāmbhā́sā śāmyanti̱ tadú ha̱ vā e̱te brā́hmavā̱dinā́ḥ pū̱rvābhi̍mu̱khāssa̱ndhyāyā́m̐ gayatri̱yā'bhi̍mantritā̱ āpá ū̱rdhvam̐ vikṣi̱panti̱ tā e̱tā āpó va̱jrībhū̱tvā tāni̱ rakṣā́m̐si ma̱ndehā'rúne dvī̱pe prakṣi̱panti̱ yatprā́dakṣi̱nam̐ prakrā́manti̱ tená pā̱pmāna̱mavá dhūnvantyu̱dyantā́mastam̱yantā́mādi̱tyamā́bhidhyā̱yanku̱rvanbrā̎hma̱ṇo vi̱dvānthsa̱kalā́m̐ bha̱dramā́śnute̱'sāvā́di̱tyo bra̱hmeti̱ brahmai̱va sanbrahmā̱pyeti̱ ya e̱vam̐ vedá || 2 || || 2 ||))

[[2-3-1]]

यद्दे॑वा दे॒वहे॑ळ॒नं॒ दे॒वा॑सश्चकृ॒मा व॒यम्।
आदि॑त्या॒स्तस्मा᳚न्मा मुञ्चत॒र्तस्य॒र्तेन॒ मामि॒त।
दे॒वा॑ जीवनका॒म्या यद्वा॒चाऽनृ॑तमूदि॒म ।
तस्मा᳚न्न इ॒ह मु॑ञ्चत॒ विश्वे॑ दे॒वास्स॒जोष॑सः ।
ऋ॒तेन॑ द्यावापृथिवी ऋ॒तेन॒ त्वꣳ स॑रस्वति।
कृ॒तान्न॑ः पा॒ह्येन॑सो॒ यत्किञ्चानृ॑तमूदि॒म।
इ॒न्द्रा॒ग्नी मि॒त्रावरु॑णौ॒ सोमो॑ धा॒ता बृह॒स्पति॑ः।
ते नो॑ मुञ्च॒न्त्वेन॑सो॒ यद॒न्यकृ॑तमारि॒म।
स॒जा॒त॒श॒ꣳसादु॒त जा॑मिश॒ꣳसाज्ज्याय॑स॒श्शꣳसा॑दु॒त वा॒ कनी॑यसः।
अना॑धृष्टं दे॒वकृ॑तं॒ यदे॒नस्तस्मा॒त्त्वम॒स्माञ्जा॑तवे॒दो मुमुग्धि॥ ३॥

((yaddévā deva̱heḻānam̱ devā́saścakṛ̱mā va̱yam |
ādi̍tyā̱stasmā̎nmā muñcata̱rtasya̱rtena̱ māmi̱ta |
devā́ jīvanakā̱myā yadvā̱cā'nṛ̍tamūdi̱ma |
tasmā̎nna i̱ha múñcata̱ viśvé devāssa̱joṣā́saḥ |
ṛ̱tenā́ dyāvāpṛthivī ṛ̱tena̱ tvam̐ sárasvati |
kṛ̱tānnā́ḥ pā̱hyenā́so̱ yatkiñcānṛ̍tamūdi̱ma |

indrāgnī mitrāvaruṇau somo dhātā bṛhaspatiḥ ।
te no muñcantvenāso yadanyakṛtamārima ।
sajātaśaṃsāduta jāmiśaṃsājjyāyasaśśaṃsāduta vā kanīyasaḥ ।
anādhṛṣṭaṃ devakṛtaṃ yadenastasmāttvamasmāñjātavedo mumugdhi ॥ 3 ॥))

[[2-3-2]]

यद्वाचा यन्मनसा बाहुभ्यामूरुभ्यामष्ठीवद्भ्याꣳ शिश्नैर्यदनृतं चकृमा वयम्।
अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता।
येन त्रितो अर्णवान्निर्बभूव येन सूर्यं तमसो निर्मुमोच।
येनेन्द्रो विश्वा अजहादरातीस्तेनाहं ज्योतिषा ज्योतिरानशान आँक्षि।
यत्कुसीदमप्रतीत्तं मयेह येन यमस्य निधिना चरामि।
एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रति तत्ते दधामि।
यन्मयि माता यदा पिपेष यदन्तरिक्षं यदाशसातिक्रामामि त्रिते देवा दिवि जाता यदाप इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयासि॥ ४॥
मुमुग्धि सप्त च॥ ३॥

((yadvācā yanmanasā bāhubhyāmūrubhyāmaṣṭhīvadbhyāṃ śiśnairyadanṛtaṃ cakṛmā vayam ।
agnirmā tasmādenaso gārhapatyaḥ pramuñcatu cakṛma yāni duṣkṛtā ।
yena trito arṇavānnirbabhūva yena sūryaṃ tamaso nirmumoca ।
yenendro viśvā ajahādarātīstenāhaṃ jyotiṣā jyotirānaśāna ākṣi ।
yatkusīdamapratīttaṃ mayeha yena yamasya nidhinā carāmi ।
etattadagne anṛṇo bhavāmi jīvanneva prati tatte dadhāmi ।
yanmayi mātā yadā pipeṣa yadantarikṣaṃ yadāśasātikrāmāmi trite devā divi jātā yadāpa imaṃ me varuṇa tattvā yāmi tvaṃ no agne sa tvaṃ no agne tvamagne ayāsi ॥ 4 ॥
mumugdhi sapta ca ॥ 3 ॥))

[[2-4-1]]

यददीव्यन्नृणमहं बभूवादित्सन्वा संजगर जनेभ्यः।
अग्निर्मा तस्मादिन्द्रश्च संविदानौ प्रमुञ्चताम्।
यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजिघ्नमानः।
उग्रंपश्या च राष्ट्रभृच्च तान्यप्सरसावनुदत्तामृणानि।
उग्रंपश्ये राष्ट्रभृत्किल्बिषाणि यदक्षवृत्तमनुदत्तमेतत्।
नेन्न ऋणानृणव इत्समानो यमस्य लोके अधिरज्जुराय।
अव ते हेळ उदुत्तम मिमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने।
संकुसुको विकुसुको निर्ऋथो यश्च निस्वनः।

तेऽ१॒स्मद्यक्ष्म॒मना॑गसो दू॒राद्दू॒रम॑चीचतम्।
निर्य॑क्ष्ममचीचते कृ॒त्यां निर्ऋ॑तिं च।
तेन॒ योऽ१॒स्मत्सम॑र्च्छाता॒ै तम॑स्मै॒ प्रसु॑वामसि।
दु॒श्श॒ꣳसा॒नु॒श॒ꣳसाभ्या॑ꣳ घ॒णेना॑नुघ॒णेन॑ च।
तेना॒न्योऽ१॒स्मत्सम॑र्च्छाता॒ै तम॑स्मै॒ प्रसु॑वामसि।
सं वर्च॑सा॒ पय॑सा॒ संत॒नूभि॒रग॑न्महि॒ मन॑सा॒ सꣳशि॒वेन॑।
त्वष्टा॑ नो॒ अत्र॒ विद॑धातु रा॒योऽनु॑मार्ष्टु त॒न्वो॑१॒ यद्विलि॑ष्टम्॥ ५॥
कृ॒त्यां निर्ऋ॑तिं च॒ पञ्च॑ च॥ ४॥

((yadadīvyannṛṇamahaṃ babhūvāditsanvā saṃjagara janebhyaḥ |
agnirmā tasmādindraśca saṃvidānau pramuñcatām |
yaddhastābhyāṃ cakara kilbiṣāṇyakṣāṇāṃ vagnumupajighnamānaḥ |
ugrampaśyā ca rāṣṭrabhṛcca tānyapsarasāvanudattāmṛṇāni |
ugrampaśye rāṣṭrabhṛtkilbiṣāṇi yadakṣavṛttamanudattametat |
nenna ṛṇānṛṇava itsamāno yamasya loke adhirajjurāya |
ava te heḷa uduttama mimaṃ me varuṇa tattvā yāmi tvaṃ no agne sa tvaṃ no agne |
saṃkusuko vikusuko nirṛtho yaśca nisvanaḥ |
te'1smadyakṣmamanāgaso dūrāddūramacīcatam |
niryakṣmamacīcate kṛtyāṃ nirṛtiṃ ca |
tena yo'1smatsamṛcchātai tamasmai prasuvāmasi |
duśśaṃsānuśaṃsābhyāṃ ghaṇenānughaṇena ca |
tenānyo'1smatsamṛcchātai tamasmai prasuvāmasi |
saṃ varcasā payasā saṃtanūbhiraganmahi manasā saṃśivena |
tvaṣṭā no atra vidadhātu rāyo'numārṣṭu tanvo1 yadviliṣṭam || 5 ||
kṛtyāṃ nirṛtiṃ ca pañca ca || 4 ||))

[[2-5-1]]
आयु॑ष्टे वि॒श्वतो॑ दधद॒यम॒ग्निर्वरे॑ण्यः।
पुन॑स्ते प्रा॒ण आया॑ति॒ परा॒ यक्ष्म॑ꣳ सुवामि ते।
आ॒यु॒र्दा अ॑ग्ने ह॒विषो॑ जुषा॒णो घृ॒तप्र॑तीको घृ॒तयो॑निरेधि।
घृ॒तं पी॒त्वा मधु॒ चारु॒ गव्यं॑ पि॒तेव॑ पु॒त्रम॒भिर॑क्षतादि॒मम्।
इ॒मम॑ग्न आयु॑षे वर्च॑से कृधि ति॒ग्ममोजो॑ वरुण॒ सꣳशि॑शाधि।
मा॒तेवा॑स्मा अदिते॒ शर्म॑ यच्छ विश्वे॑ देवा॒ जर॑दष्टि॒र्यथाऽस॑त्।
अग्न॒ आयूꣳ॑षि पवस॒ आसु॒वोर्ज॒मिषं॑ च नः।
आ॒रे बा॑धस्व दु॒च्छुना॑म्।
अग्ने॒ पव॑स्व॒ स्वपा॑ अ॒स्मे वर्च॑स्सु॒वीर्य॑म्।
दध॑द्र॒यिं मयि॒ पोष॑म्॥ ६॥

((āyu̍ṣṭe vi̱śvato̍ dadhada̱yama̱gnirvare̎ṇyaḥ |
puna̍ste prā̱ṇa āya̍ti̱ parā̱ yakṣma̐m̐ suvāmi te |
ā̱yu̱rdā a̍gne ha̱viṣo̍ juṣā̱ṇo ghṛ̱tapra̍tīko ghṛ̱tayo̍niredhi |
ghṛ̱taṃ pī̱tvā madhu̱ cāru̱ gavya̱ṃ pi̱teva̍ pu̱trama̱bhira̍kṣatādi̱mam |
i̱mama̍gna̱ āyu̍ṣe̱ varca̍se kṛdhi ti̱gmamojo̍ varuṇa̱ sam̐śi̍śādhi |
mā̱teva̎smā adite̱ śarma̍ yaccha̱ viśve̍ devā̱ jara̍daṣṭi̱ryathā'sa̍t |
agna̱ āyū̐m̐ṣi pavasa̱ āsu̱vorja̱miṣañca naḥ |
ā̱re bā̍dhasva du̱cchunā̍m |
agne̱ pava̍sva̱ svapā̍ a̱sme varca̍ssu̱vīrya̎m |
dadha̍dra̱yiṃ mayi̱ poṣa̎m || 6 ||))

[[2-5-2]]
अ॒ग्निर्ऋषि॒ः पव॑मान॒ः पाञ्च॑जन्यः पु॒रोहि॑तः।
तमी॑महे महाग॒यम्।
अग्ने॑ जा॒तान्प्रणु॑दानस्स॒पत्ना॒न्प्रत्यजा॑ताञ्जातवेदो नुदस्व।
अ॒स्मे दी॑दिहि सु॒मना॒ अहे॑ळञ्छर्म॑न्ते स्याम त्रिवरू॑थ उ॒द्भौ।
सह॑सा जा॒तान्प्रणु॑दानस्स॒पत्ना॒न्प्रत्यजा॑ताञ्जातवेदो नुदस्व।
अधि॑ नो ब्रुहि सुमन॒स्यमा॑नो व॒यꣳ स्या॑म॒ प्रणु॑दानस्स॒पत्ना॑न्।
अग्ने॒ यो नो॒ऽभितो॒ जनो॒ वृको॒ वारो॒ जिघा॑ꣳसति।
ताꣳस्त्वं वृ॑त्रहञ्जहि॒ वस्व॒स्मभ्य॒माभ॑र।
अग्ने॒ यो नो॑ऽभि॒दास॑ति समा॒नो यश्च॒ निष्ट्य॑ः।
तं व॒यꣳ स॒मिध॑ं कृ॒त्वा तुभ्य॑मग्ने॒ऽपि॑दध्मसि॥ ७॥

((a̱gnirr̥̱ṣi̱ḥ pava̍mānaḥ pāñca̍janyaḥ pu̱rohi̍taḥ |
tamī̍mahe mahāga̱yam |
agne̍ jā̱tānpraṇu̍dānassa̱patnā̱npratyajā̍tāñjātavedo nudasva |
a̱sme dī̍dihi su̱manā̱ ahe̍ḻañcharma̍nte syāma tri̱varū̍tha u̱dbhau |
saha̍sā jā̱tānpraṇu̍dānassa̱patnā̱npratyajā̍tāñjātavedo nudasva |
adhi̍ no bruhi sumana̱syamā̍no va̱yam̐ syā̍ma̱ praṇu̍dānassa̱patnā̍n |
agne̱ yo no̱'bhito̱ jano̱ vṛko̱ vāro̱ jighā̍m̐sati |
tām̐stvaṃ vṛ̍trahañjahi̱ vasva̱smabhya̱mābha̍ra |
agne̱ yo no̍'bhi̱dāsa̍ti samā̱no yaśca̱ niṣṭya̍ḥ |
taṃ va̱yam̐ sa̱midha̍ṃ kṛ̱tvā tubhya̍ma̱gne'pi̍dadhmasi || 7 ||))

[[2-5-3]]
यो न॒श्शपा॒दश॑पतो॒ यश्च॑ न॒श्शप॑त॒श्शपा॑त्।
उ॒षाश्च॒ तस्मै॑ नि॒म्रुक्च॒ सर्व॑ं पा॒पꣳ सम्॒ूहताम्।
यो न॑स्स॒पत्नो॒ यो रणो॒ मर्तो॑ऽभि॒दास॑ति देवाः।

इ॒ध्मस्ये॑व प्र॒क्षाय॑तो॒ मा तस्योच्छे॑षि॒ किञ्च॒न।
यो मां द्वेष्टि॑ जातवेदो॒ यं चा॒हं द्वेष्मि॒ यश्च॒ माम्।
सर्वा॒ꣳस्तान॑ग्ने॒ सन्द॑ह॒ याꣳश्चा॒हं द्वेष्मि॒ ये च॒ माम्।
यो अ॒स्मभ्य॑मराती॒याद्यश्च॑ नो॒ द्वेष॑ते॒ जन॑ः।
निन्दा॒द्यो अ॒स्मान्दिप्सा᳚च्च॒ सर्वा॒ꣳस्तान्म॑ष्म॒षा कु॑रु।
सꣳशि॑तं मे॒ ब्रह्म॒ सꣳशि॑तं वी॒र्या॑१ं॒ बल᳚म्।
सꣳशि॑तं क्ष॒त्त्रं मे॑ जि॒ष्णु यस्या॒हमस्मि॑ पु॒रोहि॑तः।
उदे॑षां बा॒हु अ॑तिर॒मुद्वर्चो॒ अथो॒ बल᳚म्।
क्षि॒णोमि॒ ब्रह्म॑णा॒ऽमित्रा॒नुन्न॑यामि॒ स्वाँ२ अ॒हम्।
पुन॒र्मन॒ः पुन॒रायु॒र्म आगा॒त्पुन॒श्चक्षु॒ः पुन॒श्श्रोत्रं॑ म॒ आगा॒त्पुन॑ः प्रा॒णः पुन॒राकू॑तं म॒ आगा॒त्पुन॑श्चि॒त्तं
पुन॒राधी॑तं म॒ आगा᳚त्।
वै॒श्वा॒न॒रो मेऽद॑ब्धस्तनू॒पा अव॑बाधतां दु॒रि॒तानि॒ विश्वा᳚॥ ८॥
पोषं॑ दध्मसि पु॒रोहि॑तश्च॒त्वारि॑ च॥ ५॥

((yo na̱śśapā̱daśa̍pato̱ yaśca̍ naśśapa̍ta̱śśapā̎t |
u̱ṣāśca̱ tasmai̍ ni̱mrukca̱ sarva̍ṁ pāpa̍ṁ samū̍hatām |
yo na̍ssa̱patno̱ yo ra̱ṇo̱ marto̍'bhi̱dāsa̍ti devā̱ḥ |
i̱dhmasye̍va pra̱kṣāya̍to̱ mā tasyocche̍ṣi̱ kiñca̱na |
yo māṃ dveṣṭi̍ jātavedo̱ yaṃ cā̱haṃ dveṣmi̱ yaśca̱ mām |
sarvā̱m̐stāna̍gne̱ sanda̍ha̱ yām̐ścā̱haṃ dveṣmi̱ ye ca̱ mām |
yo a̱smabhya̍marātī̱yādyaśca̍ no̱ dveṣa̍te̱ jana̍ḥ |
nindā̱dyo a̱smāndipsā̎cca̱ sarvā̱m̐stānma̍ṣma̱ṣā ku̍ru |
sam̐śi̍taṃ me̱ brahma̱ sam̐śi̍taṃ vī̱ryā̍ṃ1̱ balā̎m |
sam̐śi̍taṃ kṣa̱ttraṃ me̍ ji̱ṣṇu yasyā̱hamasmi̍ pu̱rohi̍taḥ |
ude̍ṣāṃ bā̱hu a̍tira̱mudvarco̱ atho̱ balā̎m |
kṣi̱ṇomi̱ brahma̍ṇā̱'mitrā̱nunna̍yāmi̱ svām̐2 a̱ham |
puna̱rmana̱ḥ puna̱rāyu̍rma̱ āgā̱tpuna̱ścakṣu̱ḥ puna̱śśrotra̍ṁ ma̱ āgā̱tpuna̍ḥ prā̱ṇaḥ
puna̱rākū̍taṃ ma̱ āgā̱tpuna̍ści̱ttaṃ puna̱rādhī̍taṃ ma̱ āgā̎t |
vai̱śvā̱na̱ro me'da̍bdhastanū̱pā ava̍bādhatāṃ duri̱tāni̱ viśvā̎ || 8 ||
poṣa̍ṁ dadhmasi pu̱rohi̍taśca̱tvāri̍ ca || 5 ||))

[[2-6-1]]
वै॒श्वा॒न॒राय॒ प्रति॑वेदयामो॒ यदी॑नृ॒णꣳ स॑ङ्ग॒रो दे॒वता॑सु।
स ए॒तान्पाशा᳚न्प्र॒मुच॒न्प्रवे॑द॒ स नो॑ मुञ्चातु दु॒रि॒ताद॒वद्यात्।
वै॒श्वा॒न॒रः पव॑यान्नः प॒वित्रै॒र्यत्स॑ङ्ग॒रम॒भिधावा᳚म्या॒शाम्।
अना॑जान॒न्मन॑सा॒ याच॑मानो॒ यद॒त्रैनो॒ अव॒ तत्सु॑वामि।
अ॒मी ये सु॒भगे॑ दि॒वि वि॒चृतौ॒ नाम॒ तार॑के।

प्रेहामृतस्य यच्छतामेतद्बद्धकमोचनम्।
विजिहीर्ष्व लोकान्कृधि बन्धान्मुञ्चासि बद्धकम्।
योनेरिव प्रच्युतो गर्भस्सर्वान्पथो अनुष्व।
स प्रजानन्प्रतिगृभ्णीत विद्वान्प्रजापतिः प्रथमजा ऋतस्य।
अस्माभिर्दत्तं जरसः परस्तादच्छिन्नं तन्तुमनुसञ्चरेम॥ ९॥

((vaiśvānarāya prativedayāmo yadinṛṇam̐ saṅgaro devatāsu |
sa etānpāśānpramucanpraveda sa no muñcātu duritādavadyāt |
vaiśvānaraḥ pavayānnaḥ pavitrairyatsaṅgaramabhidhāvāmyāśām |
anājānanmanasā yācamāno yadatraino ava tatsuvāmi |
amī ye subhage divi vicṛtau nāma tārake |
prehāmṛtasya yacchatāmetadbaddhakamocanam |
vijihīrṣva lokānkṛdhi bandhānmuñcāsi baddhakam |
yoneriva pracyuto garbhassarvānpatho anuṣva |
sa prajānanpratigṛbhṇīta vidvānprajāpatiḥ prathamajā ṛtasya |
asmābhirdattam jarasaḥ parastādacchinnam tantumanusañcarema || 9 ||))

[[2-6-2]]
ततं तन्तुमन्वेके अनुसञ्चरन्ति येषां दत्तं पित्र्यमायनवत्।
अबन्ध्वेके ददतः प्रयच्छाद्दातुं चेच्छक्नवाꣳस्सस्स्वर्ग एषाम्।
आरभेथामनुसꣳरभेथाꣳ समानं पन्थामवथो घृतेन।
यद्वां पूर्तं परिविष्टं यदग्नौ तस्मै गोत्रायेह जायापती सꣳरभेथाम्।
यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिꣳसिम।
अग्निर्मा तस्मादेनसो गार्हपत्य उन्नो नेषद्दुरिता यानि चकृम।
भूमिर्माताऽदितिर्नो जनित्रं भ्राताऽन्तरिक्षमभिशस्त्या नः।
द्यौर्नः पिता पितृयाच्छं भवासि जामि मित्वा मा विवित्सि लोकात्।
यत्र सुहार्दस्सुकृतो मदन्ते विहाय रोगं तन्वा१ꣳ स्वायाम्।
अश्लोणाङ्गैरह्रुतास्स्वर्गे तत्र पश्येम पितरं च पुत्रम्।
यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वा करिष्यन्न्।
यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्च प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु।
यदन्नमद्मि बहुधा विरूपं वासो हिरण्यमुत गामजामविम्।
यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्च प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु।
यन्मया मनसा वाचा कृतमेनः कदाचन।
सर्वस्मात्तस्मान्मेळितो मोग्धि त्वꣳ हि वेत्थ यथातथम्॥ १०॥

च॒रे॒म पु॒त्रꣳ षट्च॑॥ ६॥

((ta̱taṃ tantu̱manveke̱ anu̱sañcaranti̱ yeṣām̐ da̱ttaṃ pitrya̱māyanavat ।
a̱bandhveke̱ dadataḥ pra̱yacchā̱ddātu̱m cecchaknavā̱m̐sassva̱rga eṣām ।
ārabhethā̱manu̱sam̐rabhethām̐ samā̱naṃ panthāmavatho ghṛ̱tena ।
yadvām̐ pūrtaṃ parivi̱ṣṭaṃ yada̱gnau tasmai̱ gotrāye̱ha jāyāpatī̱ sam̐rabhethām ।
yada̱ntarikṣaṃ pṛthi̱vīmu̱ta dyāṃ yanmā̱taram̐ pi̱taram̐ vā jihim̐si̱ma ।
a̱gnirmā̱ tasmā̱denaso̱ gārhapatya̱ unno neṣadduri̱tā yāni cakṛ̱ma ।
bhūmirmātā'ditirno ja̱nitraṃ bhrātā̱'ntarikṣama̱bhiśasta enaḥ ।
dyaurnaḥ pi̱tā pi̱tryācchaṃ bhavāsi jā̱mi mi̱tvā mā vivitsi lo̱kāt ।
yatra su̱hārdassu̱kṛto̱ madante vi̱hāya̱ rogam̐ ta̱nvā1m̐ svāyām ।
a̱ślo̱ṇāṅgai̱rahrutāssva̱rge tatra paśyema pi̱taram̐ ca pu̱tram ।
yadanna̱madmyanṛtena devā dāsyannadāsyannu̱ta vā kari̱ṣyann ।
yadde̱vānā̱m cakṣu̱ṣyāgo̱ asti̱ yade̱va kiñca pratijagrā̱hama̱gnirmā̱ tasmādanṛ̱ṇaṃ kṛṇotu ।
yadanna̱madmi bahu̱dhā virūpa̱ṃ vāso̱ hiraṇyamu̱ta gāma̱jāmavim ।
yadde̱vānā̱m cakṣu̱ṣyāgo̱ asti̱ yade̱va kiñca pratijagrā̱hama̱gnirmā̱ tasmādanṛ̱ṇaṃ kṛṇotu ।
ya̱nmayā manasā vā̱cā̱ kṛ̱ta̱menaḥ ka̱dā̱cana ।
sarvasmāttasmānmeli̱to mo̱gdhi̱ tvam̐ hi vettha yathāta̱tham ॥ 10 ॥
ca̱re̱ma pu̱tram̐ ṣaṭca ॥ 6 ॥))

[[2-7-1]]

वात॑रशना ह॒ वा ऋष॑यश्श्रमणा ऊर्ध्वम॑न्थिनो बभूवु॒स्तानृष॑यो॒ऽर्थमा॑य॒ꣳस्ते
नि॒लाय॑मचर॒ꣳस्तेऽनु॑प्रविशुः कूश्माण्डानि॒ तꣳस्तेष्वन्व॑विन्दञ्छ्रद्धया॑ च॒ तप॑सा च॒
तानृष॑योऽब्रुवन्क॒था नि॒लायं॑ चर॒थेति॒ त ऋषीनब्रुवन्नमो॑ वोऽस्तु भगवन्तो॒ऽस्मिन्धाम्नि॒ केन॑
वस्सपर्या॒मेति॒ तानृष॑योऽब्रुवन्प॒वित्रं॑ नो ब्रूत॒ येना॑रे॒पस॑स्स्या॒मेति॒ त ए॒तानि॑ सू॒क्तान्य॑पश्यन्यद्दे॑वा
दे॒वहेळ॑नं॒ यद्दी॒व्यन्नृणम॒हं ब॒भुवायु॑ष्टे वि॒श्वतो॑ द॒धदित्ये॒तैराज्यं॑ जुहुत वैश्वान॒राय॒ प्रति॑वेदया॒म
इत्युप॑तिष्ठत॒ यद॑र्वाचीन॒मेनो॑ भ्रूणह॒त्याया॒स्तस्मा॑न्मोक्ष्यध्व॒ इति॒ त
ए॒तैर॑जुहवु॒स्तेऽरे॒पसो॑ऽभवन्कर्मा॒दिष्वे॒तैर्जु॑हुयात्पू॒तो दे॑वलो॒कान्थ्सम॑श्नुते॥ ११॥ ॥ ७॥

((vātaraśanā ha̱ vā ṛṣayaśśramaṇā ūrdhvamanthi̱no
babhūvu̱stānṛṣayo̱'rthamāya̱m̐ste ni̱lāyamacara̱m̐ste'nupraviśuḥ kūśmā̱ṇḍāni̱
tam̐steṣvanvavindañchra̱ddhayā ca̱ tapasā ca̱ tānṛṣayo'bruvanka̱thā ni̱lāyam̐
cara̱theti̱ ta ṛṣinabruva̱nnamo vo'stu bhagavanto̱'smindhāmni̱ kena vassaparyā̱meti̱
tānṛṣayo'bruvanpa̱vitram̐ no brūta̱ yenāre̱pasassyā̱meti̱ ta e̱tāni
sū̱ktānyapaśya̱nyaddevā deva̱heḻa̱naṃ yaddivyannṛ̱ṇama̱haṃ ba̱bhuvāyuṣṭe vi̱śvato
dadha̱dityetairājyam̐ juhuta vaiśvāna̱rāya̱ prativedayāma̱ ityupatiṣṭhata̱
yadarvā̱cīna̱menŏ bhrū̱ṇaha̱tyāyā̱stasmānmokṣyadhva̱ iti̱ ta
e̱tairājuhuvu̱ste're̱paso'bhavankarmā̱diṣve̱tairjuhuyātpū̱to devalo̱kānthsamaśnute ॥ 11 ॥ ॥ 7 ॥))

[[2-8-1]]

कू॒श्मा॒ण्डैर्जु॑हुया॒द्योऽपू॑त इव॒ मन्ये॑त॒ यथा᳚ स्ते॒नो यथा᳚ भ्रूण॒हैवमे॒ष भ॑वति॒ योऽयोनौ॒ रेत॑स्सि॒ञ्चति॒ यद॒र्वा॑चीन॒मेनो᳚ भ्रूणह॒त्याया॒स्तस्मा᳚न्मुच्यते॒ याव॒देनो॑ दी॒क्षामु॒पैति॑ दीक्षि॒त ए॒तैस्स॑त॒ति जु॑होति सं॒वथ्स॒रं दी᳚क्षि॒तो भ॑वति संवथ्स॒रादे॒वात्मानं॑ पुनीते॒ मासं॑ दीक्षि॒तो भ॑वति॒ यो मास॒स्स सं॑वथ्स॒रस्सं॑वथ्स॒रादे॒वात्मानं॑ पुनीते॒ चतु॑र्वि॒ꣳशति॒ꣳ॒ रात्री᳚र्दीक्षि॒तो भ॑वति॒ चतु॑र्वि॒ꣳशतिरर्धमा॒सास्सं॑वथ्स॒रस्सं॑वथ्स॒रादे॒वात्मानं॑ पुनीते॒ द्वाद॑श॒ रात्री᳚र्दीक्षि॒तो भ॑वति॒ द्वाद॑श॒ मासा᳚स्संवथ्स॒रस्सं॑वथ्स॒रादे॒वात्मानं॑ पुनीते॒ षड्रा॒त्री᳚र्दीक्षि॒तो भ॑वति॒ षड्वा ऋ॒तव॑स्संवथ्स॒रस्सं॑वथ्स॒रादे॒वात्मानं॑ पुनीते ति॒स्रो रात्री᳚र्दीक्षि॒तो भ॑वति त्रि॒पदा॑ गाय॒त्री गा॑यत्रि॒या ए॒वात्मानं॑ पुनीते॒ न मा॒ꣳ॒सम॑श्नीया॒न्न स्त्रिय॒मुपे॑या॒न्नोपर्या॑सीत॒ जुगु॑प्से॒तानृ॑ता॒त्पयो᳚ ब्राह्म॒णस्य॑ व्र॒तं यवा॒गू रा॑ज॒न्य॑स्या॒मिक्षा॒ वैश्य॒स्याथो॑ सौ॒म्येऽप्य॑ध्व॒र ए॒तद्व्र॒तं ब्रु॑या॒द्यदि॒ मन्ये॑तोप॒दस्या॒मीत्यो॑द॒नं धा॒नास्स॒क्तू᳚न्घृ॒तमित्यनु॑व्रतये॒दा॒त्मनोऽनु॑पदासाय॥ १२॥ ॥ ८॥

((kūśmāṇḍairjuhuyādyo'pūta iva manyeta yathā steno yathā bhrūṇahaivameṣa bhavati yo'yonau retassiñcati yadarvācīnamenō bhrūṇahatyāyāstasmānmucyate yāvadeno dīkṣāmupaiti dīkṣita etaissatati juhoti saṃvathsaraṃ dīkṣito bhavati saṃvathsarādevātmānaṃ punīte māsaṃ dīkṣito bhavati yo māsassa saṃvathsarassaṃvathsarādevātmānaṃ punīte caturviṃśatiṃ rātrīrdīkṣito bhavati caturviṃśatirardhamāsāssaṃvathsarassaṃvathsarādevātmānaṃ punīte dvādaśa rātrīrdīkṣito bhavati dvādaśa māsāssaṃvathsarassaṃvathsarādevātmānaṃ punīte ṣaḍrātrīrdīkṣito bhavati ṣaḍvā ṛtavassaṃvathsarassaṃvathsarādevātmānaṃ punīte tisro rātrīrdīkṣito bhavati tripadā gāyatrī gāyatriyā evātmānaṃ punīte na māṃsamaśnīyānna striyamupeyānnoparyasīta jugupsetānṛtātpayō brāhmaṇasya vrataṃ yavāgū rājanyasyāmikṣā vaiśyasyātho saumye'pyadhvara etadvrataṃ bruyādyadi manyetopadasyāmītyodanaṃ dhānāssaktūnghṛtamityanuvratayedātmano'nupadāsāya || 12 || || 8 ||))

[[2-9-1]]

अ॒जान्ह॒ वै पृश्नी॑ꣳस्तप॒स्यमा॑ना॒न्ब्रह्म॑ स्व॒यम्भ्व॑भ्यान॑र्ष॒त्त ऋष॑योऽभव॒न्तदृषी॑णामृषि॒त्वं तां दे॒वता॒मुपा॑तिष्ठन्त य॒ज्ञका॑मा॒स्त ए॒तं ब्र॑ह्मय॒ज्ञम॑पश्य॒न्तमाऽह॑र॒न्तेना॑यजन्त॒ यदृचोऽध्यगी॑षत॒ ताः पय॑ आहुतयो दे॒वाना॑मभव॒न्यद्यजू॑ꣳषि घृ॒ताहु॑तयो॒ यत्सामा॑नि॒ सोमा॑हुतयो॒ यदथ॑र्वाङ्गि॒रसो॒ मध्वा॑हुतयो॒ यद्ब्रा᳚ह्मणानी॑तिहा॒सान्पु॑रा॒णानि॒ कल्पा॒न्गाथा॑ नाराश॒ꣳ॒सीर्मे॑दाहु॒तयो॑ दे॒वाना॑मभव॒न्ताभिः॑ क्षु॒धं॑ पा॒प्मान॒मपा᳚घ्नन्नप॑हतपाप्मानो दे॒वास्स्व॒र्गं लो॒कमा॑य॒न्ब्रह्म॑ण॒स्सायु॑ज्यमृ॒ष॑योऽगच्छन्॥ १३॥ ॥ ९॥

((ajān ha vai pṛśnīṃstapasyamānānbrahma svayambhvabhyānarṣatta ṛṣayo'bhavantadṛṣiṇāmṛṣitvaṃ tāṃ devatāmupātiṣṭhanta yajñakāmāsta etaṃ brahmayajñamapaśyantamā'harantenāyajanta yadṛco'dhyagiṣata tāḥ paya āhutayo devānāmabhavanyadyajuṃṣi ghṛtāhutayo yatsāmāni somāhutayo yadatharvāṅgiraso madhvāhutayo yadbrāhmaṇānitihāsānpurāṇāni kalpāṅgāthā

nārāśa̱ṁ̐sīrme̍dāhu̱tayo̍ de̱vānā̱mabhava̱ntābhi̱ḥ kṣudha̱ṁ
pā̱pmāna̱mapa̱ghna̱nnapa̍hatapāpmāno de̱vāssva̱rga̱ṁ
lo̱kamā̍ya̱nbrahma̍ṇa̱ssāyu̍jya̱mṛ̱ṣa̍yo'gacchan || 13 || || 9 ||))

[[2-10-1]]

पञ्च॒ वा ए॒ते म॑हाय॒ज्ञास्स॑त॒ति प्रता॑यन्ते सत॒ति सन्ति॑ष्ठन्ते देवय॒ज्ञः पि॑तृय॒ज्ञो भू॑तय॒ज्ञो म॑नुष्यय॒ज्ञो ब्र॑ह्मय॒ज्ञ इ॒ति यद॒ग्नौ जु॒होत्य॒पि स॒मिधं॒ तद्दे॑वय॒ज्ञस्सन्ति॑ष्ठते
यत्पि॒तृभ्य॑स्स्व॒धाक॒रोत्यप्य॒पस्तत्पि॑तृय॒ज्ञस्सन्ति॑ष्ठते॒ यद्भू॒तेभ्यो॑ ब॒लिꣳ हर॑ति॒ तद्भू॒तय॒ज्ञस्सन्ति॑ष्ठते
यद्ब्रा॒᳚ह्मणेभ्योऽन्नं॒ दद॑ाति॒ तन्म॑नुष्यय॒ज्ञस्सन्ति॑ष्ठते॒ यत्स्वा॒᳚ध्याय॒मधी॑यी॒तैका॑मप्यृ॒चं यजु॒स्साम॑ वा॒ तद्ब्र॑ह्मय॒ज्ञस्सन्ति॑ष्ठते॒ यदृ॒चोऽधी॑ते॒ पय॑सः कू॒ल्या॑ अस्य पि॒तॄन्थ्स्व॒धा अ॒भिव॑हन्ति॒ यद्यजू॒ꣳषि घृ॒तस्य॑ कू॒ल्या॒ यत्सामा॑नि॒ सोम॑ ए॒भ्यः पवते॒ यदथ॑र्वाङ्गिरसो॒ मधो॒ः कू॒ल्या॒ यद्ब्रा॒᳚ह्मणानी॑तिहा॒सान्पु॑रा॒णानि॒ कल्पा॒न्गाथा॑ नाराश॒ꣳसीर्मे॑द॒सः कू॒ल्या॑ अस्य पि॒तॄन्थ्स्व॒धा अ॒भिव॑हन्ति॒ यदृ॒चोऽधी॑ते॒ पय॑ आहु॒तिभि॑रे॒व तद्दे॒वाꣳस्त॑र्पयति॒ यद्यजू॒ꣳषि घृ॒ताहु॑तिभि॒र्यत्सामा॑नि॒ सोमा॑हुतिभि॒र्यदथ॑र्वाङ्गिरसो॒ मध्वा॑हुतिभि॒र्यद्ब्रा॒᳚ह्मणानी॑तिहा॒सान्पु॑रा॒णानि॒ कल्पा॒न्गाथा॑ नाराश॒ꣳसीर्मे॒दाहु॑तितिभि॑रे॒व तद्दे॒वाꣳस्त॑र्पयति॒ त ए॑नं तृ॒प्ता आयु॑षा॒ तेज॑सा॒ वर्च॑सा श्रि॒या यश॑सा ब्रह्मव॒र्चसेना॒न्नाद्ये॑न च तर्पयन्ति॥ १४॥ ॥ १०॥

((pañca̱ vā e̱te ma̍hāya̱jñāssa̍ta̱ti pratā̍yante sata̱ti santi̍ṣṭhante devaya̱jñaḥ pi̍tṛya̱jño bhū̍taya̱jño ma̍nuṣyaya̱jño bra̍hmaya̱jña iti̱ yada̱gnau ju̱hotya̱pi sa̱midha̱ṁ tadde̍vayajñassanti̍ṣṭhate̱
yatpi̱tṛbhya̍ssva̱dhāka̱rotyapya̱pastatpi̍tṛya̱jñassanti̍ṣṭhate̱ yadbhū̱tebhyo̍ ba̱li̱ṁ̐ hara̍ti̱ tadbhū̱taya̱jñassanti̍ṣṭhate̱ yadbrā̎hma̱ṇebhyo'nna̱ṁ dadā̍ti̱ tanma̍nuṣyaya̱jñassanti̍ṣṭhate̱ yatsvā̎dhyā̱yamadhī̍yī̱taikā̍mapyṛ̱caṁ yaju̱ssāma̍ vā̱ tadbra̍hmaya̱jñassanti̍ṣṭhate̱ yadṛ̱co'dhī̍te̱ paya̍saḥ kūlyā̍ asya pi̱tṝnthsva̱dhā a̱bhiva̍hanti̱ yadyajū̱ṁ̐ṣi ghṛ̱tasya̍ kūlyā̱ yatsāmā̍ni̱ soma̍ ebhyaḥ pavate̱ yadatha̍rvāṅgi̱raso̱ madho̍ḥ kūlyā̱ yadbrā̎hma̱ṇānī̍tihā̱sānpu̍rā̱ṇāni̱ kalpā̱ngāthā̍ nārāśa̱ṁ̐sīrmeda̍sa̱ḥ kūlyā̍ asya pi̱tṝnthsva̱dhā a̱bhiva̍hanti̱ yadṛ̱co'dhī̍te̱ paya̍ āhutibhire̱va tadde̱vā̱ṁ̐sta̍rpayati̱ yadyajū̱ṁ̐ṣi ghṛ̱tāhu̍tibhi̱ryatsāmā̍ni̱ somā̍hutibhi̱ryadatha̍rvāṅgi̱raso̱ madhvā̍hutibhi̱ryadbrā̎hma̱ṇānī̍tihā̱sānpu̍rā̱ṇāni̱ kalpā̱ngāthā̍ nārāśa̱ṁ̐sīrme̍dāhu̱titibhi̍re̱va tadde̱vā̱ṁ̐sta̍rpayati̱ ta e̍naṁ tṛ̱ptā āyu̍ṣā̱ teja̍sā̱ varca̍sā śri̱yā yaśa̍sā brahmavarca̱senā̱nnādye̍na ca tarpayanti || 14 || || 10 ||))

[[2-11-1]]

ब्र॒ह्मय॒ज्ञेन॑ य॒क्ष्यमा॑णः प्राच्या॒᳚ दि॒शि ग्रा॒माद॒च्छ॑दि॒र्दर्॑श उदी॒᳚च्यां प्रा॒गुदी॒च्यां वोदि॑त आदि॒त्ये द॑क्षिणत उ॑पवीयो॒पवि॑श्य हस्ता॑वव॒निज्य॒ त्रिरा॒चामे॒द्द्विः परि॑मृ॒ज्य॑ स॒कृदु॒पस्पृ॒श्य॒ शिर॒श्चक्षु॑षी॒ नासि॑के॒ श्रोत्रे॒ हृद॑यमा॒लभ्य॒ यत्त्रिरा॒चाम॑ति॒ तेन॒ ऋच॑ः प्रीणाति॒ यद्द्विः परि॑मृ॒जति॒ तेन॒ यजू॒ꣳषि यत्स॒कृदु॒पस्पृ॒शति॒ तेन॒ सामा॑नि॒ यत्स॒व्यं पा॒णिं पादौ॑ प्रो॒क्षति॒ यच्छिर॒श्चक्षु॑षी॒ नासि॑के॒ श्रोत्रे॒ हृद॑यमा॒लभ॑ते॒ तेना॑थर्वाङ्गि॒रसो॑ ब्राह्मणानी॑तिहा॒सान्पु॑रा॒णानि॒ कल्पा॒न्गाथा॑ नाराश॒ꣳसीः प्रीणाति॒ द॒र्भाणां॑

म॒ह॒दु॑प॒स्तीर्यो॑पस्थं॑ कृ॒त्वा प्राङासी॑नस्स्वाध्या॒यमधी॑यीता॒पां वा ए॒ष औष॑धीना॒ꣳ॒ रसो॒ यद्द॒र्भास्सर॑समे॒व ब्रह्म॑ कुरुते दक्षिणोत्त॒रौ पा॒णी पादौ॑ कृ॒त्वा सप॒वित्रा॒वोमिति॒ प्रति॑पद्यत ए॒तद्वै य॒जुस्त्र॒यीं वि॒द्यां प्रत्ये॒षा वागे॒तत्प॑र॒मम॒क्ष॒रं॒ तदे॒तदृ॒चाऽभ्यु॑क्त मृ॒चो अ॒क्षरे॑ पर॒मे व्यो॑म॒न्यस्मि॑न्दे॒वा अधि॒ विश्वे॑ निषे॒दुर्यस्तन्न वेद॒ किमृ॒चा क॑रिष्यति॒ य इत्ताद्वि॒दुस्त इ॒मे समा॑सत॒ इति॒ त्रीने॒व प्रायु॑ङ्क्त॒ भूर्भुव॒स्स्व॑रित्या॑है॒तद्वै वाच॑स्स॒त्यं यदे॒व वा॒च॑स्स॒त्यं तत्प्रायु॒ङ्क्ताथ॑ सावि॒त्रीं गा॑य॒त्रीं त्रिरन्वा॑ह प॒च्छोऽर्ध॒र्च॒शोऽनवा॒नꣳ॒ स॑वि॒ता श्रियः॑ प्रसवि॒ता श्रिय॑मे॒वाप्नो॒त्यथो॑ प्र॒ज्ञात॑यै॒व प्र॑ति॒पदा॒ छन्दा॒ꣳ॒सि॒ प्रति॑पद्यते॥ १५॥ ॥ ११॥

((bra̱hma̱ya̱jñena̍ ya̱kṣyamā̍ṇa̱ḥ prācyā̍m̐ di̱śi grāmā̱dacha̱dirdarśa udī̎cyām̱ prāgudī̱cyām̱ vo̱dita̍ ādi̱tye da̍kṣiṇa̱ta u̍pa̱vīyo̍pa̱viśya̱ hastā̍vavani̱jya̱ trirācā̍meddviḥ pa̍ri̱mṛjya̍ sa̱kṛdu̍pa̱spṛśya̱ śira̱ścakṣu̍ṣī̱ nāsi̍ke̱ śrotre̱ hṛda̍yamā̱labhya̱ yattrirā̱cāmā̍ti̱ tena̱ ṛca̍ḥ prīṇāti̱ yaddviḥ pa̍ri̱mṛjāti̱ tena̱ yajū̍m̐ṣi̱ yatsa̱kṛdu̍pa̱spṛśati̱ tena̱ sāmā̍ni̱ yatsa̱vyam̱ pāṇim̱ pādau pro̱kṣati̱ yacchira̱ścakṣu̍ṣī̱ nāsi̍ke̱ śrotre̱ hṛda̍yamā̱labha̍te̱ tenāthaॅ̍vāṅgiraso̎ brāhma̱ṇānītihā̱sānpu̍rā̱ṇāni̱ kalpā̱ngāthā̍ nārāśa̱m̐sīḥ pri̍ṇāti̱ darbhā̍ṇām̱ ma̱hadu̍pa̱stīryo̱pastha̍m̐ kṛ̱tvā prāṅāsī̍nassvādhyā̱yamadhī̍yītā̱pām̱ vā e̱ṣa auṣa̍dhīnā̱m̐ raso̱ yadda̱rbhāssara̍same̱va brahma̍ kurute dakṣiṇotta̱rau pā̱ṇī pādau kṛ̱tvā sapa̱vitrā̱vomiti̱ prati̍padyata e̱tadvai yaju̍strayīm̱ vi̱dyām̱ pratye̱ṣā vāge̱tatpa̍ra̱mama̱kṣara̱m̱ tade̱tadṛ̱cā'bhyu̍kta mṛ̱co a̱kṣare̍ para̱me vyo̍ma̱nyasmi̍nde̱vā adhi̱ viśve̍ niṣe̱duryastanna veda̱ kimṛ̱cā ka̍riṣyati̱ ya ittādvi̱dusta i̱me samā̍sata̱ iti̱ trīne̱va prāyu̍ṅkta̱ bhūrbhuva̱ssva̍rityā̍hai̱tadvai vāca̱ssa̱tyam̱ yade̱va vā̱cassa̱tyam̱ tatprāyu̱ṅktāthā̍ sāvi̱trīm̱ gā̍ya̱trīm̱ triranvā̍ha pa̱ccho̎'rdharcā̍śo'navā̱nam̐ sa̍vi̱tā śriya̍ḥ prasavi̱tā śriya̍me̱vāpno̱tyatho̎ pra̱jñāta̍yai̱va pra̍ti̱padā̱ chandā̍m̐si̱ prati̍padyate || 15 || || 11 ||))

[[2-12-1]]

ग्रा॒मे मन॑सा स्वाध्या॒यमधी॑यीत॒ दि॒वा नक्तं॑ वे॒ति ह॑ स्मा॒ह शौ॒च आ॑ह्ने॒य उ॒तार॑ण्येऽब॒ल उ॒त वा॒चोत तिष्ठ॑न्नु॒त व्रज॑न्नु॒तासी॑न उ॒त शया॑नो॒ऽधीयी॑तै॒व स्वा॑ध्या॒यं तप॑स्वी॒ पुण्यो॑ भवति॒ य ए॒वं वि॒द्वान्थ्स्वा॑ध्या॒यमधी॑ते॒ नमो॒ ब्रह्म॑णे॒ नमो॑ अस्त्व॒ग्नये॒ नमः॑ पृथि॒व्यै नम॒ ओष॑धीभ्यः। नमो॑ वा॒चे नमो॑ वा॒चस्पत॑ये॒ नमो॒ विष्ण॑वे बृह॒ते क॑रोमि॥ १६॥ ॥ १२॥

((grāme̱ mana̍sā svādhyā̱yamadhī̍yīta̱ divā̱ nakta̍m̐ ve̱ti ha̍ smā̱ha śau̱ca ā̎hne̱ya u̱tāra̍ṇye̱'bala̍ u̱ta vā̱cota tiṣṭha̍nnu̱ta vraja̍nnu̱tāsī̍na u̱ta śayā̍no̱'dhīyī̍tai̱va svā̎dhyā̱yam̱ tapa̍svī̱ puṇyo̍ bhavati̱ ya e̱vam̱ vi̱dvānthsvā̎dhyā̱yamadhī̍te̱ namo̱ brahma̍ṇe̱ namo̍ astva̱gnaye̱ nama̍ḥ pṛthi̱vyai nama̱ oṣa̍dhībhyaḥ | namo̍ vā̱ce namo̍ vā̱caspata̍ye̱ namo̱ viṣṇa̍ve bṛha̱te ka̍romi || 16 || || 12 ||))

[[2-13-1]]

म॒ध्यन्दि॑ने प्र॒बल॒मधी॑यीता॒सौ खलु॒ वावै॒ष आ॑दि॒त्यो यद्ब्रा॑ह्म॒णस्तस्मा॒त्तर्हि॒ तेक्ष्णि॑ष्ठं तपति॒ तदे॒षाऽभ्यु॑क्ता।

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्चेति स वा एष यज्ञस्सद्यः प्रतायते सद्यस्सन्तिष्ठते तस्य प्राक्सायमवभृथो नमो ब्रह्मण इति परिधानीयां त्रिरन्वाहाप उपस्पृश्य गृहानेति ततो यत्किञ्च ददाति सा दक्षिणा॥ १७॥ ॥ १३॥

((madhyandine prabalamadhiyītāsau khalu vāvaiṣa āditya yadbrāhmaṇastasmāttarhi tekṣṇiṣṭhaṃ tapati tadeṣā'bhyuktā ।
citraṃ devānāmudagādanīkaṃ cakṣurmitrasya varuṇasyāgneḥ ।
ā'prā dyāvāpṛthivī antarikṣaꣳ sūrya ātmā jagatastasthuṣaśceti sa vā eṣa yajñassadyaḥ pratāyate sadyassantiṣṭhate tasya prāksāyamavabhṛtho namo brahmaṇa iti paridhānīyāṃ triranvāhāpa upaspṛśya gṛhāneti tato yatkiñca dadāti sā dakṣiṇā ॥ 17 ॥ ॥ 13 ॥))

[[2-14-1]]

तस्य वा एतस्य यज्ञस्य मेघो हविधानं विद्युदग्निर्वर्षꣳ हविस्स्तनयित्नुर्वषट्कारो यदवस्फूर्जति सोऽनुवषट्कारो वायुरात्माऽमावास्या स्विष्टकृद्य एवं विद्वान्मेघे वर्षति विद्योतमाने स्तनयत्यवस्फूर्जति पवमाने वायावमावास्यायाꣳ स्वाध्यायमधीते तप एव तत्तप्यते तपो हि स्वाध्याय इत्युत्तमं नाकꣳ रोहत्युत्तमस्समानानां भवति यावन्तꣳ ह वा इमां वित्तस्य पूर्णां ददथ्स्वर्गं लोकं जयति तावन्तं लोकं जयति भूयाꣳसं चाक्षय्यं चापपुनर्मृत्युञ्जयति ब्रह्मणस्सायुज्यं गच्छति॥ १८॥ ॥ १४॥

((tasya vā etasya yajñasya megho havidhānaṃ vidyudagnirvarṣaꣳ havisstanayitnurvaṣaṭkāro yadavasphūrjati so'nuvaṣaṭkāro vāyurātmā'māvāsyā sviṣṭakṛdya evaṃ vidvānmeghe varṣati vidyotamāne stanayatyavasphūrjati pavamāne vāyāvamāvāsyāyāꣳ svādhyāyamadhīte tapa eva tattapyate tapo hi svādhyāya ityuttamaṃ nākaꣳ rohatyuttamassamānānāṃ bhavati yāvantaꣳ ha vā imāṃ vittasya pūrṇāṃ dadathsvargaṃ lokaṃ jayati tāvantaṃ lokaṃ jayati bhūyāꣳsaṃ cākṣayyaṃ cāpapunarmṛtyuñjayati brahmaṇassāyujyaṃ gacchati ॥ 18 ॥ ॥ 14 ॥))

[[2-15-1]]

तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देशस्समृद्धिर्दैवतानि य एवं विद्वान्महारात्र उषस्युदिते व्रजꣳस्तिष्ठन्नासीनश्शयानोऽरण्ये ग्रामे वा यावत्तरसꣳ स्वाध्यायमधीते सर्वाꣳल्लोकाञ्जयति सर्वाꣳल्लोकाननृणोऽनुसञ्चरति तदेषाऽभ्युक्ता।
अनृणा अस्मिन्ननृणाः परस्मिꣳस्तृतीये लोके अनृणास्स्याम।
ये देवयाना उत पितृयाणास्सर्वान्पथो अनृणा आक्षीयेमेत्यग्निं वै जातं पाप्मा जग्राह तं देवा आहुतीभिः पाप्मानमपाघ्नन्नाहुतीनां यज्ञेन यज्ञस्य दक्षिणाभिर्दक्षिणानां ब्राह्मणेन ब्राह्मणस्य

छन्दो॑भिश्छन्द॑सा॒ꣳ॒ स्वध्या॒येनाप॑हतपाप्मा स्वाध्या॒यो॑ दे॒वप॑वित्रं॒ वा ए॒तत्तं॒ योऽनू॒॑थ्सृ॒जत्य॑भा॒गो वा॒चि भ॑व॒त्यभा॒गो ना॒के त॒दे॒षाऽभ्यु॑क्ता।
यस्ति॒त्याज॑ सखि॒विदꣳ॒॑ सखा॑यं॒ न तस्य॑ वा॒च्यपि॑ भा॒गो अ॑स्ति।
यदीꣳ॑ शृणो॒त्य॒लकꣳ॑ शृणोति॒ न हि प्र॒वेद॑ सु॒कृ॒तस्य॒ पन्था॒मिति॒ तस्मा॒॑थ्स्वाध्या॒योऽध्ये॑त॒व्यो॑ यं यं॑ क्र॒तुमधी॑ते॒ तेन॑ तेनास्ये॒ष्टं भ॑वत्य॒ग्नेर्वा॒योरा॑दि॒त्यस्य॒ सायु॑ज्यं गच्छति॒ त॒दे॒षाऽभ्यु॑क्ता।
ये अ॒र्वाङु॒त वा॑ पु॒रा॒णे वे॒दं वि॒द्वाꣳस॑म॒भितो॑ वदन्त्यादि॒त्यमे॒व ते परि॑वदन्ति॒ सर्वे॑ अ॒ग्निं द्वि॒तीयं॑ तृ॒तीयं॑ च ह॒ꣳ॒समिति॒ याव॑तीर्वै दे॒वता॒स्तास्सर्वा॑ वेद॒विदि॑ ब्राह्म॒णे व॑सन्ति॒ तस्मा॒॑द्ब्राह्म॒णेभ्यो॑ वेद॒विद्भ्यो॑ दि॒वे दि॑वे॒ नम॑स्कुर्या॒न्नाश्ली॒लं की॑र्तयेदे॒ता ए॒व दे॒वताः॒॑ प्रीणाति॥ १९॥ ॥ १५॥

((tasya̱ vā e̱tasya̍ ya̱jñasya̱ dvāva̍nadhyā̱yau yadā̱tmā'śuci̱ryadde̱śassami̍ddhirdaiva̱tāni̱ ya e̱vaṃ vi̱dvānma̍hārā̱tra u̱ṣasyudi̍te̱ vraja̱m̐̍stiṣṭha̱nnāsi̍na̱śśaya̍no̱'ra̱ṇye̎ grāme̱ vā yāva̍tta̱rasa̱m̐̍ svādhyā̱yamadhi̍te̱ sarvā̎m̐llo̱kāñja̍yati̱ sarvā̎m̐llo̱kāna̍nṛ̱ṇo'nu̱sañca̍rati̱ tade̱ṣā'bhyu̍ktā |
a̱nṛ̱ṇā a̱sminna̍nṛ̱ṇāḥ parā̍smim̐̍stṛ̱tīye̍ lo̱ke a̍nṛ̱ṇāssyā̍ma |
ye de̍va̱yānā̍ u̱ta pi̍tṛ̱yāṇā̱ssarvā̱npatho a̍nṛ̱ṇā ākṣi̍ye̱metya̱gniṃ vai jā̱taṃ pā̱pmā ja̍grāha̱ taṃ de̱vā āhu̍tībhiḥ pā̱pmāna̱mapā̎ghna̱nnāhu̍tīnāṃ ya̱jñena̍ ya̱jñasya̱ dakṣi̍ṇābhi̱rdakṣi̍ṇānāṃ brāhma̱ṇena̍ brāhma̱ṇasya̱ chando̍bhi̱śchanda̍sā̱m̐̍ svadhyā̱yenāpa̍hatapāpmā svādhyā̱yo̍ de̱vapa̍vitra̱ṃ vā e̱tatta̱ṃ yo'nū̎thsṛ̱jatyabhā̱go vā̱ci bha̍va̱tyabhā̱go nā̱ke tade̱ṣā'bhyu̍ktā |
yasti̱tyāja̍ sakhi̱vida̱m̐̍ sakhā̍ya̱ṃ na tasya̍ vā̱cyapi̍ bhā̱go a̍sti |
yadī̱m̐̍ śṛ̱ṇotya̱lakam̐̍ śṛ̱ṇoti̱ na hi pra̱veda̍ sukṛ̱tasya̱ panthā̱miti̱ tasmā̎thsvādhyā̱yo'dhye̍ta̱vyo̍ yaṃ ya̍ṃ kra̱tumadhi̍te̱ tena̍ tenāsye̱ṣṭaṃ bha̍vatya̱gnervā̱yorā̍dityasya̱ sāyu̍jyaṃ gacchati̱ tade̱ṣā'bhyu̍ktā |
ye a̱rvāṅu̱ta vā̍ purā̱ṇe ve̱daṃ vi̱dvām̐̍sa̍ma̱bhito̍ vadantyādi̱tyame̱va te pari̍vadanti̱ sarve̍ a̱gniṃ dvi̱tīya̍ṃ tṛ̱tīya̍ṃ ca ha̱m̐̍samiti̱ yāva̍tīrvai de̱vatā̱stāssarvā̍ veda̱vidi̍ brāhma̱ṇe va̍santi̱ tasmā̎dbrāhma̱ṇebhyo̍ veda̱vidbhyo̍ di̱ve di̍ve̱ namaskuryā̱nnāśli̱la̱ṃ kī̎rtayede̱tā e̱va de̱vatā̎ḥ prīṇāti || 19 || || 15 ||))

[[2-16-1]]
रिच्य॑त इ॒व वा ए॒ष प्रेव रि॑च्यते॒ यो या॒जय॑ति॒ प्रति॑ वा गृ॒ह्णाति॑ या॒जयि॑त्वा प्रति॒गृह्य॒ वाऽन॑श्नन्त्रि॒स्स्वा॒॑ध्यायं॑ वे॒दमधी॑यीत त्रिरा॒त्रं वा॑ सावि॒त्रीं गा॑य॒त्रीम॒न्वाति॑रेचयति॒ वरो॒ दक्षि॑णा॒ वरे॑णै॒व वर॒ꣳ॑ स्पृणोत्या॒त्मा हि वरः॑॥ २०॥ ॥ १६॥

((ricya̍ta iva̱ vā e̱ṣa preva ri̍cyate̱ yo yā̱jaya̍ti̱ prati̍ vā gṛ̱hṇāti̍ yā̱jayi̍tvā pratigṛ̱hya vā'na̍śna̱ntrissvā̎dhyā̱yaṃ ve̱damadhi̍yīta trirā̱traṃ vā̍ sāvi̱trīṃ gā̍ya̱trīma̱nvāti̍recayati̱ varo̱ dakṣi̍ṇā̱ vare̍ṇa̱iva vara̱m̐̍ spṛ̱ṇotyā̱tmā hi vara̍ḥ || 20 || || 16 ||))

[[2-17-1]]
दु॒हे ह॒ वा ए॒ष छन्दाꣳ॑सि॒ यो या॒जय॑ति॒ स येन॑ य॒ज्ञक्र॒तुना॑ या॒जये॒थ्सोऽर॑ण्यं॒ परे॒त्य॑ शुचौ॑ दे॒शे

स्वाध्यायमेवैनमधीयन्नासीत तस्यानशनं दीक्षा स्थानमुपसद् आसनꣳ सुत्या वाग्जुहूर्मन उपभृद्धृतिर्ध्रुवा प्राणो हविस्सामाध्वर्युस्स वा एष यज्ञः प्राणदक्षिणोऽनन्तदक्षिणस्समृद्धतरः ॥ २१ ॥ ॥ १७॥

((duhe ha vā eṣa chandāꣳsi yo yājayati sa yena yajñakratunā yājayethso'raṇyam paretya śucau deśe svādhyāyamevainamadhīyannāsīta tasyānaśanam dīkṣā sthānamupasada āsanaꣳ sutyā vāgjuhūrmana upabhṛddhṛtirdhruvā prāṇo havissāmādhvaryussa vā eṣa yajñaḥ prāṇadakṣiṇo'nantadakṣiṇassamṛddhataraḥ || 21 || || 17 ||))

[[2-18-1]]

कतिधाऽवकीर्णी प्रविशति चतुर्धेत्याहुर्ब्रह्मवादिनो मरुतः प्राणैरिन्द्रं बलेन बृहस्पतिं ब्रह्मवर्चसेनाग्निमेवेतरेण सर्वेण तस्यैतां प्रायश्चित्तं विदाञ्चकार सुदेवः काश्यपो यो ब्रह्मचार्यवकिरेदमावास्यायाꣳ रात्र्यामग्निं प्रणीयोपस्माधाय द्विराज्यस्योपघातं जुहोति कामावकीर्णोऽस्म्यवकीर्णोऽस्मि काम कामाय स्वाहा कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि काम कामाय स्वाहेत्यमृतं वा आज्यममृतमेवात्मन्धत्ते हुत्वा प्रयताञ्जलिः कवातिर्यङ्ङग्निमभिमन्त्रयेत सं मा सिञ्चन्तु मरुतस्सामिन्द्रस्सं बृहस्पतिः।
सं माऽयमग्निस्सिञ्चत्वायुषा च बलेन चायुष्मन्तं करोत मेति प्रति हास्मै मरुतः प्राणान्दधति प्रतीन्द्रो बलं प्रति बृहस्पतिर्ब्रह्मवर्चसं प्रत्यग्निरितरथ्सर्वꣳ सर्वतनुर्भूत्वा सर्वमायुरेति त्रिरभिमन्त्रयेत त्रिषत्या हि देवा योऽपूत इव मन्येत स इत्थं जुहुयादित्थमभिमन्त्रयेत पुनीत एवात्मानमायुरेवात्मन्धत्ते वरो दक्षिणा वरेणैव वरꣳ स्पृणोत्यात्मा हि वरः॥ २२ ॥ ॥ १८॥

((katidhā'vakīrṇī praviśati caturdhetyāhurbrahmavādino marutaḥ prāṇairindram balena bṛhaspatim brahmavarcasenāgnimevetareṇa sarveṇa tasyaitām prāyaścittam vidāñcakāra sudevaḥ kāśyapo yo brahmacāryavakiredamāvāsyāyāꣳ rātryāmagnim praṇīyopasmādhāya dvirājyasyopaghātam juhoti kāmāvakīrṇo'smyavakīrṇo'smi kāma kāmāya svāhā kāmābhidrugdho'smyabhidrugdho'smi kāma kāmāya svāhetyamṛtam vā ājyamamṛtamevātmandhatte hutvā prayatāñjaliḥ kavātiryaṅṅagnimabhimantrayeta sam mā siñcantu marutassāmindrassam bṛhaspatiḥ |
sam mā'yamagnissiñcatvāyuṣā ca balena cāyuṣmantam karota meti prati hāsmai marutaḥ prāṇāndadhati pratīndro balam prati bṛhaspatirbrahmavarcasam pratyagniritarathsarvaꣳ sarvatanurbhūtvā sarvamāyureti trirabhimantrayeta triṣatyā hi devā yo'pūta iva manyeta sa ittham juhuyāditthamabhimantrayeta punīta evātmānamāyurevātmandhatte varo dakṣiṇā vareṇaiva varaꣳ spṛṇotyātmā hi varaḥ || 22 || || 18 ||))

[[2-19-1]]

भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये भूर्भुवस्स्वः प्रपद्ये ब्रह्म प्रपद्ये ब्रह्मकोशं प्रपद्येऽमृतं

प्रप॑द्येऽमृतको॒शं प्रप॑द्ये चतु॒र्जा॒लं ब्रह्म॑को॒शं यं मृ॒त्युर्ना॒वप॒श्यति॒ तं प्रप॑द्ये दे॒वान्प्रप॑द्ये देवपु॒रं प्रप॑द्ये
परी॑वृतो॒ वरी॑वृतो॒ ब्रह्म॑णा॒ वर्म॑णा॒ऽहं तेज॑सा॒ क॒श्यप॑स्य॒ यस्मै॒ नम॒स्तच्छिरो॒ धर्मो॑ मू॒र्धानं॑ ब्र॒ह्मोत्त॑रा॒
ह॒नु॑र्य॒ज्ञोऽध॑रा॒ विष्णु॒र्हृद॑यꣳ संवथ्स॒रः प्र॒जन॑नम॒श्विनौ॑ पू॒र्वपा॒दाव॒त्रिर्मध्यं॑ मि॒त्रावरु॑णावप॒रपा॒दाव॒ग्निः
पुच्छ॑स्य प्रथ॒मं काण्ड॒ं तत॒ इन्द्र॒स्तत॑ः प्र॒जाप॑ति॒रभ॑यं चतु॒र्थꣳ स वा ए॒ष
दि॒व्यश्शाꣳक्व॒रश्शिशु॒मार॒स्तꣳ ह॒ य ए॒वं वेदाप॑ पुनर्मृ॒त्युं जय॑ति॒ जय॑ति स्व॒र्गं लो॒कं नाध्व॑नि॒ प्रमी॑यते॒
नाग्नौ प्रमी॑यते॒ नाप्सु प्रमी॑यते॒ नान॒पत्य॑ः प्रमी॑यते॑ ल॒घ्वान्नो॑ भवति ध्रु॒वस्त्वम॑सि ध्रु॒वस्य॑ क्षि॒तम॑सि॒
त्वं भू॒ताना॒मधि॑पतिरसि॒ त्वं भू॒ताना॒ꣳ श्रेष्ठो॑ऽसि॒ त्वां भू॒तान्युप॒पर्या॒व॑र्तन्ते॒ नम॑स्ते॒ नम॒स्सर्वं॑ ते॒ नमो॒
नम॑श्शिशु॒कुमारा॒य नम॑ः॥ २३॥ ॥ १९॥

((bhū̱ḥ prapa̍dye̱ bhuva̱ḥ prapa̍dye̱ sva̍ḥ prapa̍dye̱ bhūrbhū̱va̱ssva̍ḥ prapa̍dye̱ brahma̱ prapa̍dye brahmako̱śam̱ prapa̍dye̱'mṛta̱m̱ prapa̍dye'mṛtako̱śam̱ prapa̍dye caturjā̱lam̱ bra̍hmako̱śam̱ yam̱ mṛ̱tyurnāva̱paśya̍ti̱ tam̱ prapa̍dye de̱vānprapa̍dye devapu̱ram̱ prapa̍dye̱ pari̍vṛto̱ vari̍vṛto̱ brahma̍ṇā̱ varma̍ṇā̱'ham̱ teja̍sā̱ kaśya̍pasya̱ yasmai̱ nama̱stacchiro̱ dharmo̍ mū̱rdhānam̐ bra̱hmotta̍rā̱ hanu̍rya̱jño'dha̍rā̱ viṣṇu̱rhṛda̍yam̐ sam̱vathsa̱raḥ pra̱jana̍nama̱śvinau̍ pūrva̱pādā̍va̱trirmadhyam̐ mi̱trāvaru̍ṇāvapara̱pādā̍va̱gniḥ puccha̍sya pratha̱mam̱ kāṇḍa̱m̱ tata̱ indra̱stata̍ḥ pra̱jāpa̍ti̱rabha̍yam̱ catu̱rtham̐ sa vā e̱ṣa di̱vyaśśā̆kva̱raśśiśu̍māra̱stam̐ ha̱ ya e̱vam̱ vedāpa̍ punarmṛ̱tyum̱ ja̍yati̱ jaya̍ti sva̱rgam̱ lo̱kam̱ nādhvani̱ pramī̍yate̱ nāgnau pramī̍yate̱ nāpsu pramī̍yate̱ nāna̱patya̍ḥ pramīyate̍ la̱ghvānno̍ bhavati dhru̱vastvama̍si dhru̱vasya kṣitamasi̱ tvam̱ bhū̱tānā̱madhi̍patirasi̱ tvam̱ bhū̱tānā̱m̐ śreṣṭho̍'si̱ tvām̱ bhū̱tānyupa̍pa̱ryāva̍rtante̱ nama̍ste̱ nama̱ssarvam̐ te̱ namo̱ nama̍śśiśukumārāya̱ nama̍ḥ || 23 || || 19 ||))

[[2-20-1]]
नम॒ः प्राच्यै॑ दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒ प्रति॑वसन्त्येताभ्य॑श्च॒ नमो॒ नमो दक्षि॑णायै दि॒शे याश्च॑ दे॒वता॑
ए॒तस्यां॒ प्रति॑वसन्त्येताभ्य॑श्च॒ नमो॒ नम॒ः प्रती॑च्यै दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒ प्रति॑वसन्त्येताभ्य॑श्च॒
नमो॒ नम॒ उदी॑च्यै दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒ प्रति॑वसन्त्येताभ्य॑श्च॒ नमो॒ नम॑ ऊ॒र्ध्वायै॑ दि॒शे याश्च॑
दे॒वता॑ ए॒तस्यां॒ प्रति॑वसन्त्येताभ्य॑श्च॒ नमो॒ नमोऽध॑रायै दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒
प्रति॑वसन्त्येताभ्य॑श्च॒ नमो॒ नमो॑ऽवान्तरायै॑ दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒ प्रति॑वसन्त्येताभ्य॑श्च॒ नमो॒ नमो
गङ्गायमुनयोर्मध्ये ये॑ वस॒न्ति॒ ते मे प्रसन्नात्मानश्चिरं जीवितं व॑र्धय॒न्ति॒ नमो गङ्गायमुनयोर्मुनि॑भ्यश्च॒
नमो॒ नमो गङ्गायमुनयोर्मुनि॑भ्यश्च॒ नमः॥ २४॥ ॥ २०॥

स॒ह रक्षाꣳ॑सि यद्दे॑वास्सप्तद॒श यददी॑व्य॒न्पञ्च॑द॒शायु॑ष्टे॒ चत॑ुस्त्रि॒ꣳशꣳ शद्वैश्वान॒राय॒ षड्विꣳ॑शति॒र्वा॑त॑रशना
ह कू॒श्मा॒ण्डै॒रजान्ह॒ पञ्च॑ ब्रह्मय॒ज्ञेन॒ ग्रामे॑ म॒ध्यन्दि॑ने॒ तस्य॒ वै मे॒घस्तस्य॒ वै द्वौ रिच्य॑ते दु॒हे ह॑
कति॒धाऽव॑कीर्णी॒ भूर्नम॑ः प्राच्यै॑ विꣳशतिः॥ २०॥

सह॑ वात॑रशना दु॒हे ह॒ चतु॑र्विꣳश॒तिः ॥ २४ ॥

सह॒ वै मुनि॑भ्यश्च॒ नमः ॥

((namaḥ prācyai diśe yāśca devatā etasyām prativasantyetābhyaśca namo namo dakṣiṇāyai diśe yāśca devatā etasyām prativasantyetābhyaśca namo namaḥ pratīcyai diśe yāśca devatā etasyām prativasantyetābhyaśca namo nama udīcyai diśe yāśca devatā etasyām prativasantyetābhyaśca namo nama ūrdhvāyai diśe yāśca devatā etasyām prativasantyetābhyaśca namo namo'dharāyai diśe yāśca devatā etasyām prativasantyetābhyaśca namo namo'vāntarāyai diśe yāśca devatā etasyām prativasantyetābhyaśca namo namo gaṅgāyamunayormadhye ye vasanti te me prasannātmānaściram jīvitam vardhayanti namo gaṅgāyamunayormunibhyaśca namo namo gaṅgāyamunayormunibhyaśca namaḥ || 24 || || 20 ||

saha rakṣāmsi yaddevāssaptadaśa yadadivyanpañcadaśāyuṣṭe catustriśam śadvaiśvānarāya ṣadvimśatirvātāraśanā ha kūśmāṇḍairajānha pañca brahmayajñena grāme madhyandine tasya vai meghastasya vai dvau ricyate duhe ha katidhā'vakīrṇī bhūrnamaḥ prācyai vimśatiḥ || 20 ||

saha vātaraśanā duhe ha caturvimśatiḥ || 24 ||

saha vai munibhyaśca namaḥ ||))

[[2-0-0]]

नमो॒ ब्रह्म॑णे॒ नमो॑ अस्त्व॒ग्नये॒ नमः॑ पृथि॒व्यै नम॒ ओष॑धीभ्यः ।
नमो॑ वा॒चे नमो॑ वा॒चस्पत॑ये॒ नमो॒ विष्ण॑वे बृह॒ते क॑रोमि ॥
ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

((namo brahmaṇe namo astvagnaye namaḥ pṛthivyai nama oṣadhībhyaḥ |
namo vāce namo vācaspataye namo viṣṇave bṛhate karomi ||
āūm śāntiḥ śāntiḥ śāntiḥ ||))

# Taittirīya-Āraṇyaka

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 3

[[3-0-0]]

तच्छं॒योरावृ॑णीमहे।

गा॒तुं य॒ज्ञाय॑।

गा॒तुं य॒ज्ञप॑तये।

दैवी᳚ स्व॒स्तिर॑स्तु नः।

स्व॒स्तिर्मानु॑षेभ्यः।

ऊ॒र्ध्वं जि॑गातु भेष॒जम्।

शं नो॑ अस्तु द्वि॒पदे᳚।

शं चतु॑ष्पदे॥

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

((tacchaṃ̱yorāvṛ̍ṇīmahe |
gā̱tuṃ ya̱jñāya̍ |
gā̱tuṃ ya̱jñapa̍taye |
daivī᳚ sva̱stira̍stu naḥ |
sva̱stirmānu̍ṣebhyaḥ |
ū̱rdhvaṃ ji̍gātu bheṣa̱jam |
śaṃ no̍ astu dvi̱pade᳚ |
śaṃ catu̍ṣpade ||
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ ||))

[[3-1-1]]

चित्ति॒स्स्रुक्।

चि॒त्तमाज्य᳚म्।

वाग्वेदि॑ः।

आधी॑तं ब॒र्हिः।

केतो॑ अ॒ग्निः।

वि॒ज्ञा॑तम॒ग्निः ।
वाक्प॑ति॒र्होता॓ ।
मन॑ उपव॒क्ता ।
प्रा॒णो ह॒विः ।
सामा॓ध्व॒र्युः ।
वाच॑स्पते विधे नामन्न् ।
वि॒धेम॑ ते॒ नाम॑ ।
वि॒धेस्त्वम॒स्माकं॒ नाम॑ ।
वा॒चस्पति॒स्सोमं॑ पिबतु ।
आऽस्मासु॑ नृ॒म्णं धा॒त्स्वाहा॓ ॥ १ ॥
अ॒ध्व॒र्युः पञ्च॑ च ॥ १ ॥

((citti̱ssruk |
ci̱ttamājyā̎m |
vāgvedi̍ḥ |
ādhi̍taṃ ba̱rhiḥ |
keto̍ a̱gniḥ |
vijñā̍tama̱gniḥ |
vākpa̍ti̱rhotā̎ |
mana̍ upava̱ktā |
prā̱ṇo ha̱viḥ |
sāmā̎dhva̱ryuḥ |
vāca̍spate vidhe nāmann |
vi̱dhema̍ te̱ nāma̍ |
vi̱dhestvama̱smākaṃ̱ nāma̍ |
vā̱caspati̱ssomaṃ̍ pibatu |
ā'smāsu̍ nṛ̱mṇaṃ dhā̱tsvāhā̎ || 1 ||
a̱dhva̱ryuḥ pañca̍ ca || 1 ||))

[[3-2-1]]
पृ॒थि॒वी होता॓ ।
द्यौर॑ध्व॒र्युः ।
रु॒द्रो॓ऽग्नीत् ।
बृ॒हस्पति॑रुपव॒क्ता ।
वाच॑स्पते वा॒चो वी॒र्ये॓ण ।
संभृ॑ततमे॒नाय॑क्ष्यसे ।
यज॑मानाय॒ वार्य॓म् ।

आ सु॒वस्क॑र॒स्मै।
वा॒चस्पति॒स्सोम॑ं पिबति।
ज॒जन॒दिन्द्र॑मिन्द्रि॒याय॒ स्वाहा᳚॥ २॥
पृ॒थि॒वी होता॒ दश॑॥ २॥

((pṛthivī hotā̎ |
dyaurádhvaryuḥ |
rudrő'gnīt |
bṛhaspatirupavaktā |
vācáspate vāco vīryéṇa |
saṃbhṛtatamenāyákṣyase |
yajámānāya vāryä̈m |
ā suvaskarásmai |
vācaspatissomaṃ pibati |
jajanadindrámindriyāya svāhā̎ || 2 ||
pṛthivī hotā daśá || 2 ||))

[[3-3-1]]
अ॒ग्निर्होता᳚।
अ॒श्विना॒ऽध्व॒र्यू।
त्वष्टा॒ऽग्नीत्।
मि॒त्र उ॑पव॒क्ता।
सोम॒स्सोम॑स्य पु॒रो॒गाः।
शु॒क्रश्शु॒क्रस्य॑ पु॒रो॒गाः।
श्रा॒तास्त॑ इन्द्र॒ सोमा᳚ः।
वाता॑पेर्हवन॒श्रुत॒स्स्वाहा᳚॥ ३॥
अ॒ग्निर्होता॒ऽष्टौ॥ ३॥

((agnirhotā̎ |
aśvinā̎'dhvaryū |
tvaṣṭā'gnīt |
mitra úpavaktā |
somassomásya purogāḥ |
śukraśśukrasyá purogāḥ |
śrātāstá indra somā̎ḥ |
vātáperhavanaśrutassvāhā̎ || 3 ||
agnirhotā'ṣṭau || 3 ||))

[[3-4-1]]

सूर्यं ते चक्षुः।
वातं प्राणः।
द्यां पृष्ठम्।
अन्तरिक्षमात्मा।
अङ्गैर्यज्ञम्।
पृथिवीꣳ शरीरैः।
वाचस्पतेऽच्छिद्रया वाचा।
अच्छिद्रया जुह्वा।
दिवि देवावृधꣳ होत्रामेरयस्व स्वाहा॥ ४॥
सूर्यं ते नव॥ ४॥

((sūryaṃ te cakṣuḥ |
vātaṃ prāṇaḥ |
dyāṃ pṛṣṭham |
antarikṣamātmā |
aṅgairyajñam |
pṛthivīṃ śarīraiḥ |
vācaspate'cchidrayā vācā |
acchidrayā juhvā |
divi devāvṛdhaṃ hotrāmerayasva svāhā || 4 ||
sūryaṃ te nava || 4 ||))

[[3-5-1]]
महाहविर्होता।
सत्यहविरध्वर्युः।
अच्युतपाजा अग्नीत्।
अच्युतमना उपवक्ता।
अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ।
अयास्य उद्गाता।
वाचस्पते हृद्विधे नामन्न्।
विधेम ते नाम।
विधेस्त्वमस्माकं नाम।
वाचस्पतिस्सोमममपात्।
मा दैव्यस्तन्तुश्छेदि मा मनुष्यः।

नमो॑ दि॒वे।
नम॑ः पृथि॒व्यै स्वाहा᳚॥ ५॥
अ॒पा॒त्त्रीणि॑ च॥ ५॥

((ma̱hāhá̱vi̱rhotā̎ |
sa̱tyaháviradhva̱ryuḥ |
acyútapājā a̱gnīt |
acyútamanā upava̱ktā |
a̱nā̱dhṛ̱ṣyaścā̎pratidhṛ̱ṣyaśca̍ ya̱jñasyā̍bhiga̱rau |
a̱yāsya̍ udgā̱tā |
vāca̍spate hṛdvidhe nāmann |
vi̱dhema̍ te̱ nāma̍ |
vi̱dhestvama̱smākam̱ nāma̍ |
vā̱caspati̱ssoma̍mapāt |
mā daivya̱stantu̱śchedi̱ mā ma̍nu̱ṣyaḥ |
namo̍ di̱ve |
nama̍ḥ pṛthi̱vyai svāhā̎ || 5 ||
a̱pā̱ttrīṇi̍ ca || 5 ||))

[[3-6-1]]
वाग्घोता᳚।
दी॒क्षा पत्नी᳚।
वातो᳚ऽध्व॒र्युः।
आपो॑ऽभिग॒रः।
मनो॑ ह॒विः।
तप॑सि जुहोमि।
भूर्भुव॒स्सुव॑ः।
ब्रह्म॑ स्वय॒म्भु।
ब्रह्म॑णे स्वय॒म्भुवे॒ स्वाहा᳚॥ ६॥
वाग्घोता॒ नव॑॥ ६॥

((vāgghotā̎ |
dī̱kṣā patnī̎ |
vāto̎'dhva̱ryuḥ |
āpo̍'bhiga̱raḥ |
mano̍ ha̱viḥ |
tapa̍si juhomi |
bhūrbhuva̱ssuva̍ḥ |
brahma̍ svaya̱mbhu |
brahma̍ṇe svaya̱mbhuve̱ svāhā̎ || 6 ||

vāgghotā̱ navá || 6 ||))

[[3-7-1]]
ब्रा̱ह्म̱ण एक॑होता।
स य̱ज्ञः।
स मे॑ ददातु प्र̱जां प̱शून्पुष्टिं॒ यश॑ः।
य̱ज्ञश्च॑ मे भूयात्।
अ̱ग्निर्द्विहो॑ता।
स भ̱र्ता।
स मे॑ ददातु प्र̱जां प̱शून्पुष्टिं॒ यश॑ः।
भ̱र्ता च॑ मे भूयात्।
पृ̱थि̱वी त्रिहो॑ता।
स प्र॑ति̱ष्ठा॥ ७॥

((brā̱hma̱ṇa ekáhotā |
sa ya̱jñaḥ |
sa mé dadātu pra̱jāṃ pa̱śūnpuṣṭiṃ̱ yaśáḥ |
ya̱jñaścá me bhūyāt |
a̱gnirdvihótā |
sa bha̱rtā |
sa mé dadātu pra̱jāṃ pa̱śūnpuṣṭiṃ̱ yaśáḥ |
bha̱rtā cá me bhūyāt |
pṛ̱thi̱vī trihótā |
sa práti̱ṣṭhā || 7 ||))

[[3-7-2]]
स मे॑ ददातु प्र̱जां प̱शून्पुष्टिं॒ यश॑ः।
प्र̱ति̱ष्ठा च॑ मे भूयात्।
अ̱न्तरि॑क्षं॒ चतु॑र्होता।
स वि̱ष्ठाः।
स मे॑ ददातु प्र̱जां प̱शून्पुष्टिं॒ यश॑ः।
वि̱ष्ठाश्च॑ मे भूयात्।
वा̱युः पञ्च॑होता।
स प्रा̱णः।
स मे॑ ददातु प्र̱जां प̱शून्पुष्टिं॒ यश॑ः।

प्राणश्च मे भूयात्॥ ८॥

((sa me dadātu prajāṃ paśūnpuṣṭhiṃ yaśaḥ ।
pratiṣṭhā ca me bhūyāt ।
antarikṣaṃ caturhotā ।
sa viṣṭhāḥ ।
sa me dadātu prajāṃ paśūnpuṣṭiṃ yaśaḥ ।
viṣṭhāśca me bhūyāt ।
vāyuḥ pañcahotā ।
sa prāṇaḥ ।
sa me dadātu prajāṃ paśūnpuṣṭiṃ yaśaḥ ।
prāṇaśca me bhūyāt ॥ 8 ॥))

[[3-7-3]]
चन्द्रमाष्षड्ढोता।
स ऋतून्कल्पयाति।
स मे ददातु प्रजां पशून्पुष्टिं यशः।
ऋतवश्च मे कल्पन्ताम्।
अन्नꣳ सप्तहोता।
स प्राणस्य प्राणः।
स मे ददातु प्रजां पशून्पुष्टिं यशः।
प्राणस्य च मे प्राणो भूयात्।
द्यौरष्टहोता।
सोऽनाधृष्यः॥ ९॥

((candramāṣṣaḍḍhotā ।
sa ṛtūnkalpayāti ।
sa me dadātu prajāṃ paśūnpuṣṭiṃ yaśaḥ ।
ṛtavaśca me kalpantām ।
annaꣳ saptahotā ।
sa prāṇasya prāṇaḥ ।
sa me dadātu prajāṃ paśūnpuṣṭiṃ yaśaḥ ।
prāṇasya ca me prāṇo bhūyāt ।
dyauraṣṭahotā ।
so'nādhṛṣyaḥ ॥ 9 ॥))

[[3-7-4]]
स मे ददातु प्रजां पशून्पुष्टिं यशः।
अनाधृष्यश्च भूयासम्।

आदित्यो नवहोता।
स तेजस्वी।
स मे ददातु प्रजां पशून्पुष्टिं यशः।
तेजस्वी च भूयासम्।
प्रजापतिर्दशहोता।
स इदꣳ सर्वम्।
स मे ददातु प्रजां पशून्पुष्टिं यशः।
सर्वं च मे भूयात्॥ १०॥
प्रतिष्ठा प्राणश्च मे भूयादनाधृष्यस्सर्वं च मे भूयात्॥ ७॥

ब्राह्मणो यज्ञोऽग्निर्भर्ता पृथिवी प्रतिष्ठाऽन्तरिक्षं विष्ठा वायुः प्राणश्चन्द्रमा ऋतूनन्नं प्राणस्य प्राणो द्यौरनाधृष्य आदित्यस्स तेजस्वी प्रजापतिरिदꣳ सर्वम्॥

((sa mė dadātu prajāṃ paśūnpuṣṭim yaśȧḥ |
anādhṛṣyaścȧ bhūyāsam |
ādityo navȧhotā |
sa tėjasvī |
sa mė dadātu prajāṃ paśūnpuṣṭim yaśȧḥ |
tejasvī cȧ bhūyāsam |
prajāpȧtirdaśȧhotā |
sa idaṁ sarvam |
sa mė dadātu prajāṃ paśūnpuṣṭim yaśȧḥ |
sarvaṃ ca me bhūyāt || 10 ||
pratiṣṭhā prāṇaścȧ me bhūyādanādhṛṣyassarvaṃ ca me bhūyāt || 7 ||

brāhmaṇo yajñȍ'gnirbhartā pṛthivī pratiṣṭhā'ntarikṣaṃ viṣṭhā vāyuḥ prāṇaścandramȧ ṛtūnannaṃ prāṇasyȧ prāṇo dyaurȧnādhṛṣya ādityassa tėjasvī prajāpȧtiridaṁ sarvam ||))

[[3-8-1]]
अग्निर्यजुर्भिः।
सविता स्तोमैः।
इन्द्र उक्थामदैः।
मित्रावरुणावाशिषा।
अङ्गिरसो धिष्णियैरग्निभिः।
मरुतस्सदोहविर्धानाभ्याम्।

आपः प्रोक्षणीभिः।
ओषधयो बर्हिषा।
अदितिर्वेद्या।
सोमो दीक्षया॥ ११॥

((agniryajurbhiḥ |
savitā stomaiḥ |
indra ukthāmadaiḥ |
mitrāvaruṇāvāśiṣā |
aṅgiraso dhiṣṇiyairagnibhiḥ |
marutassadohavirdhānābhyām |
āpaḥ prokṣaṇībhiḥ |
oṣadhayo barhiṣā |
aditirvedyā |
somo dīkṣayā || 11 ||))

[[3-8-2]]
त्वष्टेध्मेन।
विष्णुर्यज्ञेन।
वसव आज्येन।
आदित्या दक्षिणाभिः।
विश्वे देवा ऊर्जा।
पूषा स्वगाकारेण।
बृहस्पतिः पुरोधया।
प्रजापतिरुद्गीथेन।
अन्तरिक्षं पवित्रेण।
वायुः पात्रैः।
अहꣳ श्रद्धया॥ १२॥
दीक्षया पात्रैरेकं च॥ ८॥

((tvaṣṭeghmena |
viṣṇuryajñena |
vasava ājyena |
ādityā dakṣiṇābhiḥ |
viśve devā ūrjā |
pūṣā svagākāreṇa |
bṛhaspatiḥ purodhayā |
prajāpatirudgīthena |

a̠ntari̍kṣam̐ pa̠vitre̍ṇa ।
vā̠yuḥ pātrai̎ḥ ।
a̠ham̐̎ śra̠ddhayā̎ ॥ 12 ॥
dī̠kṣayā̠ pātrai̠reka̍ñca ॥ 8 ॥))

[[3-9-1]]
सेने॑न्द्र॑स्य।
धेना॒ बृह॒स्पतेः॑।
प॒थ्या॑ पू॒ष्णः।
वाग्वा॒योः।
दी॒क्षा सोम॑स्य।
पृ॒थि॒व्य॑ग्नेः।
वसू॑नां गाय॒त्री।
रु॒द्राणा॑ं त्रि॒ष्टुक्।
आ॒दि॒त्याना॒ं जग॑ती।
विष्णो॑रनु॒ष्टुक्॥ १३॥

((senendra̍sya ।
dhenā̠ bṛha̠spate̎ḥ ।
pa̠thya̍ pū̠ṣṇaḥ ।
vāgvā̠yoḥ ।
dī̠kṣā soma̍sya ।
pṛ̠thi̠vya̍gneḥ ।
vasū̍nām̐ gāya̠trī ।
ru̠drāṇām̐̎ tri̠ṣṭuk ।
ā̠di̠tyānā̠m̐ jaga̍tī ।
viṣṇo̍ranu̠ṣṭuk ॥ 13 ॥))

[[3-9-2]]
वरु॑णस्य वि॒राट्।
य॒ज्ञस्य॑ प॒ङ्क्तिः।
प्र॒जाप॑ते॒रनु॑मतिः।
मि॒त्रस्य॑ श्र॒द्धा।
स॒वि॒तुः प्रसू॑तिः।
सूर्य॑स्य॒ मरी॑चिः।
च॒न्द्रम॑सो रोहि॒णी।
ऋषी॑णामरुन्ध॒ती।

प॒र्जन्य॑स्य वि॒द्युत्।
चत॑स्रो दि॒शः॑।
चत॑स्रोऽवान्तर्दि॒शाः॑।
अह॑श्च॒ रात्रि॑श्च।
कृ॒षिश्च॒ वृष्टि॑श्च।
त्विषि॒श्चाप॑चितिश्च।
आप॒श्चौष॑धयश्च।
ऊर्क्च॑ सू॒नृता॑ च दे॒वाना॒ं पत्न॑यः॥ १४॥
अ॒नु॒ष्टुग्दि॒शा॒ष्षट्च॑॥ ९॥

((varu̍ṇasya vi̱rāṭ |
ya̱jñasya̍ pa̱ṅktiḥ |
pra̱jāpa̍te̱ranu̍matiḥ |
mi̱trasya̍ śra̱ddhā |
sa̱vi̱tuḥ prasū̍tiḥ |
sūrya̍sya̱ marī̍ciḥ |
ca̱ndrama̍so rohi̱ṇī |
ṛ̱ṣī̍ṇāmarundha̱tī |
pa̱rjanya̍sya vi̱dyut |
cata̍sro̱ diśa̍ḥ |
cata̍sro'vāntardi̱śāḥ |
aha̍śca̱ rātri̍śca |
kṛ̱ṣiśca̱ vṛ̱ṣṭi̍śca |
tvi̱ṣi̱ścāpa̍citiśca |
āpa̱ścauṣa̍dhayaśca |
ūrkca̍ sū̱nṛtā̍ ca de̱vānā̱m patna̍yaḥ || 14 ||
a̱nu̱ṣṭugdiśa̱ṣṣaṭca̍ || 9 ||))

[[3-10-1]]
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे।
अ॒श्विनो॑र्बा॒हुभ्या॑म्।
पू॒ष्णो हस्ता॑भ्या॒ं प्रति॑गृह्णामि।
राजा॑ त्वा॒ वरु॑णो नयतु देवि दक्षिणे॒ऽग्नये॒ हिर॑ण्यम्।
तेना॑मृत॒त्वम॑श्याम्।
वयो॑ दा॒त्रे।
मयो॒ मह्य॑मस्तु प्रतिग्रही॒त्रे।
क इ॒दं कस्मा॑ अदात्।

कामः कामाय।
कामो दाता॥ १५॥

((devasya tvā savituḥ prasave |
aśvinorbāhubhyām |
pūṣṇo hastābhyām pratigṛhṇāmi |
rājā tvā varuṇo nayatu devi dakṣiṇe'gnaye hiraṇyam |
tenāmṛtatvamaśyām |
vayo dātre |
mayo mahyamastu pratigrahītre |
ka idaṃ kasmā adāt |
kāmaḥ kāmāya |
kāmo dātā || 15 ||))

[[3-10-2]]
कामः प्रतिगृहीता।
कामꣳ समुद्रमाविश।
कामेन त्वा प्रतिगृह्णामि।
कामैतत्ते।
एशा ते काम दक्षिना।
उत्तानस्त्वाऽऽङ्गिरसः प्रतिगृह्णातु।
सोमाय वासः।
रुद्राय गाम्।
वरुणायाश्वम्।
प्रजापतये पुरुषम्॥ १६॥

((kāmaḥ pratigṛhītā |
kāmam̐ samudramāviśa |
kāmena tvā pratigṛhṇāmi |
kāmaitatte |
eśā te kāma dakṣinā |
uttānastvā''ṅgirasaḥ pratigṛhṇātu |
somāya vāsaḥ |
rudrāya gām |
varuṇāyāśvam |
prajāpataye puruṣam || 16 ||))

[[3-10-3]]
मनवे तल्पम्।

त्वष्ट्रेऽजाम्।
पूष्णेऽविम्।
निर्ऋत्या अश्वतरगर्दभौ।
हिमवतो हस्तिनम्।
गन्धर्वाप्सराभ्यस्स्रगलङ्करणे।
विश्वेभ्यो देवेभ्यो धान्यम्।
वाचेऽन्नम्।
ब्रह्मण ओदनम्।
समुद्रायापः॥ १७॥

((manáve talpä̈m |
tvaṣṭre'jām |
pūṣṇe'vi̋m |
nirṛtyā aśvataragardabhau |
himaváto hastinä̈m |
gandharvāpsarābhyássragalaṅkaraṇe |
viśvë̈bhyo devebhyó dhānyam |
vāce'nnä̈m |
brahmáṇa odanam |
samudrāyāpáḥ || 17 ||))

[[3-10-4]]
उत्तानायाङ्गिरसायानः।
वैश्वानराय रथम्।
वैश्वानरः प्रत्नथा नाकमारुहत्।
दिवः पृष्ठं भन्दमानस्सुमन्मभिः।
स पूर्ववज्जन्तवे धनम्।
समानमज्मा परियाति जागृविः।
राजा त्वा वरुणो नयतु देवि दक्षिने वैश्वानराय रथम्।
तेनामृतत्वमश्याम्।
वयो दात्रे।
मयो मह्यमस्तु प्रतिग्रहीत्रे॥ १८॥

((uttānāyä̈ṅgirasāyānáḥ |
vaiśvānarāya rathä̈m |
vaiśvānaraḥ pratnathā nākamārúhat |

divaḥ pṛṣṭhaṃ bhandámānassumanmábhiḥ |
sa pū̎rvavajjantave dhanā̎m |
samānamájmā pari̍yāti jāgṛ̍viḥ |
rājā̎ tvā varú̇ṇo nayatu devi dakṣine vaiśvānarāya rathā̎m |
tenā̇mṛtatvamá̇śyām |
vayó dātre |
mayo mahyámastu pratigrahītre || 18 ||))

[[3-10-5]]

क इदं कस्मा॑ अदात्।

काम॒ः कामा॑य।

कामो॑ दा॒ता।

काम॑ः प्रतिग्रही॒ता।

कामा॒ꣳ॑ समुद्रमावि॑श।

कामे॑न त्वा॒ समु॒द्रमावि॑श।

कामे॑न त्वा॒ प्रति॑गृह्णामि।

कामै॒तत्ते॑।

ए॒षा ते॑ काम॒ दक्षि॑णा।

उ॒त्ता॒नस्त्वा॑ऽऽङ्गिरसः प्रति॑गृह्णातु॥ १९॥

दा॒ता पुरु॑षमाप॑ः प्रतिग्रही॒त्रे नव॑ च॥ १०॥

((ka idaṃ kasmā̇ adāt |
kāmaḥ kāmā̇ya |
kāmó dātā |
kāmá̇ḥ pratigrahītā |
kāmā̇m̐ samudramāvi̍śa |
kāména tvā samudramāvi̍śa |
kāména tvā prati̍grahṇāmi |
kāmaitattē̎ |
eṣā té kāma dakṣi̍ṇā |
uttānastvā̎''ṅgirasaḥ prati̍grahṇātu || 19 ||
dātā purú̇ṣamāpá̇ḥ pratigrahītre navá̇ ca || 10 ||))

[[3-11-1]]

सु॒वर्न॑ घ॒र्मं परि॑वेद॒ वेनम्।

इन्द्र॑स्या॒त्मानं॑ दश॒धा चर॑न्तम्।

अ॒न्तस्स॑मु॒द्रे मन॑सा॒ चर॑न्तम्।

ब्रह्मा॒ऽन्व॑विन्द॒द्दश॑होतार॒मर्णे॑।

अ॒न्तः प्रवि॑ष्टश्शा॒स्ता जना॑नाम्।
एक॒स्सन्ब॑हु॒धा वि॑चारः।
श॒तꣳ शु॒क्राणि॒ यत्रैकं॑ भव॑न्ति।
सर्वे॑ वेदा॒ यत्रैकं॑ भव॑न्ति।
सर्वे॑ होता॑रो॒ यत्रैकं॑ भव॑न्ति।
स॒ मान॑सीन आ॒त्मा जना॑नाम्॥ २०॥

((su̱varnaṁ gha̱rmaṃ pari̍veda ve̱nam |
indra̍syātmānaṁ daśa̱dhā cara̍ntam |
a̱ntassa̍mu̱dre mana̍sā̱ cara̍ntam |
brahmā'nva̍vinda̱ddaśa̍hotāra̱marṇe̎ |
a̱ntaḥ pravi̍ṣṭaśśā̱stā jana̍nām |
eka̱ssanba̍hu̱dhā vi̍cāraḥ |
śa̱taṁ śu̱krāṇi̱ yatraikaṃ̱ bhava̍nti |
sarve̱ vedā̱ yatraikaṃ̱ bhava̍nti |
sarve̱ hota̍ro̱ yatraikaṃ̱ bhava̍nti |
sa̱ māna̍sīna ā̱tmā jana̍nām || 20 ||))

[[3-11-2]]
अ॒न्तः प्रवि॑ष्टश्शा॒स्ता जना॑ना॒ꣳ सर्वा॑त्मा।
सर्वाः॑ प्र॒जा यत्रैकं॑ भव॑न्ति।
चतु॑र्होतारो॒ यत्र॑ स॒म्पदं॒ गच्छ॑न्ति दे॒वैः।
स॒ मान॑सीन आ॒त्मा जना॑नाम्।
ब्रह्मेन्द्र॑म॒ग्निं जग॑तः प्रति॒ष्ठाम्।
दि॒व आ॒त्मान॑ꣳ सवि॒तारं॒ बृह॒स्पति॑म्।
चतु॑र्होतारं प्र॒दिशोऽनु॑क्ल॒प्तम्।
वा॒चो वी॒र्यं॑ तप॒साऽन्व॑विन्दत्।
अ॒न्तः प्रवि॑ष्टं क॒र्तार॑मे॒तम्।
त्वष्टा॑रꣳ रू॒पाणि॑ विकु॒र्वन्तं॑ विप॒श्चिम्॥ २१॥

((a̱ntaḥ pravi̍ṣṭaśśā̱stā jana̍nā̱ṁ sarvā̍tmā |
sarvā̍ḥ pra̱jā yatraikaṃ̱ bhava̍nti |
catu̍rhotāro̱ yatra̍ sa̱mpadaṃ̱ gaccha̍nti de̱vaiḥ |
sa̱ māna̍sīna ā̱tmā jana̍nām |
brahmendra̍ma̱gnim jaga̍taḥ prati̱ṣṭhām |
di̱va ā̱tmāna̍ṁ savi̱tāraṃ̱ bṛha̱spati̍m |
catu̍rhotāraṃ pra̱diśo'nu̍kḷ̱ptam |
vā̱co vī̱ryaṁ tapa̱sā'nva̍vindat |

a̱ntaḥ praviṣṭaṃ ka̱rtārame̱tam ।
tvaṣṭāraṁ rū̱pāṇi vikurvantaṁ vipa̱ścim ॥ 21 ॥))

[[3-11-3]]

अ̱मृत॑स्य प्रा̱णं य̱ज्ञमे̱तम्।
चतु॑र्होतृणामा̱त्मानं॑ क̱वयो̱ निचि॑क्युः।
अ̱न्तः प्रवि॑ष्टं क̱र्तार॑मे̱तम्।
दे̱वाना̱ं बन्धु̱ निहि॑तं̱ गुहा॑सु।
अ̱मृते॑न क्लृ̱प्तं य̱ज्ञमे̱तम्।
चतु॑र्होतृणामा̱त्मानं॑ क̱वयो̱ निचि॑क्युः।
श̱तं नि̱यु॒तः परि॑वेद̱ विश्वा॒ वि̱श्ववा॑रः।
विश्व॑मि̱दं वृ॑णाति।
इन्द्र॑स्या̱त्मा निहि॑तः̱ पञ्च॑होता।
अ̱मृतं॑ दे̱वाना̱मायुः॑ प्र̱जाना॑म्॥ २२॥

((a̱mṛtasya prā̱ṇaṃ ya̱jñame̱tam ।
caturhotṛ̱ṇāmā̱tmānaṁ ka̱vayo̱ nicikyuḥ ।
a̱ntaḥ praviṣṭaṃ ka̱rtārame̱tam ।
de̱vānā̱ṃ bandhu̱ nihitaṃ̱ guhāsu ।
a̱mṛtena kḷ̱ptaṃ ya̱jñame̱tam ।
caturhotṛ̱ṇāmā̱tmānaṁ ka̱vayo̱ nicikyuḥ ।
śa̱taṃ ni̱yuta̱ḥ pariveda̱ viśvā vi̱śvavāraḥ ।
viśvami̱daṃ vṛṇāti ।
indrasyā̱tmā nihita̱ḥ pañcahotā ।
a̱mṛtaṁ de̱vānā̱māyuḥ pra̱jānām ॥ 22 ॥))

[[3-11-4]]

इन्द्र॒ꣳ राजा॑नꣳ सवि̱तार॑मे̱तम्।
वा̱योरा̱त्मानं॑ क̱वयो̱ निचि॑क्युः।
र̱श्मिꣳ र॑श्मी̱नां मध्ये̱ तप॑न्तम्।
ऋ̱तस्य॑ प̱दे क̱वयो̱ निपा॑न्ति।
य आ॑ण्डको̱शे भुव॑नं बि̱भर्ति॑।
अनि॑र्भिण्ण̱स्सन्नथ॑ लो̱कान्वि̱चष्टे॑।
यस्या॑ण्डको̱शꣳ शुष्म॑माहुः प्रा̱णमुल्ब॑म्।
तेन॑ क्लृ̱प्तोऽमृते॑ना̱हम॑स्मि।
सु̱वर्ण॒ꣳ कोश॒ꣳ रज॑सा̱ परी॑वृतम्।

दे॒वाना᳚ँ वसु॒धानी᳚ँ वि॒राज᳚म्॥ २३॥

((indra̱m̐ rājā̍nam̐ savi̱tāra̍me̱tam ।
vāyorā̱tmānaṃ ka̱vayo̱ nici̍kyuḥ ।
ra̱śmim̐ ra̍śmī̱nāṃ madhye̱ tapa̍ntam ।
ṛ̱tasya̍ pa̱de ka̱vayo̱ nipā̎nti ।
ya ā̎ṇḍakoṡe bhuva̍naṃ bi̱bharti̍ ।
ani̍rbhinna̱ssannatha̍ lo̱kānvi̱caṣṭe̎ ।
yasyā̎ṇḍako̱śam̐ śuṣma̍mā̱huḥ prā̱ṇamulbā̎m ।
tena̍ kḷ̱pto̍'mṛte̍nā̱hama̍smi ।
su̱varṇa̱ṃ kośa̱m̐ raja̍sā̱ pari̍vṛtam ।
de̱vānā̎m̐ vasu̱dhānī̎m̐ vi̱rājā̎m ॥ 23 ॥))

[[3-11-5]]

अ॒मृत॑स्य पू॒र्णां तामु॑ क॒लां विच॑क्षते।
पाद॒ꣳ॒ षड्ढो॑तु॒र्न किला॑ विवित्से।
येन॒र्तव॑ः पञ्च॒धोत क्लृ॒प्ताः।
उ॒त वा॑ ष॒ड्ढा मन॒सोत क्लृ॒प्ताः।
तꣳ षड्ढो॑तारमृ॒तुभि॑ः कल्प॑मानम्।
ऋ॒तस्य॑ प॒दे क॒वयो॒ निपा᳚न्ति।
अ॒न्तः प्रवि॑ष्टं क॒र्तार॑मे॒तम्।
अ॒न्तश्च॒न्द्रम॑सि॒ मन॑सा॒ चर॑न्तम्।
स॒हैव सन्त॒ं न विजा॑नन्ति दे॒वाः।
इन्द्र॑स्या॒त्मानꣳ॑ शत॒धा चर॑न्तम्॥ २४॥

((a̱mṛta̍sya pū̱rṇāṃ tāmu̍ ka̱lāṃ vica̍kṣate ।
pāda̱m̐ ṣa̱ḍḍho̍tu̱rna kilā̍ vivithse ।
yena̱rtava̍ḥ pañca̱dhota kḷ̱ptāḥ ।
u̱ta vā̍ ṣa̱ḍḍhā mana̱sota kḷ̱ptāḥ ।
tam̐ ṣa̱ḍḍho̍tāramṛ̱tubhi̱ḥ kalpa̍mānam ।
ṛ̱tasya̍ pa̱de ka̱vayo̱ nipā̎nti ।
a̱ntaḥ pravi̍ṣṭa̱ṃ ka̱rtāra̍me̱tam ।
a̱ntaśca̱ndrama̍si̱ mana̍sā̱ cara̍ntam ।
sa̱haiva santa̱ṃ na vijā̍nanti de̱vāḥ ।
indra̍syā̱tmānam̐ śata̱dhā cara̍ntam ॥ 24 ॥))

[[3-11-6]]

इन्द्रो॒ राजा॒ जग॑तो॒ य ईशे᳚।
स॒प्तहो॑ता स॒प्तधा विक्लृ॑प्तः।

परे॑ण तन्तुं॑ परिषि॒च्यमा॑नम्।
अ॒न्तरा॑दि॒त्ये मन॑सा॒ चर॑न्तम्।
दे॒वाना॒ꣳ॒ हृद॑य॒ं ब्रह्माऽन्व॑विन्दत्।
ब्र॒ह्मैतद्ब्रह्म॑ण॒ उज्ज॑भार।
अ॒र्कꣳश्चोत॑न्तꣳ सरि॒रस्य॒ मध्ये᳚।
आ यस्मि॒न्थ्स॒प्त पेर॑वः।
मेह॑न्ति बहु॒लाꣳ श्रिय᳚म्।
ब॒ह्व॒श्वामि॑न्द्र॒ गोम॑तीम्॥ २५॥

((indro̱ rājā̱ jagato̱ ya īśe |
sa̱ptahotā saptadhā vikl̥ptaḥ |
pareṇa̱ tantum parisi̱cyamānam |
a̱ntarādi̱tye manasā̱ carantam |
de̱vānā̱m̐ hr̥dayam̱ brahmā'nvavindat |
brahmai̱tadbrahmaṇa̱ ujjabhāra |
a̱rkam̐ścotantam̐ sari̱rasya̱ madhye |
ā yasminthsa̱pta peravaḥ |
mehanti bahu̱lām̐ śriyam |
ba̱hva̱śvāmindra̱ gomatīm || 25 ||))

[[3-11-7]]
अच्यु॑तां बहु॒लाꣳ श्रिय᳚म्।
स हरि॑र्वसु॒वित्त॑मः।
पे॒रुरिन्द्रा॑य पिन्वते।
ब॒ह्व॒श्वामि॑न्द्र॒ गोम॑तीम्।
अच्यु॑तां बहु॒लाꣳ श्रिय᳚म्।
मह्यमिन्द्रो॒ निय॑च्छतु।
श॒तꣳश॒ता अ॑स्य यु॒क्ता हरी॑णाम्।
अ॒र्वाङाया॑तु॒ वसु॑भी र॒श्मिरिन्द्रः॑।
प्रमꣳह॑माणो बहु॒लाꣳ श्रिय᳚म्।
र॒श्मिरिन्द्र॑स्सवि॒ता मे॒ निय॑च्छतु॥ २६॥

((acyutām̱ bahu̱lām̐ śriyam |
sa harirvasu̱vittamaḥ |
pe̱rurindrāya pinvate |
ba̱hva̱śvāmindra̱ gomatīm |
acyutām̱ bahu̱lām̐ śriyam |

mahyamindro niyacchatu |
śatamṁśatā asya yuktā hariṇām |
arvāṅāyātu vasubhī raśmirindraḥ |
pramamṁhamāṇo bahulāṁ śriyām |
raśmirindrassavitā me niyacchatu || 26 ||))

[[3-11-8]]

घृतन्तेजो मधुमदिन्द्रियम्।
मय्ययमग्निर्दधातु।
हरिः पतङ्गः पटरी सुपर्णः।
दिविक्षयो नभसा य एति।
स न इन्द्रः कामवरं ददातु।
पञ्चारं चक्रं परिवर्तते पृथु।
हिरन्यज्योतिस्सरिरस्य मध्ये।
अजस्रं ज्योतिर्नभसा सर्पदेति।
स न इन्द्रः कामवरं ददातु।
सप्त युञ्जन्ति रथमेकचक्रम्॥ २७॥

((ghṛtantejo madhumadindriyam |
mayyayamagnirdadhātu |
hariḥ pataṅgaḥ paṭarī suparṇaḥ |
divikṣayo nabhasā ya eti |
sa na indraḥ kāmavaraṃ dadātu |
pañcāraṃ cakraṃ parivartate pṛthu |
hiranyajyotissarirasya madhye |
ajasraṃ jyotirnabhasā sarpadeti |
sa na indraḥ kāmavaraṃ dadātu |
sapta yuñjanti rathamekacakram || 27 ||))

[[3-11-9]]

एको अश्वो वहति सप्तनामा।
त्रिनाभि चक्रमजरमनर्वम्।
येनेमा विश्वा भुवनानि तस्थुः।
भद्रं पश्यन्त उपसेदुरग्रे।
तपो दीक्षामृषयस्सुवर्विदः।
ततः क्षत्रं बलमोजश्च जातम्।
तदस्मै देवा अभिसन्नमन्तु।

श्वे॒तꣳ र॒श्मिं बो॑भु॒ज्यमा॑नम्।
अ॒पान्ने॒तार॒ं भुव॑नस्य गो॒पाम्।
इन्द्र॒ं निचि॑क्युः पर॒मे व्यो॑मन्॥ २८॥

((eko̱ aśvo̍ vahati saptanā̱mā |
tri̱nābhi̍ ca̱krama̱jara̱manarvam |
yene̱mā viśvā̱ bhuva̍nāni tasthuḥ |
bha̱draṃ paśya̍nta̱ upa̍sedu̱ragre̎ |
tapo̍ dī̱kṣāmṛṣa̍yassuva̱rvida̍ḥ |
tata̍ḥ kṣa̱traṃ bala̱moja̍śca jā̱tam |
tada̱smai de̱vā a̱bhisanna̍mantu |
śve̱taꣳ ra̱śmiṃ bo̍bhu̱jyamā̍nam |
a̱pānne̱tāra̱ṃ bhuva̍nasya go̱pām |
indra̱ṃ nici̍kyuḥ para̱me vyo̍man || 28 ||))

[[3-11-10]]
रोहि॑णीः पि॒ङ्गला एक॑रूपाः।
क्षर॑न्तीः पि॒ङ्गला एक॑रूपाः।
श॒तꣳ स॒हस्रा॑णि प्र॒युता॑नि॒ नव्या॑नाम्।
अ॒यं यश्श्वे॒तो र॒श्मिः।
परि॒ सर्व॑मि॒दं जग॑त्।
प्र॒जां प॒शून्धना॑नि।
अ॒स्माकं॑ ददातु।
श्वे॒तो र॒श्मिः परि॒ सर्वं॑ बभूव।
सु॒वन्मह्यं॑ प॒शून्वि॒श्वरू॑पान्।
प॒त॒ङ्गम॒क्तमसु॑रस्य मा॒यया᳚॥ २९॥

((rohi̍ṇīḥ piṅga̱lā eka̍rūpāḥ |
kṣara̍ntīḥ piṅga̱lā eka̍rūpāḥ |
śa̱taꣳ sa̱hasrā̍ṇi pra̱yutā̍ni̱ navyā̍nām |
a̱yaṃ yaśśve̱to ra̱śmiḥ |
pari̱ sarva̍mi̱daṃ jaga̍t |
pra̱jāṃ pa̱śūndhanā̍ni |
a̱smākaṃ̍ dadātu |
śve̱to ra̱śmiḥ pari̱ sarvaṃ̍ babhūva |
suva̱nmahyaṃ̍ pa̱śūnvi̱śvarū̍pān |
pa̱ta̱ṅgama̱ktamasu̍rasya mā̱yayā̎ || 29 ||))

[[3-11-11]]

हृदा पश्यन्ति मनसा मनीषिणः।
समुद्रे अन्तः कवयो विचक्षते।
मरीचीनां पदमिच्छन्ति वेधसः।
पतङ्गो वाचं मनसा बिभर्ति।
तां गन्धर्वोऽवदद्गर्भे अन्तः।
तां द्योतमानाꣳस्वर्यं मनीषाम्।
ऋतस्य पदे कवयो निपान्ति।
ये ग्राम्याः पशवो विश्वरूपाः।
विरूपास्सन्तो बहुधैकरूपाः।
अग्निस्ताꣳ अग्ने प्रमुमोक्तु देवः॥ ३०॥

((hṛdā páśyanti manásā manīṣiṇáḥ |
samudre antaḥ kavayo vicákṣate |
marícīnāṃ padamícchanti vedhasáḥ |
patańgo vācaṃ manásā bibharti |
tāṃ gándharvó'vadadgarbhé antaḥ |
tāṃ dyotámānāḿsvaryaṃ́ manīṣām |
ṛtasyá pade kavayo nipānti |
ye grāmyāḥ paśavó viśvarúpāḥ |
virúpāssantó bahudhaikárūpāḥ |
agnistāḿ agne pramúmoktu devaḥ || 30 ||))

[[3-11-12]]
प्रजापतिः प्रजया संविदानः।
वीतꣳ स्तुकेस्तुके।
युवमस्मासु नियच्छतम्।
प्रप्र यज्ञपतिन्तिर।
ये ग्राम्याः पशवो विश्वरूपाः।
विरूपास्सन्तो बहुधैकरूपाः।
तेषाꣳ सप्तानामिह रन्तिरस्तु।
रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय।
य आरण्याः पशवो विश्वरूपाः।
विरूपास्सन्तो बहुधैकरूपाः॥ ३१॥

((prajāpátiḥ prajayá saṃvidānaḥ |

vī̱taggͫ stu̍kestuke ।
yu̱vama̱smāsu̱ niya̍cchatam ।
prapra̍ ya̱jñapa̍tintira ।
ye grā̱myāḥ pa̱śavo̍ vi̱śvarū̎pāḥ ।
virū̎pā̱ssanto̍ bahu̱dhaika̍rūpāḥ ।
teṣāggͫ sapta̱nāmi̱ha ranti̎rastu ।
rā̱yaspoṣā̎ya supraj̱āstvāya̍ su̱vīryā̎ya ।
ya ā̎ra̱ṇyāḥ pa̱śavo̍ vi̱śvarū̎pāḥ ।
virū̎pā̱ssanto̍ bahu̱dhaika̍rūpāḥ ॥ 31 ॥))

[[3-11-13]]

वा॒युस्ताꣳ अ॒ग्ने प्रमु॑मोक्तु दे॒वः।
प्र॒जाप॑तिः प्र॒जया॑ संविदा॒नः।
इडा॑यै सृ॒प्तं घृ॒तव॑च्चराच॒रम्।
दे॒वा अन्व॑विन्द॒न्गुहा॑हि॒तम्।
य आ॑र॒ण्याः प॒शवो॑ वि॒श्वरू॑पाः।
विरू॑पा॒स्सन्तो॑ बहु॒धैक॑रूपाः।
तेषाꣳ स॒प्ता॒नामि॒ह रन्ति॑रस्तु।
रा॒यस्पोषा॑य सुप्रजा॒स्त्वाय॑ सु॒वीर्या॑य॥ ३२॥
आ॒त्मा जना॑नां वि॒कुर्व॑न्तं॒ विप॒श्चिं प्र॒जाना॒ँ वसु॒धानी॒ँ वि॒राजं॒ चर॑न्तं॒ गोम॑तीं मे॒ निय॑च्छ॒त्वेक॑चक्रं॒ व्योम॑न्मा॒यया॑ दे॒व एक॑रूपा अ॒ष्टौ च॑॥ ११॥

((vā̱yustāggͫ agne̱ pramu̍moktu de̱vaḥ ।
pra̱jāpa̍tiḥ pra̱jayā̎ saṃvidā̱naḥ ।
iḍā̎yai sṛ̱ptaṃ ghṛ̱tava̍ccarāca̱ram ।
de̱vā anva̍vinda̱nguhā̎hi̱tam ।
ya ā̎ra̱ṇyāḥ pa̱śavo̍ vi̱śvarū̎pāḥ ।
virū̎pā̱ssanto̍ bahu̱dhaika̍rūpāḥ ।
teṣāggͫ sapta̱nāmi̱ha ranti̎rastu ।
rā̱yaspoṣā̎ya supraj̱āstvāya̍ su̱vīryā̎ya ॥ 32 ॥
ā̱tmā janā̎nāṃ viku̱rvanta̍ṃ vipa̱ściṃ pra̱jānā̎ṃ vasu̱dhānī̎ṃ vi̱rāja̱ṃ carā̍nta̱ṃ
gomā̍tīṃ me̱ niya̍ccha̱tvekā̍cakra̱ṃ vyo̍manmā̱yayā̎ de̱va ekā̍rūpā a̱ṣṭau ca̍ ॥ 11 ॥))

[[3-12-1]]

स॒हस्र॑शीर्षा॒ पुरु॑षः।
स॒ह॒स्रा॒क्षस्स॒हस्र॑पात्।
स भूमिं॑ वि॒श्वतो॑ वृ॒त्वा।
अत्य॑तिष्ठद्दशाङ्गु॒लम्।

पुरु॑ष ए॒वेद२ं सर्वम्᳚।
यद्भू॒तं यच्च॒ भव्य᳚म्।
उ॒तामृ॑त॒त्वस्येशा॑नः।
य॒दन्नेना॑ति॒रोह॑ति।
ए॒तावा॑नस्य महि॑मा।
अतो॒ ज्याया२ं॑श्च॒ पूरु॑षः॥ ३३॥

((sa̱hasra̍śīrṣā̱ puru̍ṣaḥ ।
sa̱ha̱srā̱kṣassa̱hasra̍pāt ।
sa bhūmi̍m vi̱śvato̍ vṛ̱tvā ।
atya̍tiṣṭhaddaśāṅgu̱lam ।
puru̍ṣa e̱vedam̐ sarvam᳚ ।
yadbhū̱tam yacca̱ bhavya᳚m ।
u̱tāmṛ̍ta̱tvasyeśā̍naḥ ।
ya̱danne̍nāti̱roha̍ti ।
e̱tāvā̍nasya mahi̍mā ।
ato̱ jyāyām̐̍śca̱ pūru̍ṣaḥ ॥ 33 ॥))

[[3-12-2]]
पादो᳚ऽस्य॒ विश्वा॑ भू॒तानि॑।
त्रि॒पाद॑स्या॒मृतं॑ दि॒वि।
त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः।
पादो᳚ऽस्ये॒हाभ॑वा॒त्पुनः॑।
ततो॒ विश्व॒ङ्व्य॑क्रामत्।
सा॒श॒ना॒न॒श॒ने अ॒भि।
तस्मा᳚द्वि॒राड॑जायत।
वि॒राजो॒ अधि॒ पूरु॑षः।
स जा॒तो अत्य॑रिच्यत।
प॒श्चाद्भूमि॒मथो॑ पु॒रः॥ ३४॥

((pādo᳚'sya̱ viśva̍ bhū̱tāni̍ ।
tri̱pāda̍syā̱mṛtam̍ di̱vi ।
tri̱pādū̱rdhva udai̱tpuru̍ṣaḥ ।
pādo᳚'sye̱hābha̍vā̱tpuna̍ḥ ।
tato̱ viśva̱ṅvya̍krāmat ।
sā̱śa̱nā̱na̱śa̱ne a̱bhi ।
tasmā᳚dvi̱rāḍa̍jāyata ।
vi̱rājo̱ adhi̱ pūru̍ṣaḥ ।

sa jāto atyáricyata |
paścādbhūmimathó puraḥ || 34 ||))

[[3-12-3]]
यत्पुरुषेण हविषा।
देवा यज्ञमतन्वत।
वसन्तो अस्यासीदाज्यम्।
ग्रीष्म इध्मश्शरद्धविः।
सप्तास्यासन्परिधयः।
त्रिस्सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वानाः।
अबध्नन्पुरुषं पशुम्।
तं यज्ञं बर्हिषि प्रौक्षन्न्।
पुरुषं जातमग्रतः॥ ३५॥

((yatpurúṣeṇa haviṣā |
devā yajñamatánvata |
vasanto ásyāsīdājyam |
grīṣma idhmaśśaraddhaviḥ |
saptāsyásanparidhayáḥ |
trissapta samidháḥ kṛtāḥ |
devā yadyajñaṃ tánvānāḥ |
abádhnanpurúṣaṃ paśum |
taṃ yajñaṃ barhiṣi praukṣánn |
purúṣaṃ jātamágrataḥ || 35 ||))

[[3-12-4]]
तेन देवा अयजन्त।
साध्या ऋषयश्च ये।
तस्माद्यज्ञात्सर्वहुतः।
संभृतं पृषदाज्यम्।
पशूꣳस्ताꣳश्चक्रे वायव्यान्।
आरण्यान्ग्राम्याश्च ये।
तस्माद्यज्ञात्सर्वहुतः।
ऋचस्सामानि जज्ञिरे।
छन्दाꣳसि जज्ञिरे तस्मात्।

यजुस्तस्मादजायत॥ ३६॥

((tena devā ayajanta ।
sādhyā ṛṣayaśca ye ।
tasmādyajñāthsarvahutaḥ ।
saṃbhṛtaṃ pṛṣadājyam ।
paśūṃstāṃścakre vāyavyān ।
āraṇyāngrāmyāśca ye ।
tasmādyajñāthsarvahutaḥ ।
ṛcassāmāni jajñire ।
chandāṃsi jajñire tasmāt ।
yajustasmādajāyata ॥ 36 ॥))

[[3-12-5]]

तस्मादश्वा अजायन्त।
ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्।
तस्माज्जाता अजावयः।
यत्पुरुषं व्यदधुः।
कतिधा व्यकल्पयन्न्।
मुखं किमस्य कौ बाहू।
कावूरू पादावुच्येते।
ब्राह्मणोऽस्य मुखमासीत्।
बाहू राजन्यः कृतः॥ ३७॥

((tasmādaśvā ajāyanta ।
ye ke cobhayādataḥ ।
gāvo ha jajñire tasmāt ।
tasmājjātā ajāvayaḥ ।
yatpuruṣaṃ vyadadhuḥ ।
katidhā vyakalpayann ।
mukhaṃ kimasya kau bāhū ।
kāvūrū pādāvucyete ।
brāhmaṇo'sya mukhamāsīt ।
bāhū rājanyaḥ kṛtaḥ ॥ 37 ॥))

[[3-12-6]]

ऊरू तदस्य यद्वैश्यः।
पद्भ्याꣳ शूद्रो अजायत।

च॒न्द्रमा॒ मन॑सो जा॒तः।
चक्षो॒स्सूर्यो॑ अजायत।
मुखा॒दिन्द्र॑श्चा॒ग्निश्च॑।
प्रा॒णाद्वा॒युर॑जायत।
नाभ्या॑ आसीद॒न्तरि॑क्षम्।
शी॒र्ष्णो द्यौस्सम॑वर्तत।
प॒द्भ्यां भूमि॒र्दिश॒श्श्रोत्रा॑त्।
तथा॑ लो॒काꣳ अ॑कल्पयन्न्॥ ३८॥

((ūrū tada̍sya̱ yadvaiśya̍ḥ |
pa̱dbhyām̐ śū̱dro a̍jāyata |
ca̱ndramā̱ mana̍so jā̱taḥ |
cakṣo̱ssūryo̍ ajāyata |
mukhā̱dindra̍ścā̱gniśca̍ |
prā̱ṇādvā̱yura̍jāyata |
nābhya̍ āsīda̱ntari̍kṣam |
śī̱rṣṇo dyaussama̍vartata |
pa̱dbhyāṃ bhūmi̱rdiśa̱śśrotra̍̄t |
tathā̍ lo̱kām̐ a̍kalpayann || 38 ||))

[[3-12-7]]
वेदा॒हमे॒तं पुरु॑षं म॒हान्त॑म्।
आ॒दि॒त्यव॑र्णं॒ तम॑स॒स्तु पा॒रे।
सर्वा॑णि रू॒पाणि॑ वि॒चित्य॒ धीर॑ः।
नामा॑नि कृ॒त्वाऽभि॒वद॒न्यदा॒स्ते॑।
धा॒ता पु॒रस्ता॒द्यमु॑दा॒ज॒हार॑।
श॒क्रः प्रवि॒द्वान्प्र॒दिश॒श्चत॑स्रः।
तमे॒वं वि॒द्वान॒मृत॑ इ॒ह भ॑वति।
नान्यः पन्था॒ अय॑नाय विद्यते।
य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः।
तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन्।
ते ह॒ नाकं॑ महि॒मान॑स्सचन्ते।
यत्र॒ पूर्वे॑ सा॒ध्यास्सन्ति॑ दे॒वाः॥ ३९॥
पूरु॑षः पु॒रो॑ऽग्र॒तो॑ऽजायत कृ॒तो॑ऽकल्पयन्नास॒न्द्वे च॑॥ १२॥

( ज्यायानधि पूरुषः। अन्यत्र पुरुषः॥ )

((vedāhametaṃ puruṣaṃ mahāntām |
ādityavarṇaṃ tamasastu pāre |
sarvāṇi rūpāṇi vicitya dhīraḥ |
nāmāni kṛtvā'bhivadanyadāste |
dhātā purastādyamudājahāra |
śakraḥ pravidvānpradiśaścatasraḥ |
tamevaṃ vidvānamṛta iha bhavati |
nānyaḥ panthā ayanāya vidyate |
yajñena yajñamayajanta devāḥ |
tāni dharmāṇi prathamānyāsan |
te ha nākaṃ mahimānassacante |
yatra pūrve sādhyāssanti devāḥ || 39 ||
pūruṣaḥ puro'grato'jāyata kṛto'kalpayannāsandve ca || 12 ||

( jyāyānadhi pūruṣaḥ | anyatra puruṣaḥ || )))

[[3-13-1]]

अद्भ्यस्संभूतः पृथिव्यै रसाच्च।
विश्वकर्मणस्समवर्तताधि।
तस्य त्वष्टा विदधद्रूपमेति।
तत्पुरुषस्य विश्वमाजानमग्रे।
वेदाहमेतं पुरुषं महान्तम्।
आदित्यवर्णं तमसः परस्तात्।
तमेवं विद्वानमृत इह भवति।
नान्यः पन्था विद्यतेऽयनाय।
प्रजापतिश्चरति गर्भे अन्तः।
अजायमानो बहुधा विजायते॥ ४०॥

((adbhyassaṃbhūtaḥ pṛthivyai rasācca |
viśvakarmaṇassamavartatādhi |
tasya tvaṣṭā vidadhadrūpameti |
tatpuruṣasya viśvamājānamagre |
vedāhametaṃ puruṣaṃ mahāntām |
ādityavarṇaṃ tamasaḥ parastāt |
tamevaṃ vidvānamṛta iha bhavati |
nānyaḥ panthā vidyate'yanāya |
prajāpatiścarati garbhe antaḥ |
ajāyamano bahudhā vijāyate || 40 ||))

[[3-13-2]]

तस्य॒ धीरा॒ः परि॑जानन्ति॒ योनि᳚म्।
मरी॑चीनां प॒दमि॑च्छन्ति वे॒धस॑ः।
यो दे॒वेभ्य॒ आत॑पति।
यो दे॒वानां᳚ पु॒रोहि॑तः।
पूर्वो॒ यो दे॒वेभ्यो॑ जा॒तः।
नमो॑ रु॒चाय॒ ब्राह्म॑ये।
रु॒चं॑ ब्रा॒ह्मं ज॒नय॑न्तः।
दे॒वा अग्रे॒ तद॑ब्रुवन्न्।
यस्त्वै॒वं ब्रा᳚ह्म॒णो वि॒द्यात्।
तस्य॑ दे॒वा अस॒न्वशे᳚।
ह्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्यौ᳚।
अ॒हो॒रा॒त्रे पा॒र्श्वे।
नक्ष॑त्राणि रू॒पम्।
अ॒श्विनौ॒ व्यात्त᳚म्।
इ॒ष्टं म॑निषाण।
अ॒मुं म॑निषाण।
सर्वं᳚ मनिषाण॥ ४१॥
जा॒य॒ते॒ वशो॑ स॒प्त च॑॥ १३॥

((tasya̱ dhīrā̱ḥ pari̍jānanti̱ yoni̎m |
mari̍cīnāṃ pa̱dami̍cchanti ve̱dhasa̍ḥ |
yo de̱vebhya̱ āta̍pati |
yo de̱vānā̎ṃ pu̱rohi̍taḥ |
pūrvo̱ yo de̱vebhyo̍ jā̱taḥ |
namo̍ ru̱cāya̱ brāhma̍ye |
ruca̍ṃ brā̱hmaṃ ja̱naya̍ntaḥ |
de̱vā agre̱ tada̍bruvann |
yastvai̱vaṃ brā̎hma̱ṇo vi̱dyāt |
tasya̍ de̱vā asa̱nvaśe̎ |
hrīśca̍ te la̱kṣmīśca̱ patnyau̎ |
a̱ho̱rā̱tre pā̱rśve |
nakṣa̍trā̱ṇi rū̱pam |
a̱śvinau̱ vyātta̎m |
i̱ṣṭaṃ ma̍niṣāṇa |
a̱muṃ ma̍niṣāṇa |

sarvam̐ maniṣāṇa || 41 ||
jāyate vaśe sapta ca || 13 ||))

[[3-14-1]]

भर्ता सन्भ्रियमाणो बिभर्ति।
एको देवो बहुधा निविष्टः।
यद भारं तन्द्रयते स भर्तुम्।
निधाय भारं पुनरस्तमेति।
तमेव मृत्युममृतं तमाहुः।
तं भर्तारं तमु गोप्तारमाहुः।
स भृतो भ्रियमाणो बिभर्ति।
य एनं वेद सत्येन भर्तुम्।
सद्यो जातमुत जहात्येषः।
उतो जरन्तं न जहात्येकम्॥ ४२॥

((bhartā sanbhriyamāṇo bibharti |
eko devo bahudhā niviṣṭaḥ |
yada bhāram tandrayate sa bhartum |
nidhāya bhāram punarastameti |
tameva mṛtyumamṛtam tamāhuḥ |
tam bhartāram tamu goptāramāhuḥ |
sa bhṛto bhriyamāṇo bibharti |
ya enam veda satyena bhartum |
sadyo jātamuta jahātyeṣaḥ |
uto jarantam na jahātyekam || 42 ||))

[[3-14-2]]

उतो बह्वनेकमहर्जहार।
अतन्द्रो देवस्सदमेव प्रार्थः।
यस्तद्वेद यत आबभूव।
सन्धां च याꣳ संदधे ब्रह्मणैषः।
रमते तस्मिन्नुत जीर्णे शयाने।
नैनं जहात्यहस्सु पूर्व्येषु।
त्वामापो अनु सर्वाश्चरन्ति जानतीः।
वत्सं पयसा पुनानाः।
त्वमग्निꣳ हव्यवाहꣳ समिन्थसे।

त्वं भ॒र्ता मा॑त॒रिश्वा॒ँ प्र॒जाना॒ँम्॥ ४३॥

((u̱to ba̱hūneka̱mahárjahāra |
atándro de̱vassadáme̱va prārtháḥ |
yastadveda̱ yatá ābạbhūvá |
sa̱ndhāṃ ca̱ yāṁ saṃda̱dhe brahmáṇai̱ṣaḥ |
ramáte̱ tasminnu̱ta jī̱rṇe śayáne |
nainaṃ jahā̱tyahássu pū̱rvyeṣú |
tvāmāpo̱ anu̱ sarvā̱ścaranti jāna̱tīḥ |
va̱thsaṃ payásā punā̱nāḥ |
tvama̱gniṁ hávyavāha̱ṁ saminthse |
tvaṃ bha̱rtā máta̱riśvā̱ pra̱jānā̱m || 43 ||))

[[3-14-3]]

त्वं य॒ज्ञस्त्वमु॑ व॒वासि॒ सोम॑ः।
तव॑ दे॒वा ह॒वमाय॑न्ति॒ सर्वे॒ँ।
त्वमेको॑ऽसि ब॒हूननु॒प्रवि॑ष्टः।
नम॑स्ते अस्तु सु॒हवो॑ म एधि।
नमो॑ वामस्तु शृणु॒तꣳ हवं॑ मे।
प्राणा॑पानावजि॒रꣳ सं॒चर॑न्तौ।
ह्वया॑मि वां॒ ब्रह्म॑णा तू॒र्तमे॒तम्।
यो मां द्वेष्टि॒ तं ज॑हितं युवाना।
प्राणा॑पानौ संविदा॒नौ ज॑हितम्।
अ॒मुष्यासु॑ना॒ मा संग॑साथाम्॥ ४४॥

((tvaṃ ya̱jñastvamú ve̱vāsi̱ somáḥ |
tavá de̱vā hava̱māyánti̱ sarvē |
tvamekó'si ba̱hūnanu̱praviṣṭaḥ |
namáste astu su̱havó ma edhi |
namó vāmastu śṛṇu̱taṁ havaṃ me |
prāṇápānāvaji̱raṁ saṃcarántau |
hvayámi vāṃ brahmáṇā tū̱rtametā̱m |
yo māṃ dveṣṭi̱ taṃ jáhitaṃ yuvānā |
prāṇápānau saṃvidā̱nau jáhitam |
a̱muṣyāsúnā̱ mā saṃgásāthām || 44 ||))

[[3-14-4]]

तं मे॑ देवा॒ ब्रह्म॑णा संविदा॒नौ।
व॒धाय॑ द॒त्तं तम॒हꣳ ह॑नामि।

असञ्जजान सत आबभूव।
यंयं जजान स उं गोपो अस्य।
यदा भारं तन्द्रयते स भर्तुम्।
परास्य भारं पुनरस्तमेति।
तद्वै त्वं प्राणो अभवः।
महान्भोगः प्रजापतेः।
भुजः करिष्यमाणः।
यद्देवान्प्राणयो नव॥ ४५॥
एकं प्रजानां गसाथां नव॥ १४॥

((taṃ me devā brahmaṇā saṃvidānau |
vadhāya dattaṃ tamahaṃ hanāmi |
asajjajāna sata ābabhūva |
yaṃyaṃ jajāna sa u gopo asya |
yadā bhāraṃ tandrayate sa bhartum |
parāsya bhāraṃ punarastameti |
tadvai tvaṃ prāṇo abhavaḥ |
mahānbhogaḥ prajāpateḥ |
bhujaḥ kariṣyamāṇaḥ |
yaddevānprāṇayo nava || 45 ||
ekaṃ prajānāṃ gasāthāṃ nava || 14 ||))

[[3-15-1]]
हरिꣳ हरन्तमनुयन्ति देवाः।
विश्वस्येशानं वृषभं मतीनाम्।
ब्रह्म सरूपमनु मेदमागात्।
अयनं मा विवधीर्विक्रमस्व।
मा छिदो मृत्यो मा वधीः।
मा मे बलं विवृहो मा प्रमोषीः।
प्रजां मा मे रीरिष आयुरुग्र।
नृचक्षसं त्वा हविषा विधेम।
सद्यश्चकमानाय।
प्रवेपानाय मृत्यवे॥ ४६॥

((hariṃ harantamanuyanti devāḥ |
viśvasyeśānaṃ vṛṣabhaṃ matīnām |

brahma̠ sarū̍pa̠manu̍ me̠damāgā̎t ।
ayā̍nam̠ mā vivā̍dhī̠rvikrā̍masva ।
mā chi̍do mr̠tyo̠ mā vā̍dhīḥ ।
mā me̠ balam̠ vivr̍ho̠ mā pramo̍ṣīḥ ।
pra̠jām̠ mā me̍ rīriṣa̠ āyu̍rugna ।
nr̠cakṣa̍sam̠ tvā ha̠viṣā̎ vidhema ।
sa̠dyaśca̍kamā̠nāyā̍ ।
pra̠ve̠pā̠nāyā̍ mr̠tyave̎ ॥ 46 ॥))

[[3-15-2]]

प्रास्मा̠ आशा̍ अशृण्वन्न्।
कामे̍नाजनय̠न्पुन॑ः।
कामे̍न मे̠ काम॒ आगा॑त्।
हृद॑या̠द्धृद॑यं मृ̠त्योः।
यद॒मीषा॑म॒दः प्रि॒यम्।
तदैतू॒प माम॒भि।
परं॑ मृत्यो॒ अनु॒परे॑हि॒ पन्था॑म्।
यस्ते॒ स्व इत॑रो दे॒वयाना॑त्।
चक्षु॑ष्मते शृण्व॒ते ते॑ ब्रवीमि।
मा न॑ः प्र॒जाꣳ री॑रिषो॒ मोत वी॒रान्।
प्र पूर्व्यं॑ मन॑सा॒ वन्द॑मानः।
नाध॑मानो वृष॒भं च॑र्षणी॒नाम्।
यः प्र॒जाना॑मेक॒राण्मानु॑षीणाम्।
मृ॒त्युं य॑जे प्रथम॒जामृ॒तस्य॑॥ ४७॥
मृ॒त्यवे॑ वी॒राꣳश्च॒त्वारि॑ च॥ १५॥

((prāsmā̠ āśā̍ aśr̥ṇvann ।
kāme̍nājanaya̠npuna̍ḥ ।
kāme̍na me̠ kāma̠ āgā̎t ।
hr̥da̍yā̠ddhr̥da̍yam̠ mr̠tyoḥ ।
yada̠mīṣā̍ma̠daḥ pri̠yam ।
tadaitūpa̠ māma̠bhi ।
param̍ mr̥tyo̠ anu̠pare̍hi̠ panthā̎m ।
yaste̠ sva ita̍ro deva̠yānā̎t ।
cakṣu̍ṣmate śr̥ṇva̠te te̎ bravīmi ।
mā na̍ḥ pra̠jām̐ ri̍riṣo̠ mota vī̠rān ।
pra pū̠rvyam̠ mana̍sā̠ vanda̍mānaḥ ।
nādha̍māno vr̥ṣa̠bham̠ ca̍rṣaṇī̠nām ।

yaḥ pra̠jānā̍mekā̠rāṇ̣mānu̍ṣīṇām ।
mṛ̠tyuṃ ya̍je prathama̠jāmṛ̠tasya̍ ॥ 47 ॥
mṛ̠tyave̍ vī̠rāṃ̐ś̍ca̠tvāri̍ ca ॥ 15 ॥))

[[3-16-1]]
त॒रणि॑र्वि॒श्वद॑र्शतो ज्योति॒ष्कृद॑सि सूर्य।
विश्व॒माभा॑सि रोच॒नम्।
उ॒प॒या॒मगृ॑हीतोऽसि॒ सूर्या॑य त्वा॒ भ्राज॑स्वत ए॒ष ते॒ योनि॒स्सूर्या॑य त्वा॒ भ्राज॑स्वते॥ ४८॥ ॥ १६॥

((ta̠raṇi̍rvi̠śvada̍rśato jyoti̠ṣkṛda̍si sūrya ।
viśva̠mābhā̍si roca̠nam ।
u̠pa̠yā̠magṛ̍hīto'si̠ sūryā̍ya tvā̠ bhrāja̍svata e̠ṣa te̠ yoni̠ssūryā̍ya tvā̠ bhrāja̍svate ॥ 48 ॥ ॥ 16 ॥))

[[3-17-1]]
आप्या॑यस्व मदिन्तम॒ सोम॒ विश्वा॑भिरू॒तिभि॑ः।
भवा॑ नस्स॒प्रथ॑स्तमः॥ ४९॥ ॥ १७॥

((āpyā̍yasva madintama̠ soma̠ viśvā̍bhirū̠tibhi̍ḥ ।
bhavā̍ nassa̠prathā̍stamaḥ ॥ 49 ॥ ॥ 17 ॥))

[[3-18-1]]
ई॒युष्टे ये पूर्व॑तरा॒मप॑श्यन्व्यु॒च्छन्ती॑मु॒षसं॒ मर्त्या॑सः।
अ॒स्माभि॑रू॒ नु प्र॑ति॒चक्ष्या॑ऽभू॒दो ते य॑न्ति॒ ये अ॑प॒रीषु॒ पश्या॑न्॥ ५०॥ ॥ १८॥

((ī̠yuṣṭe ye pūrva̍tarā̠mapa̍śyanvyu̠cchantī̍mu̠ṣasa̠ṃ martyā̍saḥ ।
a̠smābhi̍rū̠ nu pra̍ti̠cakṣyā̍'bhū̠do te ya̍nti̠ ye a̍pa̠rīṣu̠ paśyā̍n ॥ 50 ॥ ॥ 18 ॥))

[[3-19-1]]
ज्योति॑ष्मतीं त्वा सादयामि ज्योति॒ष्कृतं॑ त्वा सादयामि ज्योति॒र्विदं॑ त्वा सादयामि॒ भास्व॑तीं त्वा सादयामि॒ ज्वल॑न्तीं त्वा सादयामि मल्मला॒ भव॑न्तीं त्वा सादयामि॒ दीप्य॑मानां त्वा सादयामि॒ रोच॑मानां त्वा साद॒या॒म्यज॑स्रां त्वा सादयामि बृ॒हज्ज्यो॑तिषं त्वा सादयामि बो॒धय॑न्तीं त्वा सादयामि॒ जाग्र॑तीं त्वा सादयामि॥ ५१॥ ॥ १९॥

((jyoti̍ṣmatīṃ tvā sādayāmi jyoti̠ṣkṛta̍ṃ tvā sādayāmi jyoti̠rvida̍ṃ tvā sādayāmi̠ bhāsva̍tīṃ tvā sādayāmi̠ jvala̍ntīṃ tvā sādayāmi malmalā̠ bhava̍ntīṃ tvā sādayāmi̠ dīpya̍mānāṃ tvā sādayāmi̠ roca̍mānāṃ tvā sāda̠yā̠myaja̍srāṃ tvā sādayāmi bṛ̠hajjyo̍tiṣaṃ tvā sādayāmi bo̠dhaya̍ntīṃ tvā sādayāmi̠ jāgra̍tīṃ tvā sādayāmi ॥ 51 ॥ ॥ 19 ॥))

[[3-20-1]]

प्रयासाय स्वाहाऽऽयासाय स्वाहा वियासाय स्वाहा संयासाय स्वाहोद्यासाय स्वाहाऽवयासाय स्वाहा शुचे स्वाहा शकाय स्वाहा तप्यत्वै स्वाहा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै स्वाहा॥ ५२॥ ॥ २०॥

((prayāsāya svāhā''yāsāya svāhā viyāsāya svāhā saṃyāsāya svāhodyāsāya svāhā'vayāsāya svāhā śuce svāhā śakāya svāhā tapyatvai svāhā tapate svāhā brahmahatyāyai svāhā sarvasmai svāhā || 52 || || 20 ||))

[[3-21-1]]
चित्तꣳ संतानेन भवं यक्ना रुद्रं तनिम्ना पशुपतिꣳ स्थूलहृदयेनाग्निꣳ हृदयेन रुद्रं लोहितेन शर्वं मतस्नाभ्यां महादेवमन्तः पार्श्वेनौषिष्ठहनꣳ शिङ्गीनिकोश्याभ्याम्॥ ५३॥ ॥ २१॥

चित्तिः पृथिव्याग्निस्सूर्यं ते चक्षुर्महाहविर्होता वाग्घोता ब्राह्मण एकहोताऽग्निर्यजुर्भिस्सेनेन्द्रस्य देवस्य सुवर्णं घर्मꣳ सहस्रशीर्षाऽद्भ्यो भर्ता हरिं तरणिराप्यायस्वेयुष्टे ये ज्योतिष्मतीं प्रयासाय चित्तमेकविꣳशतिः॥ २१॥

चित्तिरग्निर्यजुर्भिरन्तः प्रविष्टः प्रजापतिः प्रजया संविदानस्तस्य धीरा ज्योतिष्मतीं त्रिपञ्चाशत्॥ ५३॥

चित्तिश्शिङ्गीनिकोश्याभ्याम्॥

((cittaṁ saṁtānena bhavaṃ yaknā rudraṃ tanimnā paśupatiṁ sthūlahṛdayenāgniṁ hṛdayena rudraṃ lohitena śarvaṃ matasnābhyāṃ mahādevamantaḥ pārśvenauṣiṣṭhahanaṁ śiṅgīnikośyābhyām || 53 || || 21 ||

cittiḥ pṛthivyāgnissūryaṃ te cakṣurmahāhavirhotā vāgghotā brāhmaṇa ekahotā'gniryajurbhissenendrasya devasya suvarṇaṃ gharmaṁ sahasraśīrṣā'dbhyo bhartā hariṃ taraṇirāpyāyasveyuṣṭe ye jyotiṣmatīṃ prayāsāya cittamekaviṁśatiḥ || 21 ||

cittiragniryajurbhirantaḥ praviṣṭaḥ prajāpatiḥ prajayā saṃvidānastasya dhīrā jyotiṣmatīṃ tripañcāśat || 53 ||

cittiśśiṅgīnikośyābhyām ||))

[[3-0-0]]
तच्छं योरावृणीमहे।
गातुं यज्ञाय।

ग॒तुं य॒ज्ञप॑तये।
दैवीँ॑ स्व॒स्तिर॑स्तु नः।
स्व॒स्तिर्मानु॑षेभ्यः।
ऊ॒र्ध्वं जि॑गातु भेष॒जम्।
शं नो॑ अस्तु द्वि॒पदे॓।
शं चतु॑ष्पदे॥
ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

((taccham̱ yorāvṛ̍ṇīmahe |
gā̱tuṃ ya̱jñāya̍ |
gā̱tuṃ ya̱jñapa̍taye |
daivī̎ sva̱stira̍stu naḥ |
sva̱stirmānu̍ṣebhyaḥ |
ū̱rdhvaṃ ji̍gātu bheṣa̱jam |
śaṃ no̍ astu dvi̱padē̎ |
śaṃ catu̍ṣpade ||
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ ||))

# Taittirīya-Āraṇyaka

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 4

[[4-0-0]]

नमोऽनु॑ मदन्तु॥
ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

((namo'nu̍ madantu ||
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ ||))

[[4-1-1]]

नमो॑ वा॒चे या चोदि॒ता या चानु॑दि॒ता तस्यै॑ वा॒चे नमो॒ नमो॑ वा॒चे नमो॑ वा॒चस्पत॑ये॒ नम॒ ऋषि॑भ्यो
मन्त्र॒कृद्भ्यो॒ मन्त्र॑पतिभ्यो॒ मा मामृष॑यो मन्त्र॒कृतो॑ मन्त्र॒पत॑यः॒ परा॑दु॒र्मा॑ऽहमृषी᳚न्मन्त्र॒कृतो॑
मन्त्र॒पती॒न्परा॑दां वैश्वदे॒वीं वाच॑मुद्यासꣳ शि॒वामद॑स्ता॒ं जुष्टा᳚ं दे॒वेभ्य॒श्शर्म᳚ मे॒ द्यौश्शर्म᳚ पृथि॒वी शर्म॒
विश्व॑मि॒दं जग॑त्।
शर्म᳚ च॒न्द्रश्च॒ सूर्य॑श्च॒ शर्म᳚ ब्रह्मप्रजाप॒ती।
भू॒तं व॑दिष्ये॒ भुव॑नं वदिष्ये॒ तेजो॑ वदिष्ये॒ यशो॑ वदिष्ये॒ तपो॑ वदिष्ये॒ ब्रह्म॑ वदिष्ये॒ स॒त्यं व॑दिष्ये॒ तस्मा॑
अ॒ह॒मि॒दमु॑प॒स्तर॑ण॒मुप॑स्तृण उ॒पस्तर॑णं मे प्र॒जायै॑ प॒शू॒नां भू॑यादु॒पस्तर॑णम॒हं प्र॒जायै॑ प॒शू॒नां भू॑यास॒ं
प्राणा॑पानौ मृ॒त्योर्मा᳚ पा॒तं प्राणा॑पानौ॒ मा मा॑ हासि॒ष्टं मधु॑ मनिष्ये॒ मधु॑ जनिष्ये॒ मधु॑ वक्ष्यामि॒ मधु॑
वदिष्यामि॒ मधु॑मतीं दे॒वेभ्यो॒ वाच॑मुद्यासꣳ शुश्रू॒षेण्या᳚ं मनु॒ष्ये᳚भ्य॒स्तं मा॑ दे॒वा अ॑वन्तु शो॒भायै॑
पि॒तरोऽनु॑मदन्तु॥
ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥ १॥

((namo̍ vā̱ce yā co̍di̱tā yā cānu̍ditā̱ tasyai̍ vā̱ce namo̱ namo̍ vā̱ce namo̍ vā̱caspata̍ye̱ nama̱ ṛṣi̍bhyo mantra̱kṛdbhyo̱ mantra̍patibhyo̱ mā māmṛṣa̍yo mantra̱kṛto̍ mantra̱pata̍ya̱ḥ parā̍du̱rmā'hamṛṣī̎nmantra̱kṛto̍ mantra̱patī̱nparā̍dāṃ vaiśvade̱vīṃ vāca̍mudyāsam̐ śi̱vāmada̍stā̱ṃ juṣṭā̎ṃ de̱vebhya̱śśarma̍ me̱ dyauśśarma̍ pṛthi̱vī śarma̱ viśva̍mi̱daṃ jaga̍t |
śarma̍ ca̱ndraśca̱ sūrya̍śca̱ śarma̍ brahmaprajāpa̱tī |
bhū̱taṃ va̍diṣye̱ bhuva̍naṃ vadiṣye̱ tejo̍ vadiṣye̱ yaśo̍ vadiṣye̱ tapo̍ vadiṣye̱ brahma̍ vadiṣye sa̱tyaṃ va̍diṣye̱ tasmā̍ a̱hami̱damu̍pa̱staraṇa̱mupa̍stṛ̱ṇa upa̱stara̍ṇaṃ me

pra̱jāyai̍ paśū̱nāṃ bhū̍yādupa̱staraṇamaha̱ṃ pra̱jāyai̍ paśū̱nāṃ bhū̍yāsa̱ṃ
prāṇa̍pānau mṛ̱tyormā̍ pāta̱ṃ prāṇa̍pānau̱ mā mā̍ hāsiṣṭa̱ṃ madhu̍ maniṣye̱ madhu̍
janiṣye̱ madhu̍ vakṣyāmi̱ madhu̍ vadiṣyāmi̱ madhu̍matīṃ de̱vebhyo̱ vāca̍mudyāsa̐ṃ
śuśrū̱ṣeṇyā̍ṃ manu̱ṣye̎bhya̱staṃ mā̍ de̱vā a̍vantu śo̱bhāyai̍ pi̱taro'nu̍madantu ||
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ || 1||))

[[4-2-1]]

युञ्ज॒ते मन॑ उ॒त यु॑ञ्ज॒ते धियः॑।
विप्रा॒ विप्र॑स्य बृह॒तो वि॑प॒श्चितः॑।
वि होत्रा॑ दधे वयुना॒विदेक॒ इत्।
म॒ही दे॒वस्य॑ सवि॒तुः परि॑ष्टुतिः।
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे।
अ॒श्विनो᳚र्बा॒हुभ्या᳚म्।
पू॒ष्णो हस्ता᳚भ्या॒माद॑दे।
अभ्रि॑रसि॒ नारि॑रसि।
अ॒ध्व॒र॒कृद्दे॒वेभ्यः॑।
उत्ति॑ष्ठ ब्रह्मणस्पते॥ २॥

((yu̱ñjate̱ mana̍ u̱ta yu̍ñjate̱ dhiya̍ḥ |
viprā̱ vipra̍sya bṛha̱to vi̍pa̱ściita̍ḥ |
vi hotrā̍ dadhe vayunā̱videka̱ it |
ma̱hī de̱vasya̍ savi̱tuḥ pari̍ṣṭutiḥ |
de̱vasya̍ tvā savi̱tuḥ pra̍sa̱ve |
a̱śvinē̎rbā̱hubhyā̎m |
pū̱ṣṇo hastā̎bhyā̱mādā̍de |
abbhri̍rasi̱ nāri̍rasi |
a̱dhva̱ra̱kṛdde̱vebhya̍ḥ |
utti̍ṣṭha brahma̱ṇaspate || 2 ||))

[[4-2-2]]

दे॒वयन्त॑स्त्वेमहे।
उप॒प्रय॑न्तु म॒रुत॑स्सु॒दान॑वः।
इन्द्र॑ प्रा॒शूर्भ॑वा॒ सचा᳚।
प्रैतु॒ ब्रह्म॑ण॒स्पतिः॑।
प्र दे॒व्ये॑तु सू॒नृता᳚।
अच्छा॑ वी॒रं नर्यं॑ प॒ङ्क्तिरा॑धसम्।
दे॒वा य॒ज्ञं न॑यन्तु नः।

देवी᳚ द्यावापृथिवी॒ अनु॑ मेऽमꣳसाथाम्।
ऋ॒द्ध्यास॑म॒द्य।
म॒खस्य॒ शिर॑ः॥ ३॥

((de̱va̱yanta̍stvemahe ।
upa̱praya̍ntu ma̱ruta̍ssu̱dāna̍vaḥ ।
indra̍ prā̱śūrbha̍vā̱ sacā̎ ।
praitu̱ brahma̍ṇa̱spati̍ḥ ।
pra de̱vye̍tu sū̱nṛtā̎ ।
acchā̍ vī̱raṃ narya̍ṃ pa̱ṅktirā̍dhasam ।
de̱vā ya̱jñaṃ na̍yantu naḥ ।
devī̎ dyāvāpṛthivī̱ anu̍ me'maꣳsātham ।
ṛ̱ddhyāsa̍ma̱dya ।
ma̱khasya̱ śira̍ḥ ॥ 3 ॥))

[[4-2-3]]
म॒खाय॑ त्वा।
म॒खस्य॑ त्वा शी॒र्ष्णे।
इ॒यत्यग्र॑ आसीः।
ऋ॒द्ध्यास॑म॒द्य।
म॒खस्य॒ शिर॑ः।
म॒खाय॑ त्वा।
म॒खस्य॑ त्वा शी॒र्ष्णे।
देवी᳚र्वम्रीर॒स्य भू॒तस्य॑ प्रथमजा ऋतावरीः।
ऋ॒द्ध्यास॑म॒द्य।
म॒खस्य॒ शिर॑ः॥ ४॥

((ma̱khāya̍ tvā ।
ma̱khasya̍ tvā śī̱rṣṇe ।
iya̱tyagra̍ āsīḥ ।
ṛ̱ddhyāsa̍ma̱dya ।
ma̱khasya̱ śira̍ḥ ।
ma̱khāya̍ tvā ।
ma̱khasya̍ tvā śī̱rṣṇe ।
devī̎rvamrīra̱sya bhū̱tasya̍ prathamajā ṛtāvarīḥ ।
ṛ̱ddhyāsa̍ma̱dya ।
ma̱khasya̱ śira̍ḥ ॥ 4 ॥))

[[4-2-4]

म॒खाय॑ त्वा।
म॒खस्य॑ त्वा शी॒र्ष्णे।
इन्द्र॒स्यौजो॑ऽसि।
ऋ॒ध्यास॑म॒द्य।
म॒खस्य॒ शिर॑ः।
म॒खाय॑ त्वा।
म॒खस्य॑ त्वा शी॒र्ष्णे।
अ॒ग्निजा अ॑सि प्र॒जाप॑ते॒ रेत॑ः।
ऋ॒ध्यास॑म॒द्य।
म॒खस्य॒ शिर॑ः॥ ५॥

((ma̱khāya̍ tvā |
ma̱khasya̍ tvā śī̱rṣṇe |
indra̱syaujo̍'si |
ṛ̱ddhyāsa̍ma̱dya |
ma̱khasya̱ śira̍ḥ |
ma̱khāya̍ tvā |
ma̱khasya̍ tvā śī̱rṣṇe |
a̱gnijā a̍si pra̱jāpa̍te̱ reta̍ḥ |
ṛ̱ddhyāsa̍ma̱dya |
ma̱khasya̱ śira̍ḥ || 5 ||))

[[4-2-5]]
म॒खाय॑ त्वा।
म॒खस्य॑ त्वा शी॒र्ष्णे।
आयु॑र्धेहि प्रा॒णं धे॑हि।
अ॒पा॒नं धे॑हि व्या॒नं धे॑हि।
चक्षु॑र्धेहि॒ श्रोत्र॑ं धेहि।
मनो॑ धेहि॒ वाच॑ं धेहि।
आ॒त्मान॑ं धेहि प्रति॒ष्ठां धे॑हि।
मां धे॑हि॒ मयि॑ धेहि।
मधु॑ त्वा मधु॒ला क॑रोतु।
म॒खस्य॒ शिरो॑सि॥ ६॥

((ma̱khāya̍ tvā |

makhasya tvā śīrṣṇe |
āyurdhehi prāṇam dhehi |
apānam dhehi vyānam dhehi |
cakṣurdhehi śrotram dhehi |
mano dhehi vācam dhehi |
ātmānam dhehi pratiṣṭhām dhehi |
mām dhehi mayi dhehi |
madhu tvā madhulā karotu |
makhasya śiro'si || 6 ||))

[[4-2-6]]

यज्ञस्य पदे स्थः।
गायत्रेण त्वा छन्दसा करोमि।
त्रैष्टुभेन त्वा छन्दसा करोमि।
जागतेन त्वा छन्दसा करोमि।
मखस्य रास्नाऽसि।
अदितिस्ते बिलं गृह्णातु।
पाङ्क्तेन छन्दसा।
सूर्यस्य हरसा श्राय।
मखोऽसि॥ ७॥
पते शिर ऋतावरीर्ऋध्यासमद्य मखस्य शिरश्शिरश्शिरोऽसि नव च॥ २॥
इयति देवीरिन्द्रस्यौजोऽस्यग्निजा अस्यायुर्धेहि प्राणं पञ्च॥

((yajñasya pade sthaḥ |
gāyatreṇa tvā chandasā karomi |
traiṣṭubhena tvā chandasā karomi |
jāgatena tvā chandasā karomi |
makhasya rāsnā'si |
aditiste bilam gṛhṇātu |
pāṅktena chandasā |
sūryasya harasā śrāya |
makho'si || 7 ||
pate śira ṛtāvarīrṛddhyāsamadya makhasya śiraśśiraśśiro'si nava ca || 2 ||
iyati devīrindrasyaujo'syagnijā asyāyurdhehi prāṇam pañca ||))

[[4-3-1]]

वृष्णो अश्वस्य निष्पदसि।
वरुणस्त्वा धृतव्रत आधूपयतु।
मित्रावरुणयोर्ध्रुवेण धर्मणा।

अ॒र्चिषे॑ त्वा।
शो॒चिषे॑ त्वा।
ज्योति॑षे त्वा।
तप॑से त्वा।
अ॒भीमं म॑हि॒ना दिव॑म्।
मि॒त्रो ब॑भूव स॒प्रथाः॑।
उ॒त श्रव॑सा पृथि॒वीम्॥ ८॥

((vṛṣṇo̱ aśva̍sya ni̱ṣpada̍si |
varu̍ṇastvā dhṛ̱tavra̍ta̱ ādhū̍payatu |
mi̱trāvaru̍ṇayordhru̱veṇa̱ dharma̍ṇā |
a̱rciṣe̎ tvā |
śo̱ciṣe̎ tvā |
jyoti̍ṣe tvā |
tapa̍se tvā |
a̱bhīmaṃ ma̍hi̱nā diva̎m |
mi̱tro ba̍bhūva sa̱prathā̎ḥ |
u̱ta śrava̍sā pṛthi̱vīm || 8 ||))

[[4-3-2]]
मि॒त्रस्य॑ चर्षणी॒धृत॑ः।
श्रवो॑ दे॒वस्य॑ सान॒सिम्।
द्यु॒म्नं चि॒त्रश्र॑वस्तमम्।
सिध्यै॑ त्वा।
दे॒वस्त्वा॑ सवि॒तोद्व॑पतु।
सु॒पा॒णिस्स्व॑ङ्गु॒रिः।
सु॒बा॒हु॒रु॒त शक्त्या॑।
अप॑द्यमानः पृथि॒व्याम्।
आशा॒ दिश॒ आपृ॑ण।
उत्ति॑ष्ठ बृ॒हन्भ॑व॥ ९॥

((mi̱trasya̍ carṣa̱ṇī̱dhṛta̍ḥ |
śravo̍ de̱vasya̍ sāna̱sim |
dyu̱mnaṃ ci̱traśra̍vastamam |
siddhyai̎ tvā |
de̱vastvā̍ savi̱todva̍patu |
su̱pā̱ṇissva̍ṅgu̱riḥ |

su̱bā̱huru̱ta śaktyä̎ ।
apádyamānaḥ pṛthi̱vyām ।
āśā̱ diśa̱ āpṛ̍ṇa ।
uttiṣṭha bṛ̱hanbháva ॥ 9 ॥))

[[4-3-3]]

ऊ॒र्ध्वस्ति॑ष्ठ ध्रु॒वस्त्वम्।

सूर्य॑स्य त्वा॒ चक्षु॒षाऽन्वी᳚क्षे।

ऋ॒जवे᳚ त्वा।

सा॒धवे᳚ त्वा।

सु॒क्षि॒त्यै त्वा॒ भूत्यै᳚ त्वा।

इ॒दम॒हम॒मुमा॑मुष्या॒यणं॑ वि॒शा प॒शुभि॑र्ब्रह्मवर्च॒सेन॒ पर्यू᳚हामि।

गा॒य॒त्रेण॑ त्वा॒ छन्द॒साऽऽच्छृ॑णद्मि।

त्रैष्टु॑भेन त्वा॒ छन्द॒साऽऽच्छृ॑णद्मि।

जाग॑तेन त्वा॒ छन्द॒साऽऽच्छृ॑णद्मि।

छृ॒णत्तु॑ त्वा॒ वाक्।

छृ॒णत्तु॒ त्वोर्क्।

छृ॒णत्तु॑ त्वा ह॒विः।

छृ॒न्धि वाच᳚म्।

छृ॒न्ध्यूर्ज᳚म्।

छृ॒न्धि ह॒विः।

दे॒व॑ पुरश्चर स॒ध्यासं॑ त्वा॥ १०॥

पृ॒थि॒वीं भ॑व॒ वाख्षड्ढ॥ ३॥

((ū̱rdhvastíṣṭha dhru̱vastvam ।
sūryásya tvā̱ cakṣụṣā'nvī̎kṣe ।
ṛ̱javë tvā ।
sā̱dhavë tvā ।
su̱kṣi̱tyai tvā̱ bhūtyä̎ tvā ।
i̱dama̱hama̱mumámuṣyāya̱ṇaṃ vi̱śā pa̱śubhírbrahmavarca̱sena̱ paryúhāmi ।
gā̱ya̱treṇá tvā̱ chanda̱sā''cchṛ̍ṇadmi ।
traiṣṭúbhena tvā̱ chanda̱sā''cchṛ̍ṇadmi ।
jāgátena tvā̱ chanda̱sā''cchṛ̍ṇadmi ।
chṛ̱ṇattú tvā̱ vāk ।
chṛ̱ṇattu̱ tvork ।
chṛ̱ṇattú tvā ha̱viḥ ।
chṛ̱ndhi vācä̎m ।

chṛ̱ndhyūrjā̍̍m ।
chṛ̱ndhi ha̱viḥ ।
deva̍ puraścara sa̱dhyāsa̍ṁ tvā ॥ 10 ॥
pṛ̱thi̱vīṃ bha̍va̱ vākhṣaṭca̍ ॥ 3 ॥))

[[4-4-1]]
ब्रह्म॑न्प्रव॒र्ग्ये॑ण॒ प्रच॑रिष्यामः।
होत॑र्घ॒र्मम॒भिष्टु॑हि।
अग्नी॒द्रौहि॑णौ पुरो॒डाशा॒वधि॑श्रय।
प्रति॑प्रस्थात॒र्विह॑र।
प्रस्तो॑त॒स्सामा॑नि गाय।
यजु॑र्यु॒क्तꣳ साम॑भि॒राक्त॑खं त्वा।
विश्वै॑र्दे॒वैरनु॑मतं म॒रुद्भिः॑।
दक्षि॑णाभि॒ः प्रत॑तं पारयि॒ष्णुम्।
स्तुभो॑ वहन्तु सुमन॒स्यमा॑नम्।
स नो॒ रुचं॑ धे॒ह्यहृ॑णीयमानः।
भूर्भुव॒स्सुवः॑।
ओमिन्द्र॑वन्तः॒ प्रच॑रत॥ ११॥
अहृ॑णीयमानो॒ द्वे च॑॥ ४॥

((brahma̍npravargye̍ṇa̱ praca̍riṣyāmaḥ ।
hota̍rgha̱rmama̱bhiṣṭu̍hi ।
agnī̱drauhi̍ṇau puro̱ḍāśā̱vadhi̍śraya ।
prati̍prasthāta̱rviha̍ra ।
prasto̍ta̱ssāmā̍ni gāya ।
yaju̍ryukta̱ꣳ sāma̍bhi̱rākta̍khaṃ tvā ।
viśvai̍rde̱vairanu̍mataṃ ma̱rudbhi̍ḥ ।
dakṣi̍ṇābhi̱ḥ prata̍taṃ pārayi̱ṣṇum ।
stubho̍ vahantu sumana̱syamā̍nam ।
sa no̱ ruca̍ṁ dhe̱hyahṛ̍ṇīyamānaḥ ।
bhūrbhuva̱ssuva̍ḥ ।
omindra̍vanta̱ḥ praca̍rata ॥ 11 ॥
ahṛ̍ṇīyamāno̱ dve ca̍ ॥ 4 ॥))

[[4-5-1]]
ब्रह्म॒न्प्रच॑रिष्यामः।
होत॑र्घ॒र्मम॒भिष्टु॑हि।
य॒माय॑ त्वा म॒खाय॑ त्वा।

सूर्य॑स्य॒ हर॑से त्वा।
प्रा॒णाय॒ स्वाहा᳚ व्या॒नाय॒ स्वाहा॑ऽपा॒नाय॒ स्वाहा᳚।
चक्षु॑षे॒ स्वाहा॒ श्रोत्रा॑य॒ स्वाहा᳚।
मन॑से॒ स्वाहा॑ वा॒चे सर॑स्वत्यै॒ स्वाहा᳚।
दक्षा॑य॒ स्वाहा॒ क्रत॑वे॒ स्वाहा᳚।
ओज॑से॒ स्वाहा॒ बला॑य॒ स्वाहा᳚।
दे॒वस्त्वा॑ सवि॒ता मध्वा॑ऽनक्तु॥ १२॥

((brahma̱npracári̍ṣyāmaḥ |
hotárgha̱rmama̱bhiṣṭúhi |
ya̱māyá tvā ma̱khāyá tvā |
sūryásya̱ haráse tvā |
prā̱ṇāya̱ svāhā̎ vyā̱nāya̱ svāhá'pā̱nāya̱ svāhā̎ |
cakṣúṣe̱ svāhā̱ śrotráya̱ svāhā̎ |
manáse̱ svāhá vā̱ce sarásvatyai̱ svāhā̎ |
dakṣáya̱ svāhā̱ kratáve̱ svāhā̎ |
ojáse̱ svāhā̱ baláya̱ svāhā̎ |
de̱vastvá savi̱tā madhvá'naktu || 12 ||))

[[4-5-2]]
पृ॒थि॒वीं तप॑सस्त्रायस्व।
अ॒र्चिर॑सि शो॒चिर॑सि॒ ज्योति॑रसि॒ तपो॑सि।
सꣳ सी॑दस्व म॒हाꣳ अ॑सि।
शोच॑स्व दे॒ववी॑तमः।
वि॑धू॒मम॑ग्ने अ॒रुषं॑ मि॑येध्य।
सृ॒ज प्र॑शस्त द॒र्शतम्।
अ॒ञ्जन्ति॒ यं प्र॒थय॑न्तो॒ न विप्रा᳚ः।
व॒पाव॑न्तं॒ नाग्निना॒ तप॑न्तः।
पि॒तुर्न पु॒त्र उप॑सि॒ प्रेष्ठः॑।
आ घ॒र्मो अ॒ग्निमृ॒तय॑न्नसादीत्॥ १३॥

((pr̥̱thi̱vīṃ tapásastrāyasva |
a̱rcirási śo̱cirási̱ jyotírasi̱ tapósi |
sam̐ sídasva ma̱hām̐ ási |
śocásva deva̱vītámaḥ |
vidhū̱mamágne aru̱ṣaṃ míyedhya |
sr̥̱ja práśasta darśa̱tam |

a̱ñjanti̱ yaṃ pra̱thaya̍nto̱ na vipra̎ḥ |
va̱pāva̍ntam̱ nāgninā̱ tapa̍ntaḥ |
pi̱turna pu̱tra upa̍si̱ preṣṭha̍ḥ |
ā gha̱rmo a̱gnimṛ̱taya̍nnasādīt || 13 ||))

[[4-5-3]]
अ॒ना॒धृष्या पु॒रस्ता᳚त्।
अ॒ग्नेराधि॑पत्ये।
आयु॑र्मे दाः।
पु॒त्रव॑ती दक्षिण॒तः।
इन्द्र॒स्याधि॑पत्ये।
प्र॒जां मे॑ दाः।
सु॒षदा॑ प॒श्चात्।
दे॒वस्य॑ सवि॒तुराधि॑पत्ये।
प्रा॒णं मे॑ दाः।
आश्रु॑तिरुत्तर॒तः॥ १४॥

((a̱nā̱dhṛ̱ṣyā pu̱rastā̎t |
a̱gnerādhi̍patye |
āyu̍rme dāḥ |
pu̱trava̍tī dakṣiṇa̱taḥ |
indra̱syādhi̍patye |
pra̱jāṃ me̍ dāḥ |
su̱ṣadā̍ pa̱ścāt |
de̱vasya̍ savi̱turādhi̍patye |
prā̱ṇaṃ me̍ dāḥ |
āśru̍tiruttara̱taḥ || 14 ||))

[[4-5-4]]
मि॒त्रावरु॑णयो॒राधि॑पत्ये।
श्रोत्रं॑ मे दाः।
विधृ॑तिरु॒परि॑ष्टात्।
बृह॒स्पते॒राधि॑पत्ये।
ब्रह्म॑ मे दाः क्ष॒त्त्रं मे॑ दाः।
तेजो॑ मे धा॒ वर्चो॑ मे धाः।
यशो॑ मे धा॒स्तपो॑ मे धाः।
मनो॑ मे धाः।

म॒नो॒रश्वा॑ऽसि॒ भूरि॑पुत्रा।
वि॒श्वा॒भ्यो मा ना॒ष्ट्रा॒भ्यः॑ पाहि॥ १५॥

((mi̱trāvaru̍ṇayo̱rādhi̍patye |
śrotra̍ṃ me dāḥ |
vidhṛ̍tiru̱pari̍ṣṭāt |
bṛha̱spate̱rādhi̍patye |
brahma̍ me dāḥ kṣa̱ttraṃ me̍ dāḥ |
tejo̍ me dhā̱ varco̍ me dhāḥ |
yaśo̍ me dhā̱stapo̍ me dhāḥ |
mano̍ me dhāḥ |
mano̱raśvā̍'si̱ bhūri̍putrā |
viśvā̍bhyo mā nā̱ṣṭrābhya̍ḥ pāhi || 15 ||))

[[4-5-5]]
सू॒प॒स॒दा॑ मे भूया॒ मा मा॑ हिꣳसीः।
तपो॒ ष्व॑ग्ने॒ अन्त॑राꣳ अ॒मित्रा॑न्।
तपा॒ शꣳस॑मर॒रु॒षः॑ पर॑स्य।
तपा॑ वसो चिकिता॒नो अ॒चित्ता॑न्।
वि ते॑ तिष्ठन्ताम॒जरा॑ अ॒यास॑ः।
चित॑स्स्थ परि॒चित॑ः।
स्वाहा॑ म॒रुद्भि॒ः परि॑श्रयस्व।
मा अ॑सि।
प्र॒मा अ॑सि।
प्र॒ति॒मा अ॑सि॥ १६॥

((sū̱pa̱sadā̍ me bhūyā̱ mā mā̍ hiṁ̍sīḥ |
tapo̱ ṣva̍gne̱ anta̍rām̐ a̱mitrā̍n |
tapā̱ śam̐sa̍mara̱ruṣa̱ḥ para̍sya |
tapā̍ vaso cikitā̱no a̱cittā̍n |
vi te̍ tiṣṭhantāma̱jarā̍ a̱yāsa̍ḥ |
citā̍sstha pari̱citā̍ḥ |
svāhā̍ ma̱rudbhi̱ḥ pari̍śrayasva |
mā a̍si |
pra̱mā a̍si |
pra̱ti̱mā a̍si || 16 ||))

[[4-5-6]]
सं॒मा अ॑सि।

विमा असि।
उन्मा असि।
अन्तरिक्षस्यान्तर्धिरसि।
दिवं तपसस्त्रायस्व।
आभिर्गीर्भिर्यदतो न ऊनम्।
आप्यायय हरिवो वर्धमानः।
यदा स्तोतृभ्यो महि गोत्रा रुजासि।
भूयिष्ठभाजो अध ते स्याम।
शुक्रं ते अन्यद्यजतं ते अन्यत्॥ १७॥

((sammā ási ।
vimā ási ।
unmā ási ।
antarikṣasyāntardhirási ।
divaṃ tapásastrāyasva ।
ābhirgīrbhiryadató na ūnam ।
āpyáyaya harivo vardhámānaḥ ।
yadā stotṛbhyo mahi gotrā rujāsi ।
bhūyiṣṭhabhājo adhá te syāma ।
śukraṃ té anyadyájataṃ té anyat ॥ 17 ॥))

[[4-5-7]]
विषुरूपे अहनी द्यौरिवासि।
विश्वा हि माया अवसि स्वधावः।
भद्रा ते पूषन्निह रातिरस्तु।
अर्हन्बिभर्षि सायकानि धन्व।
अर्हन्निष्कं यजतं विश्वरूपम्।
अर्हन्निदं दयसे विश्वमब्भुवम्।
न वा ओजीयो रुद्र त्वदस्ति।
गायत्रमसि।
त्रैष्टुभमसि।
जागतमसि।
मधु मधु मधु॥ १८॥
अनन्त्वसादीदुत्तरतः पाहि प्रतिमा असि यजतं ते अन्यज्जागतमस्येकं च॥ ५॥

((viṣu̍rūpe̱ aha̍nī̱ dyauri̍vāsi |
viśvā̱ hi mā̱yā ava̍si svadhāvaḥ |
bha̱drā te̍ pūṣanni̱ha rā̱tira̍stu |
arha̍nbibharṣi̱ sāya̍kāni̱ dhanva̍ |
arha̍nni̱ṣkaṃ ya̍ja̱taṃ vi̱śvaru̍̍pam |
arha̍nni̱daṃ da̍yase̱ viśva̱mabbhu̍vam |
na vā oji̍̍yo rudra̱ tvada̍sti |
gā̱ya̱trama̍si |
trai̱ṣṭu̍bhamasi |
jāga̍tamasi |
madhu̱ madhu̱ madhu̍ || 18 ||
a̱na̱ktva̱sā̱dī̱du̱tta̱ra̱taḥ pa̍hi prati̱mā a̍si yaja̱taṃ te̍ a̱nyajjāga̍tama̱syekaṃ̍ ca || 5 ||))

[[4-6-1]]
दश॒ प्राची॒र्दश॑ भासि॒ दक्षि॒णा।
दश॑ प्र॒तीची॒र्दश॑ भा॒स्युदी॑चीः।
दशो॒र्ध्वा भा॑सि सुमन॒स्यमा॑नः।
स नो॒ रुचं॑ धेह्यहृ॑णीयमानः।
अ॒ग्निष्ट्वा॒ वसु॑भिः पु॒रस्ता॒द्रोचयतु गाय॒त्रेण॒ छन्द॑सा।
स मा॑ रुचि॒तो रो॑चय।
इन्द्र॑स्त्वा रु॒द्रैर्द॑क्षिण॒तो रो॑चयतु॒ त्रैष्टु॑भेन॒ छन्द॑सा।
स मा॑ रुचि॒तो रो॑चय।
वरु॑णस्त्वादि॒त्यैः प॒श्चाद्रो॑चयतु॒ जाग॑तेन॒ छन्द॑सा।
स मा॑ रुचि॒तो रो॑चय॥ १९॥

((daśa̱ prācī̱rdaśa̍ bhāsi dakṣi̱ṇā |
daśa̍ pra̱tīcī̱rdaśa̍ bhā̱syudi̍cīḥ |
daśo̱rdhvā bha̍si sumana̱syamā̍naḥ |
sa no̱ rucaṃ̍ dhe̱hyahṛ̍ṇīyamānaḥ |
a̱gniṣṭvā̱ vasu̍bhiḥ pu̱rastā̍̍drocayatu gāya̱treṇa̱ chanda̍sā |
sa mā̍ ruci̱to ro̍caya |
indra̍stvā ru̱draird̍akṣiṇa̱to ro̍cayatu̱ traiṣṭu̍bhena̱ chanda̍sā |
sa mā̍ ruci̱to ro̍caya |
varu̍ṇastvādi̱tyaiḥ pa̱ścādro̍cayatu̱ jāga̍tena̱ chanda̍sā |
sa mā̍ ruci̱to ro̍caya || 19 ||))

[[4-6-2]]
द्युता॒नस्त्वा॑ मारु॒तो म॒रुद्भि॑रुत्तर॒तो रो॑चय॒त्वानु॒ष्टुभे॒न छन्द॑सा।
स मा॑ रुचि॒तो रो॑चय।
बृ॒ह॒स्पति॑स्त्वा॒ विश्वै॑र्दे॒वैरु॒परि॑ष्टाद्रोचयतु॒ पाङ्क्ते॒न छन्द॑सा।

स मा॑ रुचि॒तो रो॑चय।
रो॒चि॒तस्त्वं दे॑व घर्म दे॒वेष्व॑सि।
रो॒चि॒षी॒याहं म॑नु॒ष्ये॑षु।
सम्रा᳚ड्घर्म रुचि॒तस्त्वं दे॒वेष्वायु॑ष्मा꣡ꣳस्तेज॒स्वी ब्रह्म॑वर्च॒स्य॑सि।
रु॒चि॒तो॑ऽहं म॑नु॒ष्ये᳚ष्वायु॑ष्मा꣡ꣳस्तेज॒स्वी ब्रह्म॑वर्च॒सी भू॑यासम्।
रुग॑सि।
रुचं॒ मयि॑ धेहि॥ २०॥

((dyu̱tā̱nastva̍ māru̱to ma̱rudbhi̍ruttara̱to ro̍caya̱tvānu̍ṣṭubhena̱ chanda̍sā |
sa ma̍ ruci̱to ro̍caya |
bṛha̱spati̍stva̱ viśvai̍rde̱vairu̱pari̍ṣṭādrocayatu̱ pāṅkte̍na̱ chanda̍sā |
sa ma̍ ruci̱to ro̍caya |
ro̱ci̱tastvaṃ de̍va gharma de̱veṣvasi̍ |
ro̱ci̱ṣī̱yāhaṃ ma̍nu̱ṣye̍ṣu |
samrā̎ḍgharma ruci̱tastvaṃ de̱veṣvāyu̍ṣmām̐stejạsvī bra̍hmavarca̱syа̍si |
ru̱ci̱to̍'haṃ ma̍nu̱ṣye̎ṣvāyu̍ṣmām̐steja̱svī bra̍hmavarca̱sī bhu̍̍yāsam |
ruga̍si |
ruca̱ṃ mayi̍ dhehi || 20 ||))

[[4-6-3]]
म॒यि॒ रुक्।
दशा॑ पु॒रस्ता᳚द्रोचसे।
दशा॑ द॒क्षि॒णा।
दशा॑ प्र॒त्यङ्।
दशोद॑ङ्।
दशो॒र्ध्वो भा॑सि सुमन॒स्यमा॑नः।
स न॑स्सम्रा॒डिष॒मूर्जं᳚ धेहि।
वा॒जी वा॒जिने॑ पवस्व।
रो॒चि॒तो घ॒र्मो रु॑ची॒य॥ २१॥
रो॒च॒य॒ धे॒हि॒ नव॑ च॥ ६॥

((ma̱yi̱ ruk |
daśa̍ pu̱rastā̎drocase |
daśa̍ dakṣi̱ṇā |
daśa̍ pra̱tyaṅ |
daśoda̍ṅ |
daśo̱rdhvo bhā̍si sumana̱syamā̍naḥ |

sa nȧssamrā̱ḍi̱ṣa̱mūrjaṁ̇ dhehi |
vā̱jī vā̱jinė pavasva |
ro̱ci̱to gha̱rmo rủcī̱ya || 21 ||
ro̱ca̱ya̱ dhe̱hi̱ navȧ ca || 6 ||))

[[4-7-1]]

अप॑श्यं गो॒पामनि॑पद्यमानम्।
आ च॒ परा॑ च प॒थिभि॒श्चर॑न्तम्।
स स॒ध्रीची॒स्स विषू॑चीर्वसा॑नः।
आव॑रीवर्ति॒ भुव॑नेष्व॒न्तः।
अत्र॑ प्रा॒वीः।
मधु॒माध्वी॑भ्यां॒ मधु॒माधू॑चीभ्याम्।
अनु॑ वां दे॒ववी॑तये।
सम॒ग्निर॒ग्निना॑ गत।
सं दे॒वेन॑ सवि॒त्रा।
सꣳ सूर्ये॑ण रोचते॥ २२॥

((apȧśyaṃ go̱pāmani̍padyamānam |
ā ca̱ parȧ ca pa̱thibhi̱ścarȧntam |
sa sa̱ddhrīcī̱ssa viṣủcī̱rvasȧnaḥ |
āvȧrīvarti̱ bhuvȧneṣva̱ntaḥ |
atrȧ prā̱vīḥ |
madhu̱mādhvi̍bhyā̱ṃ madhu̱mādhủcībhyām |
anủ vāṃ de̱vavi̍taye |
sama̱gnira̱gninȧ gata |
saṃ de̱venȧ savi̱trā |
saṁ̇ sūryė̱ṇa rocate || 22 ||))

[[4-7-2]]

स्वाहा॒ सम॒ग्निस्तप॑सा गत।
सं दे॒वेन॑ सवि॒त्रा।
सꣳ सूर्ये॑णारोचिष्ट।
ध॒र्ता दि॒वो विभा॑सि॒ रज॑सः।
पृ॒थिव्या ध॒र्ता।
उ॒रोर॒न्तरि॑क्षस्य ध॒र्ता।
ध॒र्ता दे॒वो दे॒वाना॑म्।
अम॑र्त्यस्तपो॒जाः।

हृ॒दे त्वा॒ मन॑से त्वा।
दि॒वे त्वा॒ सूर्या॑य त्वा॥ २३॥

((svāhā̱ sama̱gnistapa̍sā gata ।
saṃ de̱vena̍ savi̱trā ।
sa̐ṃ sūrye̍ṇārociṣṭa ।
dha̱rtā di̱vo vibhā̍si̱ raja̍saḥ ।
pṛthi̱vyā dha̱rtā ।
u̱rora̱ntari̍kṣasya dha̱rtā ।
dha̱rtā de̱vo de̱vānā̎m ।
ama̍rtyastapo̱jāḥ ।
hṛ̱de tvā̱ mana̍se tvā ।
di̱ve tvā̱ sūryā̍ya tvā ॥ 23 ॥))

[[4-7-3]]
ऊ॒र्ध्वमि॒मम॑ध्व॒रं कृ॑धि।
दि॒वि दे॒वेषु॒ होत्रा॑ यच्छ।
विश्वा॑सां भुवां पते।
विश्व॑स्य भुवनस्पते।
विश्व॑स्य मनसस्पते।
विश्व॑स्य वचसस्पते।
विश्व॑स्य तपसस्पते।
विश्व॑स्य ब्रह्मणस्पते।
दे॒व॒श्रूस्त्वं दे॑व घर्म दे॒वान्पा॑हि।
त॒पो॒जां वाच॑म॒स्मे नि॑यच्छ देवा॒युव॑म्॥ २४॥

((ū̱rdhvami̱mama̍dhva̱raṃ kṛ̍dhi ।
di̱vi de̱veṣu̱ hotrā̍ yaccha ।
viśvā̍sāṃ bhuvāṃ pate ।
viśva̍sya bhuvanaspate ।
viśva̍sya manasaspate ।
viśva̍sya vacasaspate ।
viśva̍sya tapasaspate ।
viśva̍sya brahmaṇaspate ।
de̱va̱śrūstvaṃ de̍va gharma de̱vānpā̍hi ।
ta̱po̱jāṃ vāca̍ma̱sme niya̍ccha devā̱yuvā̎m ॥ 24 ॥))

[[4-7-4]]
गर्भो॑ दे॒वाना॑म्।

पि॒ता म॑ती॒नाम्।
पति॑ः प्र॒जाना॓म्।
मति॑ः क॒वी॒नाम्।
सं दे॒वो दे॒वेन॑ सवि॒त्राऽय॑तिष्ट।
सꣳ सूर्ये॑णारुक्त।
आ॒यु॒र्दस्त्वम॒स्मभ्य॑ं घर्म वर्चो॒दा अ॑सि।
पि॒ता नो॑ऽसि पि॒ता नो॑ बोध।
आ॒यु॒र्धास्त॑नू॒धाः प॑यो॒धाः।
व॒र्चो॒दा व॑रिवो॒दा द्र॑विणो॒दाः॥ २५॥

((garbhȯ de̱vānā̎m |
pi̱tā mȧtī̱nām |
pati̍ḥ pra̱jānā̎m |
mati̍ḥ kavī̱nām |
saṃ de̱vo de̱venȧ savi̱trā'yȧtiṣṭa |
sa̐ sūryeṇārukta |
ā̱yu̱rdastvama̱smabhyaṃ gharma varco̱dā ȧsi |
pi̱tā nȯ'si pi̱tā nȯ bodha |
ā̱yu̱rdhāstȧnū̱dhāḥ pȧyo̱dhāḥ |
va̱rco̱dā vȧrivo̱dā drȧviṇo̱dāḥ || 25 ||))

[[4-7-5]]
अ॒न्त॒रि॒क्ष॒प्र उ॒रोर्वरी॑यान्।
अ॒शी॒महि॑ त्वा॒ मा मा॑ हिꣳसीः।
त्वम॑ग्ने गृ॒हप॑तिर्वि॒शाम॑सि।
विश्वा॑सां॒ मानु॑षीणाम्।
श॒तं पू॒र्भिर्य॑विष्ठ पा॒ह्यꣳह॑सः।
स॒मे॒द्धारꣳ॑ श॒तꣳ हिमा॓ः।
त॒न्द्रा॒वि॒णꣳ॑ हार्दि॒वानम्।
इ॒हैव रा॒तय॑स्सन्तु।
त्वष्टी॑मती ते सपेय।
सु॒रेता॒ रेतो॒ दधा॑ना।
वी॒रं वि॑दे॒य तव॑ सं॒दृशि॑।
माऽहꣳ रा॒यस्पोषे॑ण॒ वियो॑षम्॥ २६॥

रो॒च॒ते॒ सूर्या॑य त्वा दे॒वायुवं॑ द्रवि॒णो॒दा द॒धा॑ना॒ द्वे च॑॥ ७॥

((a̱nta̱ri̱kṣa̱pra̱ u̱rorvarī̍yān ।
a̱śī̱mahi̍ tva̱ mā mȧ hiṁ̍sīḥ ।
tvamȧgne gṟhapȧtirvi̱śāmȧsi ।
viśvȧsā̱m mānu̍ṣīṇām ।
śa̱taṃ pū̱rbhiryȧviṣṭha pa̱hyaṁ̍hȧsaḥ ।
sa̱me̱ddhāraṁ̍ śa̱taṁ̍ hima̍̍ḥ ।
ta̱ndrā̱viṇaṁ̍ hārdiva̱nam ।
i̱haiva rā̱tayȧssantu ।
tvaṣṭī̍matī te sapeya ।
su̱retā̱ reto̱ dadhȧnā ।
vī̱raṃ vi̍deya̱ tavȧ saṃdṟśi̍ ।
mā'haṁ̍ rā̱yaspoṣe̍ṇa̱ viyȯṣam ॥ 26 ॥
ro̱ca̱te̱ sūryȧya tvā devā̱yuvaṃ̍ dravi̱ṇo̱dā dadhȧnā̱ dve cȧ ॥ 7 ॥))

[[4-8-1]]

दे॒वस्य॑ त्वा स॒वि॒तुः प्र॑स॒वे।
अ॒श्विनो॑र्बा॒हुभ्या॑म्।
पू॒ष्णो हस्ता॑भ्या॒माद॑दे।
अदि॑त्यै॒ रास्ना॑ऽसि।
इड॒ एहि॑।
अदि॑त॒ एहि॑।
सर॑स्वत्येहि॑।
अ॒सा॒वेहि॑।
अ॒सा॒वेहि॑।
अ॒सा॒वेहि॑॥ २७॥

((de̱vasyȧ tvā savi̱tuḥ prȧsa̱ve ।
a̱śvino̍rbā̱hubhyā̍m ।
pū̱ṣṇo hastā̍bhyā̱mādȧde ।
adi̍tyai̱ rāsnȧ'si ।
iḍa̱ ehi̍ ।
adi̍ta̱ ehi̍ ।
sarȧsva̱tyehi̍ ।
asā̱vehi̍ ।
asā̱vehi̍ ।
asā̱vehi̍ ॥ 27 ॥))

[[4-8-2]]

अदि॑त्या उ॒ष्णीष॑मसि।
वा॒युर॑स्यै॒डः।
पू॒षा त्वो॒पाव॑सृजतु।
अ॒श्विभ्यां॒ प्रदा॑पय।
यस्ते॒ स्तन॑श्शश॒यो यो म॑यो॒भूः।
येन॒ विश्वा॒ पुष्य॑सि॒ वार्या॑णि।
यो र॑त्न॒धा व॑सु॒विद्यस्सु॒दत्रः॑।
सर॑स्वति॒ तमि॒ह धात॑वेऽकः।
उस्र॑ घ॒र्मꣳ शि॑ꣳष।
उस्र॑ घ॒र्मं पा॑हि॥ २८॥

((aditya̍ u̱ṣṇīṣa̍masi |
vā̱yura̍syai̱ḍaḥ |
pū̱ṣā tvo̱pāva̍sṛjatu |
a̱śvibhyā̱ṃ prada̍paya |
yaste̱ stana̍śśaśa̱yo yo ma̍yo̱bhūḥ |
yena̱ viśvā̱ puṣya̍si̱ vārya̍ṇi |
yo ra̍tna̱dhā va̍su̱vidyassu̱datra̍ḥ |
sara̍svati̱ tami̱ha dhāta̍ve'kaḥ |
usra̍ gha̱rmam̐ śi̍m̐ṣa |
usra̍ gha̱rmaṃ pa̍hi || 28 ||))

[[4-8-3]]
घ॒र्माय॑ शि॑ꣳष।
बृ॒हस्पति॒स्त्वोप॑सीदतु।
दान॑वस्स्थ॒ पेर॑वः।
वि॒ष्वग्वृतो॒ लोहि॑तेन।
अ॒श्विभ्या॑ं पिन्वस्व।
सर॑स्वत्यै पिन्वस्व।
पू॒ष्णे पि॑न्वस्व।
बृ॒हस्पत॑ये पिन्वस्व।
इन्द्रा॑य पिन्वस्व।
इन्द्रा॑य पिन्वस्व॥ २९॥

((gha̱rmāya̍ śim̐ṣa |

bṛh̠aspati̠stvopa̍sīdatu |
dāna̍vasstha̠ pera̍vaḥ |
vi̠ṣva̠gvṛto̠ lohi̍tena |
a̠śvibhyā̍m̐ pinvasva |
sara̍svatyai pinvasva |
pū̠ṣṇe pi̍nvasva |
bṛh̠aspata̍ye pinvasva |
indrā̍ya pinvasva |
indrā̍ya pinvasva || 29 ||))

[[4-8-4]]

गा॒य॒त्रो॑ऽसि।
त्रैष्टु॑भोसि।
जाग॑तमसि।
स॒होर्जो भा॒गेनोप॒ मेहि॑।
इन्द्रा॑श्विना॒ मधु॑नस्सार॒घस्य॑।
घ॒र्मं पा॑त वसवो॒ यज॑ता॒ वट्।
स्वाहा॑ त्वा॒ सूर्य॑स्य र॒श्मये॑ वृ॒ष्टिवन॑ये जुहो॑मि।
मधु॑ ह॒विर॑सि।
सूर्य॑स्य॒ तप॑स्तप।
द्यावा॑पृथि॒वीभ्यां॑ त्वा॒ परि॑गृह्णामि॥ ३०॥

((gā̠ya̠tro̍'si |
traiṣṭu̍bhosi |
jāga̍tamasi |
sa̠horjo bhā̠genopa̠ mehi̍ |
indrā̍śvinā̠ madhu̍nassāra̠ghasya̍ |
gha̠rmam pā̍ta vasavo̠ yaja̍tā̠ vaṭ |
svāhā̍ tvā̠ sūrya̍sya ra̠śmaye̍ vṛṣṭi̠vana̍ye juhomi |
madhu̍ ha̠vira̍si |
sūrya̍sya̠ tapa̍stapa |
dyāvā̍pṛthi̠vībhyā̍m̐ tvā̠ pari̍gṛhṇāmi || 30 ||))

[[4-8-5]]

अ॒न्तरि॑क्षेण॒ त्वोप॑यच्छामि।
दे॒वानां॑ त्वा पितृ॒णामनु॑मतो॒ भर्तुं॑ शकेयम्।
तेजो॑ऽसि।
तेजो॒ऽनुप्रेहि॑।

दि॒वि॒स्पृङ्मा मा॑ हि॒ꣳसीः।
अ॒न्त॒रि॒क्ष॒स्पृङ्मा मा॑ हि॒ꣳसीः।
पृ॒थि॒वि॒स्पृङ्मा मा॑ हि॒ꣳसीः।
सु॒व॑रसि॒ सु॒व॑र्मे यच्छ।
दिवं॑ यच्छ दि॒वो मा॑ पाहि॥ ३१॥
एहि॑ पाहि पिन्वस्व गृह्णामि॒ नव॑ च॥ ८॥

((a̱ntari̍kṣeṇa̱ tvopa̍yacchāmi |
de̱vānāṁ̍ tvā pitṝ̱ṇāmanu̍mato̱ bhartu̐m śakeyam |
tejo̍'si |
tejo'nu̱prehi̍ |
di̱vi̱spṛṅmā mā̍ hi̱ꣳsīḥ |
a̱nta̱ri̱kṣa̱spṛṅmā mā̍ hi̱ꣳsīḥ |
pṛ̱thi̱vi̱spṛṅmā mā̍ hi̱ꣳsīḥ |
suva̍rasi̱ suva̍rme yaccha |
divaṁ̍ yaccha di̱vo mā̍ pāhi || 31 ||
ehi̍ pāhi pinvasva gṛhṇāmi̱ nava̍ ca || 8 ||))

[[4-9-1]]
स॒मु॒द्राय॑ त्वा॒ वाता॑य॒ स्वाहा᳚।
स॒लि॒लाय॑ त्वा॒ वाता॑य॒ स्वाहा᳚।
अ॒ना॒धृ॒ष्याय॑ त्वा॒ वाता॑य॒ स्वाहा᳚।
अ॒प्र॒ति॒धृ॒ष्याय॑ त्वा॒ वाता॑य॒ स्वाहा॑।
अ॒व॒स्यवे᳚ त्वा॒ वाता॑य॒ स्वाहा᳚।
दु॒व॑स्वते त्वा॒ वाता॑य॒ स्वाहा᳚।
शि॒मि॑द्वते त्वा॒ वाता॑य॒ स्वाहा᳚।
अ॒ग्नये᳚ त्वा॒ व॒सु॑मते॒ स्वाहा᳚।
सोमा॑य त्वा रु॒द्रव॑ते॒ स्वाहा᳚।
वरु॑णाय त्वाऽऽदि॒त्यव॑ते॒ स्वाहा᳚॥ ३२॥

((sa̱mu̱drāya̍ tvā̱ vāta̍ya̱ svāhā̎ |
sa̱li̱lāya̍ tvā̱ vāta̍ya̱ svāhā̎ |
a̱nā̱dhṛ̱ṣyāya̍ tvā̱ vāta̍ya̱ svāhā̎ |
a̱pra̱ti̱dhṛ̱ṣyāya̍ tvā̱ vāta̍ya̱ svāhā̍ |
a̱va̱syave̎ tvā̱ vāta̍ya̱ svāhā̎ |
duva̍svate tvā̱ vāta̍ya̱ svāhā̎ |
śimi̍dvate tvā̱ vāta̍ya̱ svāhā̎ |
a̱gnaye̎ tvā̱ vasu̍mate̱ svāhā̎ |

somā́ya tvā rudravā́te svāhā̆ |
varú̇ṇāya tvā''dityavā́te svāhā̆ || 32 ||))

[[4-9-2]]

बृहस्पत॑ये त्वा विश्वदे॑व्यावते स्वाहा᳚।
सवित्रे त्व॑र्भुमते॑ विभुमते᳚ प्रभुमते वाज॑वते स्वाहा᳚।
यमाय त्वाऽङ्गि॑रस्वते पितृमते स्वाहा᳚।
विश्वा आशा॑ दक्षिणसत्।
विश्वा᳚न्देवान॑याडिह।
स्वाहा॑कृतस्य घर्मस्य॑।
मधो᳚ः पिबतमश्विना।
स्वाहाऽग्नये॑ यज्ञिया॑य।
शं यजु॑र्भिः।
अश्वि॑ना घर्मं पा॑तꣳ हार्दि॑वानम्॥ ३३॥

((bṛhaspatā́ye tvā viśvade̋vyāvate svāhā̆ |
savitre tvā́rbhumatė vibhumatē prabhumate vājā́vate svāhā̆ |
yamāya tvā'ṅgírasvate pitṛmate svāhā̆ |
viśvā āśā́ dakṣiṇasat |
viśvā̆ndevānā́yāḍiha |
svāhā́kṛtasya gharmasyā́ |
madhō̆ḥ pibatamaśvinā |
svāhā'gnayė yajñiyā́ya |
śaṃ yajú̇rbhiḥ |
aśvínā gharmaṃ pā́taṁ hārdivānam || 33 ||))

[[4-9-3]]

अह॑र्दिवाभि॑रूतिभि॑ः।
अनु॑ वां द्यावा॑पृथिवी मꣳ॑साताम्।
स्वाहेन्द्रा॑य।
स्वाहेन्द्रा वट्।
घर्मम॑पातमश्विना हार्दि॑वानम्।
अह॑र्दिवाभि॑रूतिभि॑ः।
अनु॑ वां द्यावा॑पृथिवी अ॑मꣳसाताम्।
तं प्राव्यं॑ यथा वट्।
नमो॑ दिवे।

नम॑ः पृथि॒व्यै॥ ३४॥

((aha̍rdi̱vābhi̍rū̱tibhi̍ḥ ।
anu̍ vā̱ṃ dyāvā̍pṛthi̱vī maṁ̐sātām ।
svāhendrā̍ya ।
svāhendrā̱ vaṭ ।
gha̱rmama̍pātamaśvinā hārdivā̱nam ।
aha̍rdi̱vābhi̍rū̱tibhi̍ḥ ।
anu̍ vā̱ṃ dyāvā̍pṛthi̱vī a̍maṁ̐sātām ।
taṃ prā̱vyaṃ̍ yathā̱ vaṭ ।
namo̍ di̱ve ।
nama̍ḥ pṛthi̱vyai ॥ 34 ॥))

[[4-9-4]]
दि॒वि धा॑ इ॒मं य॒ज्ञम्।
य॒ज्ञमि॒मं दि॒वि धा॑ः।
दिवं॑ गच्छ।
अ॒न्तरि॑क्षं गच्छ।
पृ॒थि॒वीं ग॑च्छ।
पञ्च॑ प्र॒दिशो॑ गच्छ।
दे॒वान्घ॒र्मपा॒न्ग॑च्छ।
पि॒तॄन्घ॒र्मपा॒न्ग॑च्छ॥ ३५॥
आ॒दि॒त्यव॑ते॒ स्वाहा॑ हार्दिवा॒नं पृ॑थि॒व्या अ॒ष्टौ च॑॥ ९॥

((di̱vi dhā̍ i̱maṃ ya̱jñam ।
ya̱jñami̱maṃ di̱vi dhā̍ḥ ।
divaṃ̍ gaccha ।
a̱ntari̍kṣaṃ gaccha ।
pṛ̱thi̱vīṃ ga̍ccha ।
pañca̍ pra̱diśo̍ gaccha ।
de̱vānghā̍rma̱pānga̍ccha ।
pi̱tṝnghā̍rma̱pānga̍ccha ॥ 35 ॥
ā̱di̱tyava̍te̱ svāhā̍ hārdivā̱naṃ pṛ̍thi̱vyā a̱ṣṭau ca̍ ॥ 9 ॥))

[[4-10-1]]
इ॒षे पी॑पिहि।
ऊ॒र्जे पी॑पिहि।
ब्रह्म॑णे पीपिहि।
क्ष॒त्त्राय॑ पीपिहि।

अ॒द्भ्यः पी॑पिहि।
ओष॑धीभ्यः पीपिहि।
वन॒स्पति॑भ्यः पीपिहि।
द्यावा॑पृथि॒वीभ्या॓ं पीपिहि।
सु॒भू॒ताय॑ पीपिहि।
ब्र॒ह्म॒व॒र्च॒साय॑ पीपिहि॥ ३६॥

((i̱ṣe pi̍pihi |
ū̱rje pi̍pihi |
brahma̍ṇe pīpihi |
kṣa̱ttrāya̍ pīpihi |
a̱dbhyaḥ pi̍pihi |
oṣa̍dhībhyaḥ pīpihi |
vana̱spati̍bhyaḥ pīpihi |
dyāvā̍pṛthi̱vībhyā̓m̐ pīpihi |
su̱bhū̱tāya̍ pīpihi |
bra̱hma̱va̱rca̱sāya̍ pīpihi || 36 ||))

[[4-10-2]]
यज॑मानाय पीपिहि।
मह्यं॒ ज्यैष्ठ्या॑य पीपिहि।
त्विष्यै॓ त्वा।
द्यु॒म्नाय॑ त्वा।
इ॒न्द्रि॒याय॑ त्वा॒ भूत्यै॓ त्वा।
धर्मा॑ऽसि सु॒धर्मा॑ मे॓ न्य॒स्मे।
ब्रह्मा॑णि धारय।
क्ष॒त्त्राणि॑ धारय।
विशं॑ धारय।
नेत्त्वा॒ वात॑स्स्क॒न्दया॓त्॥ ३७॥

((yaja̍mānāya pīpihi |
mahya̱ṃ jyaiṣṭhya̍ya pīpihi |
tviṣyai̍̍ tvā |
dyu̱mnāya̍ tvā |
i̱ndri̱yāya̍ tvā̱ bhūtyai̍̍ tvā |
dharmā̍'si su̱dharmā me̍̍ nya̱sme |
brahmā̍ṇi dhāraya |
kṣa̱ttrāṇi̍ dhāraya |

viśaṃ dhāraya |
nettvā vātásskandayát || 37 ||))

[[4-10-3]]

अमुष्य त्वा प्राणे सादयामि।
अमुना सह निरर्थं गच्छ।
योऽस्मान्द्वेष्टि।
यं च वयं द्विष्मः।
पूष्णे शरसे स्वाहा।
ग्रावभ्यस्स्वाहा।
प्रतिरेभ्यस्स्वाहा।
द्यावापृथिवीभ्याꣳ स्वाहा।
पितृभ्यो घर्मपेभ्यस्स्वाहा।
रुद्राय रुद्रहोत्रे स्वाहा॥ ३८॥

((amuṣya tvā prāṇe sádayāmi |
amuná saha nirartham gáccha |
yö'smāndveṣṭi |
yaṃ cá vayaṃ dviṣmaḥ |
pūṣṇe śarase svāhā |
grāvábhyassvāhā |
pratirebhyassvāhā |
dyāvápṛthivībhyāṃ svāhā |
pitṛbhyó gharmapebhyassvāhā |
rudrāyá rudrahötre svāhá || 38 ||))

[[4-10-4]]

अहर्ज्योतिः केतुना जुषताम्।
सुज्योतिर्ज्योतिषाꣳ स्वाहा।
रात्रिर्ज्योतिः केतुना जुषताम्।
सुज्योतिर्ज्योतिषाꣳ स्वाहा।
अपीपरो माऽह्नो रात्रियै मा पाहि।
एषा ते अग्ने समित्।
तया समिध्यस्व।
आयुर्मे दाः।
वर्चसा माऽञ्जीः।

अपीपरो मा रात्रिया अह्नो मा पाहि॥ ३९॥

((aharjyotiḥ ketunā juṣatām ।
sujyotirjyotiṣām̐ svāhā ।
rātrirjyotiḥ ketunā juṣatām ।
sujyotirjyotiṣām̐ svāhā ।
apiparo mā'hno rātriyai mā pāhi ।
eṣā te agne samit ।
tayā samiddhyasva ।
āyurme dāḥ ।
varcasā mā'ñjīḥ ।
apiparo mā rātriyā ahno mā pāhi ॥ 39 ॥))

[[4-10-5]]

एषा ते अग्ने समित्।

तया समिद्ध्यस्व।

आयुर्मे दाः।

वर्चसा माऽञ्जीः।

अग्निर्ज्योतिर्ज्योतिरग्निस्स्वाहा।

सूर्यो ज्योतिर्ज्योतिस्सूर्यस्स्वाहा।

भूस्स्वाहा।

हुतꣳ हविः।

मधु हविः।

इन्द्रतमेऽग्नौ॥ ४०॥

((eṣā te agne samit ।
tayā samiddhyasva ।
āyurme dāḥ ।
varcasā mā'ñjīḥ ।
agnirjyotirjyotiragnissvāhā ।
sūryo jyotirjyotissūryassvāhā ।
bhūssvāhā ।
hutam̐ haviḥ ।
madhu haviḥ ।
indratame'gnau ॥ 40 ॥))

[[4-10-6]]

पिता नोऽसि मा मा हिꣳसीः।

अश्याम ते देव घर्म।

मधु॑मतो॒ वाज॑वतः पितु॒मत॑ः।
अङ्गि॑रस्वतस्स्वधा॒वि॑नः।
अ॒शी॒महि॑ त्वा॒ मा मा॑ हि॒ꣳसीः।
स्वाहा॓ त्वा॒ सूर्य॑स्य र॒श्मिभ्य॑ः।
स्वाहा॓ त्वा॒ नक्ष॑त्रेभ्यः॥ ४१॥
ब्र॒ह्म॒व॒र्च॒साय॑ पीपिहि स्क॒न्दया॓द्रु॒द्राय॑ रु॒द्रहो॓त्रे॒ स्वाहाऽह्नो॑ मा पाह्य॒ग्नौ स॒प्त च॑॥ १०॥

((pi̱tā no'si̱ mā mā hiṁsīḥ |
a̱śyāma te deva gharma |
madhumato̱ vājavataḥ pitu̱mataḥ |
aṅgirasvatassvadhā̱vinaḥ |
a̱śī̱mahi tvā̱ mā mā hiṁsīḥ |
svāhā tvā̱ sūryasya ra̱śmibhyaḥ |
svāhā tvā̱ nakṣatrebhyaḥ || 41 ||
bra̱hma̱va̱rca̱sāya pīpihi ska̱ndayādru̱drāya ru̱drahotre̱ svāhā'hno mā pāhya̱gnau sa̱pta ca || 10 ||))

[[4-11-1]]
घर्म॒ या ते॑ दि॒वि शुक्।
या गा॑य॒त्रे छन्द॑सि।
या ब्रा॓ह्म॒णे।
या ह॑वि॒र्धाने॓।
तां त॑ ए॒तेनाव॑यजे॒ स्वाहा॓।
घर्म॒ या ते॒ऽन्तरि॑क्षे॒ शुक्।
या त्रैष्टु॑भे॒ छन्द॑सि।
या रा॑ज॒न्ये॓।
याऽऽग्नी॓ध्रे।
तां त॑ ए॒तेनाव॑यजे॒ स्वाहा॓॥ ४२॥

((gharma̱ yā te di̱vi śuk |
yā gāya̱tre chandasi |
yā brāhma̱ṇe |
yā havi̱rdhāne |
tāṃ ta e̱tenāvayaje̱ svāhā |
gharma̱ yā te̱'ntarikṣe̱ śuk |
yā traiṣṭubhe̱ chandasi |
yā rāja̱nye |
yā''gniddhre |

tāṃ ta̍ e̱tenāva̍yaje̱ svāhā̎ || 42 ||))

[[4-11-2]]
घर्म̱ या ते̍ पृथि̱व्याꣳ शुक्।
या जाग̍ते̱ छन्द̍सि।
या वैश्ये̎।
या सद̍सि।
तां त̍ ए̱तेनाव̍यजे̱ स्वाहा̎।
अनु̍ नो̱ऽद्यानु̍मतिः।
अन्विद̍नुमते̱ त्वम्।
दि̱वस्त्वा̍ प॒र॒स्पाया̎ः।
अ̱न्तरि̍क्षस्य त̱नुव̍ः पाहि।
पृ̱थि̱व्यास्त्वा̱ धर्म̍णा॥ ४३॥

((gharma̱ yā te̍ pṛthi̱vyāꣳ śuk |
yā jāga̍te̱ chanda̍si |
yā vaiśye̎ |
yā sada̍si |
tāṃ ta̍ e̱tenāva̍yaje̱ svāhā̎ |
anu̍ no̱'dyānu̍matiḥ |
anvida̍numate̱ tvam |
di̱vastva̍ para̱spāyā̎ḥ |
a̱ntari̍kṣasya ta̱nuva̍ḥ pāhi |
pṛ̱thi̱vyāstvā̱ dharma̍ṇā || 43 ||))

[[4-11-3]]
व̱यमनु̍क्रामाम सु̱वि̱ताय̱ नव्य̍से।
ब्रह्म̍णस्त्वा प॒र॒स्पाया̎ः।
क्ष̱त्त्रस्य̍ त̱नुव̍ः पाहि।
वि̱शस्त्वा̱ धर्म̍णा।
व̱यमनु̍क्रामाम सु̱वि̱ताय̱ नव्य̍से।
प्रा̱णस्य̍ त्वा प॒र॒स्पायै̎।
चक्षु̍षस्त̱नुव̍ः पाहि।
श्रोत्र̍स्य त्वा̱ धर्म̍णा।
व̱यमनु̍क्रामाम सु̱वि̱ताय̱ नव्य̍से।

व॒ल्गुर॑सि शं॒युधा॑याः ॥ ४४ ॥

((va̱yamanu̍krāmāma suvi̱tāya̱ navya̍se |
brahma̍ṇastvā para̱spāyā᳚ḥ |
kṣa̱ttrasya̍ ta̱nuva̍ḥ pāhi |
vi̱śastva̱ dharma̍ṇā |
va̱yamanu̍krāmāma suvi̱tāya̱ navya̍se |
prā̱ṇasya̍ tvā para̱spāyai᳚ |
cakṣu̍ṣasta̱nuva̍ḥ pāhi |
śrotra̍sya tva̱ dharma̍ṇā |
va̱yamanu̍krāmāma suvi̱tāya̱ navya̍se |
va̱lgura̍si śa̱ṃyudhā̍yāḥ || 44 ||))

[[4-11-4]]

शिशु॒र्जन॑धायाः ।
शं च॒ वक्षि॒ परि॑ च॒ वक्षि॑ ।
चतु॑स्स्रक्ति॒र्नाभि॑र्ऋ॒तस्य॑ ।
सदो॑ वि॒श्वायु॒श्शर्म॑ स॒प्रथाः᳚ ।
अप॒ द्वेषो॒ अप॒ ह्वरः॑ ।
अ॒न्यद्व्र॑तस्य सश्चिम ।
घ॒र्मै॒तत्तेऽन्न॑मे॒तत्पुरी॑षम् ।
तेन॒ वर्ध॑स्व॒ चा च॑ प्यायस्व ।
व॒र्धि॒षी॒महि॑ च व॒यम् ।
आ च॑ प्यासिषी॒महि॑ ॥ ४५ ॥

((śiśu̱rjana̍dhāyāḥ |
śaṃ ca̱ vakṣi̱ pari̍ ca̱ vakṣi̍ |
catu̍ssrakti̱rnābhi̍rṛ̱tasya̍ |
sado̍ vi̱śvāyu̱śśarma̍ sa̱prathā᳚ḥ |
apa̱ dveṣo̱ apa̱ hvara̍ḥ |
a̱nyadvra̍tasya saścima |
gharma̱itatte'nna̍me̱tatpurī̍ṣam |
tena̱ vardha̍sva̱ cā ca̍ pyāyasva |
va̱rdhi̱ṣī̱mahi̍ ca va̱yam |
ā ca̍ pyāsiṣī̱mahi̍ || 45 ||))

[[4-11-5]]

रन्ति॒र्नामा॑सि दि॒व्यो ग॑न्ध॒र्वः ।
तस्य॑ ते प॒द्वद्ध॑वि॒र्धान᳚म् ।

अ॒ग्निर॑ध्य॑क्षाः।
रु॒द्रोऽधि॑पतिः।
सम॒हमायु॑षा।
सं प्रा॒णेन॑।
सं वर्च॑सा।
सं पय॑सा।
सं गौप॒त्येन॑।
सꣳ रा॒यस्पोषे॑ण॥ ४६॥

((rantirnāmāsi divyo gandharvaḥ |
tasya te padvaddhavirdhānām |
agniradhyakṣāḥ |
rudro'dhipatiḥ |
samahamāyuṣā |
saṃ prāṇena |
saṃ varcasā |
saṃ payasā |
saṃ gaupatyena |
sam̐ rāyaspoṣeṇa || 46 ||))

[[4-11-6]]
व्य॑सौ।
यो॑ऽस्मान्द्वेष्टि॑।
यं च॑ व॒यं द्वि॒ष्मः।
अचि॑क्रदद्वृ॒षा॒ हरि॑ः।
म॒हान्मि॒त्रो न द॑र्श॒तः।
सꣳ सूर्ये॑ण रोचते।
चिद॑सि समु॒द्रयो॑निः।
इन्दु॒र्दक्ष॑श्श्ये॒न ऋ॒तावा॑।
हिर॑ण्यपक्षश्शकु॒नो भु॑र॒ण्युः।
म॒हान्थ्स॒धस्थे॑ ध्रु॒व आनिष॑त्तः॥ ४७॥

((vyasau |
yo'smāndveṣṭi |
yaṃ ca vayaṃ dviṣmaḥ |
acikradadvṛṣā hariḥ |
mahānmitro na darśataḥ |

saṁ sūryéṇa rocate |
cidási samu̱drayóniẖ |
indu̱rdakṣáśśye̱na ṛ̱tāvā̎ |
hiráṇyapakṣaśśaku̱no bhúra̱ṇyuḥ |
ma̱hānthsa̱dhasthē̎ dhru̱va āniṣáttaḥ || 47 ||))

[[4-11-7]]

नम॑स्ते अस्तु॒ मा मा॑ हिꣳसीः।

वि॒श्वाव॑सुꣳ सोमगन्ध॒र्वम्।

आपो॑ द॒दृ॒शुषी᳚ः।

तदृ॒तेना॒ व्या॑यन्न्।

तद॒न्ववै᳚त्।

इन्द्रो॑ रारहा॒ण आ॑साम्।

परि॒ सूर्य॑स्य परि॒धीꣳर॑पश्यत्।

वि॒श्वाव॑सुर॒भि तन्नो॑ गृणातु।

दि॒व्यो ग॑न्ध॒र्वो रज॑सो वि॒मान॑ः।

यद्वा॑ घा स॒त्यमु॒त यन्न वि॒द्म॥ ४८॥

((namáste astu̱ mā má hiṁsīḥ |
vi̱śvāvásuṁ somagandha̱rvam |
āpó dadṛ̱śuṣī̎ḥ |
tadṛ̱tenā̱ vyáyann |
tada̱nvavaĭt |
indró rārahā̱ṇa ásām |
pari̱ sūryásya pari̱dhīṁrápaśyat |
vi̱śvāvásura̱bhi tannó gṛṇātu |
di̱vyo gándha̱rvo rajáso vi̱mānáḥ |
yadvá ghā sa̱tyamu̱ta yanna vi̱dma || 48 ||))

[[4-11-8]]

धियो॑ हिन्वा॒नो धिय॒ इन्नो॑ अव्यात्।

स॒स्निमविन्द॒च्चर॑णे न॒दीना᳚म्।

अपा॑वृणो॒द्दुरो॒ अश्म॑व्रजानाम्।

प्रासा᳚ गन्ध॒र्वो अ॒मृता॑नि वोचत्।

इन्द्रो॒ दक्ष॒ं परि॑जानाद॒हीन॑म्।

ए॒तत्त्वं दे॑व घर्म दे॒वो दे॒वानुपा॑गाः।

इ॒दम॒हं म॑नु॒ष्यो॑ मनु॒ष्यान्।

सोम॑पी॒थानु॒ मेहिं॑।
स॒ह प्र॒जया॑ स॒ह रा॒यस्पोषे॑ण।
सु॒मि॒त्रा न॒ आप॒ ओष॑धयस्सन्तु॥ ४९॥

((dhiyȯ hinvā̱no dhiya̱ innö avyāt |
sasni̍mavinda̱ccara̍ṇe na̱dīnā̎m |
apā̍vṛṇo̱dduro̱ aśma̍vrajānām |
prāsā̎m̐ gandha̱rvo a̱mṛtā̍ni vocat |
indro̱ dakṣa̱m pari̍jānāda̱hīnā̎m |
e̱tattvaṃ de̍va gharma de̱vo de̱vānupā̍gāḥ |
i̱dama̱haṃ ma̍nu̱ṣyȯ manu̱ṣyā̍n |
soma̍pī̱thānu̱ mehi̍ |
sa̱ha pra̱jayā̍ sa̱ha rā̱yaspoṣe̍ṇa |
su̱mi̱trā na̱ āpa̱ oṣa̍dhayassantu || 49 ||))

[[4-11-9]]
दु॒र्मि॒त्रास्तस्मै॑ भूयासुः।
यो॑ऽस्मान्द्वेष्टि॑।
यं च॑ व॒यं द्वि॒ष्मः।
उद्व॒यं तम॑स॒स्परि॑।
उदु॒ त्यं चि॒त्रम्।
इ॒ममू॒ षु त्यम॒स्मभ्य॑ꣳ स॒निम्।
गा॒य॒त्रं नवी॑याꣳसम्।
अग्ने॑ दे॒वेषु॒ प्रवो॑चः॥ ५०॥
याऽऽग्नींद्ध्रे॒ तां त॑ ए॒तेनाव॑यज॒े स्वाहा॒ धर्म॑णा श॒ंयुधा॑याः प्यासिषी॒महि॒ पोषे॑ण॒ निष॑त्तो वि॒द्म सन्त्व॒ष्टौ च॑॥ ११॥

((du̱rmi̱trāstasmai̍ bhūyāsuḥ |
yö'smāndveṣṭi̍ |
yaṃ ca̍ va̱yaṃ dvi̱ṣmaḥ |
udva̱yaṃ tama̍sa̱spari̍ |
udu̱ tyaṃ ci̱tram |
i̱mamū̱ ṣu tyama̱smabhya̍m̐ sa̱nim |
gā̱ya̱traṃ navi̍yām̐sam |
agnė de̱veṣu̱ pravȯcaḥ || 50 ||
yā''gnīddhre̱ tāṃ ta̍ e̱tenāva̍yaje̱ svāhā̱ dharma̍ṇā śa̱ṃyudhā̍yāḥ pyāsiṣī̱mahi̱ poṣe̍ṇa̱ niṣa̍tto vi̱dma sa̍ntva̱ṣṭau ca̍ || 11 ||))

[[4-12-1]]

म॒ही॒नां पयो॑ऽसि॒ विहि॑तं दे॒वत्रा।
ज्यो॒ति॒र्भा अ॑सि॒ वन॒स्पती॑ना॒मोष॑धीना॒ꣳ रस॑ः।
वा॒जिनं॑ त्वा वा॒जिनो॑ऽव॒नयामः।
ऊ॒र्ध्वं मन॑स्सुव॒र्गं॥ ५१॥ ॥ १२॥

((ma̱hī̱nāṃ payo̍'si̱ vihi̍taṃ deva̱trā ।
jyo̱ti̱rbhā a̍si̱ vana̱spati̍nā̱moṣa̍dhīnā̱ꣳ rasa̍ḥ ।
vā̱jinaṃ̍ tvā vā̱jino'va̍nayāmaḥ ।
ū̱rdhvaṃ mana̍ssuva̱rgaṃ ॥ 51 ॥ ॥ 12 ॥))

[[4-13-1]]
अस्का॒न्द्यौः पृ॑थि॒वीम्।
अस्का॑नृष॒भो युवा॒ गाः।
स्क॒न्नेमा विश्वा॒ भुव॑ना।
स्क॒न्नो य॒ज्ञः प्रज॑नयतु।
अस्का॒नजा॑नि॒ प्राजा॑नि।
आ स्क॒न्नाज्जा॑यते॒ वृषा॑।
स्क॒न्नात्प्रजा॑निषीमहि॥ ५२॥ ॥ १३॥

((askā̱ndyauḥ pṛ̍thi̱vīm ।
askā̍nṛṣa̱bho yuvā̱ gāḥ ।
ska̱nnemā viśvā̱ bhuva̍nā ।
ska̱nno ya̱jñaḥ praja̍nayatu ।
askā̱naja̍ni̱ prāja̍ni ।
ā ska̱nnājjā̍yate̱ vṛṣā̎ ।
ska̱nnātpraja̍niṣīmahi ॥ 52 ॥ ॥ 13 ॥))

[[4-14-1]]
या पु॒रस्ता॑द्वि॒द्युदाप॑तत्।
तां त॑ ए॒तेनाव॑यजे॒ स्वाहा॑।
या द॑क्षिण॒तः।
या प॒श्चात्।
योत्त॑र॒तः।
योपरि॑ष्टाद्वि॒द्युदाप॑तत्।
तां त॑ ए॒तेनाव॑यजे॒ स्वाहा॑॥ ५३॥ ॥ १४॥

((yā pu̱rastā̎dvi̱dyudāpa̍tat ।

tāṃ ta̍ e̱tenāva̍yaje̱ svāhā̎ ।
yā da̍kṣiṇa̱taḥ ।
yā pa̱ścāt ।
yotta̍ra̱taḥ ।
yopari̍ṣṭādvi̱dyudāpa̍tat ।
tāṃ ta̍ e̱tenāva̍yaje̱ svāhā̎ ॥ 53 ॥ ॥ 14 ॥))

[[4-15-1]]

प्रा̱णाय̱ स्वाहा̎ व्या̱नाय̱ स्वाहा̍ऽपा̱नाय̱ स्वाहा̎।
चक्षु̍षे̱ स्वाहा̱ श्रोत्रा̍य̱ स्वाहा̎।
मन॑से̱ स्वाहा̍ वा̱चे सर॑स्वत्यै̱ स्वाहा̎॥ ५४॥ ॥ १५॥

((prā̱ṇāya̱ svāhā̎ vyā̱nāya̱ svāhā̍'pā̱nāya̱ svāhā̎ ।
cakṣu̍ṣe̱ svāhā̱ śrotrā̍ya̱ svāhā̎ ।
mana̍se̱ svāhā̍ vā̱ce sara̍svatyai̱ svāhā̎ ॥ 54 ॥ ॥ 15 ॥))

[[4-16-1]]

पू̱ष्णे स्वाहा̍ पू̱ष्णे श॒र॑से̱ स्वाहा̎।
पू̱ष्णे प्र॑प॒थ्या॑य̱ स्वाहा̍ पू̱ष्णे न̱रन्धि॑षाय̱ स्वाहा̎।
पू̱ष्णेऽङ्घृ॑णये̱ स्वाहा̍ पू̱ष्णे न̱रुणा॑य̱ स्वाहा̎।
पू̱ष्णे सा॑के̱ताय̱ स्वाहा̎॥ ५५॥ ॥ १६॥

((pū̱ṣṇe svāhā̍ pū̱ṣṇe śara̍se̱ svāhā̎ ।
pū̱ṣṇe pra̍pa̱thyā̍ya̱ svāhā̍ pū̱ṣṇe na̱randhi̍ṣāya̱ svāhā̎ ।
pū̱ṣṇe'ṅghṛ̍ṇaye̱ svāhā̍ pū̱ṣṇe na̱ruṇā̍ya̱ svāhā̎ ।
pū̱ṣṇe sā̍ke̱tāya̱ svāhā̎ ॥ 55 ॥ ॥ 16 ॥))

[[4-17-1]]

उद॑स्य̱ शुष्मा̎द्भा̱नुर्नार्त॑ बिभ॑र्ति।
भा̱रं पृ॑थि̱वी न भूम॑।
प्र शु̱क्रैतु॑ दे̱वी म॑नी̱षा।
अ̱स्मथ्सु॒त॑ष्टो̱ रथो̱ न वा̱जी।
अर्च॑न्त̱ एके̱ महि̱ साम॑ मन्वत।
तेन̱ सूर्य॑मधारयन्न्।
तेन̱ सूर्य॑मरोचयन्न्।
घ̱र्मश्शिर̱स्तद̱यम̱ग्निः।
पुरी॑षमसि̱ संप्रि॑यं प्र̱जया॑ प̱शुभि॑र्भुवत्।

प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ ५६॥ ॥ १७॥

((udȧsya̱ śuṣmȁdbhā̱nurnārta̱ bibhȧrti ।
bhā̱raṃ pṛ̇thi̱vī na bhūmȧ ।
pra śu̱kraitu̇ de̱vī mȧnī̱ṣā ।
a̱smathsutȧṣṭo̱ ratho̱ na vā̱jī ।
arcȧnta̱ eke̱ mahi̱ sāmȧ manvata ।
tena̱ sūryȧmadhārayann ।
tena̱ sūryȧmarocayann ।
gha̱rmaśśira̱stada̱yama̱gniḥ ।
puri̇ṣamasi̱ saṃpri̇yaṃ pra̱jayȧ pa̱śubhi̇rbhuvat ।
pra̱jāpȧtistvā sādayatu ।
tayȧ de̱vatȧyā'ṅgira̱svaddhru̱vā si̇da ॥ 56 ॥ ॥ 17 ॥))

[[4-18-1]]
यास्ते॑ अग्न आ॒र्द्रा योन॑यो॒ याः कु॑ला॒यिनी॑ः।
ये ते॑ अग्न॒ इन्द॑वो॒ या उ॒ नाभ॑यः।
यास्ते॑ अग्ने त॒नुव॒ ऊर्जो॒ नाम॑।
ताभि॒स्त्वमु॒भयी॑भिस्सं॒विदा॒नः।
प्र॒जाभि॑रग्ने॒ द्रवि॑णे॒ह सी॑द।
प्र॒जाप॑तिस्त्वा सादयतु।
तया॑ दे॒वत॑याऽङ्गिर॒स्वद्ध्रु॒वा सी॑द॥ ५७॥ ॥ १८॥

((yāstė agna ā̱rdrā yonȧyo̱ yā̱ḥ kȯlā̱yinȉḥ ।
ye tė agna̱ indȧvo̱ yā u̱ nābhȧyaḥ ।
yāstė agne ta̱nuva̱ ūrjo̱ nāmȧ ।
tābhi̱stvamu̱bhayi̇bhissaṃvidā̱naḥ ।
pra̱jābhi̇ragne̱ dravi̇ṇe̱ha si̇da ।
pra̱jāpȧtistvā sādayatu ।
tayȧ de̱vatȧyā'ṅgira̱svaddhru̱vā si̇da ॥ 57 ॥ ॥ 18 ॥))

[[4-19-1]]
अ॒ग्निर॑सि वैश्वान॒रो॑ऽसि।
सं॒वथ्स॒रो॑ऽसि परिवथ्स॒रो॑ऽसि।
इ॒दा॒वथ्स॒रो॑ऽसीदुवथ्स॒रो॑ऽसि।
इ॒द्वथ्स॒रो॑ऽसि वथ्स॒रो॑ऽसि।
तस्य॑ ते वस॒न्तश्शिर॑ः।

ग्रीष्मो दक्षिणः पक्षः।
वर्षाः पुच्छम्।
शरदुत्तरः पक्षः।
हेमन्तो मध्यम्।
पूर्वपक्षाश्चितयः।
अपरपक्षाः पुरीषम्।
अहोरात्राणीष्टकाः।
तस्य ते मासाश्चार्धमासाश्च कल्पन्ताम्।
ऋतवस्ते कल्पन्ताम्।
संवथ्सरस्ते कल्पताम्।
अहोरात्राणि ते कल्पन्ताम्।
एति प्रेति वीति समित्युदिति।
प्रजापतिस्त्वा सादयतु।
तया देवतयाऽङ्गिरस्वद्ध्रुवस्सीद॥ ५८॥
चितयो नव च॥ १९॥

((agnirasi vaiśvānaro'si |
saṃvathsaro'si parivathsaro'si |
idāvathsaro'sīduvathsaro'si |
idvathsaro'si vathsaro'si |
tasya te vasantaśśiraḥ |
grīṣmo dakṣiṇaḥ pakṣaḥ |
varṣāḥ puccham |
śaraduttaraḥ pakṣaḥ |
hemanto madhyam |
pūrvapakṣāścitayaḥ |
aparapakṣāḥ purīṣam |
ahorātrāṇīṣṭakāḥ |
tasya te māsāścārdhamāsāśca kalpantām |
ṛtavaste kalpantām |
saṃvathsaraste kalpatām |
ahorātrāṇi te kalpantām |
eti preti vīti samityuditi |
prajāpatistvā sādayatu |
tayā devatayā'ṅgirasvaddhruvassīda || 58 ||
citayo nava ca || 19 ||))

[[4-20-1]]

भूर्भुव॒स्सुव॑ः।
ऊ॒र्ध्व ऊ॒ षु ण॑ ऊ॒तये॓।
ऊ॒र्ध्वो न॑ः पा॒ह्यꣳह॑सः।
वि॒धुं द॑द्रा॒णꣳ सम॑ने ब॒हूनाम्।
युवा॑न॒ꣳ सन्त॑ं पलि॒तो ज॑गार।
दे॒वस्य॑ पश्य॒ काव्य॑ं महि॒त्वाऽद्या म॒मार॑।
स ह्य॒स्समा॑न।
यदृ॒ते चि॑दभि॒श्रिष॑ः।
पु॒रा ज॒र्तृभ्य॑ आ॒तृद॑ः।
सन्धा॑ता स॒न्धिं म॒घवा॑ पु॒रो॒वसु॑ः॥ ५९॥

((bhūrbhuva̱ssuva̍ḥ ।
ū̱rdhva ū̱ ṣu ṇa̍ ū̱taye̎ ।
ū̱rdhvo na̍ḥ pā̱hyam̐ha̍sa̍ḥ ।
vi̱dhuṃ da̍drā̱ṇam̐ sama̍ne bahū̱nām ।
yuvā̍na̱m̐ santa̍ṃ pali̱to ja̍gāra ।
de̱vasya̍ paśya̱ kāvya̍ṃ mahi̱tvā'dyā ma̱mārȧ ।
sa hya̱ssamā̍na ।
yadṛ̱te ci̍dabhi̱śriṣa̍ḥ ।
pu̱rā ja̱rtṛbhya̍ ā̱tṛda̍ḥ ।
sandhā̍tā sa̱ndhiṃ ma̱ghavā̍ puro̱vasu̍ḥ ॥ 59 ॥))

[[4-20-2]]
निष्क॑र्ता॒ विह्रु॑तं॒ पुन॑ः।
पुन॑रू॒र्जा स॒ह र॒य्या।
मा नो॑ घर्म॑ व्यथि॒तो वि॑व्यथो नः।
मा न॒ः पर॒मधर॑ं॒ मा रजो॑ऽनैः।
मोष्व॑स्माꣳस्तम॑स्यन्त॒रा धा॓ः।
मा रु॒द्रिया॑सो अ॒भिगु॒र्वृधा न॑ः।
मा न॒ः क्रतु॑भिर्हीडि॒तेभि॑र॒स्मान्।
द्विषा॑ सुनी॒ते मा परा॑दाः।
मा नो॑ रु॒द्रो निर्ऋ॑ति॒र्मा नो॒ अस्ता॓।
मा द्यावा॑पृथि॒वी ही॑डिषाताम्॥ ६०॥

((niṣka̍rtā̱ vihru̍tam̱ puna̍ḥ ।

punarūrjā saha rayyā |
mā no gharma vyathito vivyatho naḥ |
mā naḥ paramadharam mā rajo'naiḥ |
moṣvasmām̐stamasyantarā dhāḥ |
mā rudriyāso abhigurvṛdhā naḥ |
mā naḥ kratubhirhīḍitebhirasmān |
dviṣā sunīte mā parādāḥ |
mā no rudro nirṛtirmā no astā |
mā dyāvāpṛthivī hīḍiṣātām || 60 ||))

[[4-20-3]]

उप नो मित्रावरुणाविहावतम्।
अन्वादीध्याथामिह नस्सखाया।
आदित्यानां प्रसितिर्हेतिः।
उग्रा शतापाष्ठा घ विषा परि णो वृणक्तु।
इमं मे वरुण तत्त्वा यामि।
त्वं नो अग्ने स त्वं नो अग्ने।
त्वमग्ने अयासि ।
उद्वयं तमसस्परि।
उदु त्यं चित्रम्।
वयस्सुपर्णाः ॥ ६१ ॥
पुरोवसुर्हीडिषाताꣳ सुपर्णाः ॥ २० ॥

((upa no mitrāvaruṇāvihāvatam |
anvādīdhyāthāmiha nassakhāyā |
ādityānām prasitirhetiḥ |
ugrā śatāpāṣṭhā gha viṣā pari ṇo vṛṇaktu |
imaṃ me varuṇa tattvā yāmi |
tvaṃ no agne sa tvaṃ no agne |
tvamagne ayāsi |
udvayaṃ tamasaspari |
udu tyaṃ citram |
vayassuparṇāḥ || 61 ||
purovasurhīḍiṣātām̐ suparṇāḥ || 20 ||))

[[4-21-1]]

भूर्भुवस्सुवः।
मयि त्यदिन्द्रियं महत्।
मयि दक्षो मयि क्रतुः।

मयि॑ धायि सु॒वीर्य॒ँम्।
त्रि॒शु॒ग्घ॒र्मो वि॒भा॑तु मे।
आकू॑त्या॒ मन॑सा स॒ह।
वि॒राजा॒ ज्योति॑षा स॒ह।
य॒ज्ञेन॒ पय॑सा स॒ह।
ब्रह्म॑णा॒ तेज॑सा स॒ह।
क्ष॒त्रेण॒ यश॑सा स॒ह।
स॒त्येन॒ तप॑सा स॒ह।
तस्य॒ दोह॑मशीमहि।
तस्य॑ सु॒म्नम॑शीमहि।
तस्य॑ भ॒क्षम॑शीमहि।
तस्य॑ त॒ इन्द्रे॑ण पी॒तस्य॒ मधु॑मतः।
उप॑हूत॒स्योप॑हूतो भक्षयामि॥ ६२॥
यश॑सा स॒ह षट्च॑॥ २१॥

((bhūrbhuvassuvaḥ |
mayi tyadindriyaṃ mahat |
mayi dakṣo mayi kratuḥ |
mayi dhāyi suvīryam |
triśugghaṛmo vibhātu me |
ākūtyā manasā saha |
virājā jyotiṣā saha |
yajñena payasā saha |
brahmaṇā tejasā saha |
kṣatreṇa yaśasā saha |
satyena tapasā saha |
tasya dohamaśīmahi |
tasya sumnamaśīmahi |
tasya bhakṣamaśīmahi |
tasya ta indreṇa pītasya madhumataḥ |
upahūtasyopahūto bhakṣayāmi || 62 ||
yaśasā saha ṣaṭca || 21 ||))

[[4-22-1]]
यास्ते॑ अग्ने घो॒रास्त॒नुव॑ः।
क्षुच्च॒ तृष्णा॑ च।
अस्नु॒क्चाना॑हुतिश्च।

अ॒श॒न॒या च॑ पिपा॒सा च॑।
से॒दिश्चाम॑तिश्च।
ए॒तास्ते॑ अग्ने घो॒रास्त॒नुव॑ः।
ताभि॑र॒मुं ग॑च्छ।
यो᳚ऽस्मान्द्वेष्टि॑।
यं च॑ व॒यं द्वि॒ष्मः॥ ६३॥ ॥ २२॥

((yāste̍ agne gho̱rāsta̱nuva̍ḥ |
kṣucca̱ tṛṣṇa̍̄ ca |
asnu̱kcāna̍̄hutiśca |
a̱śa̱na̱yā ca̍ pipā̱sā ca̍ |
se̱diścāma̍tiśca |
e̱tāste̍ agne gho̱rāsta̱nuva̍ḥ |
tābhi̍ra̱mum ga̍ccha |
yo̎'smāndveṣṭi̍ |
yaṃ ca̍ va̱yaṃ dvi̱ṣmaḥ || 63 || || 22 ||))

[[4-23-1]]
स्निक्च॒ स्नीहि॑तिश्च॒ स्निहि॑तिश्च।
उ॒ष्णा च॑ शी॒ता च॑।
उ॒ग्रा च॑ भी॒मा च॑।
स॒दाम्नी॑ से॒दिरनि॑रा।
ए॒तास्ते॑ अग्ने घो॒रास्त॒नुव॑ः।
ताभि॑र॒मुं ग॑च्छ।
यो᳚ऽस्मान्द्वेष्टि॑।
यं च॑ व॒यं द्वि॒ष्मः॥ ६४॥ ॥ २३॥

((snikca̱ snīhi̍tiśca̱ snihi̍tiśca |
u̱ṣṇā ca̍ śī̱tā ca̍ |
u̱grā ca̍ bhī̱mā ca̍ |
sa̱dāmni̍ se̱diranirā |
e̱tāste̍ agne gho̱rāsta̱nuva̍ḥ |
tābhi̍ra̱mum ga̍ccha |
yo̎'smāndveṣṭi̍ |
yaṃ ca̍ va̱yaṃ dvi̱ṣmaḥ || 64 || || 23 ||))

[[4-24-1]]
धुनि॑श्च ध्वा॒न्तश्च॑ ध्व॒नश्च॑ ध्व॒नयँ॑श्च।

नि॒लि॒म्पश्च॑ वि॒लि॒म्पश्च॑ वि॒क्षि॒पः ॥ ६५॥ ॥ २४॥

((dhuni̍śca dhvā̱ntaśca̍ dhva̱naśca̍ dhva̱nayaṁ̐śca |
ni̱li̱mpaśca̍ vili̱mpaśca̍ vikṣi̱paḥ || 65 || || 24 ||))

[[4-25-1]]
उ॒ग्रश्च॒ धुनि॑श्च ध्वा॒न्तश्च॑ ध्व॒नश्च॑ ध्व॒नय॒ꣳश्च॑ ।
स॒ह॒स॒ह्वाꣳश्च॒ सह॑मानश्च॒ सह॑स्वाꣳश्च॒ सही॑याꣳश्च ।
ए॒त्य॒ प्रेत्य॑ वि॒क्षि॒पः ॥ ६६॥ ॥ २५॥

((u̱graśca̱ dhuni̍śca dhvā̱ntaśca̍ dhva̱naśca̍ dhva̱nayaṁ̐śca |
sa̱ha̱sa̱hvāṁ̐śca̱ saha̍mānaśca̱ saha̍svāṁ̐śca̱ sahi̍yāṁ̐śca |
etya̱ pretya̍ vikṣi̱paḥ || 66 || || 25 ||))

[[4-26-1]]
अ॒हो॒रा॒त्रे त्वोदी॑रयताम् ।
अ॒र्ध॒मा॒सास्त्वोदी᳚ञ्जयन्तु ।
मासा᳚स्त्वा श्रपयन्तु ।
ऋ॒तव॑स्त्वा पचन्तु ।
सं॒व॒थ्स॒रस्त्वा॑ हन्त्वसौ ॥ ६७॥ ॥ २६॥

((a̱ho̱rā̱tre tvodi̍rayatām |
a̱rdha̱mā̱sāstvodi̎ñjayantu |
māsā̎stvā śrapayantu |
ṛ̱tava̍stvā pacantu |
sa̱ṁva̱thsa̱rastvā̍ hantvasau || 67 || || 26 ||))

[[4-27-1]]
खट्फड्ज॒हि ।
छि॒न्धी भि॒न्धी ह॒न्धी क॒ट् ।
इति॒ वाच॑ः क्रूरा॒णि ॥ ६८॥ ॥ २७॥

((khaṭphaḍja̱hi |
chi̱ndhī bhi̱ndhī ha̱ndhī kaṭ |
iti̱ vāca̍ḥ krūrā̱ṇi || 68 || || 27 ||))

[[4-28-1]]
वि॑गा इ॑न्द्र वि॒चर᳚न्थ्स्पाशयस्व ।
स्व॒पन्त॑मिन्द्र पशु॒मन्त॑मिच्छ ।

वज्रे॑णा॒मुं बो॑धय दु॒र्वि॑द॒त्रा॑म्।
स्व॒प॒तो॑ऽस्य॒ प्रह॑र॒ भोज॑नेभ्यः।
अग्ने॑ अ॒ग्निना॒ संव॑दस्व।
मृत्यो॑ मृ॒त्युना॒ संव॑दस्व।
नम॑स्ते अस्तु भगवः।
स॒कृत्ते॑ अग्ने॒ नम॑ः।
द्विस्ते॒ नम॑ः।
त्रिस्ते॒ नम॑ः।
च॒तुस्ते॒ नम॑ः।
प॒ञ्च॒कृत्व॑स्ते॒ नम॑ः।
द॒श॒कृत्व॑स्ते॒ नम॑ः।
श॒त॒कृत्व॑स्ते॒ नम॑ः।
आ॒स॒ह॒स्र॒कृत्व॑स्ते॒ नम॑ः।
अ॒प॒रि॒मि॒त॒कृत्व॑स्ते॒ नम॑ः।
नम॑स्ते अस्तु॒ मा मा॑ हिꣳसीः॥ ६९॥
त्रिस्ते॒ नम॑स्स॒प्त च॑॥ २८॥

((vigā indra vi̱carānthspāśayasva |
sva̱pantámindra paśu̱mantámiccha |
vajréṇā̱mum bódhaya durvi̱datrām |
sva̱pa̱tō'sya̱ prahára̱ bhojánebhyaḥ |
agné a̱gninā̱ saṃvádasva |
mṛtyó mṛ̱tyunā̱ saṃvádasva |
namáste astu bhagavaḥ |
sa̱kṛtté agne̱ namáḥ |
dviste̱ namáḥ |
triste̱ namáḥ |
ca̱tuste̱ namáḥ |
pañca̱kṛtváste̱ namáḥ |
da̱śa̱kṛtváste̱ namáḥ |
śa̱ta̱kṛtváste̱ namáḥ |
ā̱sa̱ha̱sra̱kṛtváste̱ namáḥ |
a̱pa̱ri̱mi̱ta̱kṛtváste̱ namáḥ |
namáste astu̱ mā má himँsīḥ || 69 ||
triste̱ namássa̱pta cá || 28 ||))

[[4-29-1]]

असृ॑न्मुखो रुधि॒रेणा॒व्य॑क्त।
य॒मस्य॑ दू॒तश्श्वपा॒द्विधा॑वसि।
गृध्र॑स्सुप॒र्णः कु॒णप॑ं नि॒षे॑वसे।
य॒मस्य॑ दू॒तः प्रहि॑तो भ॒वस्य॑ चो॒भयो॑ः॥ ७०॥ ॥ २९॥

((asṛ̍nmukho rudhi̱reṇā̱vyȧkta ।
ya̱masyȧ dū̱taśśvapā̱dvidhȧvasi ।
gṛddhrȧssupa̱rṇaḥ ku̱ṇapa̱m ni̱ṣėvase ।
ya̱masyȧ dū̱taḥ prahi̍to bha̱vasyȧ co̱bhayȍḥ ॥ 70 ॥ ॥ 29 ॥))

[[4-30-1]]
यदे॒तद्वृ॑क॒सो भू॒त्वा।
वाग्दे॑व्यभि॒राय॑सि।
द्वि॒षन्त॑ं मे॒ऽभिरा॑य।
तं मृ॑त्यो मृ॒त्यवे॑ नय।
स आर्त्या॒ऽऽर्ति॒मार्च्छ॑तु॥ ७१॥ ॥ ३०॥

((yade̱tadvṛ̍ka̱so bhū̱tvā ।
vāgdȅvyabhi̱rāyȧsi ।
dvi̱ṣantaṁ̍ me̱'bhirȧya ।
tam mṛ̍tyo mṛ̱tyavė naya ।
sa ārtyā''rti̱mārcchȧtu ॥ 71 ॥ ॥ 30 ॥))

[[4-31-1]]
यदी॑षि॒तो यदि॑ वा स्वका॒मी।
भ॒येड॑को॒ वद॑ति॒ वोच॑मे॒ताम्।
तामि॑न्द्रा॒ग्नी ब्रह्म॑णा सं॒वि॒दा॒नौ।
शि॒वाम॒स्मभ्य॑ं कृणुतं गृ॒हेषु॑॥ ७२॥ ॥ ३१॥

((yadi̍ṣi̱to yadi̍ vā svakā̱mī ।
bha̱yedȧko̱ vadȧti̱ vocȧme̱tām ।
tāmi̍ndrā̱gnī brahmȧṇā saṃvidā̱nau ।
śi̱vāma̱smabhyaṁ̍ kṛṇutam gṛ̱heṣu̇ ॥ 72 ॥ ॥ 31 ॥))

[[4-32-1]]
दीर्घ॑मुखि दु॒र्ह॑णु।
मा स्म॑ दक्षि॒णतो॒ वद॑ः।
यदि॑ दक्षि॒णतो॒ वदा॑द्द्वि॒षन्त॑ं मेऽव॑बाधासै॥ ७३॥ ॥ ३२॥

((dīrghámukhi̱ durhá̱nu ।
mā smá dakṣiṇa̱to vádaḥ ।
yadi̍ dakṣi̱ṇa̱to vadā̎ddvi̱ṣantam̱ me'vábādhāsai ॥ 73 ॥ ॥ 32 ॥))

[[4-33-1]]
इ॒त्थादुलू॑क॒ आप॑प्तत्।
हि॒र॒ण्या॒क्षो अयो॑मुखः।
रक्ष॑सां दू॒त आग॑तः।
तमि॒तो ना॑शयाग्ने॥ ७४॥ ॥ ३३॥

((i̱tthādulū̍ka̱ āpáptat ।
hi̱ra̱ṇyā̱kṣo ayómukhaḥ ।
rakṣásām̱ dū̱ta āgátaḥ ।
tami̱to ná̍śayāgne ॥ 74 ॥ ॥ 33 ॥))

[[4-34-1]]
यदे॒तद्भू॒तान्य॑न्वा॒विश्य॑।
दैवीं॑ वाचं॑ व॒द॒सि॑।
द्वि॒षतो॑ न॒ः परा॑वद।
तान्मृ॑त्यो मृ॒त्यवे॑ नय।
त आर्त्या॑ऽऽर्ति॒मार्च्छ॑न्तु।
अ॒ग्निना॒ऽग्निस्संव॑दताम्॥ ७५॥ ॥ ३४॥

((yade̱tadbhū̱tānyánvā̱viśyá ।
daivīm̱ vācam̍ va̱dasi̍ ।
dvi̱ṣató na̱ḥ parávada ।
tānmr̍tyo mṟtyavé naya ।
ta ārtyā''rti̱mārcchántu ।
a̱gninā̱'gnissam̱vádatām ॥ 75 ॥ ॥ 34 ॥))

[[4-35-1]]
प्र॒सार्य॑ स॒क्थ्यौ॑ पत॑सि।
स॒व्यमक्षि॑ नि॒पेपि॑ च।
मेह क॑स्यच॒नाम॑मत्॥ ७६॥ ॥ ३५॥

((pra̱sāryá sa̱kthyaú patási ।
sa̱vyamakṣi̍ ni̱pepi̍ ca ।
meha kásyaca̱nāmámat ॥ 76 ॥ ॥ 35 ॥))

[[4-36-1]]

अत्रिणा त्वा क्रिमे हन्मि।
कण्वेन जमदग्निना।
विश्वावसोर्ब्रह्मणा हतः।
क्रिमीणाꣳ राजा।
अप्येषाꣳ स्थपतिर्हतः।
अथो माताऽथो पिता।
अथो स्थूरा अथो क्षुद्राः।
अथो कृष्णा अथो श्वेताः।
अथो आशातिका हताः।
श्वेताभिस्सह सर्वे हताः॥ ७७॥ ॥ ३६॥

((atriṇā tvā krime hanmi |
kaṇvena jamadagninā |
viśvāvasorbrahmaṇā hataḥ |
krimīṇām̐ rājā |
apyeṣām̐ sthapatirhataḥ |
atho mātā'tho pitā |
atho sthūrā atho kṣudrāḥ |
atho kṛṣṇā atho śvetāḥ |
atho āśātikā hatāḥ |
śvetābhissaha sarve hatāḥ || 77 || || 36 ||))

[[4-37-1]]

आहरावद्य।
श्रृतस्य हविषो यथा।
तत्सत्यम्।
यदमुं यमस्य जम्भयोः।
आदधामि तथा हि तत्।
खण्फण्म्रसि॥ ७८॥ ॥ ३७॥

((āharāvadya |
śṛtasya haviṣo yathā |
tatsatyam |
yadamuṃ yamasya jambhayoḥ |
ādadhāmi tathā hi tat |
khaṇphaṇmrasi || 78 || || 37 ||))

[[4-38-1]]

ब्रह्मणा त्वा शपामि।
ब्रह्मणस्त्वा शपथेन शपामि।
घोरेण त्वा भृगूणां चक्षुषा प्रेक्षे।
रौद्रेण त्वाऽङ्गिरसां मनसा ध्यायामि।
अघस्य त्वा धारया विध्यामि।
अधरो मत्पद्यस्वासौ॥ ७९॥ ॥ ३८॥

((brahmáṇā tvā śapāmi |
brahmáṇastvā śa̱pathéna śapāmi |
gho̱reṇá tvā̱ bhṛgū́ṇāṃ̱ cakṣúṣā̱ prekṣē̈ |
rau̱dreṇa̱ tvā'ṅgírasā̱ṃ manásā dhyāyāmi |
a̱ghasyá tvā̱ dhārá́yā vidhyāmi |
adháro̱ matpádyasvāsau || 79 || || 38 ||))

[[4-39-1]]

उत्तुद शिमिजावरि।
तल्पेजे तल्प उत्तुद।
गिरीꣳरनुप्रवेशय।
मरीचीरुप संनुद।
यावदितः पुरस्तादुदयाति सूर्यः।
तावदितोऽमुं नाशय।
योऽस्मान्द्वेष्टि।
यं च वयं द्विष्मः॥ ८०॥ ॥ ३९॥

((uttúda śimijāvari |
talpéje̱ talpa̱ uttúda |
gi̱rīm̐ranu̱pravéśaya |
marícī̱rupa̱ saṃnúda |
yāvádi̱taḥ pu̱rastádu̱dayáti̱ sūryáḥ |
tāvádi̱tó'muṃ náśaya |
yō̈'smāndveṣṭí |
yaṃ cá va̱yaṃ dvi̱ṣmaḥ || 80 || || 39 ||))

[[4-40-1]]

भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवः।
भुवोऽद्धायि भुवोऽद्धायि भुवोऽद्धायि।

नृ॒म्णायि नृ॒म्णं नृ॒म्णायि नृ॒म्णं नृ॒म्णायि नृ॒म्णम्।
नि॒धाय्यो॑ऽवायि नि॒धाय्यो॑ऽवायि नि॒धाय्यो॑ऽवायि।
ए अ॒स्मे अ॒स्मे।
सुव॒र्नज्योती᳚ः॥ ८१॥ ॥ ४०॥

((bhūrbhuva̱ssuvo̱ bhūrbhuva̱ssuvo̱ bhūrbhuva̱ssuva̍ḥ ।
bhuvo᳚'ddhāyi̱ bhuvo᳚'ddhāyi̱ bhuvo᳚'ddhāyi ।
nṛ̱mṇāyi nṛ̱mṇaṃ nṛ̱mṇāyi nṛ̱mṇaṃ nṛ̱mṇāyi nṛ̱mṇam ।
ni̱dhāyyo̍'vāyi ni̱dhāyyo̍'vāyi ni̱dhāyyo̍'vāyi ।
e a̱sme a̱sme ।
suva̱rnajyotī᳚ḥ ॥ 81 ॥ ॥ 40 ॥))

[[4-41-1]]
पृ॒थि॒वी स॒मित्।
ताम॒ग्निस्समि॑न्धे।
साऽग्निꣳ समि॑न्धे।
ताम॒हꣳ समि॑न्धे।
सा मा॒ समि॑द्धा।
आयु॑षा॒ तेज॑सा।
वर्च॑सा श्रि॒या।
यश॑सा ब्रह्मवर्च॒सेन॑।
अ॒न्नाद्ये॑न॒ समि॑न्ता॒ꣳ॒ स्वाहा᳚।
अ॒न्तरि॑क्षꣳ स॒मित्॥ ८२॥

((pṛ̱thi̱vī sa̱mit ।
tāma̱gnissami̍ndhe ।
sā'gnigm̐ sami̍ndhe ।
tāma̱hagm̐ sami̍ndhe ।
sā mā̱ sami̍ddhā ।
āyu̍ṣā̱ teja̍sā ।
varca̍sā śri̱yā ।
yaśa̍sā brahmavarca̱sena̍ ।
a̱nnādye̍na̱ sami̍ntā̱gm̐ svāhā᳚ ।
a̱ntari̍kṣagm̐ sa̱mit ॥ 82 ॥))

[[4-41-2]]
तां वा॒युस्समि॑न्धे।
सा वा॒युꣳ समि॑न्धे।

तामुहꣳ समिन्धे।
सा मा समिद्धा।
आयुषा तेजसा।
वर्चसा श्रिया।
यशसा ब्रह्मवर्चसेन।
अन्नाद्येन समिन्ताꣳ स्वाहा।
द्यौस्समित्।
तामादित्यस्समिन्धे॥ ८३॥

((tām vāyussamindhe |
sā vāyumँ samindhe |
tāmahamँ samindhe |
sā mā samiddhā |
āyuṣā tejasā |
varcasā śriyā |
yaśasā brahmavarcasena |
annādyena samintāmँ svāhā |
dyaussamit |
tāmādityassamindhe || 83 ||))

[[4-41-3]]
साऽऽदित्यꣳ समिन्धे।
तामुहꣳ समिन्धे।
सा मा समिद्धा।
आयुषा तेजसा।
वर्चसा श्रिया।
यशसा ब्रह्मवर्चसेन।
अन्नाद्येन समिन्ताꣳ स्वाहा।
प्राजापत्या मे समिदसि सपत्नक्षयणी।
भ्रातृव्यहा मेऽसि स्वाहा।
अग्ने व्रतपते व्रतं चरिष्यामि॥ ८४॥

((sā''dityamँ samindhe |
tāmahamँ samindhe |
sā mā samiddhā |
āyuṣā tejasā |
varcasā śriyā |

yaśa̍sā brahmavarca̱sena̍ |
a̱nnādye̍na̱ sami̍ntā̱m̐ svāhā̎ |
prā̱jā̱pa̱tyā me̍ sa̱mida̍si sapatna̱kṣaya̍ṇī |
bhrā̱tṛ̱vya̱hā me̍'si̱ svāhā̎ |
agne̎ vratapate vra̱taṃ ca̍riṣyāmi || 84 ||))

[[4-41-4]]
तच्छ॑केय॒ं तन्मे॑ राध्यताम्।
वायो᳚ व्रतपत॒ आदि॑त्य व्रतपते।
व्र॒ताना᳚ं व्रतपते व्र॒तं च॑रिष्यामि।
तच्छ॑केय॒ं तन्मे॑ राध्यताम्।
द्यौस्स॒मित्।
तामा॑दि॒त्यस्समि॑न्धे।
साऽऽदि॒त्यꣳ समि॑न्धे।
ताम॒हꣳ समि॑न्धे।
सा मा॒ समि॑द्धा।
आयु॑षा॒ तेज॑सा॥ ८५॥

((taccha̍keyaṃ̱ tanme̍ rādhyatām |
vāyo̎ vratapata̱ ādi̍tya vratapate |
vra̱tānā̎m̐ vratapate vra̱taṃ ca̍riṣyāmi |
taccha̍keyaṃ̱ tanme̍ rādhyatām |
dyaussa̱mit |
tāmā̍di̱tyassami̍ndhe |
sā''di̱tyam̐ sami̍ndhe |
tāma̱ham̐ sami̍ndhe |
sā mā̱ sami̍ddhā |
āyu̍ṣā̱ teja̍sā || 85 ||))

[[4-41-5]]
वर्च॑सा श्रि॒या।
यश॑सा ब्रह्मवर्च॒सेन॑।
अ॒न्नाद्ये॑न॒ समि॑न्ता॒ꣳ स्वाहा᳚।
अ॒न्तरि॑क्षꣳ स॒मित्।
तां वा॒युस्समि॑न्धे।
सा वा॒युꣳ समि॑न्धे।
ताम॒हꣳ समि॑न्धे।

सा मा॒ समि॑द्धा।
आयु॑षा॒ तेज॑सा।
वर्च॑सा श्रि॒या॥ ८६॥

((varca̍sā śri̱yā |
yaśa̍sā brahmavarca̱sena̍ |
a̱nnādye̍na̱ sami̍ntā̱m̐ svāhā̎ |
a̱ntari̍kṣam̐ sa̱mit |
tāṃ vā̱yussami̍ndhe |
sā vā̱yum̐ sami̍ndhe |
tāma̱ham̐ sami̍ndhe |
sā mā̱ sami̍ddhā |
āyu̍ṣā̱ teja̍sā |
varca̍sā śri̱yā || 86 ||))

[[4-41-6]]
यश॑सा ब्रह्मवर्च॒सेन॑।
अ॒न्नाद्ये॑न॒ समि॑न्ता॒ꣳ स्वाहा᳚।
पृ॒थि॒वी स॒मित्।
ताम॒ग्निस्समि॑न्धे।
साऽग्निꣳ समि॑न्धे।
ताम॒हꣳ समि॑न्धे।
सा मा॒ समि॑द्धा।
आयु॑षा॒ तेज॑सा।
वर्च॑सा श्रि॒या।
यश॑सा ब्रह्मवर्च॒सेन॑॥ ८७॥

((yaśa̍sā brahmavarca̱sena̍ |
a̱nnādye̍na̱ sami̍ntā̱m̐ svāhā̎ |
pṛ̱thi̱vī sa̱mit |
tāma̱gnissami̍ndhe |
sā'gnim̐ sami̍ndhe |
tāma̱ham̐ sami̍ndhe |
sā mā̱ sami̍ddhā |
āyu̍ṣā̱ teja̍sā |
varca̍sā śri̱yā |
yaśa̍sā brahmavarca̱sena̍ || 87 ||))

[[4-41-7]]

अ॒न्नाद्ये॑न॒ समि॑न्ता॒ꣳ॒ स्वाहा᳚।
प्रा॒जा॒प॒त्या मे॑ स॒मिद॑सि सपत्न॒क्षय॑णी ।
भ्रा॒तृ॒व्य॒हा मे॑ऽसि॒ स्वाहा᳚।
आदि॑त्य व्रतपते व्र॒तम॑चारिषम्।
तद॑शकं॒ तन्मे॑ऽराधि।
वायो᳚ व्रतप॒तेऽग्ने᳚ व्रतपते।
व्र॒ताना᳚ं व्रतपते व्र॒तम॑चारिषम्।
तद॑शकं॒ तन्मे॑ऽराधि॥ ८८॥
स॒मिथ्समि॑न्धे व्र॒तं च॑रिष्या॒म्यायु॑षा॒ तेज॑सा॒ वर्च॑सा श्रि॒या यश॑सा ब्रह्मवर्च॒सेना॒ष्टौ च॑॥ ॥ ४१॥

((a̱nnādye̍na̱ sami̍ntā̱m̐ svāhā̎ |
prā̱jā̱pa̱tyā me̍ sa̱mida̍si sapatna̱kṣaya̍ṇī |
bhrā̱tṛ̱vya̱hā me̍'si̱ svāhā̎ |
ādi̍tya vratapate vra̱tama̍cāriṣam |
tada̍śakam̱ tanme̍'rādhi |
vāyo̎ vratapa̱te'gne̎ vratapate |
vra̱tānā̎m vratapate vra̱tama̍cāriṣam |
tada̍śakam̱ tanme̍'rādhi || 88 ||
sa̱mithsami̍ndhe vra̱taṃ ca̍riṣya̱myāyu̍ṣā̱ teja̍sā̱ varca̍sā śri̱yā yaśa̍sā
brahmavarca̱senā̱ṣṭau ca̍ || || 41 ||))

[[4-42-1]]
शं नो॒ वात॑ः पवतां मात॒रिश्वा॒ शं न॑स्तपतु॒ सूर्य॑ः।
अहा॑नि॒ शं भ॑वन्तु॒ नश्शꣳ॒ रात्रि॒ः प्रति॑ धीयताम्।
शमु॒षा नो॒ व्य॑च्छतु॒ शमादि॒॑त्य उदे॑तु नः।
शि॒वा न॒श्शन्त॑मा भव सुमृडी॒का सर॑स्वति।
मा ते॒ व्यो॑म सं॒दृशि॑।
इडा॑यै॒ वास्त्व॑सि वास्तु॒मद्वा᳚स्तु॒मन्तो॑ भूयास्म॒ मा वास्तो᳚श्छिथ्स्मह्यवा॒स्तुस्स भू॑या॒द्यो᳚ऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः।
प्र॒ति॒ष्ठाऽसि॑ प्रति॒ष्ठाव॑न्तो भूयास्म॒ मा प्र॑ति॒ष्ठाया᳚श्छिथ्स्मह्यप्रति॒ष्ठस्स भू॑या॒द्यो᳚ऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः।
आ वा॑त वाहि भेष॒जं वि वा॑त वाहि॒ यद्रप॑ः।
त्वꣳहि वि॒श्वभे॑षजो दे॒वाना᳚ं दू॒त ईय॑से।
द्वावि॒मौ वातौ᳚ वात॒ आसिन्धो॒रापरा॒वत॑ः॥ ८९॥

((śaṃ no̱ vātaḥ pavatām mātari̱śvā̱ śaṃ na̍stapatu̱ sūryaḥ |
ahā̍ni̱ śaṃ bha̍vantu na̱śśam̐ rātri̱ḥ prati̍ dhīyatām |
śamu̱ṣā no̱ vya̍cchatu̱ śamā̍di̱tya ude̍tu naḥ |
śi̱vā na̱śśantamā̍ bhava sumṛ̱ḍī̱kā sarā̍svati |
mā te̱ vyo̍ma saṃdṛ̱śi̍ |
i̱ḍā̍ya̱i vāstvā̍si vāstu̱madvā̎stu̱manto̍ bhūyāsma̱ mā vāsto̎śchithsmahyavā̱stussa
bhū̍yā̱dyo̎'smāndveṣṭi̱ yaṃ ca̍ va̱yaṃ dvi̱ṣmaḥ |
pra̱ti̱ṣṭhā'si̍ prati̱ṣṭhāva̍nto bhūyāsma̱ mā prā̍ti̱ṣṭhāyā̎śchithsmahyaprati̱ṣṭhassa
bhū̍yā̱dyo̎'smāndveṣṭi̱ yaṃ ca̍ va̱yaṃ dvi̱ṣmaḥ |
ā vā̍ta vāhi bheṣa̱jaṃ vi vā̍ta vāhi̱ yadrapa̍ḥ |
tvam̐hi vi̱śvabhe̍ṣajo de̱vānā̎ṃ dū̱ta īya̍se |
dvavi̱mau vāta̍u vāta̱ āsindho̱rāpa̍rā̱vata̍ḥ || 89 ||))

[[4-42-2]]

दक्षं॑ मे अ॒न्य आ॒वातु॒ परा॒ऽन्यो वा॑तु॒ यद्रप॑ः।
यद॒दो वा॑त ते गृ॒हे॑ऽमृत॑स्य नि॒धिर्हि॒तः।
ततो॑ नो देहि जी॒वसे॒ ततो॑ नो धेहि भे॒षजम्।
ततो॑ नो॒ मह॒ आव॑ह॒ वात॒ आवा॑तु भे॒षजम्।
शं॒भूर्म॑यो॒भूर्नो॑ हृ॒दे प्र ण॒ आयू॑ꣳषि तारिषत्।
इन्द्र॑स्य गृ॒हो॑ऽसि॒ तं त्वा॒ प्रप॑द्ये॒ सगु॒स्साश्व॑ः।
स॒ह यन्मे॒ अस्ति॒ तेन॑।
भूः प्रप॑द्ये॒ भुवः॒ प्रप॑द्ये॒ सुवः॒ प्रप॑द्ये भूर्भुव॒स्सुवः॒ प्रप॑द्ये वा॒युं प्र॒प॒द्ये॒ऽना॑र्तां दे॒वतां॒ प्रप॒द्ये॒ऽश्मा॑नमाख॒णं प्रप॑द्ये प्र॒जाप॑तेर्ब्रह्मको॒शं ब्रह्म॒ प्रप॑द्य॒ ओं प्रप॑द्ये।
अ॒न्तरि॑क्षं म उ॒र्व॑न्तरं॑ बृ॒हद॒ग्नय॒ः पर्व॑ताश्च॒ यया॒ वात॑स्स्व॒स्त्या स्व॑स्ति॒ मां तया॑ स्व॒स्त्या स्व॑स्ति॒ मान॑सानि।
प्रा॒णा॑पा॒नौ मृ॒त्योर्मा॑ पात॒ं प्रा॒णा॑पा॒नौ॒ मा मा॑ हासिष्टं॒ मयि॑ मे॒धां मयि॑ प्र॒जां म॒य्य॒ग्निस्तेजो॑ द॒धातु॒ मयि॑ मे॒धां मयि॑ प्र॒जां मयीन्द्र॑ इन्द्रि॒यं द॑धातु॒ मयि॑ मे॒धां मयि॑ प्र॒जां मयि॒ सूर्यो॒ भ्राजो॑ दधातु॥ ९०॥

((dakṣa̍ṃ me a̱nya ā̱vātu̱ parā̱'nyo vā̍tu̱ yadrapa̍ḥ |
yada̱do vā̍ta te gṛ̱he̍'mṛta̍sya ni̱dhirhi̱taḥ |
tato̍ no dehi jī̱vase̱ tato̍ no dhehi bhe̱ṣajam |
tato̍ no̱ maha̱ āva̍ha̱ vāta̱ āvā̍tu bhe̱ṣajam |
śa̱ṃbhūrma̍yo̱bhūrno̍ hṛ̱de pra ṇa̱ āyū̍m̐ṣi tāriṣat |
indra̍sya gṛ̱ho̍'si̱ taṃ tvā̱ prapa̍dye̱ sagu̱ssāśva̍ḥ |
sa̱ha yanme̱ asti̱ tena̍ |
bhūḥ prapa̍dye̱ bhuva̱ḥ prapa̍dye̱ suva̱ḥ prapa̍dye̱ bhūrbhuva̱ssuva̱ḥ prapa̍dye
vā̱yuṃ prapa̱dye'nā̎rtāṃ de̱vatā̱ṃ prapa̱dye'śmā̍namākha̱ṇaṃ prapa̍dye
pra̱jāpa̍terbrahmako̱śaṃ brahma̱ prapa̍dya̱ oṃ prapa̍dye |
a̱ntari̍kṣaṃ ma u̱rva̍ntara̍ṃ bṛ̱hada̱gnaya̱ḥ parva̍tāśca̱ yayā̱ vāta̍ssva̱styā svā̍sti̱ mām
tayā̎ sva̱styā svā̍sti̱ mānā̍sāni |

prāṇa̍pānau mṛtyormā̍ pātam prāṇa̍pānau mā mā̍ hāsiṣṭam mayi̍ medhām mayi̍
prajām mayyagnistejo̍ dadhātu mayi̍ medhām mayi̍ prajām mayīndra̍ indriyam
da̍dhātu mayi̍ medhām mayi̍ prajām mayi sūryo bhrājo̍ dadhātu || 90 ||))

[[4-42-3]]

द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः।
तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी उत द्यौः।
कया नश्चित्र आभुवदूती सदावृधस्सखा।
कया शचिष्ठया वृता।
कस्त्वा सत्यो मदानां मꣳहिष्ठो मथ्सदन्धसः।
दृढा चिदारुजे वसु।
अभी षु णस्सखीनामविता जरितृणाम्।
शतं भवास्यूतिभिः।
वयस्सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान्॥ ९१॥

((dyubhiraktubhiḥ pari̍pātamasmānari̍ṣṭebhiraśvinā saubhā̍gebhiḥ |
tanno̍ mitro varu̍ṇo māmahantāmaditissindhu̍ḥ pṛthivī uta dyauḥ |
kayā̍ naścitra ābhu̍vadūtī sadāvṛ̍dhassakhā̍ |
kayā śaci̍ṣṭhayā vṛtā |
kastvā̍ satyo madā̍nām maꣳhi̍ṣṭho mathsadandha̍saḥ |
dṛḍhā ci̍dāruje vasu̍ |
abhī ṣu ṇassakhī̍nāmavitā ja̍ritṝṇām |
śatam bha̍vāsyūtibhiḥ |
vaya̍ssuparṇā upa̍sedurindram priyame̍dhā ṛṣa̍yo nādha̍mānāḥ |
apa̍ dhvāntamū̍rṇuhi pūrdhi cakṣu̍rmumugdhya̍smānnidhaye̍va baddhān || 91 ||))

[[4-42-4]]

शं नो देवीरभिष्टय आपो भवन्तु पीतये।
शं योरभिस्रवन्तु नः।
ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम्।
अपो याचामि भेषजम्।
सुमित्रा न आप ओषधयस्सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः।
आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन।
महे रणाय चक्षसे।
यो वश्शिवतमो रसस्तस्य भाजयतेह नः।

उ॒श॒तीरि॑व मा॒तरः॑।
तस्मा॒ अरं॑ गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ॥ ९२॥

((śaṃ no̍ de̱vīra̱bhiṣṭa̍ya̱ āpo̍ bhavantu pītaye̎ ।
śaṃ̱ yora̱bhisra̍vantu naḥ̱ ।
īśā̍nā̱ vārya̍ṇāṃ̱ kṣaya̍ntīścarṣa̱ṇī̱nām ।
a̱po ya̍cāmi bheṣa̱jam ।
su̱mi̱trā na̱ āpa̱ oṣa̍dhayassantu durmi̱trāstasmai̍ bhūyāsu̱ryo̎'smāndveṣṭi̱ yaṃ̱ ca̍
va̱yaṃ̱ dvi̱ṣmaḥ ।
āpo̱ hi ṣṭhā ma̍yo̱bhuva̱stā na̍ ū̱rje da̍dhātana ।
ma̱he ra̱ṇā̍ya̱ cakṣa̍se ।
yo va̍śśi̱vata̍mo̱ rasa̱stasya̍ bhājayate̱ha na̍ḥ ।
u̱śa̱tīri̍va mā̱tara̍ḥ ।
tasmā̱ ara̍ṃ gamāma vo̱ yasya̱ kṣayā̍ya̱ jinva̍tha ॥ 92 ॥))

[[4-42-5]]
आपो॑ ज॒नय॑था च नः।
पृ॒थि॒वी शा॒न्ता साऽग्निना॑ शा॒न्ता सा मे॑ शा॒न्ता शुचं॑ शमयतु।
अ॒न्तरि॑क्षꣳ शा॒न्तं तद्वा॒युना॑ शा॒न्तं तन्मे॑ शा॒न्तꣳ शुचं॑ शमयतु।
द्यौश्शा॒न्ता साऽऽदि॒त्येन॑ शा॒न्ता सा मे॑ शा॒न्ता शुचं॑ शमयतु।
पृ॒थि॒वी शान्ति॑र॒न्तरि॑क्ष॒ꣳ शान्ति॒र्द्यौः शान्ति॒र्दि॒शः शान्ति॑रवान्तरदि॒शाः शान्ति॑र॒ग्निः शान्ति॑र्वा॒युः
शान्ति॑रादि॒त्यः शान्ति॑श्च॒न्द्रमाः॒ शान्ति॒र्नक्ष॑त्राणि॒ शान्ति॒राप॒ः शान्ति॒रोष॑धय॒ः शान्ति॒र्वन॒स्पत॑य॒ः
शान्ति॒र्गौः शान्ति॑र॒जा शान्ति॒रश्वः॒ शान्तिः॒ पुरु॑ष॒ः शान्ति॒र्ब्रह्म॒ शान्ति॒र्ब्राह्मणः॒ शान्ति॒ः शान्ति॑रे॒व
शान्ति॒ः शान्ति॑र्मे अस्तु॒ शान्तिः॑।
तया॒हꣳ शा॒न्त्या स॑र्वशा॒न्त्या मह्यं॑ द्वि॒पदे॒ चतु॑ष्पदे॒ च॒ शान्तिं॑ करोमि॒ शान्ति॑र्मे अस्तु॒ शान्तिः॑।
एह॒ श्रीश्च॒ ह्रीश्च॒ धृति॑श्च॒ तपो॑ मे॒धा प्र॑ति॒ष्ठा श्र॒द्धा स॒त्यं धर्म॑श्चैतानि॒ मोत्ति॑ष्ठन्त॒मनू॒त्ति॑ष्ठन्तु॒ मा मा॒ꣳ
श्रीश्च॒ ह्रीश्च॒ धृति॑श्च॒ तपो॑ मे॒धा प्र॑ति॒ष्ठा श्र॒द्धा स॒त्यं धर्म॑श्चैतानि॒ मा॒ मा हा॑सिषुः।
उदायु॑षा स्वा॒युषोदोष॑धीना॒ꣳ रसे॒नोत्प॒र्जन्य॑स्य॒ शुष्मे॒णोद॑स्थाममृता॒ꣳ अनु॑।
तच्चक्षु॑र्दे॒वहि॑तं पु॒रस्ता॑च्छु॒क्रमु॒च्चर॑त्।
पश्ये॑म श॒रद॑श्श॒तं जीवे॑म श॒रद॑श्श॒तं नन्दा॑म श॒रद॑श्श॒तं मोदा॑म श॒रद॑श्श॒तं भवा॑म श॒रद॑श्श॒तꣳ
शृ॒णवा॑म श॒रद॑श्श॒तं प्रब्र॑वाम श॒रद॑श्श॒तमजी॑तास्स्याम श॒रद॑श्श॒तं ज्योक्च॒ सूर्यं॑ दृ॒शे॥ ९३॥

((āpo̍ ja̱naya̍thā ca naḥ ।
pṛ̱thi̱vī śā̱ntā sā'gninā̍ śā̱ntā sā me̍ śā̱ntā śucaṃ̍ śamayatu ।
a̱ntari̍kṣaṃ̍ śā̱ntaṃ tadvā̱yunā̍ śā̱ntaṃ tanme̍ śā̱ntaṃ̍ śucaṃ̍ śamayatu ।
dyauśśā̱ntā sā''di̱tyenā̍ śā̱ntā sā me̍ śā̱ntā śucaṃ̍ śamayatu ।
pṛ̱thi̱vī śānti̍ra̱ntari̍kṣa̱ṃ̍ śānti̱rdyauḥ śānti̱rdiśa̱ḥ śānti̍ravāntaradi̱śāḥ śānti̍ra̱gniḥ

śānti̍rvāyuḥ śānti̍rādi̱tyaḥ śānti̍śca̱ndramā̍ḥ śānti̱rnakṣatrā̍ṇi̱ śānti̱rāpa̱ḥ
śānti̱roṣa̍dhaya̱ḥ śānti̱rvana̱spata̍ya̱ḥ śānti̱rgauḥ śānti̍ra̱jā śānti̱raśva̱ḥ śānti̱ḥ
puru̍ṣa̱ḥ śānti̱rbrahma̱ śānti̍rbrāhma̱ṇaḥ śānti̱ḥ śānti̍re̱va śānti̱ḥ śānti̍rme astu̱ śānti̍ḥ
।
tayā̱haṃ śā̱ntyā sa̍rvaśā̱ntyā mahya̍ṃ dvi̱pade̱ catu̍ṣpade ca̱ śānti̍ṃ karomi̱ śānti̍rme
astu̱ śānti̍ḥ ।
eha̱ śrīśca̱ hrīśca̱ dhṛti̍śca̱ tapo̍ me̱dhā pra̍ti̱ṣṭhā śra̱ddhā sa̱tyaṃ dharma̍ścai̱tāni̱
motti̍ṣṭhanta̱manūtti̍ṣṭhantu̱ mā mā̱ṃ śrīśca̱ hrīśca̱ dhṛti̍śca̱ tapo̍ me̱dhā pra̍ti̱ṣṭhā
śra̱ddhā sa̱tyaṃ dharma̍ścai̱tāni̍ mā̱ mā hā̍siṣu̱ḥ ।
udāyu̍ṣā svā̱yuṣodo̍ṣadhīnā̱ṃ rase̱notpa̱rjanya̍sya śuṣme̱ṇodas̍thāma̱mṛtā̱ṃ anu̍ ।
taccakṣu̍rde̱vahi̍taṃ pu̱rastā̎cchu̱kramu̱ccara̍t ।
paśye̍ma śa̱rada̍śśa̱taṃ jīve̍ma śa̱rada̍śśa̱taṃ nanda̍ma śa̱rada̍śśa̱taṃ moda̍ma
śa̱rada̍śśa̱taṃ bhava̍ma śa̱rada̍śśa̱taṃ śṛ̱ṇava̍ma śa̱rada̍śśa̱taṃ prabra̍vāma
śa̱rada̍śśa̱tamaji̍tāssyāma śa̱rada̍śśa̱taṃ jyokca̱ sūrya̍ṃ dṛ̱śe ॥ 93 ॥))

[[4-42-6]]

य उद॑गान्मह॒तोऽर्णवा॑द्वि॒भ्राज॑मानस्सरि॒रस्य॒ मध्या॒थ्स मा॑ वृष॒भो लौहि॑ता॒क्षस्सूर्यो॑ वि॒पश्चि॒न्मन॑सा पुनातु।

ब्रह्म॑णश्श्चोत॑न्यसि ब्रह्म॑ण आ॒णी स्थो॒ ब्रह्म॑ण आ॒वप॑नमसि धारि॒तेयं॑ पृ॒थि॒वी ब्रह्म॑णा म॒ही धा॑रि॒तमे॑नेन म॒हद॒न्तरि॑क्षं दि॒वं॑ दाधार पृथि॒वीꣳ सदे॑वां॒ यद॒हं वेद॒ तद॒हं धा॑रयाणि॒ मा मद्वेदोऽधि॒ विस्र॑सत्।

मे॒धाम॒नी॒षे माऽऽवि॑शताꣳ स॒मीची॑ भू॒तस्य॒ भव्य॒स्याव॑रुद्ध्यै॒ सर्व॒मायु॑रयाणि॒ सर्व॒मायु॑रयाणि।

आ॒भिर्गी॒र्भिर्यद॒तो॑ न ऊ॒नमाप्या॑यय हरिवो॒ वर्ध॑मानः।

य॒दा स्तो॒तृभ्यो॒ महि॑ गो॒त्रा रु॒जासि॑ भूयि॒ष्ठभाजो॒ अध॑ ते स्याम।

ब्रह्म॒ प्रावा॑दिष्म॒ तन्नो॒ मा हा॑सीत्।

ओं शान्तिः॒ शान्तिः॒ शान्तिः॑॥ ९४॥

प॒रा॒वतो॑ दधातु ब॒द्धाञ्जि॒न्वथ दृ॒शे स॒प्त च॑॥ ४२॥

नमो॑ यु॒ञ्जते॒ वृष्णो॒ अश्व॑स्य ब्रह्म॑न्प्रव॒र्ग्ये॑ण ब्रह्म॑न्प्रच॑रिष्यामो॒ द॒श प्राचीरप॑श्यं॒ गो॒पां दे॒वस्यं॑ समु॒द्राये॒षे पी॑पिहि॒ घर्म॒ या ते॑ मही॒नां च॒त्वार्य॑स्का॒न्या पुरस्ता॒थ्स॒प्त स॒प्त प्रा॒णाय॒ त्रीणि॑ पू॒ष्णे च॒त्वार्यु॒दस्यैका॑द॒श यास्ते॑ स॒प्ताग्नि॒र्ध्रुवस्सी॒दैका॑न्न विꣳ॑शति॒र्भूरू॒र्ध्वस्त्रिꣳ॒ श॒द्धूम॑यि॒ षोड॑श॒ यास्ते॑ घो॒रा नव॒ स्त्रिक्का॒ष्टौ धु॒नि॑श्च॒ द्वे उ॒ग्रश्च॒ त्रीण्य॑होरा॒त्रे पञ्च॒ ख॒द्गी॒णि विगा॒स्स॒प्त॒द॒शा॒सृ॑न्मुख॒श्चत्वारि॒ य॒दे॒तद्वृ॒कसः॑ पञ्च॒ य॒दी॑षि॒तश्च॒त्वारि॒ दी॒र्घमु॒खि॒ त्रीणी॒त्था॒च॒त्वारि॒ य॒दे॒तद्भू॒ता॒नि॒ ष॒ड्भ॒सा॒यं॒ त्रीन्य॒त्रि॑णा॒ द॒शा॒ह॒राव॒द्य ब्रह्म॑णा॒ षट्थ्॒ ष॒डुत्तु॒दाष्टौ भूष्व॒दृ॒थि॒व्य॒ष्टष॒ष्टि॒र्श॒ं नस्स॒प्त॒प॒ञ्चा॒श॒द्वि॒च॒त्वा॒रिꣳ॒ शत्॥ ४२॥

नमो॑ वा॒चे ब्रह्म॑न्प्रव॒र्ग्यै॑ण॒ मयि॒ रुग॒न्तरि॑क्षेण पि॒ता नो॑ऽसि मही॒नामुप॑ नो॒
यदे॒तद्भूर्द्यु॒भिश्च॒तु॑रनवतिः ॥ ९४॥

((ya uda̍gānmaha̱to'rṇavā̎dvi̱bhrāja̍mānassari̱rasya̱ madhyā̱thsa ma̍ vṛ̱ṣa̱bho
lo̍hitā̱kṣassūryo̍ vipa̱ścinmana̍sā punātu |
brahma̍ṇa̱śścota̍nyasi̱ brahma̍ṇa ā̱ṇī stho̱ brahma̍ṇa ā̱vapa̍namasi dhāri̱teyaṃ pṛ̍thi̱vī
brahma̍ṇā ma̱hī dhā̍ri̱tame̍nena ma̱hada̱ntari̍kṣa̱m diva̍ṃ dādhāra pṛthi̱vīṃ̎ sade̍vā̱m
yada̱haṃ veda̱ tada̱haṃ dhā̍rayā̱ṇi̱ mā madvedo'dhi̱ visra̍sat |
me̱dhā̱ma̱nī̱ṣe mā''vi̍śatā̱ṃ̎ sa̱mīci̍ bhū̱tasya̱ bhavya̱syāva̍ruddhyai̱ sarva̱māyu̍rayā̱ṇi̱
sarva̱māyu̍rayā̱ṇi |
ā̱bhirgī̱rbhiryadato̍ na ū̱namāpyā̍yaya harivo̱ vardha̍mānaḥ |
ya̱dā sto̱tṛbhyo̱ mahi̍ go̱trā ru̱jāsi̍ bhūyiṣṭha̱bhājo̱ adha̍ te syāma |
brahma̱ prāva̍diṣma̱ tanno̱ mā hā̍sīt |
oṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ || 94 ||
para̱vato̍ dadhātu ba̱ddhāñjinva̍tha dṛ̱śe sa̱pta ca̍ || 42 ||

namo̍ yu̱ñjate̱ vṛ̱ṣṇo̱ aśva̍sya̱ brahma̍npravargye̍ṇa̱ brahma̱npracā̍riṣyāmo̱ daśa̱
prācī̱rapa̍śyaṃ go̱pāṃ de̱vasya̍ samu̱drāye̱ṣe pi̍pihi̱ gharma̱ yā te̍ mahi̱nāṃ
ca̱tvāryaskā̱nyā pu̱rastā̎thsapta sa̍pta prā̱ṇāya̱ trī̱ṇi̍ pū̱ṣṇe ca̱tvāryuda̱syaikā̍daśa̱
yāste̍ sa̱ptāgnirdhru̱vassī̱daikā̱nna viṃ̎śati̱rbhūrū̱rdhvastri̱ṃ̎ śadbhūrmayi̱ ṣoḍa̍śa̱
yāste̍ gho̱rā nava̱ snikcā̱ṣṭau dhuni̍śca̱ dve u̱graśca̱ trīṇyā̍horā̱tre pañca̱ khaṭṭrī̱ṇi̱
vigāssa̱ptada̱śāsṛ̱nmukhaśca̱tvāri̱ yade̱tadvṛ̍ka̱saḥ pañca̱ yadi̍ṣi̱taśca̱tvāri̱
dīrghā̍mukhi̱ trī̱ṇītthācca̱tvāri̱ yade̱tadbhū̱tāni̱ ṣaṭpra̱sārya̱ trīṇyatri̍ṇā̱
daśāha̱rāvā̍dya̱ brahma̍ṇā̱ ṣaṭth ṣa̱ḍuttu̍dā̱ṣṭau bhū̱ṣṣaṭpṛ̍thi̱vyā̍ṣṭa̱ṣā̍ṣṭi̱śśaṃ
na̍ssa̱ptapa̍ñcā̱śaddvica̍tvāri̱ṃ̎ śat || 42 ||
namo̍ vā̱ce brahma̍npravargye̍ṇa̱ mayi̱ ruga̱ntari̍kṣe̱ṇa pi̱tā no̍'si mahī̱nāmupa̍ no̱
yade̱tadbhūrdyu̱bhiśca̱tu̍ranavatiḥ || 94 ||))

[[4-0-0]]
नमोऽनु॑ मदन्तु।
ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

((namo'nu̍ madantu |
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ ||))

# Taittirīya-Āraṇyaka

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 5

[[5-0-0]]

शं न॒स्तन्नो॒ मा हा॑सीत्।

ओं शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

((śaṃ na̱stanno̱ mā hásīt ।
oṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ ॥))

[[5-1-1]]

दे॒वा वै स॒त्रमा॑सत।

ऋद्धि॑परिमित॒ं यश॑स्कामाः।

ते॓ऽब्रुवन्।

यन्नः॑ प्रथ॒मं यश॑ ऋ॒च्छात्।

सर्वे॑षां न॒स्तथ्स॒हास॒दिति॑।

तेषाꣳ॑ कुरुक्षे॒त्रं वेदि॑रासीत्।

तस्यै॑ खाण्ड॒वो द॑क्षिणा॒र्ध आ॑सीत्।

तूर्घ्न॑मुत्तरा॒र्धः।

प॒रीण॒ज्ज॑घना॒र्धः।

म॒रव॑ उत्क॒रः॥ १॥

((de̱vā vai sa̱tramásata ।
ṛddhi̍parimita̱ṃ yaśáskāmāḥ ।
tē̎'bruvan ।
yannáḥ pratha̱maṃ yaśá ṛ̱cchāt ।
sarve̍ṣāṃ na̱stathsa̱hāsa̱diti̍ ।
teṣāṃ̎ kurukṣe̱traṃ vedi̍rāsīt ।
tasyai̍ khāṇḍa̱vo dákṣiṇā̱rdha ásīt ।
tūrghnámuttarā̱rdhaḥ ।
pa̱rī̱ṇajjághanā̱rdhaḥ ।

ma̱ravá utka̱raḥ || 1 ||))

[[5-1-2]]

तेषा॑ꣳ म॒खं वै॑ष्ण॒वं याश॑ आर्च्छत्।

तन्न्य॑कामयत।

तेनापा॑क्रामत्।

तं दे॒वा अन्वा॑यन्न्।

यशो॑ऽव॒रुरु॑थ्समानाः।

तस्या॒न्वाग॑तस्य।

स॒व्याद्धनु॒रजा॑यत।

दक्षि॑णा॒दिष॑वः।

तस्मा॑दिषुध॒न्वं पुण्य॑जन्म।

य॒ज्ञज॑न्मा॒ हि॥ २॥

((teṣāꣳ ma̱khaṃ vaiṣṇa̱vaṃ yāśá ārcchat |
tannyákāmayata |
tenāpākrāmat |
taṃ de̱vā anváyann |
yaśó'va̱rurúthsamānāḥ |
tasyā̱nvāgátasya |
sa̱vyāddhanu̱rajáyata |
dakṣiṇā̱diṣávaḥ |
tasmádiṣudha̱nvaṃ puṇyájanma |
ya̱jñajánmā̱ hi || 2 ||))

[[5-1-3]]

तमेक॒ꣳ सन्त॑म्।

ब॒ह॒वो॒ नाभ्य॑धृष्णुवन्न्।

तस्मा॒देक॑मिषुध॒न्विन॑म्।

ब॒ह॒वो॑ऽनिषु॒धन्वा नाभिधृ॑ष्णुवन्ति।

सो॑ऽस्मयत।

एकं॑ मा॒ सन्तं॑ ब॒ह॒वो॒ नाभ्य॑धर्षिषु॒रिति॑।

तस्य॑ सिष्मिया॒णस्य॒ तेजो॑ऽपा॑क्रामत्।

तद्दे॒वा ओष॑धीषु॒ न्य॑मृजुः।

ते श्या॒माका॑ अभवन्न्।

स्म॒याका॒ वै नाम॒ैते॥ ३॥

((tamekam̐ santam |
bahavo nābhyadhr̥ṣṇuvann |
tasmādekamiṣudhanvinam |
bahavo'niṣudhanvā nābhidhr̥ṣṇuvanti |
so'smayata |
ekaṁ mā santaṁ bahavo nābhyadharṣiṣuriti |
tasya siṣmiyāṇasya tejo'pākrāmat |
taddevā oṣadhīṣu nyamr̥juḥ |
te śyāmākā abhavann |
smayākā vai nāmaite || 3 ||))

[[5-1-4]]

तथ्स्म॒याका॑नाꣳ स्मयाक॒त्वम्।
तस्मा॑ द्दीक्षि॒तेना॑पि॒गृह्य॑ स्मेत॒व्य॑म्।
तेज॑सो॒ धृत्यै॑।
स धनु॑ः प्रति॒ष्कभ्या॑तिष्ठत्।
ता उ॑प॒दीका॑ अब्रुव॒न्वरं॑ वृणामहै।
अथ॑ व इ॒मꣳ र॑न्धयाम।
यत्र॒ क्व॑ च॒ खना॑म।
तद॒पो॑ऽभितृ॒णदा॒मेति॑।
तस्मा॑दुप॒दीका॒ यत्र॒ क्व॑ च॒ खन॑न्ति।
तद॒पो॑ऽभितृ॒न्दन्ति॥ ४॥

((tathsmayākānām̐ smayākatvam |
tasmā ddīkṣitenāpigr̥hya smetavyam |
tejaso dhr̥tyai |
sa dhanuḥ pratiṣkabhyātiṣṭhat |
tā upadīkā abruvanvaraṁ vr̥ṇāmahai |
atha va imam̐ randhayāma |
yatra kva ca khanāma |
tadapo'bhitr̥ṇadāmeti |
tasmādupadīkā yatra kva ca khananti |
tadapo'bhitr̥ndanti || 4 ||))

[[5-1-5]]

वारे॑ वृत॒ꣳ ह्या॑साम्।
तस्य॒ ज्याम॒प्या॑ऽदन्न्।

तस्य॒ धनु॑र्वि॒प्रव॑माण॒ꣳ॒ शिर॒ उद॑वर्तयत्।
तद्द्यावा॑पृथि॒वी अ॒नुप्राव॑र्तत।
यत्प्राव॑र्तत।
तत्प्र॑व॒र्ग्य॑स्य प्रवर्ग्य॒त्वम्।
यद्घ्राꣳ॒ ४ इत्यप॑तत्।
तद्घ॒र्मस्य॑ घर्म॒त्वम्।
म॒ह॒तो वी॒र्य॑मपप्त॒दिति॑।
तन्म॑हावी॒रस्य॑ महावी॒र॒त्वम्॥ ५॥

((vāre̍ vṛta̱m̐ hya̍sām ।
tasya̱ jyāmapya̍'dann ।
tasya̱ dhanu̍rvi̱prava̍māṇa̱m̐ śira̱ uda̍vartayat ।
taddyāva̍pṛthi̱vī anu̱prāva̍rtata ।
yatprāva̍rtata ।
tatpra̍va̱rgya̍sya pravargya̱tvam ।
yadghrām̐ 4 ityapa̍tat ।
tadgha̱rmasya̍ gharma̱tvam ।
ma̱ha̱to vī̱rya̍mapapta̱diti̍ ।
tanma̍hāvī̱rasya̍ mahāvīra̱tvam ॥ 5 ॥))

[[5-1-6]]
यद॒स्यास्स॒मभ॑रन्न्।
तथ्स॒म्राज्ञ॑स्सम्रा॒ड्त्वम्।
तꣳ॒ स्तृ॒तं दे॒वता॑स्त्रे॒धा व्य॑गृह्णत।
अ॒ग्निः प्रा॑तस्सव॒नम्।
इन्द्रो॒ माध्य॑न्दिन॒ꣳ॒ सव॑नम्।
विश्वे॑ दे॒वास्तृ॑तीयसव॒नम्।
तेनाप॑शिर्ष्णा य॒ज्ञेन॒ यज॑मानाः।
नाशिषो॒ऽवारु॑न्धत।
न सु॑व॒र्गं लो॒कम॒भ्य॑जयन्न्।
ते दे॒वा अ॒श्विना॑वब्रुवन्न्॥ ६॥

((yada̱syāssa̱mabha̍rann ।
tathsa̱mrājña̍ssamrā̱ṭṭvam ।
ta̱m̐ stṛ̱taṃ de̱vata̍stre̱dhā vya̍gṛhṇata ।
a̱gniḥ prā̍tassava̱nam ।
indro̱ mādhya̍ndina̱m̐ sava̍nam ।

viśve devāstṛtīyasavanam |
tenāpaśirṣṇā yajñena yajamānāḥ |
nāśiṣo'vārundhata |
na suvargaṃ lokamabhyajayann |
te devā aśvināvabruvann || 6 ||))

[[5-1-7]]
भिषजौ वै स्थः।
इदं यज्ञस्य शिरः प्रतिधत्तमिति।
तावब्रूतां वरं वृणावहै।
ग्रह एव नावत्रापि गृह्यतामिति।
ताभ्यामेतमाश्विनमगृह्णन्न्।
तावेतद्यज्ञस्य शिरः प्रत्यधत्ताम्।
यत्प्रवर्ग्यः।
तेन सशीर्ष्णा यज्ञेन यजमानाः।
अवाशिषोऽरुन्धत।
अभि सुवर्गं लोकमजयन्न्।
यत्प्रवर्ग्यं प्रवृणक्ति।
यज्ञस्यैव तच्छिरः प्रतिदधाति।
तेन सशीर्ष्णा यज्ञेन यजमानः।
अवाशिषो रुन्धे।
अभि सुवर्गं लोकं जयति।
तस्मादेष आश्विनप्रवया इव।
यत्प्रवर्ग्यः॥ ७॥
उत्करो ह्येते तृन्दन्ति महावीरत्वमब्रुवन्नजयन्थ्सप्त च॥ १॥

((bhiṣajau vai sthaḥ |
idaṃ yajñasya śiraḥ pratidhattamiti |
tāvabrūtāṃ varaṃ vṛṇāvahai |
graha eva nāvatrāpi gṛhyatāmiti |
tābhyāmetamāśvinamagṛhṇann |
tāvetadyajñasya śiraḥ pratyadhattām |
yatpravargyaḥ |
tena saśīrṣṇā yajñena yajamānāḥ |
avāśiṣo'rundhata |
abhi suvargaṃ lokamajayann |
yatpravargyaṃ pravṛṇakti |

yajñasyaiva tacchiraḥ pratidadhāti |
tena saśīrṣṇā yajñena yajamānaḥ |
avāśiṣo rundhe |
abhi suvargaṃ lokaṃ jayati |
tasmādeṣa āśvinapravayā iva |
yatpravargyaḥ || 7 ||
utkaro hyete tṛndanti mahāvīratvamabruvannajayanthsapta ca || 1 ||))

[[5-2-1]]

सावित्रं जुहोति प्रसूत्यै।
चतुर्गृहीतेन जुहोति।
चतुष्पादः पशवः।
पशूनेवावरुन्धे।
चतस्रो दिशः।
दिक्ष्वेव प्रतितिष्ठति।
छन्दाꣳसि देवेभ्योऽपाक्रामन्न्।
न वो भागानि हव्यं वक्ष्याम इति।
तेभ्य एतच्चतुर्गृहीतमधारयन्न्।
पुरोनुवाक्यायै याज्यायै॥ ८॥

((sāvitraṃ juhoti prasūtyai |
caturgṛhītena juhoti |
catuṣpādaḥ paśavaḥ |
paśūnevāvarundhe |
catasro diśaḥ |
dikṣveva pratitiṣṭhati |
chandāṃsi devebhyo'pākrāmann |
na vo bhāgāni havyaṃ vakṣyāma iti |
tebhya etaccaturgṛhītamadhārayann |
puronuvākyāyai yājyāyai || 8 ||))

[[5-2-2]]

देवतायै वषट्काराय।
यच्चतुर्गृहीतं जुहोति।
छन्दाꣳस्येव तत्प्रीणाति।
तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति।
ब्रह्मवादिनो वदन्ति।
होतव्यं दीक्षितस्य गृहा ३ इ न होतव्या ३ मिति।

ह॒विर्वै दी॑क्षि॒तः।
यज्जु॑हु॒यात्।
ह॒विष्कृ॑त॒ं यज॑मानम॒ग्नौ प्रद॑ध्यात्।
यन्न जु॑हु॒यात्॥ ९॥

((de̱vatá̍yai vaṣa̱ṭkā̱rāyá̍ |
yaccá̍turgṛ̱hī̱taṃ ju̱hoti̍ |
chandā̠ṁ̐syeva tatprī̍ṇāti |
tānyá̍sya prī̱tāni̍ de̱vebhyó̍ ha̱vyaṃ vá̍hanti |
bra̱hma̱vā̱dinó̍ vadanti |
ho̱ta̱vyaṃ̍ dīkṣi̱tasyá̍ gṛ̱hā 3 i na hó̍ta̱vyā 3 miti̍ |
ha̱virvai dī̎kṣi̱taḥ |
yajjú̍hu̱yāt |
ha̱viṣkṛ̍ta̱ṃ yajá̍mānama̱gnau pradá̍dhyāt |
yanna jú̍hu̱yāt || 9 ||))

[[5-2-3]]
य॒ज्ञ॒प॒रु॒र॒न्तरि॑यात्।
यजु॑रे॒व व॑देत्।
न ह॒विष्कृ॑त॒ं यज॑मानम॒ग्नौ प्र॒दधा॑ति।
न य॑ज्ञप॒रुर॒न्तरे॑ति।
गा॒य॒त्री छन्दा॒ꣳस्यत्य॑मन्यत।
तस्यै॑ वषट्का॒रो॑ऽभ्यय्य॒ शिरो॑ऽच्छिनत्।
तस्यै॑ द्वे॒धा रस॒ः परा॑पतत्।
पृ॒थि॒वीम॒र्धः प्रावि॑शत्।
प॒शून॒र्धः।
यः पृ॑थि॒वीं प्रावि॑शत्॥ १०॥

((ya̱jña̱pa̱ru̱ra̱ntari̍yāt |
yajú̍re̱va vá̍det |
na ha̱viṣkṛ̍ta̱ṃ yajá̍mānama̱gnau pra̱dadhā̍ti |
na yá̍jñapa̱ru̱rantaré̍ti |
gā̱ya̱trī chandā̠ṁ̐syatyá̍manyata |
tasyai̍ vaṣa̱ṭkā̱rö'bhyayya̱ śirö'cchinat |
tasyai̎ dve̱dhā rasa̱ḥ parā̍patat |
pṛ̱thi̱vīma̱rdhaḥ prāvi̍śat |
pa̱śūna̱rdhaḥ |
yaḥ pṛ̍thi̱vīṃ prāvi̍śat || 10 ||))

[[5-2-4]]

स खदिरोऽभवत्।

यः पशून्।

सोऽजाम्।

यत्खादिर्यभ्रिर्भवति।

छन्दसामेव रसेन यज्ञस्य शिरस्सम्भरति।

यदौदुम्बरी।

ऊर्ग्वा उदुम्बरः।

ऊर्जैव यज्ञस्य शिरस्सम्भरति।

यद्वैणवी।

तेजो वै वेणुः॥ ११॥

((sa khádiró'bhavat |
yaḥ paśūn |
só'jām |
yatkhādiryabhrirbhavati |
chandásāmeva raséna yajñasya śirassambhárati |
yadaudúmbarī |
ūrgvā údumbaráḥ |
ūrjaiva yajñasya śirassambhárati |
yadvaiṇavī |
tejo vai veṇúḥ || 11 ||))

[[5-2-5]]

तेजसैव यज्ञस्य शिरस्सम्भरति।

यद्वैकङ्कती।

भा एवावरुन्धे।

देवस्य त्वा सवितुः प्रसव इत्यभ्रिमादत्ते प्रसूत्यै।

अश्विनोर्बाहुभ्यामित्याह।

अश्विनौ हि देवानामध्वर्यू आस्ताम्।

पूष्णो हस्ताभ्यामित्याह यत्यै।

वज्र इव वा एषा।

यदभ्रिः।

अभ्रिरसि नारिरसीत्याह शान्त्यै॥ १२॥

((teja̍sa̱iva ya̱jñasya̱ śira̱ssambha̍rati |
yadvaika̍ṅkatī |
bhā e̱vāva̍rundhe |
de̱vasya̍ tvā savi̱tuḥ pra̍sa̱va ityabhri̱māda̍tte̱ prasū̎tyai |
a̱śvino̎rbā̱hubhyā̱mitya̍ha |
a̱śvinau̱ hi de̱vānā̍madhva̱ryū āstā̎m |
pū̱ṣṇo hastā̎bhyā̱mitya̍ha̱ yatyai̎ |
vajra̍ iva̱ vā e̱ṣā |
yadabhri̍ḥ |
abhri̍rasi̱ nāri̍ra̱sītya̍ha̱ śāntyai̎ || 12 ||))

[[5-2-6]]

अ॒ध्व॒र॒कृद्दे॒वेभ्य॒ इत्या॑ह।
य॒ज्ञो वा अ॑ध्व॒रः।
य॒ज्ञ॒कृद्दे॒वेभ्य॒ इति॒ वावैतदा॑ह।
उत्ति॑ष्ठ ब्रह्मणस्पत॒ इत्या॑ह।
ब्रह्म॑णै॒व य॒ज्ञस्य॒ शिरोऽच्छै॑ति।
प्रैतु॒ ब्रह्म॑ण॒स्पति॒रित्या॑ह।
प्रे॒त्यै॒व य॒ज्ञस्य॒ शिरोऽच्छै॑ति।
प्र॒दे॒व्ये॑तु सू॒नृतेत्या॑ह।
य॒ज्ञो वै सू॒नृता᳚।
अच्छा॑ वी॒रं नर्यं॑ प॒ङ्क्तिरा॑धस॒मित्या॑ह॥ १३॥

((a̱dhva̱ra̱kṛdde̱vebhya̱ itya̍ha |
ya̱jño vā a̍dhva̱raḥ |
ya̱jña̱kṛdde̱vebhya̱ iti̱ vāvaitada̍ha |
utti̍ṣṭha brahmaṇaspata̱ itya̍ha |
brahma̍ṇa̱iva ya̱jñasya̱ śiro'ccha̍iti |
praitu̱ brahma̍ṇa̱spati̱ritya̍ha |
pretya̱iva ya̱jñasya̱ śiro'ccha̍iti |
prade̱vye̍tu sū̱nṛtetya̍ha |
ya̱jño vai sū̱nṛtā̎ |
accha̍ vī̱raṃ narya̍ṃ pa̱ṅktirādhasa̱mitya̍ha || 13 ||))

[[5-2-7]]

पाङ्क्तो॒ हि य॒ज्ञः।
दे॒वा य॒ज्ञं न॑यन्तु न॒ इत्या॑ह।
दे॒वाने॒व य॑ज्ञ॒निय॑ः कुरुते।
देवी᳚ द्यावापृथिवी॒ अनु॑ मेऽमꣳसाथा॒मित्या॑ह।

आ॒भ्यामे॒वानु॑मतो य॒ज्ञस्य॒ शिर॒स्सम्भ॑रति।
ऋ॒ध्यास॑म॒द्य म॒खस्य॒ शिर॒ इत्या॑ह।
य॒ज्ञो वै म॒खः।
ऋ॒ध्यास॑म॒द्य य॒ज्ञस्य॒ शिर॒ इति॒ वावैतदा॑ह।
म॒खाय॑ त्वा म॒खस्य॑ त्वा शी॒र्ष्ण इत्या॑ह।
नि॒र्दिश्यै॒वैन॑द्धरति॥ १४॥

((pāṅktọ hi yạjñaḥ |
dẹvā yạjñaṃ náyantu nạ ityá̍ha |
dẹvānẹva yájñạniyáḥ kurute |
devī̎ dyāvāpṛthivī̱ anú me'maṁsāthā̱mityá̍ha |
ā̱bhyāmẹvānúmato yạjñasyạ śirassambhárati |
ṛ̱dhyāsámạdya mạkhasyạ śirạ ityá̍ha |
yạjño vai mạkhaḥ |
ṛ̱dhyāsámạdya yạjñasyạ śirạ itị vāvaitadá̍ha |
mạkhāyá tvā mạkhasyá tvā śī̱rṣṇa ityá̍ha |
nịrdiśyaịvainádḍharati || 14 ||))

[[5-2-8]]
त्रिर्ह॑रति।
त्रय॑ इ॒मे लो॒काः।
ए॒भ्य ए॒व लो॒केभ्यो॑ य॒ज्ञस्य॒ शिर॒स्सम्भ॑रति।
तू॒ष्णीं च॑तु॒र्थꣳ ह॑रति।
अप॑रिमितादे॒व य॒ज्ञस्य॒ शिर॒स्सम्भ॑रति।
मृ॒त्ख॒नाद॒ग्रे॑ हरति।
तस्मा᳚न्मृत्ख॒नः क॑रु॒ण्य॑तमः।
इ॒यत्य॒ग्र॑ आसी॒रित्या॑ह।
अ॒स्यामे॒वाछ॑म्बट्कारं य॒ज्ञस्य॒ शिर॒स्सम्भ॑रति।
ऊर्जं॒ वा ए॒तꣳ रसं॑ पृथि॒व्या उ॑प॒दीका॒ उद्दि॑हन्ति॥ १५॥

((trirhárati |
trayá ịme lọkāḥ |
ẹbhya ẹva lọkebhyó yạjñasyạ śirạssambhárati |
tū̱ṣṇīṃ cátụrthaṁ hárati |
apárimitādẹva yạjñasyạ śirạssambhárati |
mṛ̱tkhạnādagré harati |
tasmā̎nmṛtkhạnaḥ kárụṇyátamaḥ |
iyạtyagrá āsī̱rityá̍ha |

a̱syāmeṟvāchaˈmbaṭkāraṃ yaˌjñasyaˌ śiraˌssambhaˈrati |
ūrjaṃˌ vā eṯtaṁ̐ rasaṃˈ pṛthiˌvyā uˈpaˌdīkāˌ uddiˈhanti || 15 ||))

[[5-2-9]]

यद्व॒ल्मीक॑म्।
यद्व॑ल्मीकव॒पा स॑म्भा॒रो भव॑ति।
ऊर्ज॑मे॒व रसं॑ पृथि॒व्या अव॑रुन्धे।
अथो॒ श्रोत्र॑मे॒व।
श्रोत्र॒ꣳ॒ ह्ये॑तत्पृ॑थि॒व्याः।
यद्व॒ल्मीकः॑।
अब॑धिरो भवति।
य ए॒वं वेद॑।
इन्द्रो॑ वृ॒त्राय॒ वज्र॒मुद॑यच्छत्।
स यत्र॑ यत्र प॒राक्र॑मत॥ १६॥

((yadvaˌlmīkaˈm |
yadvaˈlmīkavaˌpā saˈmbhāˌro bhavaˈti |
ūrjaˈmeˌva rasaṃˈ pṛthiˌvyā avaˈrundhe |
athoˌ śrotraˈmeˌva |
śrotraˌm̐ hyeˈtatpṛˈthiˌvyāḥ |
yadvaˌlmīkaˈḥ |
abaˈdhiro bhavati |
ya eˌvaṃ vedaˈ |
indroˈ vṛˌtrāyaˌ vajraˌmudaˈyacchat |
sa yatraˈ yatra paˌrākraˈmata || 16 ||))

[[5-2-10]]

तन्नाद्ध्रि॑यत।
स पू॑तीकस्त॒म्बे परा॑क्रमत।
सो॑ऽद्ध्रियत।
सो॑ऽब्रवीत्।
ऊ॒तिं वै मे॑ धा॒ इति॑।
तदू॒तीका॑नामूतीक॒त्वम्।
यदू॒तीका॒ भव॑न्ति।
य॒ज्ञायै॒वोतिं॑ द॑धाति।
अ॒ग्निजा अ॑सि प्र॒जाप॑ते॒ रेत॒ इत्या॑ह।

य एव रसः पशून्प्राविशत्॥ १७॥

((tannāddhriyata ।
sa pūtīkastambe parākramata ।
so'ddhriyata ।
so'bravīt ।
ūtiṃ vai me dhā iti ।
tadūtīkanāmūtīkatvam ।
yadūtīkā bhavanti ।
yajñāyaivotiṃ dadhati ।
agnijā asi prajāpate reta ityāha ।
ya eva rasaḥ paśūnprāviśat ॥ 17 ॥))

[[5-2-11]]
तमेवावरुन्धे।
पञ्चैते सम्भारा भवन्ति।
पाङ्क्तो यज्ञः।
यावानेव यज्ञः।
तस्य शिरस्सम्भरति।
यद्ग्राम्याणां पशूनां चर्मणा सम्भरेत्।
ग्राम्यान्पशूञ्छुचाऽर्पयेत्।
कृष्णाजिनेन सम्भरति।
आरण्यानेव पशूञ्छुचाऽर्पयति।
तस्माथ्समावत्पशूनां प्रजायमानानाम्॥ १८॥

((tamevāvarundhe ।
pañcaite sambhārā bhavanti ।
pāṅkto yajñaḥ ।
yāvāneva yajñaḥ ।
tasya śirassambharati ।
yadgrāmyāṇāṃ paśūnāṃ carmaṇā sambharet ।
grāmyānpaśūñchucā'rpayet ।
kṛṣṇājinena sambharati ।
āraṇyāneva paśūñchucā'rpayati ।
tasmāthsamāvatpaśūnāṃ prajāyamānānām ॥ 18 ॥))

[[5-2-12]]
आरण्याः पशवः कनीयाꣳसः।
शुचा ह्यृताः।

लो॒म॒तस्सम्भ॑रति।

अतो॒ ह्य॑स्य॒ मेध्य᳚म्।

प॒रि॒गृह्याय॑न्ति।

रक्ष॑सा॒मप॑हत्यै।

ब॒हवो॑ हर॑न्ति।

अप॑चितिमे॒वास्मि॑न्दधति।

उद्ध॑ते॒ सिक॑तोपोप्ते॒ परि॑श्रिते॒ निद॑धति॒ शान्त्यै᳚।

मद॑न्तीभि॒रुप॑सृजति॥ १९॥

((ā̱ra̱ṇyāḥ pa̱śava̱ḥ kaníyām̐saḥ |
śu̱cā hyṛ́tāḥ |
lo̱ma̱tassambhárati |
ato̱ hyásya̱ medhyá̍m |
pa̱ri̱gṛhyāyánti |
rakṣásā̱mapáhatyai |
ba̱havó haranti |
apácitime̱vāsmíndadhati |
uddháte̱ sikátopopte̱ pariśrite̱ nidádhati̱ śāntyaí |
madántībhi̱rupásṛjati || 19 ||))

[[5-2-13]]

तेज॑ ए॒वास्मि॑न्दधाति।

मधु॑ त्वा मधु॒ला क॑रो॒त्वित्या॑ह।

ब्रह्म॑णैवास्मि॒न्तेजो॑ दधाति।

यद्ग्रा॒म्याणं॒ पात्रा॑णां क॒पालै᳚स्सꣳसृ॒जेत्।

ग्रा॒म्याणि॒ पात्रा॑णि शु॒चाऽर्प᳚येत्।

अ॒र्म॒क॒पा॒लैस्सꣳसृ॑जति।

ए॒तानि॒ वा अ॑नुपजीवनी॒यानि॑।

तान्येव शु॒चाऽर्प᳚यति।

शर्क॑राभि॒स्सꣳसृ॑जति॒ धृत्यै᳚।

अथो॑ श॒न्त्वाय॑।

अ॒ज॒लो॒मैस्सꣳसृ॑जति।

ए॒षा वा अ॒ग्नेः प्रि॒या त॒नूः।

यद॒जा।

प्रि॒ययै॒वैनं॑ त॒नुवा॒ सꣳसृ॑जति।

अथो॒ तेज॑सा।

कृ॒ष्णा॒जि॒नस्य॒ लोम॑भि॒स्सꣳसृ॑जति।

य॒ज्ञो वै कृ॑ष्णाजि॒नम्।

य॒ज्ञेनै॒व य॒ज्ञꣳ सꣳसृ॑जति॥ २०॥

या॒ज्या॑यै॒ न जु॑हु॒यादवि॑श॒द्वेणु॒श्शान्त्यै॑ प॒ङ्क्तिरा॑धस॒मित्या॑ह हरति दिहन्ति

प॒राक्र॑म॒तावि॑शत्प्र॒जाय॑मानानाꣳ सृजति श॒न्त्वाया॒ष्टौ च॑॥ २॥

((teja̍ e̱vāsmi̍ndadhāti |
madhu̍ tvā madhu̱lā ka̍ro̱tvityā̍ha |
brahma̍ṇai̱vāsmi̱ntejo̍ dadhāti |
yadgrā̱myāṇa̱ṃ pātrā̍ṇāṃ ka̱pālai̎ssam̐sṛ̱jet |
grā̱myāṇi̱ pātrā̍ṇi śu̱cā'rpa̍yet |
a̱rma̱ka̱pā̱laissam̐sṛ̍jati |
e̱tāni̱ vā a̍nupajīvanī̱yāni̍ |
tānye̱va śu̱cā'rpa̍yati |
śarka̍rābhi̱ssam̐sṛ̍jati̱ dhṛtyai̎ |
atho̍ śa̱ntvāya̍ |
a̱ja̱lo̱maissam̐sṛ̍jati |
e̱ṣā vā a̱gneḥ pri̱yā ta̱nūḥ |
yada̱jā |
pri̱yayai̱vainam̍ ta̱nuvā̱ sam̐sṛ̍jati |
atho̱ teja̍sā |
kṛ̱ṣṇā̱ji̱nasya̱ loma̍bhi̱ssam̐sṛ̍jati |
ya̱jño vai kṛ̍ṣṇāji̱nam |
ya̱jñenai̱va ya̱jñam̐ sam̐sṛ̍jati || 20 ||
yā̱jyā̍yai̱ na ju̍hu̱yādavi̍śa̱dveṇu̱śśāntyai̍ pa̱ṅktirā̍dhasa̱mityā̍ha harati dihanti
pa̱rākra̍ma̱tāvi̍śatpra̱jāya̍mānānām̐ sṛjati śa̱ntvāyā̱ṣṭau ca̍ || 2 ||))

[[5-3-1]]

परि॑श्रिते करोति।

ब्र॒ह्म॒व॒र्च॒सस्य॒ परि॑गृहीत्यै।

न कु॒र्वन्न॒भिप्रा᳚ण्यात्।

यत्कु॒र्वन्न॑भिप्रा॒ण्यात्।

प्रा॒णाञ्छु॒चाऽर्प᳚येत्।

अ॒प॒हा॒य॒ प्राणि॑ति।

प्रा॒णानां᳚ गोपी॒थाय॑।

न प्र॑व॒र्ग्यं᳚ चादि॒त्यं चा॒न्तरे॑यात्।

यदन्तरेयात्।
दुश्चर्मा स्यात्॥ २१॥

((pariśrite karoti |
brahmavarcasasya parigṛhītyai |
na kurvannabhiprāṇyāt |
yatkurvannabhiprāṇyāt |
prāṇāñchucā'rpayet |
apahāya prāṇiti |
prāṇānām gopīthāya |
na pravargyaṃ cādityaṃ cāntareyāt |
yadantareyāt |
duścarmā syāt || 21 ||))

[[5-3-2]]
तस्मान्नान्तराय्यम्।
आत्मनो गोपीथाय।
वेणुना करोति।
तेजो वै वेणुः।
तेजः प्रवर्ग्यः।
तेजसैव तेजस्समर्धयति।
मखस्य शिरोऽसीत्याह।
यज्ञो वै मखः।
तस्यैतच्छिरः।
यत्प्रवर्ग्यः॥ २२॥

((tasmānnāntarāyyam |
ātmano gopīthāya |
veṇunā karoti |
tejo vai veṇuḥ |
tejaḥ pravargyaḥ |
tejasaiva tejassamardhayati |
makhasya śiro'sītyāha |
yajño vai makhaḥ |
tasyaitacchiraḥ |
yatpravargyaḥ || 22 ||))

[[5-3-3]]
तस्मादेवमाह।

य॒ज्ञस्य॑ प॒दे स्थ॒ इत्या॑ह।
य॒ज्ञस्य॒ ह्ये॑ते प॒दे।
अथो॒ प्रति॑ष्ठित्यै।
गा॒य॒त्रेण॑ त्वा॒ छन्द॑सा क॒रोमीत्या॑ह।
छन्दो॑भिरे॒वैनं॑ करोति।
त्र्यु॑द्धिं करोति।
त्रय॑ इ॒मे लो॒काः।
ए॒षां लो॒काना॒माप्त्यै॑।
छन्दो॑भिः करोति॥ २३॥

((tasmā̍de̱vamā̍ha |
ya̱jñasya̍ pa̱de stha̱ ityā̍ha |
ya̱jñasya̱ hye̍te pa̱de |
atho̱ prati̍ṣṭhityai |
gā̱ya̱treṇa̍ tvā̱ chanda̍sā karo̱mītyā̍ha |
chando̍bhire̱vainaṁ̍ karoti |
tryu̍ddhiṁ karoti |
traya̍ i̱me lo̱kāḥ |
e̱ṣāṁ lo̱kānā̱māptyai̎ |
chando̍bhiḥ karoti || 23 ||))

[[5-3-4]]
वी॒र्यं॑ वै छन्दा॑ꣳसि।
वी॒र्ये॑णै॒वैनं॑ करोति।
यजु॑षा॒ बिलं॑ करोति॒ व्यावृ॑त्त्यै।
इय॑न्तं करोति।
प्र॒जाप॑तिना यज्ञमु॒खे॒न॒ संमि॑तम्।
इय॑न्तं करोति।
य॒ज्ञ॒प॒रु॒षा॒ संमि॑तम्।
इय॑न्तं करोति।
ए॒ता॒वद्वै पुरु॑षे वी॒र्य॑म्।
वी॒र्य॑संमितम्॥ २४॥

((vī̱ryaṁ̍ vai chandā̍ṁsi |
vī̱rye̍ṇa̱ivainaṁ̍ karoti |
yaju̍ṣā̱ bilaṁ̍ karoti̱ vyāvṛ̍ttyai |

iyantaṃ karoti ।
prajāpatinā yajñamukhena sammitam ।
iyantaṃ karoti ।
yajñaparuṣā sammitam ।
iyantaṃ karoti ।
etāvadvai puruṣe vīryam ।
vīryasammitam ॥ 24 ॥))

[[5-3-5]]

अपरिमितं करोति।

अपरिमितस्यावरुद्ध्यै।

परिग्रीवं करोति धृत्यै।

सूर्यस्य हरसा श्रायेत्याह।

यथा यजुरेवैतत्।

अश्वशकेन धूपयति।

प्राजापत्यो वा अश्वस्सयोनित्वाय।

वृष्णो अश्वस्य निष्पदसीत्याह।

असौ वा आदित्यो वृषाश्वः।

तस्य छन्दांसि निष्पत्॥ २५॥

((aparimitaṃ karoti ।
aparimitasyāvaruddhyai ।
parigrīvaṃ karoti dhṛtyai ।
sūryasya harasā śrāyetyāha ।
yathā yajurevaitat ।
aśvaśakena dhūpayati ।
prājāpatyo vā aśvassayonitvāya ।
vṛṣṇo aśvasya niṣpadasītyāha ।
asau vā ādityo vṛṣāśvaḥ ।
tasya chandāṃsi niṣpat ॥ 25 ॥))

[[5-3-6]]

छन्दोभिरेवैनं धूपयति।

अर्चिषे त्वा शोचिषे त्वेत्याह।

तेज एवास्मिन्दधाति।

वारुणोऽभीद्धः।

मैत्रियोपैति शान्त्यै।

सिद्ध्यै त्वेत्याह।

यथा यजुरेवैतत्।
देवस्त्वा सवितोद्वपत्वित्याह।
सवितृप्रसूत एवैनं ब्रह्मणा देवताभिरुद्वपति।
अपद्यमानः पृथिव्यामाशा दिश आपृणेत्याह॥ २६॥

((chandóbhirevainam dhūpayati |
arciṣe tvā śociṣe tvetyáha |
teja evāsmindadhāti |
vāruṇó'bhīddháḥ |
maitriyopaiti śāntyai |
siddhyai tvetyáha |
yathā yajurevaitat |
devastvá savitodvápatvityáha |
savitṛprásūta evainam brahmáṇā devatábhirudvápati |
apádyamānaḥ pṛthivyāmāśā diśa āpṛṇetyáha || 26 ||))

[[5-3-7]]
तस्माद्ग्निस्सर्वा दिशोऽनुविभाति।
उत्तिष्ठ बृहन्भवोर्ध्वस्तिष्ठ ध्रुवस्त्वमित्याह प्रतिष्ठित्यै।
ईश्वरो वा एशोऽन्धो भवितोः।
यः प्रवर्ग्यमन्वीक्षते।
सूर्यस्य त्वा चक्षुषाऽन्वीक्ष इत्याह।
चक्षुषो गोपीथाय।
ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा भूत्यै त्वेत्याह।
इयं वा ऋजुः।
अन्तरिक्षꣳ साधु।
असौ सुक्षितिः॥ २७॥

((tasmádagnissarvā diśo'nuvibháti |
uttiṣṭha bṛhanbhávordhvastiṣṭha dhruvastvamityáha pratiṣṭhityai |
īśvaro vā eśo'ndho bhavitoḥ |
yaḥ právargyámanvīkṣate |
sūryásya tvā cakṣuṣā'nvīkṣa ityáha |
cakṣúṣo gopīthāyá |
ṛjave tvā sādhave tvā sukṣityai tvā bhūtyai tvetyáha |
iyaṃ vā ṛjuḥ |
antarikṣam̐ sādhu |
asau súkṣitiḥ || 27 ||))

[[5-3-8]]
दिशो भूतिः।
इमानेवास्मै लोकान्कल्पयति।
अथो प्रतिष्ठित्यै।
इदमहममुमामुष्यायणं विशा पशुभिर्ब्रह्मवर्चसेन पर्यूहामीत्याह।
विशैवैनं पशुभिर्ब्रह्मवर्चसेन पर्यूहति।
विशेति राजन्यस्य ब्रूयात्।
विशैवैनं पर्यूहति।
पशुभिरिति वैश्यस्य।
पशुभिरेवैनं पर्यूहति।
असुर्यं पात्रमनाच्छृण्णम्॥ २८॥

((diśo bhūtiḥ |
imānevāsmai lokānkalpayati |
atho pratiṣṭhityai |
idamahamamumāmuṣyāyaṇam viśā paśubhirbrahmavarcasena paryūhāmītyāha |
viśaivainaṁ paśubhirbrahmavarcasena paryūhati |
viśeti rājanyasya brūyāt |
viśaivainam paryūhati |
paśubhiriti vaiśyasya |
paśubhirevainam paryūhati |
asuryaṁ pātramanācchṛṇṇam || 28 ||))

[[5-3-9]]
आच्छृणत्ति।
देवत्राऽर्कः।
अजक्षीरेणाच्छृणत्ति।
परमं वा एतत्पयः।
यदजक्षीरम्।
परमेणैवैनं पयसाऽऽच्छृणत्ति।
यजुषा व्यावृत्त्यै।
छन्दोभिराच्छृणत्ति।
छन्दोभिर्वा एष क्रियते।
छन्दोभिरेव छन्दाꣳस्याच्छृणत्ति।
छृन्धि वाचमित्याह।

वाचमेवावरुन्धे।
छृन्ध्यूर्जमित्याह।
ऊर्जमेवावरुन्धे।
छृन्धि हविरित्याह।
हविरेवाकः।
देव पुरश्चर सघ्यासं त्वेत्याह।
यथा यजुरेवैतत्॥ २९॥
स्याद्यत्प्रवर्ग्यश्छन्दोभिः करोति वीर्यसंमितं छन्दाꣳसि निष्पत्पृणेत्याह सुक्षितिरनाच्छृण्णं छन्दाꣳस्याच्छृणत्त्यष्टौ च॥ ३॥

((ācchṛṇatti |
devatrā'kaḥ |
ajakṣīreṇācchṛṇatti |
paramam vā etatpayaḥ |
yadājakṣīram |
parameṇaivainam payasā''cchṛṇatti |
yajuṣā vyāvṛttyai |
chandobhirācchṛṇatti |
chandobhirvā eṣa kriyate |
chandobhireva chandāṃsyācchṛṇatti |
chṛndhi vācamityāha |
vācamevāvarundhe |
chṛndhyūrjamityāha |
ūrjamevāvarundhe |
chṛndhi havirityāha |
havirevākaḥ |
deva puraścara saghyāsam tvetyāha |
yathā yajurevaitat || 29 ||
syādyatpravargyaśchandobhiḥ karoti vīryasammitam chandāṃsi niṣpatpṛṇetyāha
sukṣitiranācchṛṇṇam chandāṃsyācchṛṇattyaṣṭau ca || 3 ||))

[[5-4-1]]
ब्रह्मन्प्रचरिष्यामो होतर्घर्ममभिष्टुहीत्याह।
एष वा एतर्हि बृहस्पतिः।
यद्ब्रह्मा।
तस्मा एव प्रतिप्रोच्य प्रचरति।
आत्मनोऽनार्त्यै।
यमाय त्वा मखाय त्वेत्याह।

ए॒ता वा ए॒तस्य॑ दे॒वताः᳚।
ताभि॑रे॒वैन॒ꣳ॒ सम॑र्धयति।
मद॑न्तीभि॒ः प्रोक्ष॑ति।
तेज॑ ए॒वास्मि॑न्दधाति॥ ३०॥

((brahma̱npraca̍riṣyāmo̱ hota̍rgha̱rmama̱bhiṣṭu̱hītya̍ha ।
e̱ṣa vā e̱tarhi̱ bṛha̱spati̍ḥ ।
yadbra̱hmā ।
tasma̍ e̱va pra̍ti̱procya̱ praca̍rati ।
ā̱tmano'nā̎rtyai ।
ya̱māya̍ tvā ma̱khāya̱ tvetya̍ha ।
e̱tā vā e̱tasya̍ de̱vatā̎ḥ ।
tābhi̍re̱vaina̱ꣳ̱ sama̍rdhayati ।
mada̍ntībhi̱ḥ prokṣa̍ti ।
teja̍ e̱vāsmi̍ndadhāti ॥ 30 ॥))

[[5-4-2]]
अ॒भि॒पू॒र्वं प्रोक्ष॑ति।
अ॒भि॒पू॒र्वमे॒वास्मि॒न्तेजो॑ दधाति।
त्रिः प्रोक्ष॑ति।
त्र्या॑वृ॒द्धि य॒ज्ञः।
अथो॑ मे॒ध्य॒त्वाय॑।
होताऽन्वा॑ह।
रक्ष॑सा॒मप॑हत्यै।
अन॑वानम्।
प्रा॒णाना॒ꣳ॒ सन्त॑त्यै।
त्रि॒ष्टुभ॑स्स॒तीर्गा॑य॒त्रीरि॒वान्वा॑ह॥ ३१॥

((a̱bhi̱pū̱rvaṃ prokṣa̍ti ।
a̱bhi̱pū̱rvame̱vāsmi̱ntejo̍ dadhāti ।
triḥ prokṣa̍ti ।
tryā̍vṛ̱ddhi ya̱jñaḥ ।
atho̍ medhya̱tvāya̍ ।
hotā'nvā̍ha ।
rakṣa̍sā̱mapa̍hatyai ।
ana̍vānam ।
prā̱ṇānā̱ꣳ̱ santa̍tyai ।
tri̱ṣṭu̱bha̍ssa̱tīrgā̍ya̱trīri̱vānvā̍ha ॥ 31 ॥))

[[5-4-3]]

गा॒य॒त्रो हि प्रा॒णः ।

प्रा॒णमे॒व यज॑माने दधाति ।

सन्त॑त॒मन्वा॑ह ।

प्रा॒णाना॑म॒न्नाद्य॑स्य॒ सन्त॑त्यै ।

अथो॒ रक्ष॑सा॒मप॑हत्यै ।

यत्परि॑मिता अनुब्रू॒यात् ।

परि॑मित॒मव॑रुन्धीत ।

अप॑रिमिता॒ अन्वा॑ह ।

अप॑रिमित॒स्याव॑रुद्ध्यै ।

शिरो॒ वा ए॒तद्य॒ज्ञस्य॑ ॥ ३२ ॥

((gā̱ya̱tro hi prā̱ṇaḥ ।
prā̱ṇame̱va yaja̍māne dadhāti ।
santa̍ta̱manvā̍ha ।
prā̱ṇānā̍ma̱nnādya̍sya̱ santa̍tyai ।
atho̱ rakṣa̍sā̱mapa̍hatyai ।
yatpari̍mitā anubrū̱yāt ।
pari̍mita̱mava̍rundhīta ।
apa̍rimitā̱ anvā̍ha ।
apa̍rimita̱syāva̍ruddhyai ।
śiro̱ vā e̱tadya̱jñasya̍ ॥ 32 ॥))

[[5-4-4]]

यत्प्र॑व॒र्ग्य᳚ः ।

ऊर्ग्मु॒ञ्जा᳚ः ।

यन्मौ॒ञ्जो वे॒दो भव॑ति ।

ऊ॒र्जैव य॒ज्ञस्य॒ शिर॒स्सम॑र्धयति ।

प्रा॒णा॒हु॒तीर्जु᳚होति ।

प्रा॒णाने॒व यज॑माने दधाति ।

स॒प्त जु॑होति ।

स॒प्त वै शी॑र्॒षण्या᳚ः प्रा॒णाः ।

प्रा॒णाने॒वास्मि॑न्दधाति ।

दे॒वस्त्वा॑ सवि॒ता मध्वा॑ऽन॒क्त्वित्या॑ह ॥ ३३ ॥

((yatprávargyáḥ |
ūrṅmuñjā̎ḥ |
yanmauñjo vedo bhavávati |
ūrjaiva yajñasya śirassamárdhayati |
prāṇāhutīrjúhoti |
prāṇāneva yajámāne dadhāti |
sapta júhoti |
sapta vai śírṣaṇyā̎ḥ prāṇāḥ |
prāṇānevāsmíndadhāti |
devastvá savitā madhvá'naktvityáha || 33 ||))

[[5-4-5]]

तेज॑सै॒वैन॒मन॑क्ति।

पृ॒थि॒वीं तप॑सस्त्रा॒य॒स्वेति॒ हिर॑ण्य॒मुपा॑॑स्यति।

अ॒स्या अन॑तिदाहाय।

शिरो॒ वा ए॒तद्य॒ज्ञस्य॑।

यत्प्र॑व॒र्ग्यः॑।

अ॒ग्निस्सर्वा॑ दे॒वताः॑॑।

प्र॒ल॒वाना॒दीप्योपा॑॑स्यति।

दे॒वता॑॑स्वे॒व य॒ज्ञस्य॒ शिर॒ः प्रति॑द॒धाति।

अप्र॑तिशीर्णाग्रं भवति।

ए॒तद्बा॑र्हि॒र्ह्ये॑षः॥ ३४॥

((tejásaivainámanakti |
pṛthivīṃ tapásastrāyasveti hiráṇyamupā̎syati |
asyā anátidāhāya |
śiro vā etadyajñasyá |
yatprávargyáḥ |
agnissarvá devatā̎ḥ |
pralavānādīpyopā̎syati |
devatā̎sveva yajñasya śiraḥ pratídadhāti |
aprátiśīrṇāgraṃ bhavati |
etadbárhirhyéṣaḥ || 34 ||))

[[5-4-6]]

अ॒र्चिर॑सि शो॒चिर॒सीत्या॑ह।

तेज॑ ए॒वास्मि॑न्ब्रह्मवर्च॒सं द॑धाति।

सꣳसी॑दस्व म॒हाꣳ अ॒सीत्या॑ह।

म॒हान् ह्ये॑षः।

ब्रह्मवादिनो वदन्ति।
एते वाव त ऋत्विजः।
ये दर्शपूर्णमासयोः।
अथ कथा होता यजमानायाशिषो नाऽऽशास्त इति।
पुरस्तादाशीः खलु वा अन्यो यज्ञः।
उपरिष्टादाशीरन्यः॥ ३५॥

((arcirasi śocirasītyāha |
teja evāsminbrahmavarcasam dadhāti |
saṁsīdasva mahāṁ asītyāha |
mahān hyeṣaḥ |
brahmavādino vadanti |
ete vāva ta ṛtvijaḥ |
ye darśapūrṇamāsayoḥ |
atha kathā hotā yajamānāyāśiṣo nā''śāsta iti |
purastādāśīḥ khalu vā anyo yajñaḥ |
upariṣṭādāśīranyaḥ || 35 ||))

[[5-4-7]]
अनाधृष्या पुरस्तादिति यदेतानि यजूंष्याह।
शीर्षत एव यज्ञस्य यजमान आशिषोऽवरुन्धे।
आयुः पुरस्तादाह।
प्रजां दक्षिणतः।
प्राणं पश्चात्।
श्रोत्रमुत्तरतः।
विधृतिमुपरिष्टात्।
प्राणानेवास्मै समीचो दधाति।
ईश्वरो वा एष दिशोऽनून्मदितोः।
यं दिशोऽनु व्यास्थापयन्ति॥ ३६॥

((anādhṛṣyā purastāditi yadetāni yajūṁṣyāha |
śīrṣata eva yajñasya yajamāna āśiṣo'varundhe |
āyuḥ purastādāha |
prajām dakṣiṇataḥ |
prāṇam paścāt |
śrotramuttarataḥ |
vidhṛtimupariṣṭāt |
prāṇānevāsmai samīco dadhāti |

īśvaro vā eṣa diśo'nūnmáditoḥ |
yaṃ diśo'nú vyāsthāpayánti || 36 ||))

[[5-4-8]]
मनोरश्वाऽसि भूरिपुत्रेतीमामभिमृशति।
इयं वै मनोरश्वा भूरिपुत्त्रा।
अस्यामेव प्रतितिष्ठत्यनुन्मादाय।
सूपसदा मे भूया मा मा हिꣳसीरित्याहाहिꣳ सायै।
चितस्स्थ परिचित इत्याह।
अपचितिमेवास्मिन्दधाति।
शिरो वा एतद्यज्ञस्य।
यत्प्रवर्ग्यः।
असौ खलु वा आदित्यः प्रवर्ग्यः।
तस्य मरुतो रश्मयः॥ ३७॥

((manoraśvá'si bhūríputretīmāmabhimṛśati |
iyaṃ vai manoraśvā bhūríputtrā |
asyāmeva pratítiṣṭhatyanúnmādāya |
sūpasadá me bhūyā mā má hiṁsīrityāhāhiṁ sāyai |
citásstha paricita ityáha |
apácitimevāsmíndadhāti |
śiro vā etadyajñasyá |
yatprávargyáḥ |
asau khalu vā ádityaḥ právargyáḥ |
tasyá marutó raśmayáḥ || 37 ||))

[[5-4-9]]
स्वाहा मरुद्भिः परिश्रयस्वेत्याह।
अमुमेवादित्यꣳ रश्मिभिः पर्यूहति।
तस्मादसावादित्योऽमुष्मिँल्लोके रश्मिभिः पर्यूढः।
तस्माद्राजा विशा पर्यूढः।
तस्माद्ग्रामणीस्सजातैः पर्यूढः।
अग्नेस्सृष्टस्य यतः।
विकङ्कतं भा आर्च्छत्।
यद्वैकङ्कताः परिधयो भवन्ति।
भा एवावरुन्धे।

द्वाद॑श भवन्ति॥ ३८॥

((svāhá̱ ma̱rudbhi̱ḥ pari̍śraya̱svetyá̱ha ।
a̱mume̱vādi̱tyam̐ ra̱śmibhi̱ḥ paryú̱hati ।
tasmā̍da̱sāvā̍di̱tyò'mu̱ṣmim̐lllo̱ke ra̱śmibhi̱ḥ paryú̱ḍhaḥ ।
tasmā̱drājá̱ vi̱śā paryú̱ḍhaḥ ।
tasmā̍dgrāma̱ṇīssá̱jā̱taiḥ paryú̱ḍhaḥ ।
a̱gnessṛ̱ṣṭasyá ya̱taḥ ।
vikáṅkata̱m bhā ā̍rcchat ।
yadvaikáṅkatā̱ḥ pari̱dhayo̱ bhavánti ।
bhā e̱vāvá̍rundhe ।
dvādá̍śa bhavanti ॥ 38 ॥))

[[5-4-10]]
द्वाद॑श॒ मासा॒स्संव॑थ्स॒रः।
सं॒व॒थ्स॒रमे॒वाव॑रुन्धे।
अस्ति॑ त्रयोद॒शो मास॒ इत्या॑हुः।
यत्त्र॑योद॒शः प॑रि॒धिर्भव॑ति।
तेनै॒व त्र॑योद॒शं मास॒मव॑रुन्धे।
अ॒न्तरि॑क्षस्यान्त॒र्धिर॒सीत्या॑ह॒ व्यावृ॑त्त्यै।
दिवं॒ तप॑सस्त्रा॒यस्वेत्यु॒परि॑ष्टा॒द्धिर॑ण्य॒मधि॒ निद॑धाति।
अ॒मुष्या॒ अन॑तिदाहाय।
अथो॑ आ॒भ्याम॒वैन॑मु॒भ॒यत॒ः परि॑गृह्णाति।
अर्ह॑न्बिभर्षि॒ साय॑कानि॒ धन्वेत्या॑ह॥ ३९॥

((dvādá̍śa̱ māsā̍ssa̱ṃvathsa̱raḥ ।
sa̱ṃva̱thsa̱rame̱vāvá̍rundhe ।
asti̍ trayoda̱śo māsa̱ ityá̱huḥ ।
yattrá̍yoda̱śaḥ pá̍ri̱dhirbhavá̍ti ।
tenai̱va trá̍yoda̱śaṃ māsa̱mavá̍rundhe ।
a̱ntari̍kṣasyānta̱rdhira̱sītyá̱ha̱ vyāvṛ̍ttyai ।
diva̱ṃ tapá̍sastrāya̱svetyu̱pari̍ṣṭā̱ddhirá̍ṇya̱madhi̱ nidá̍dhāti ।
a̱muṣyā̱ aná̍tidāhāya ।
athó ā̱bhyāme̱vainá̍mubha̱yata̱ḥ pari̍gṛhṇāti ।
arhá̍nbibharṣi̱ sāyá̍kāni̱ dhanvetyá̱ha ॥ 39 ॥))

[[5-4-11]]
स्तौत्ये॒वैन॑मे॒तत्।
गा॒य॒त्रम॑सि॒ त्रैष्टु॑भमसि॒ जाग॑तम॒सीति॒ ध॒वित्रा॒ण्याद॑त्ते।

छन्दो॑भिरे॒वैना॒न्याद॑त्ते।
मधु॒ मध्विति॑ धूनोति।
प्रा॒णो वै मधु॑।
प्रा॒णमे॒व यज॑माने दधाति।
त्रिः परि॑यन्ति।
त्रि॒वृद्धि प्रा॒णः।
त्रिः परि॑यन्ति।
त्र्या॑वृ॒द्धि य॒ज्ञः॥ ४०॥

((stautye̱vainá̍me̱tat ।
gā̱ya̱tramá̍si̱ traiṣṭú̍bhamasi̱ jāgá̍tama̱sīti̍ dha̱vitrā̱ṇyādá̍tte ।
chandó̍bhire̱vainā̱nyādá̍tte ।
madhu̱ madhviti̍ dhūnoti ।
prā̱ṇo vai madhú̍ ।
prā̱ṇame̱va yajá̍māne dadhāti ।
triḥ pari̍yanti ।
tri̱vṛddhi prā̱ṇaḥ ।
triḥ pari̍yanti ।
tryá̍vṛ̱ddhi ya̱jñaḥ ॥ 40 ॥))

[[5-4-12]]
अथो॒ रक्ष॑सा॒मप॑हत्यै।
त्रिः पुनः॒ परि॑यन्ति।
षट्॒थ् संप॑द्यन्ते।
षड्वा ऋ॒तव॑ः।
ऋ॒तुष्वे॒व प्रति॑तिष्ठन्ति।
यो वै घ॒र्मस्य॑ प्रि॒यां त॒नुव॑मा॒क्राम॑ति।
दु॒श्चर्मा॒ वै स भ॑वति।
ए॒ष ह॒ वा अ॑स्य प्रि॒यां त॒नुव॒माक्रा॑मति।
यस्त्रिः प॒रीत्य॑ चतु॒र्थं पर्यै॑ति।
ए॒ताꣳ ह॒ वा अ॑स्यो॒ग्रदे॑वो॒ राज॑नि॒राच॑क्राम॥ ४१॥

((atho̱ rakṣá̍sā̱mapá̍hatyai ।
triḥ puna̱ḥ pari̍yanti ।
ṣaṭ̱th sampá̍dyante ।
ṣaḍ̱vā ṛ̱tavá̍ḥ ।
ṛ̱tuṣve̱va prati̍tiṣṭhanti ।

yo vai gharmasya priyām tanuvāmākrāmati |
duścarmā vai sa bhavati |
eṣa ha vā asya priyām tanuvamākrāmati |
yastriḥ parītya caturthaṃ paryeti |
etām̐ ha vā asyogradevo rājanirācakrāma || 41 ||))

[[5-4-13]]

ततो वै स दुश्चर्माऽभवत्।
तस्मात्त्रिः परीत्य न चतुर्थं परीयात्।
आत्मनो गोपीथाय।
प्राणा वै धवित्राणि।
अव्यतिषङ्गं धून्वन्ति।
प्राणानामव्यतिषङ्गाय क्लृप्त्यै।
विनिषद्य धून्वन्ति।
दिक्ष्वेव प्रतितिष्ठन्ति।
ऊर्ध्वं धून्वन्ति।
सुवर्गस्य लोकस्य समष्ट्यै।
सर्वतो धून्वन्ति।
तस्मादयꣳ सर्वतः पवते॥ ४२॥
दधातीवान्वाह यज्ञस्याहैष उपरिष्टादाशीरन्यो
व्यास्थापयन्ति रश्मयो भवन्ति धन्वेत्याह यज्ञश्चक्राम समष्ट्यै द्वे च॥ ४॥

((tato vai sa duścarma'bhavat |
tasmāttriḥ parītya na caturthaṃ pariyāt |
ātmano gopīthāya |
prāṇā vai dhavitrāṇi |
avyatiṣaṅgaṃ dhūnvanti |
prāṇānāmavyatiṣaṅgāya klṛptyai |
viniṣadya dhūnvanti |
dikṣveva pratitiṣṭhanti |
ūrdhvaṃ dhūnvanti |
suvargasya lokasya samaṣṭyai |
sarvato dhūnvanti |
tasmādayam̐ sarvataḥ pavate || 42 ||
dadhātīvānvāha yajñasyāhaiṣa upariṣṭādāśīranyo
vyāsthāpayanti raśmayo bhavanti dhanvetyāha yajñaścakrāma samaṣṭyai dve ca || 4 ||))

[[5-5-1]]

अ॒ग्निष्ट्वा॒ वसु॑भिः पु॒रस्ता᳚द्रोचयतु गाय॒त्रेण॒ छन्द॒सेत्या॑ह ।
अ॒ग्निरे॒वैनं॒ वसु॑भिः पु॒रस्ता᳚द्रोचयति गाय॒त्रेण॒ छन्द॑सा ।
स मा॑ रुचि॒तो रो॑च॒येत्या॑ह ।
आ॒शिषं॑मे॒वैतामाशा᳚स्ते ।
इन्द्र॑स्त्वा रु॒द्रैर्द॑क्षिण॒तो रो॑चयतु॒ त्रैष्टु॑भेन॒ छन्द॒सेत्या॑ह ।
इन्द्र॑ ए॒वैन॑ꣳ रु॒द्रैर्द॑क्षिण॒तो रो॑चयति॒ त्रैष्टु॑भेन॒ छन्द॑सा ।
स मा॑ रुचि॒तो रो॑च॒येत्या॑ह ।
आ॒शिषं॑मे॒वैतामाशा᳚स्ते ।
वरु॑णस्त्वाऽऽदि॒त्यैः प॒श्चाद्रो॑चयतु॒ जाग॑तेन॒ छन्द॒सेत्या॑ह ।
वरु॑ण ए॒वैनं॑मादि॒त्यैः प॒श्चाद्रो॑चयति॒ जाग॑तेन॒ छन्द॑सा ॥ ४३ ॥

((a̱gniṣṭvā̱ vasúbhiḥ pu̱rastā̎drocayatu gāya̱treṇa̱ chanda̱setyā́ha ।
a̱gnire̱vainam̱ vasúbhiḥ pu̱rastā̎drocayati gāya̱treṇa̱ chandásā ।
sa mā́ ruci̱to róca̱yetyā́ha ।
ā̱śiṣáme̱vaitāmāśā̎ste ।
indrástvā ru̱drairdákṣiṇa̱to rócayatu̱ traiṣṭúbhena̱ chanda̱setyā́ha ।
indrá e̱vainaꣳ ru̱drairdákṣiṇa̱to rócayati̱ traiṣṭúbhena̱ chandásā ।
sa mā́ ruci̱to róca̱yetyā́ha ।
ā̱śiṣáme̱vaitāmāśā̎ste ।
varúṇastvā''di̱tyaiḥ pa̱ścādrócayatu̱ jāgátena̱ chanda̱setyā́ha ।
varúṇa e̱vainámādi̱tyaiḥ pa̱ścādrócayati̱ jāgátena̱ chandásā ॥ 43 ॥))

[[5-5-2]]
स मा॑ रुचि॒तो रो॑च॒येत्या॑ह ।
आ॒शिषं॑मे॒वैतामाशा᳚स्ते ।
द्यु॒ता॒नस्त्वा॑ मारु॒तो म॒रुद्भि॑रुत्तर॒तो रो॑चय॒त्वानु॑ष्टुभेन॒ छन्द॒सेत्या॑ह ।
द्यु॒तान ए॒वैनं॑ मारु॒तो म॒रुद्भि॑रुत्तर॒तो रो॑चय॒त्यानु॑ष्टुभेन॒ छन्द॑सा ।
स मा॑ रुचि॒तो रो॑च॒येत्या॑ह ।
आ॒शिषं॑मे॒वैतामाशा᳚स्ते ।
बृ॒ह॒स्पति॑स्त्वा॒ विश्वै᳚र्दे॒वैरु॒परि॑ष्टाद्रोचयतु पाङ्क्ते᳚न छन्द॒सेत्या॑ह ।
बृ॒ह॒स्पति॑रे॒वैनं॒ विश्वै᳚र्दे॒वैरु॒परि॑ष्टाद्रोचयति॒ पाङ्क्ते᳚न॒ छन्द॑सा ।
स मा॑ रुचि॒तो रो॑च॒येत्या॑ह ।
आ॒शिषं॑मे॒वैतामाशा᳚स्ते ॥ ४४ ॥

((sa mā́ ruci̱to róca̱yetyā́ha ।

āśiṣamevaitāmāśāste ।
dyutānastvā māruto marudbhiruttarato rocayatvānuṣṭubhena chandasetyāha ।
dyutāna evainaṃ māruto marudbhiruttarato rocayatyānuṣṭubhena chandasā ।
sa mā rucito rocayetyāha ।
āśiṣamevaitāmāśāste ।
bṛhaspatistvā viśvairdevairupariṣṭādrocayatu pāṅktena chandasetyāha ।
bṛhaspatirevainaṃ viśvairdevairupariṣṭādrocayati pāṅktena chandasā ।
sa mā rucito rocayetyāha ।
āśiṣamevaitāmāśāste ॥ 44 ॥))

[[5-5-3]]

रोचितस्त्वं देव घर्म देवेष्वसीत्याह।
रोचितो ह्येष देवेषु।
रोचिषीयाहं मनुष्येष्वित्याह।
रोचत एवैष मनुष्येषु।
सम्राड्घर्म रुचितस्त्वं देवेष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चस्यसीत्याह।
रुचितो ह्येष देवेष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चसी।
रुचितोऽहं मनुष्येष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चसी भूयासमित्याह।
रुचित एवैष मनुष्येष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चसी भवति।
रुगसि रुचं मयि धेहि मयि रुगित्याह।
आशिषमेवैतामाशास्ते।
तं यदेतैर्यजुर्भिररोचयित्वा।
रुचितो घर्म इति प्रब्रूयात्।
अरोचुकोऽध्वर्युस्स्यात्।
अरोचुको यजमानः।
अथ यदेनमेतैर्यजुर्भी रोचयित्वा।
रुचितो घर्म इति प्राह।
रोचुकोऽध्वर्युर्भवति।
रोचुको यजमानः॥ ४५॥
पश्चाद्रोचयति जागतेन छन्दसा स मा रुचितो रोचयेत्याहाशिषमेवैतामाशास्ते शास्तेऽष्टौ च॥
५॥

((rocitastvaṃ deva gharma deveṣvasītyāha ।
rocito hyeṣa deveṣu ।
rociṣīyāhaṃ manuṣyeṣvityāha ।

rocȧta e̱vaiṣa mȧnu̱ṣyė̄ṣu |
samrā̱̈ḍgharma rucị̱tastvaṃ de̱veṣvāyu̇ṣmām̐̇stejạsvī brȧhmavarcạsyȧsītyǡha |
ru̱ci̱to hyė̄ṣa de̱veṣvāyu̇ṣmām̐̇stejạsvī brȧhmavarcạsī |
ru̱ci̱tȯ'haṃ mȧnu̱ṣyė̄ṣvāyu̇ṣmām̐̇stejạsvī brȧhmavarcạsī bhū̇yāsạmityǡha |
ru̱ci̱ta e̱vaiṣa mȧnu̱ṣyė̄ṣvāyu̇ṣmām̐̇stejạsvī brȧhmavarcạsī bhȧvati |
rugȧsi̱ rucaṃ̱ mayi̍ dhehi̱ mayi̱ rugityǡha |
ā̱śiṣȧme̱vaitāmāśā̱̈ste |
taṃ yade̱tairyaju̇rbhi̱rarȯcayitvā |
ru̱ci̱to gha̱rma iti̍ prabrū̱yāt |
arȯcuko'dhva̱russyāt |
arȯcuko̱ yajȧmānaḥ |
atha̱ yadėname̱tairyaju̇rbhī rocayi̱tvā |
ru̱ci̱to gha̱rma iti̱ prāhȧ |
rocu̇ko'dhva̱ryurbhavȧti |
rocu̇ko̱ yajȧmānaḥ || 45 ||
pa̱ścādrȯcayati̱ jāgȧtena̱ chandȧsā̱ sa mǡ ruci̱to rȯca̱yetyǡhā̱śiṣȧme̱vaitāmāśā̱̈ste śāste̱'ṣṭau cȧ || 5 ||))

[[5-6-1]]

शिरो॒ वा ए॒तद्य॒ज्ञस्य॑।
यत्प्र॑व॒र्ग्यः॑।
ग्रीवा॑ उ॒प॒सदः॑।
पु॒रस्ता॑दुप॒सदां॓ प्रव॒र्ग्यं॓ प्रवृ॒णक्ति।
ग्री॒वास्वे॒व य॒ज्ञस्य॒ शिर॒ः प्रति॑दधाति।
त्रिः प्रवृ॒णक्ति।
त्रय॑ इ॒मे लो॒काः।
ए॒भ्य ए॒व लो॒केभ्यो॑ य॒ज्ञस्य॒ शिरोऽव॑रुन्धे।
षट्थ सं॒प॑द्यन्ते।
षड्वा ऋ॒तवः॑॥ ४६॥

((śiro̱ vā e̱tadya̱jñasyȧ |
yatprȧva̱rgyȧḥ |
grī̱vā u̇pa̱sadȧḥ |
pu̱rastǡdupa̱sadām̐̇ prava̱rgyaṃ̇ pravṛ̇̄ṇakti |
grī̱vāsve̱va ya̱jñasya̱ śira̱ḥ prati̍dadhāti |
triḥ pravṛ̇̄ṇakti |
trayȧ i̱me lo̱kāḥ |
e̱bhya e̱va lo̱kebhyȯ ya̱jñasya̱ śiro'vȧrundhe |
ṣaṭtha saṃpȧdyante |
ṣa̱ḍvā ṛ̱tavȧḥ || 46 ||))

[[5-6-2]]

ऋ॒तुभ्य॑ ए॒व य॒ज्ञस्य॒ शिरो॑ऽव॑रुन्धे।

द्वाद॑श॒कृत्व॒ः प्रवृ॑णक्ति।

द्वाद॑श॒ मासा᳚स्संवथ्स॒रः।

सं॒व॒थ्स॒राद्दे॒व य॒ज्ञस्य॒ शिरो॑ऽव॑रुन्धे।

चतु॑र्विꣳशति॒स्संप॑द्यन्ते।

चतु॑र्विꣳशतिरर्धमा॒साः।

अ॒र्ध॒मा॒सेभ्य॑ ए॒व य॒ज्ञस्य॒ शिरो॑ऽव॑रुन्धे।

अथो॒ खलु॑।

स॒कृद्दे॒व प्र॒वृज्य॑ः।

एक॒ꣳ॒ हि शिर॑ः॥ ४७॥

((ṛ̱tubhya̍ e̱va ya̱jñasya̱ śiro'va̍rundhe |
dvāda̍śa̱kṛtva̱ḥ pravṛ̍ṇakti |
dvāda̍śa̱ māsā᳚ssaṃvathsa̱raḥ |
sa̱ṃva̱thsa̱rāde̱va ya̱jñasya̱ śiro'va̍rundhe |
catu̍rviꣳśati̱ssampa̍dyante |
catu̍rviꣳśatirardhamā̱sāḥ |
a̱rdha̱mā̱sebhya̍ e̱va ya̱jñasya̱ śiro'va̍rundhe |
atho̱ khalu̍ |
sa̱kṛde̱va pra̱vṛjya̍ḥ |
eka̱ꣳ̱ hi śira̍ḥ || 47 ||))

[[5-6-3]]

अ॒ग्नि॒ष्टो॒मे प्रवृ॑णक्ति।

ए॒तावा॒न्वै य॒ज्ञः।

याव॑ानग्निष्टो॒मः।

याव॑ाने॒व य॒ज्ञः।

तस्य॒ शिर॒ः प्रति॑दधाति।

नोक्थ्ये᳚ प्रवृ॑ञ्ज्यात्।

प्र॒जा वै प॒शव॑ उ॒क्थानि॑।

यदु॒क्थ्ये᳚ प्रवृ॒ञ्ज्यात्।

प्र॒जां प॒शून॑स्य॒ निर्द॑हेत्।

वि॒श्वजि॑ति॒ सर्व॑पृष्ठे प्रवृ॑णक्ति॥ ४८॥

((a̱gni̱ṣṭo̱me pravṛ̍ṇakti |
e̱tāvā̱nvai ya̱jñaḥ |
yāva̍̄nagni̱ṣṭo̱maḥ |
yāva̍̄ne̱va ya̱jñaḥ |
tasya̱ śira̱ḥ prati̍dadhāti |
nokthye̎ pravṛ̍ñjyāt |
pra̱jā vai pa̱śava̍ u̱kthāni̍ |
yadu̱kthye̎ pravṛ̱ñjyāt |
pra̱jāṃ pa̱śūna̍sya̱ nirda̍het |
vi̱śva̱jiti̱ sarva̍pṛṣṭhe̱ pravṛ̍ṇakti || 48 ||))

[[5-6-4]]
पृ॒ष्ठानि॒ वा अच्यु॑तं च्यावयन्ति।
पृ॒ष्ठैरे॒वास्मा॒ अच्यु॑तं च्यावयि॒त्वाऽव॑रुन्धे।
अप॑श्यं गो॒पामित्या॑ह।
प्रा॒णो वै गो॒पाः।
प्रा॒णमे॒व प्र॒जासु॒ विया॑तयति।
अप॑श्यं गो॒पामित्या॑ह।
अ॒सौ वा आ॑दि॒त्यो गो॒पाः।
स हीमाः प्र॒जा गो॑पा॒यति॑।
तमे॒व प्र॒जानां॒ गो॒प्तारं॑ कुरुते।
अनि॑पद्यमान॒मित्या॑ह॥ ४९॥

((pṛṣṭhāni̱ vā acyu̍taṃ cyāvayanti |
pṛṣṭhaire̱vāsmā̱ acyu̍taṃ cyāvayi̱tvā'va̍rundhe |
apa̍śyaṃ go̱pāmitya̍̄ha |
prā̱ṇo vai go̱pāḥ |
prā̱ṇame̱va pra̱jāsu̱ viya̍̄tayati |
apa̍śyaṃ go̱pāmitya̍̄ha |
a̱sau vā ā̍di̱tyo go̱pāḥ |
sa hīmāḥ pra̱jā go̍pā̱yati̍ |
tame̱va pra̱jānā̱ṃ go̱ptāra̍ṃ kurute |
ani̍padyamāna̱mitya̍̄ha || 49 ||))

[[5-6-5]]
न ह्ये॑ष नि॒पद्य॑ते।
आ च॒ परा॑ च प॒थिभि॒श्चर॑न्त॒मित्या॑ह।
आ च॒ ह्ये॑ष परा॑ च प॒थिभि॒श्चर॑ति।
स स॒ध्रीची॒स्स विषू॑ची॒र्वसा॑न॒ इत्या॑ह।

स॒ध्रीची॓श्च॒ ह्ये॑ष विषू॑चीश्च॒ वसा॑नः प्र॒जा अ॒भिवि॒पश्य॑ति।
आव॑रीवर्ति॒ भुव॑नेष्व॒न्तरित्या॑ह।
आ ह्ये॑ष व॑री॒वर्ति॒ भुव॑नेष्व॒न्तः।
अत्र॑ प्रा॒वीर्म॑धु॒माध्वी॓भ्या॒ं मधु॒माधू॑चीभ्या॒मित्या॑ह।
वास॑न्तिकावे॒वास्मा॑ ऋ॒तू क॑ल्पयति।
स॒म॒ग्निर॒ग्निना॑ ग॒तेत्या॑ह॥ ५०॥

((na hye̍ṣa ni̱padya̍te |
ā ca̱ para̍ ca pa̱thibhi̱ścara̍nta̱mitya̍ha |
ā ca̱ hye̍ṣa para̍ ca pa̱thibhi̱ścara̍ti |
sa sa̱ddhrīcī̱ssa viṣu̍cī̱rvasa̍na̱ itya̍ha |
sa̱ddhrīcī̎śca̱ hye̍ṣa viṣu̍cīśca̱ vasa̍naḥ pra̱jā a̱bhivi̱paśya̍ti |
āva̍rīvarti̱ bhuva̍neṣva̱ntaritya̍ha |
ā hye̍ṣa va̍rī̱varti̱ bhuva̍neṣva̱ntaḥ |
atra̍ prā̱vīrmadhu̱mādhvī̎bhyā̱ṃ madhu̱mādhū̍cībhyā̱mitya̍ha |
vāsa̍ntikāve̱vāsmā̍ ṛ̱tū ka̍lpayati |
sama̱gnira̱gninā̍ ga̱tetya̍ha || 50 ||))

[[5-6-6]]
ग्रैष्मा॑वे॒वास्मा॑ ऋ॒तू क॑ल्पयति।
स॒म॒ग्निर॒ग्निना॑ ग॒तेत्या॑ह।
अ॒ग्निर्ह्ये॑वैषो॓ऽग्निना॑ सं॒गच्छ॑ते।
स्वाहा॒ सम॒ग्निस्तप॑सा ग॒तेत्या॑ह।
पूर्व॑मे॒वोदि॒तम्।
उत्त॑रेणा॒भिगृ॒णाति।
ध॒र्ता दि॒वो विभा॑सि॒ रज॑सः पृ॒थि॒व्या इत्या॑ह।
वार्षि॑कावे॒वास्मा॑ ऋ॒तू क॑ल्पयति।
हृ॒दे त्वा॒ मन॑से॒ त्वेत्या॑ह।
शा॒र॒दा॒वे॒वास्मा॑ ऋ॒तू क॑ल्पयति॥ ५१॥

((graiṣma̍ve̱vāsmā̍ ṛ̱tū ka̍lpayati |
sama̱gnira̱gninā̍ ga̱tetyā̍ha |
a̱gnirhye̍vaiṣo̎'gninā̍ sa̱ṃgaccha̍te |
svāhā̱ sama̱gnistapa̍sā ga̱tetyā̍ha |
pūrva̍me̱vodi̱tam |
utta̍reṇā̱bhigṛ̱ṇāti |
dha̱rtā di̱vo vibhā̍si̱ raja̍saḥ pṛ̱thi̱vyā itya̍ha |
vārṣi̍kāve̱vāsmā̍ ṛ̱tū ka̍lpayati |

hṛ̱de tvā̱ manáse̱ tvetyā̍ha ।
śā̱ra̱dāve̱vāsmā̍ ṛ̱tū ka̍lpayati ॥ 51 ॥))

[[5-6-7]]
दि॒वि दे॒वेषु॒ होत्रा॑ य॒च्छेत्या॑ह।
होत्रा॑भिरे॒वेमाँल्लो॒कान्थ्सं द॑धाति।
विश्वा॑सां भुवां प॒त इत्या॑ह।
हैम॑न्तिकावे॒वास्मा॑ ऋ॒तू क॑ल्पयति।
दे॒वश्रू॒स्त्वं दे॑व घर्म दे॒वान्पा॒हीत्या॑ह।
शै॒शि॒रावे॒वास्मा॑ ऋ॒तू क॑ल्पयति।
त॒पो॒जां वाच॑म॒स्मे निय॑च्छ दे॒वा॒यु॒व॒मित्या॑ह।
या वै मेध्या॒ वाक्।
सा त॑पो॒जाः।
ता॒मे॒वाव॑रुन्धे॥ ५२॥

((di̱vi de̱ve̱ṣu̱ hotrā̍ ya̱cchetyā̍ha ।
hotrā̍bhire̱vemām̐llo̱kānthsaṃ da̍dhāti ।
viśvā̍sāṃ bhuvāṃ pata̱ ityā̍ha ।
haima̍ntikāve̱vāsmā̍ ṛ̱tū ka̍lpayati ।
de̱va̱śrūstvaṃ de̍va gharma de̱vānpā̱hītyā̍ha ।
śai̱śi̱rāve̱vāsmā̍ ṛ̱tū ka̍lpayati ।
ta̱po̱jāṃ vāca̍ma̱sme niya̍ccha devā̱yuva̱mityā̍ha ।
yā vai medhyā̱ vāk।
sā ta̍po̱jāḥ ।
tāme̱vāva̍rundhe ॥ 52 ॥))

[[5-6-8]]
गर्भो॑ दे॒वाना॒मित्या॑ह।
गर्भो॒ ह्ये॑ष दे॒वाना॑म्।
पि॒ता म॑ती॒नामित्या॑ह।
प्र॒जा वै म॒तय॑ः।
तासा॑मे॒ष ए॒व पि॒ता।
यत्प्र॑व॒र्ग्य॑ः।
तस्मा॑दे॒वमा॑ह।
पति॑ः प्र॒जाना॒मित्या॑ह।
पति॒र्ह्ये॑ष प्र॒जाना॑म्।

मतिः कवीनामित्याह॥ ५३॥

((garbhȯ devānāmityȧha |
garbho hyeṡa devānām |
pitā mȧtīnāmityȧha |
prajā vai matayȧḥ |
tāsȧmeṣa eva pitā |
yatprȧvargyȧḥ |
tasmȧdevamȧha |
patiḥ prajānāmityȧha |
patirhyeṡa prajānām |
matiḥ kavīnāmityȧha || 53 ||))

[[5-6-9]]

मतिर्ह्येष कवीनाम्।
सं देवो देवेन सवित्राऽयतिष्ट सꣳ सूर्येणारुक्तेत्याह।
अमुं चैवादित्यं प्रवर्ग्यं च सꣳ शास्ति।
आयुर्दास्त्वमस्मभ्यं घर्म वर्चोदा असीत्याह।
आशिषमेवैतामाशास्ते।
पिता नोऽसि पिता नो बोधेत्याह।
बोधयत्येवैनम्।
नवैतेऽवकाशा भवन्ति।
पत्नियै दशमः।
नव वै पुरुषे प्राणाः॥ ५४॥

((matirhyeṡa kȧvīnām |
saṃ devo devenȧ savitrā'yȧtiṣṭa saṁ sūryeṇāruktetyȧha |
amuṃ caivādityaṃ prȧvargyaṃ ca saṁ śāsti |
āyurdāstvamasmabhyaṃ gharma varcodā asītyȧha |
āśiṣȧmevaitāmāśāste |
pitā nȯ'si pitā nȯ bodhetyȧha |
bodhayȧtyevainām |
navaitė'vakāśā bhavȧnti |
patniyai daśamaḥ |
nava vai purȯṣe prāṇāḥ || 54 ||))

[[5-6-10]]

नाभिर्दशमी।
प्राणानेव यजमाने दधाति।

अथो॒ दशा॑क्षरा वि॒राट्।
अन्नं॑ वि॒राट्।
वि॒रा॒जै॒वान्ना॒द्य॒मव॑रुन्धे।
य॒ज्ञस्य॒ शिरो॑ऽच्छिद्यत।
तद्दे॒वा होत्रा॑भि॒ः प्रत्य॑दधुः।
ऋ॒त्विजो॑ऽवे॑क्षन्ते।
ए॒ता वै होत्रा॑ः।
होत्रा॑भिरे॒व य॒ज्ञस्य॒ शिर॒ः प्रति॑दधाति॥ ५५॥

((nābhirdaśa̱mī ।
prā̱ṇāne̱va yajamāne dadhāti ।
atho̱ daśākṣarā vi̱rāṭ ।
annaṁ vi̱rāṭ ।
vi̱rāja̱i̱vānnādya̱mavarundhe ।
ya̱jñasya̱ śiro'cchidyata ।
tadde̱vā hotrābhi̱ḥ pratyadadhuḥ ।
ṛ̱tvijo'vekṣante ।
e̱tā vai hotrāḥ ।
hotrābhire̱va ya̱jñasya̱ śira̱ḥ pratidadhāti ॥ 55 ॥))

[[5-6-11]]
रु॒चि॒तमवे॑क्षन्ते।
रु॒चि॒ताद्वै प्र॒जाप॑तिः प्र॒जा अ॑सृजत।
प्र॒जाना॒ꣳ सृष्ट्यै॑।
रु॒चि॒तमवे॑क्षन्ते।
रु॒चि॒ताद्वै प॒र्जन्यो॑ वर्ष॑ति।
वर्षु॑कः प॒र्जन्यो॑ भवति।
सं प्र॒जा ए॑धन्ते।
रु॒चि॒तमवे॑क्षन्ते।
रु॒चि॒तं वै ब्र॑ह्मवर्च॒सम्।
ब्र॒ह्म॒व॒र्च॒सिनो॑ भवन्ति॥ ५६॥

((ru̱ci̱tamavekṣante ।
ru̱ci̱tādvai pra̱jāpatiḥ pra̱jā asṛjata ।
pra̱jānā̱m̐ sṛṣṭyai ।
ru̱ci̱tamavekṣante ।
ru̱ci̱tādvai pa̱rjanyo varṣati ।

varṣukaḥ parjanyo bhavati |
saṃ prajā edhante |
rucitamavekṣante |
rucitaṃ vai brahmavarcasam |
brahmavarcasino bhavanti || 56 ||))

[[5-6-12]]

अधीयन्तोऽवेक्षन्ते।

सर्वमायुर्यन्ति।

न पत्न्यवेक्षेत।

यत्पत्न्यवेक्षेत।

प्रजायेत।

प्रजां त्वस्यै निर्दहेत्।

यन्नावेक्षेत।

न प्रजायेत।

नास्यै प्रजां निर्दहेत्।

तिरस्कृत्य यजुर्वाचयति।

प्रजायते।

नास्यै प्रजां निर्दहति।

त्वष्टीमती ते सपेयेत्याह।

सपाद्धि प्रजाः प्रजायन्ते॥ ५७॥

ऋतवो हि शिरस्सर्वपृष्ठे प्रवृणक्त्यनिपद्यमानमित्याह गतेत्याह शारदावेवास्मा ऋतू कल्पयति रुन्धे कवीनामित्याह प्राणाः प्रतिदधाति भवन्ति वाचयति चत्वारि च॥ ६॥

((adhīyanto'vekṣante |
sarvamāyuryanti |
na patnyavekṣeta |
yatpatnyavekṣeta |
prajāyeta |
prajāṃ tvasyai nirdahet |
yannāvekṣeta |
na prajāyeta |
nāsyai prajāṃ nirdahet |
tiraskṛtya yajurvācayati |
prajāyate |
nāsyai prajāṃ nirdahati |
tvaṣṭīmatī te sapeyetyāha |
sapāddhi prajāḥ prajāyante || 57 ||

ṛtavo̱ hi śira̱ssarva̍pṛṣṭhe̱ pravṛ̍ṇa̱ktyani̍padyamāna̱mitya̍ha ga̱tetya̍ha śāra̱dāve̱vāsma̍ ṛ̱tū ka̍lpayati rundhe kavī̱nāmitya̍ha prā̱ṇāḥ prati̍dadhāti bhavanti vācayati ca̱tvāri̍ ca || 6 ||))

[[5-7-1]]

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒व इति॑ रश॒नामाद॑त्ते॒ प्रसू᳚त्यै।
अ॒श्विनो᳚र्बा॒हुभ्या॒मित्या॑ह।
अ॒श्विनौ॒ हि दे॒वाना॑मध्व॒र्यू आस्ता᳚म्।
पू॒ष्णो हस्ता᳚भ्या॒मित्या॑ह॒ यत्यै᳚।
आद॒देऽदि॑त्यै॒ रास्ना॒ऽसीत्या॑ह॒ यजु॑ष्कृत्यै।
इड॒ एह्यदि॑त॒ एहि॒ सर॑स्व॒त्येहीत्या॑ह।
ए॒तानि॒ वा अ॑स्यै देवना॒मानि॑।
दे॒व॒ना॒मैरे॒वैना॒माह्व॑यति।
अस॒ावेह्यस॒ावेह्यस॒ावेहीत्या॑ह।
ए॒तानि॒ वा अ॑स्यै मनुष्यना॒मानि॑॥ ५८॥

((de̱vasya̍ tvā savi̱tuḥ pra̍sa̱va iti̍ raśa̱nāmāda̍tte̱ prasū᳚tyai |
a̱śvino᳚rbā̱hubhyā̱mitya̍ha |
a̱śvinau̱ hi de̱vānā̍madhva̱ryū āstā᳚m |
pū̱ṣṇo hastā᳚bhyā̱mitya̍ha̱ yatyai᳚ |
āda̱de'di̍tyai̱ rāsnā̱'sītya̍ha̱ yaju̍ṣkṛtyai |
iḍa̱ ehyadi̍ta̱ ehi̱ sara̍sva̱tyehītya̍ha |
e̱tāni̱ vā a̍syai devanā̱māni̍ |
de̱va̱nā̱maire̱vainā̱māhva̍yati |
asā̱vehyasā̱vehyasā̱vehītya̍ha |
e̱tāni̱ vā a̍syai manuṣyanā̱māni̍ || 58 ||))

[[5-7-2]]

म॒नु॒ष्य॒ना॒मैरे॒वैना॒माह्व॑यति।
षट्थ सं॑पद्यन्ते।
षड्वा ऋ॒तव॑ः।
ऋ॒तुभि॑रे॒वैना॒माह्व॑यति।
अदि॑त्या उ॒ष्णीष॑म॒सीत्या॑ह।
य॒था य॒जुरे॒वैतत्।
वा॒युर॑स्यैड इत्या॑ह।
वा॒यु॒दे॒व॒त्यो॑ वै व॒त्सः।

पूषा त्वोपावसृजत्वित्याह।
पौष्णा वै देवतया पशवः॥ ५९॥

((manuṣyanāmairevaināmāhvayati ।
ṣattha sampadyante ।
ṣadvā ṛtavaḥ ।
ṛtubhirevaināmāhvayati ।
adityā uṣṇīṣamasītyaha ।
yathā yajurevaitat ।
vāyurasyaiḍa ityaha ।
vāyudevatyo vai vathsaḥ ।
pūṣā tvopāvasṛjatvityaha ।
pauṣṇā vai devatayā paśavaḥ ॥ 59 ॥))

[[5-7-3]]
स्वयैवैनं देवतयोपावसृजति।
अश्विभ्यां प्रदापयेत्याह।
अश्विनौ वै देवानां भिषजौ।
ताभ्यामेवास्मै भेषजं करोति।
यस्ते स्तनश्शशय इत्याह।
स्तौत्येवैनाम्।
उस्र घर्मꣳ शिꣳषोस्र घर्मं पाहि घर्माय शिꣳषेत्याह।
यथा ब्रूयादमुष्मै देहीति।
तादृगेव तत्।
बृहस्पतिस्त्वोपसीदत्वित्याह॥ ६०॥

((svayaivainam devatayopāvasṛjati ।
aśvibhyām pradāpayetyaha ।
aśvinau vai devānām bhiṣajau ।
tābhyamevāsmai bheṣajam karoti ।
yaste stanaśśaśaya ityaha ।
stautyevainām ।
usra gharmam śiṁṣosra gharmam pahi gharmāya śiṁṣetyaha ।
yathā brūyādamuṣmai dehīti ।
tādṛgeva tat ।
bṛhaspatistvopasīdatvityaha ॥ 60 ॥))

[[5-7-4]]
ब्रह्म वै देवानां बृहस्पतिः।

ब्रह्म॑णै॒वैना॒मुप॑सीदति।
दान॑वस्स्थ॒ पेर॑व॒ इत्या॑ह।
मेध्या॑ने॒वैना॑न्करोति।
वि॒ष्व॒ग्वृतो॒ लोहि॑ते॒नेत्या॑ह॒ व्यावृ॑त्यै।
अ॒श्विभ्या॑ं पिन्वस्व॒ सर॑स्वत्यै पिन्वस्व पू॒ष्णे पि॑न्वस्व॒ बृ॒ह॒स्पत॑ये पिन्व॒स्वेत्या॑ह।
ए॒ताभ्यो॒ ह्ये॑षा दे॒वता॑भ्यः पिन्व॑ते।
इन्द्रा॑य पिन्व॒स्वेन्द्रा॑य पिन्व॒स्वेत्या॑ह।
इन्द्र॑मे॒व भा॑ग॒धेये॑न॒ सम॑र्धयति।
द्विरिन्द्रा॒येत्या॑ह॥ ६१॥

((brahma̱ vai de̱vānā̱m bṛha̱spati̍ḥ |
brahma̍ṇa̱i̱vainā̱mupa̍sīdati |
dāna̍vasstha̱ pera̍va̱ ity̍āha |
medhyā̍ne̱vainā̍nkaroti |
vi̱ṣva̱gvṛto̱ lohi̍te̱netyā̍ha̱ vyāvṛ̍ttyai |
a̱śvibhyā̍m pinvasva̱ sara̍svatyai pinvasva pū̱ṣṇe pi̍nvasva̱ bṛha̱spata̍ye
pinva̱svetyā̍ha |
e̱tābhyo̱ hye̍ṣā de̱vatā̍bhya̱ḥ pinva̍te |
indrā̍ya pinva̱svendrā̍ya pinva̱svetyā̍ha |
indra̍me̱va bhā̍ga̱dheye̍na̱ sama̍rdhayati |
dvirindrā̱yetyā̍ha || 61 ||))

[[5-7-5]]
तस्मा॒दिन्द्रो॑ दे॒वता॑नां भूयिष्ठ॒भाक्त॑मः।
गा॒य॒त्रो॑ऽसि॒ त्रैष्टु॑भोऽसि॒ जाग॑तम॒सीति॑ शफोपय॒मानाद॑त्ते।
छन्दो॑भिरे॒वैना॒नाद॑त्ते।
स॒होजो॑ भा॒गेनोप॒मेहीत्या॑ह।
ऊ॒र्ज ए॒वैनं॑ भा॒गम॑कः।
अ॒श्विनौ॒ वा ए॒तद्य॒ज्ञस्य॒ शिर॑ः प्रति॒दध॑तावब्रूताम्।
आवाभ्या॑मे॒व पूर्वा॑भ्यां वष॑ड्क्रियाता॒ इति॑।
इन्द्रा॑श्विना॒ मधु॑नस्सार॒घस्येत्या॑ह।
अ॒श्विभ्या॑मे॒व पूर्वा॑भ्या॒ं वष॑ड्करोति।
अथो॑ अ॒श्विना॑वे॒व भा॑ग॒धेये॑न॒ सम॑र्धयति॥ ६२॥

((tasmā̱dindro̍ de̱vatā̍nā̱m bhūyiṣṭha̱bhākta̍maḥ |
gā̱ya̱tro̍'si̱ traiṣṭu̍bho'si̱ jāga̍tama̱sīti̍ śaphopaya̱mānāda̍tte |

chandóbhirevainānādátte |
sahorjo bhāgenopamehītyā̍ha |
ūrja evainaṁ bhāgamákaḥ |
aśvinau vā etadyajñasya śiráḥ pratidadhátāvabrūtām |
āvābhyā̍meva pūrvā̎bhyām vaṣáṭkriyātā iti̍ |
indrā̎śvinā madhúnassāraghasyetyā̍ha |
aśvibhyā̍meva pūrvā̎bhyām vaṣáṭkaroti |
athó aśvinā̍veva bhā̍gadheyéna samárdhayati || 62 ||))

[[5-7-6]]

घर्मं पात वसवो यजता वडित्याह।
वसूनेव भागधेयेन समर्धयति।
यद्वषड्कुर्यात्।
यातयामाऽस्य वषड्कारस्स्यात्।
यन्न वषड्कुर्यात्।
रक्षांसि यज्ञं हन्युः।
वडित्याह।
परोक्षमेव वषड्करोति।
नास्य यातयामा वषड्कारो भवति।
न यज्ञं रक्षांसि घ्नन्ति॥ ६३॥

((gharmaṃ pā̍ta vasavo yajátā vadityā̍ha |
vasúneva bhā̍gadheyéna samárdhayati |
yadvá̍ṣaṭkuryāt |
yātayámā'sya vaṣaṭkārassyā̎t |
yanna váṣaṭkuryāt |
rakṣā̎ṁsi yajñaṁ hányuḥ |
vadityā̍ha |
parokṣámeva vaṣáṭkaroti |
nāsyá yātayámā vaṣaṭkāro bhaváti |
na yajñaṁ rakṣā̎ṁsi ghnanti || 63 ||))

[[5-7-7]]

स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये जुहोमीत्याह।
यो वा अस्य पुण्यो रश्मिः।
स वृष्टिवनिः।
तस्मा एवैनं जुहोति।
मधु हविरसीत्याह।

स्वदयत्येवैनम्।
सूर्यस्य तपस्तपेत्याह।
यथा यजुरेवैतत्।
द्यावापृथिवीभ्यां त्वा परिगृह्णामीत्याह।
द्यावापृथिवीभ्यामेवैनं परिगृह्णाति॥ ६४॥

((svāhā tvā sūryasya raśmaye vṛṣṭivanaye juhomītyāha |
yo vā asya puṇyo raśmiḥ |
sa vṛṣṭivaniḥ |
tasmā evainaṃ juhoti |
madhu havirasītyāha |
svadayatyevainām |
sūryasya tapastapetyāha |
yathā yajurevaitat |
dyāvāpṛthivībhyāṃ tvā parigṛhṇāmītyāha |
dyāvāpṛthivībhyāmevainaṃ parigṛhṇāti || 64 ||))

[[5-7-8]]
अन्तरिक्षेण त्वोपयच्छामीत्याह।
अन्तरिक्षेणैवैनमुपयच्छति।
न वा एतं मनुष्यो भर्तुमर्हति।
देवानां त्वा पितृणामनुमतो भर्तुꣳ शकेयमित्याह।
देवैरेवैनं पितृभिरनुमत आदत्ते।
वि वा एनमेतदर्धयन्ति।
यत्पश्चात्प्रवृज्य पुरो जुह्वति।
तेजोऽसि तेजोऽनुप्रेहीत्याह।
तेज एवास्मिन्दधाति।
दिविस्पृङ्मा मा हिꣳसीरन्तरिक्षस्पृङ्मा मा हिꣳसीः पृथिविस्पृङ्मा मा हिꣳसीरित्याहाहिꣳसायै॥
६५॥

((antarikṣeṇa tvopayacchāmītyāha |
antarikṣeṇaivainamupayacchati |
na vā etaṃ manuṣyo bhartumarhati |
devānāṃ tvā pitṛṇāmanumato bhartuṃ śakeyamityāha |
devairevainaṃ pitṛbhiranumata ādatte |
vi vā enametadardhayanti |
yatpaścātpravṛjya puro juhvati |
tejo'si tejo'nuprehītyāha |

tejȧ e̱vāsmi̍ndadhāti ।
di̱vi̱spṛṅmā mȧ hiṁ̐sīrantarikṣa̱spṛṅmā mȧ hiṁ̐sīḥ pṛthivi̱spṛṅmā mȧ hiṁ̐sī̱rityā̱hāhiṁ̐sāyai ॥ 65 ॥))

[[5-7-9]]
सु॒वर॑सि सु॒वर्मे॑ यच्छ॒ दिवं॑ यच्छ दि॒वो मा॑ पा॒हीत्या॑ह।
आ॒शिष॑मे॒वैतामाशा॑ᳫस्ते।
शिरो॒ वा ए॒तद्य॒ज्ञस्य॑।
यत्प्र॑व॒र्ग्यः॑।
आ॒त्मा वा॒युः।
उ॒द्यत्य॑वातना॒मान्या॑ह।
आ॒त्मन्ने॒व य॒ज्ञस्य॒ शिर॒ः प्रति॑दधाति।
अन॑वानम्।
प्रा॒णाना॒ᳫ्ं संत॑त्यै।
पञ्चा॑ह॥ ६६॥

((suvȧrasi̱ suvȧrme yaccha̱ divaṁ yaccha di̱vo mȧ pā̱hītyȧha ।
ā̱śiṣȧme̱vaitāmāśȧ̈ste ।
śiro̱ vā e̱tadya̱jñasyȧ ।
yatprȧva̱rgyȧḥ ।
ā̱tmā vā̱yuḥ ।
u̱dyatyȧvātanā̱mānyȧha ।
ā̱tmanne̱va ya̱jñasya̱ śira̱ḥ pratȉdadhāti ।
anȧvānam ।
prā̱ṇānā̱m̐ saṁtȧtyai ।
pañcȧha ॥ 66 ॥))

[[5-7-10]]
पाङ्क्तो॑ य॒ज्ञः।
याव॑ाने॒व य॒ज्ञः।
तस्य॒ शिर॒ः प्रति॑दधाति।
अ॒ग्नये॑ त्वा॒ वसु॑मते॒ स्वाहेत्या॑ह।
अ॒सौ वा आ॑दि॒त्यो॑ऽग्निर्वसु॑मान्।
तस्मा॑ ए॒वैनं॑ जुहोति।
सोमा॑य त्वा रु॒द्रव॑ते॒ स्वाहेत्या॑ह।
च॒न्द्रमा॒ वै सोमो॑ रु॒द्रवान्।

तस्मा॑ ए॒वैनं॑ जुहोति।
वरु॑णाय त्वाऽऽदि॒त्यव॑ते॒ स्वाहे॒त्या॑ह॥ ६७॥

((pāṅktȯ ya̠jñaḥ |
yāvȧ̍ne̠va ya̠jñaḥ |
tasya̠ śira̠ḥ pratȉdadhāti |
a̠gnayë tvā̠ vasȕmate̠ svāhetyȁha |
a̠sau vā ȁdi̠työ'gnirvasȕmān |
tasmȁ e̠vainaṁ̍ juhoti |
somȁya tvā ru̠dravȧte̠ svāhetyȁha |
ca̠ndramā̠ vai somȯ ru̠dravāṅ |
tasmȁ e̠vainaṁ̍ juhoti |
varȕṇāya tvā''di̠tyavȧte̠ svāhetyȁha || 67 ||))

[[5-7-11]]
अ॒प्सु वै वरु॑ण आदि॒त्यवा॑न्।
तस्मा॑ ए॒वैनं॑ जुहोति।
बृ॒ह॒स्पत॑ये त्वा वि॒श्वदे॑व्यावते॒ स्वाहे॒त्या॑ह।
ब्रह्म॒ वै दे॒वानां॒ बृ॒ह॒स्पति॑ः।
ब्रह्म॑ण ए॒वैनं॑ जुहोति।
स॒वि॒त्रे त्व॑र्भु॒मते॑ विभु॒मते॑ प्रभु॒मते॒ वाज॑वते॒ स्वाहे॒त्या॑ह।
सं॒व॒थ्स॒रो वै स॑वि॒तुर्भु॒मान्वि॑भु॒मान्प्र॑भु॒मान्वाज॑वान्।
तस्मा॑ ए॒वैनं॑ जुहोति।
य॒माय॒ त्वाऽङ्गि॑रस्वते पि॒तृ॒मते॒ स्वाहे॒त्या॑ह।
प्रा॒णो वै य॒मोऽङ्गि॑रस्वान्पि॒तृ॒मान्॥ ६८॥

((a̠psu vai varȕṇa ādi̠tyavāṅ |
tasmȁ e̠vainaṁ̍ juhoti |
bṛ̠ha̠spatȧye tvā vi̠śvadëvyāvate̠ svāhetyȁha |
brahma̠ vai de̠vānā̠ṁ bṛ̠ha̠spatȉḥ |
brahmȧṇa e̠vainaṁ̍ juhoti |
sa̠vi̠tre tvȧrbhu̠matë vibhu̠matë prabhu̠mate̠ vājȧvate̠ svāhetyȁha |
sa̠ṁva̠thsa̠ro vai sȧvi̠turbhu̠mānvȉbhu̠mānprȧbhu̠mānvājȧvān |
tasmȁ e̠vainaṁ̍ juhoti |
ya̠māya̠ tvā'ṅgȉrasvate pi̠tṛ̠mate̠ svāhetyȁha |
prā̠ṇo vai ya̠mo'ṅgȉrasvānpi̠tṛ̠mān || 68 ||))

[[5-7-12]]
तस्मा॑ ए॒वैनं॑ जुहोति।

एताभ्य एवैनं देवताभ्यो जुहोति।
दश संपद्यन्ते।
दशाक्षरा विराट्।
अन्नं विराट्।
विराजैवान्नाद्यमवरुन्धे।
रौहिणाभ्यां वै देवास्सुवर्गं लोकमायन्न्।
तद्रौहिणयो रौहिणत्वम्।
यद्रौहिणौ भवतः।
रौहिणाभ्यामेव तद्यजमानस्सुवर्गं लोकमेति।
अहर्ज्योतिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषाꣳ स्वाहा रात्रिर्ज्योतिः केतुना जुषताꣳ
सुज्योतिर्ज्योतिषाꣳ स्वाहेत्याह।
आदित्यमेव तदमुष्मिँल्लोकेऽह्ना परस्ताद्दाधार।
रात्रिया अवस्तात्।
तस्मादसावादित्योऽमुष्मिँल्लोकेऽहोरात्राभ्यां धृतः॥ ६९॥
मनुष्यनामानि पशवस्सीदत्वित्याहेन्द्रायेत्याहार्धयति घ्नन्ति गृह्णात्यहिꣳसायै पञ्चाहादित्यवते
स्वाहेत्याह पितृमानेति चत्वारि च॥ ७॥

((tasma̍ e̱vaina̍ṁ juhoti |
e̱tābhya̍ e̱vaina̍ṁ de̱vatā̎bhyo juhoti |
daśa̱ sa̱ṁpa̍dyante |
daśā̎kṣarā vi̱rāṭ |
anna̍ṁ vi̱rāṭ |
vi̱rāja̱ivānnādya̱mava̍rundhe |
rau̱hi̱ṇābhyā̱ṁ vai de̱vāssu̍va̱rgaṁ lo̱kamā̍yann |
tadrau̍hi̱ṇayo̍ rauhi̱ṇatvam |
yadrau̍hi̱ṇau bhava̍taḥ |
rau̱hi̱ṇābhyā̍me̱va tadyaja̍mānassuva̱rgaṁ lo̱kame̍ti |
aha̱rjyoti̍ḥ ke̱tunā̍ juṣatāꣳ sujyo̱tirjyoti̍ṣā̱ꣳ svāhā̱ rātri̱rjyoti̍ḥ ke̱tunā̍ juṣatāꣳ
sujyo̱tirjyoti̍ṣā̱ꣳ svāhetyā̍ha |
ā̱di̱tyame̱va tada̱muṣmi̍ꣳllo̱ke'hnā̍ pa̱rastā̎ddādhāra |
rātri̍yā a̱vastā̎t |
tasmā̍da̱sāvā̍di̱tyo̍'muṣmi̍ꣳllo̱ke̍'horā̱trābhyā̎ṁ dhṛ̱taḥ || 69 ||
ma̱nu̱ṣya̱nā̱māni̍ pa̱śava̍ssīda̱tvitya̱hendrā̱yetyā̍hārdhayati ghnanti
gṛ̱hṇā̱tyahiꣳ̍sāya̱i pañca̍hādi̱tyava̍te̱ svāhetyā̍ha pitṛ̱māne̍ti ca̱tvāri̍ ca || 7 ||))

[[5-8-1]]
विश्वा आशा दक्षिणसदित्याह।

विश्वा॑ने॒व दे॒वान्प्री॑णाति।
अथो॒ दुरि॑ष्ट्या ए॒वैनं॑ पाति।
विश्वा॑न्दे॒वान॑या॒डि॒हेत्या॑ह।
विश्वा॑ने॒व दे॒वान्भा॑ग॒धेये॑न॒ सम॑र्धयति।
स्वाहा॑कृतस्य घ॒र्मस्य॒ मधोः॑ पिबतमश्वि॒नेत्या॑ह।
अ॒श्विना॑वे॒व भा॑ग॒धेये॑न॒ सम॑र्धयति।
स्वाहा॒ऽग्नये॑ य॒ज्ञिया॑य॒ शं यजु॑र्भि॒रित्या॑ह।
अ॒भ्येवैनं॑ घारयति।
अथो॑ ह॒विरे॒वाकः॑॥ ७०॥

((viśvā̠ āśā̍ dakṣiṇa̠sadityā̍ha |
viśvā̍ne̠va de̠vānprī̍ṇāti |
atho̠ duri̍ṣṭyā e̠vainaṃ̍ pāti |
viśvā̍nde̠vāna̍yā̠ḍi̠hetyā̍ha |
viśvā̍ne̠va de̠vānbhā̍ga̠dheye̍na̠ sama̍rdhayati |
svāhā̍kṛtasya gha̠rmasya̠ madhȍḥ pibatamaśvi̠netyā̍ha |
a̠śvinā̍ve̠va bhā̍ga̠dheye̍na̠ sama̍rdhayati |
svāhā̠'gnaye̍ ya̠jñiyā̍ya̠ śaṃ yaju̍rbhi̠rityā̍ha |
a̠bhye̍vainaṃ̍ ghārayati |
atho̍ ha̠vire̠vāka̍ḥ || 70 ||))

[[5-8-2]]
अ॒श्विना॑ घ॒र्मं पा॑तꣳ॒ हार्दि॑वान॒मह॑र्दि॒वाभि॑रू॒तिभि॒रित्या॑ह।
अ॒श्विना॑वे॒व भा॑ग॒धेये॑न॒ सम॑र्धयति।
अनु॑ वां॒ द्यावा॑पृथि॒वी मꣳ॑साता॒मित्या॒हानु॑मत्यै।
स्वाहेन्द्रा॑य॒ स्वाहेन्द्रा॒वडित्या॑ह।
इन्द्रा॑य॒ हि पु॒रो हू॒यते॑।
आ॒श्राव्या॑ह घ॒र्मस्य॑ य॒जेति॑।
वष॑ट्कृते जु॒होति।
रक्ष॑सा॒मप॑हत्यै।
अनु॑यजति स्व॒गाकृ॑त्यै।
घ॒र्मम॑पातमश्वि॒नेत्या॑ह॥ ७१॥

((aśvi̍nā gha̠rmaṃ pā̍taṁ̍ hārdivā̠namaha̍rdi̠vābhi̍rū̠tibhi̠rityā̍ha |
a̠śvinā̍ve̠va bhā̍ga̠dheye̍na̠ sama̍rdhayati |
anu̍ vā̠ṃ dyāvā̍pṛthi̠vī maṁ̍sātā̠mityā̠hānu̍matyai |

svāhendrảya̱ svāhendrā̱vaḍityảha ।
indrảya̱ hi pu̱ro hū̱yatë ।
ā̱śrāvyảha gha̱rmasyȧ ya̱jeti̍ ।
vaṣȧṭkṛte juhoti ।
rakṣȧsā̱mapȧhatyai ।
anủyajati sva̱gākṛ̍tyai ।
gha̱rmamȧpātamaśvi̱netyảha ॥ 71 ॥))

[[5-8-3]]

पूर्वँमे̱वोदि̱तम्।
उत्त॑रेणा̱भिगृ॑णाति।
अनु॑ वा॒ं द्यावा॑पृथि̱वी अ॑मꣳसाता॒मित्या॒हानु॑मत्यै।
तं प्रा॒व्यं॑ यथा̱वण्णमो॑ दि̱वे नम॑ः पृथि̱व्या इत्या॑ह।
य̱था य̱जुरे̱वैतत्।
दि̱वि धा॑ इ̱मं य॒ज्ञं य॒ज्ञमि̱मं दि̱वि धा इत्या॑ह।
सु̱व॒र्गमे̱वैनं॑ लो̱कं ग॑मयति।
दिवं॑ गच्छा̱न्तरि॑क्षं गच्छ पृथि̱वीं ग̱च्छेत्या॑ह।
ए̱ष्वे॑वैनं॑ लो̱केषु प्रति॑ष्ठापयति।
पञ्च॑ प्र̱दिशो॑ ग̱च्छेत्या॑ह॥ ७२॥

((pūrvȧme̱vodi̱tam ।
uttȧreṇā̱bhigṛ̍ṇāti ।
anủ vā̱ṃ dyāvȧpṛthi̱vī ȧmaꣳsātā̱mityā̱hānủmatyai ।
ta̱ṃ prā̱vyaṃ̍ yathā̱vaṇṇamȯ di̱ve namȧḥ pṛthi̱vyā ityảha ।
ya̱thā̱ ya̱jure̱vaitat ।
di̱vi dhȧ i̱maṃ ya̱jñaṃ ya̱jñami̱maṃ di̱vi dhā̱ ityảha ।
su̱va̱rgame̱vainaṃ̍ lo̱kaṃ gȧmayati ।
divaṃ̍ gacchā̱ntarỉkṣaṃ gaccha pṛthi̱vīṃ ga̱cchetyảha ।
e̱ṣvėvainaṃ̍ lo̱keṣu̱ prati̍ṣṭhāpayati ।
pañcȧ pra̱diśȯ ga̱cchetyảha ॥ 72 ॥))

[[5-8-4]]

दि̱क्ष्वे॑वैन̱ं प्रति॑ष्ठापयति।
दे̱वान्घ॑र्म̱पान्ग॑च्छ पि̱तॄन्घ॑र्म̱पान्ग̱च्छेत्या॑ह।
उ̱भये॑ष्वे̱वैन̱ं प्रति॑ष्ठापयति।
यत्पिन्व॑ते।
वर्षु॑कः प̱र्जन्यो॑ भवति।
तस्मा॒त्पिन्व॑मान̱ः पुण्य॑ः।

यत्प्राङ्पिन्व॑ते।

तद्दे॒वाना᳚म्।

यद्द॑क्षि॒णा।

तत्पि॑तॄ॒णाम्॥ ७३॥

((di̱kṣvėvainam̱ prati̍ṣṭhāpayati |
de̱vāngharmȧpāngȧccha pi̱tṝngharmȧpānga̱cchetyȧha |
u̱bhayeṣve̱vainam̱ prati̍ṣṭhāpayati |
yatpinvȧte |
varṣu̇kaḥ pa̱rjanyȯ bhavati |
tasmā̱tpinvȧmāna̱ḥ puṇyȧḥ |
yatprāṅpinvȧte |
tadde̱vānā̈m |
yaddȧkṣi̱ṇā |
tatpi̍tṛ̱ṇām || 73 ||))

[[5-8-5]]

यत्प्र॒त्यक्।

तन्म॑नु॒ष्या॑नाम्।

यदुद॑ङ्।

तद्रु॒द्राणा᳚म्।

प्राञ्च॒मुद॑ञ्चं पिन्वयति।

दे॒व॒त्राऽक॑ः।

अथो॒ खलू॑।

सर्वा॒ अनु॒ दिश॑ः पिन्वयति।

सर्वा॒ दिश॒स्सम॑धन्ते।

अ॒न्तः॒प॒रि॒धि पि॑न्वयति॥ ७४॥

((yatpra̱tyak |
tanmȧnu̱ṣyȧnām|
yadudȧṅ |
tadru̱drāṇā̈m |
prāñca̱mudȧñcam̱ pinvayati |
de̱va̱trā'kȧḥ |
atho̱ khalu̇ |
sarvā̱ anu̱ diśȧḥ pinvayati |
sarvā̱ diśa̱ssamėdhante |
a̱nta̱ḥpa̱ri̱dhi pi̍nvayati || 74 ||))

[[5-8-6]]

तेजसोऽस्कन्दाय।
इषे पीपिह्यूर्जे पीपिहीत्याह।
इषमेवोर्जं यजमाने दधाति।
यजमानाय पीपिहीत्याह।
यजमानायैवैतामाशिषमाशास्ते।
मह्यं ज्यैष्ठ्याय पीपिहीत्याह।
आत्मन एवैतामाशिषमाशास्ते।
त्विष्यै त्वा द्युम्नाय त्वेन्द्रियाय त्वा भूत्यै त्वेत्याह।
यथा यजुरेवैतत्।
धर्मोऽसि सुधर्मा मे न्यस्मे ब्रह्माणि धारयेत्याह॥ ७५॥

((tejaso'skandāya |
iṣe pīpihyūrje pīpihītyāha |
iṣamevorjaṃ yajamāne dadhāti |
yajamānāya pīpihītyāha |
yajamānāyaivaitāmāśiṣamāśāste |
mahyaṃ jyaiṣṭhyāya pīpihītyāha |
ātmana evaitāmāśiṣamāśāste |
tviṣyai tvā dyumnāya tvendriyāya tvā bhūtyai tvetyāha |
yathā yajurevaitat |
dharma'si sudharmā me nyasme brahmāṇi dhārayetyāha || 75 ||))

[[5-8-7]]

ब्रह्मन्नेवैनं प्रतिष्ठापयति।
नेत्त्वा वातस्स्कन्दयादिति यद्यभिचरेत्।
अमुष्य त्वा प्राणे सादयाम्यमुना सह निरर्थं गच्छेति ब्रूयाद्यं द्विष्यात्।
यमेव द्वेष्टि।
तेनैनꣳ सह निरर्थं गमयति।
पूष्णे शरसे स्वाहेत्याह।
या एव देवता हुतभागाः।
ताभ्य एवैनं जुहोति।
ग्रावभ्यस्स्वाहेत्याह।
या एवान्तरिक्षे वाचः॥ ७६॥

((brahmánnẹvainaṃ pratíṣṭhāpayati |
nettvā̱ vātásskạndayā̱diti yadyábhi̱carè̱t |
ạmuṣyá tvā prā̱ṇe sádayāmyạmuná sạha nírạrthaṃ gạccheti brūyā̱dyaṃ dvi̱ṣyāt |
yamẹva dveṣṭí |
tenáinaṁ sạha nírạrthaṃ gámayati |
pū̱ṣṇe śaráse̱ svāhetyáha |
yā ẹva dẹvatá hụtabhágāḥ |
tābhyá ẹvainaṁ juhoti |
grāvábhyạssvāhetyáha |
yā ẹvāntaríkṣe̱ vācáḥ || 76 ||))

[[5-8-8]]

ताभ्य॑ ए॒वैनं॑ जुहोति।
प्र॒ति॒रेभ्य॒स्स्वाहेत्या॑ह।
प्रा॒णा वै दे॒वाः प्र॑ति॒राः।
तेभ्य॑ ए॒वैनं॑ जुहोति।
द्यावा॑पृथि॒वीभ्य॒ꣳ॒ स्वाहेत्या॑ह।
द्यावा॑पृथि॒वीभ्या॑मे॒वैनं॑ जुहोति।
पि॒तृभ्यो॑ घर्म॒पेभ्य॒स्स्वाहेत्या॑ह।
ये वै यज्वा॑नः।
ते पि॒तरो॑ घर्म॒पाः।
तेभ्य॑ ए॒वैनं॑ जुहोति॥ ७७॥

((tābhyá ẹvainaṁ juhoti |
prạtịrebhyạssvāhetyáha |
prā̱ṇā vai dẹvāḥ prátịrāḥ |
tebhyá ẹvainaṁ juhoti |
dyāvápṛthịvībhyạṁ̱ svāhetyáha |
dyāvápṛthịvībhyámẹvainaṁ juhoti |
pịtṛbhyó ghạrmạpebhyạssvāhetyáha |
ye vai yajvánaḥ |
te pịtaró ghạrmạpāḥ |
tebhyá ẹvainaṁ juhoti || 77 ||))

[[5-8-9]]

रु॒द्राय॑ रु॒द्रहो॑त्रे स्वाहेत्या॑ह।
रु॒द्रमे॒व भा॑ग॒धेये॑न॒ सम॑र्धयति।
स॒र्व॑त॒स्सम॑नक्ति।
स॒र्व॑त ए॒व रु॒द्रं नि॒रव॑दयते।

उदञ्चं निरस्यति।
एषा वै रुद्रस्य दिक्।
स्वायामेव दिशि रुद्रं निरवदयते।
अप उपस्पृशति मेध्यत्वाय।
नान्वीक्षेत।
यदन्वीक्षेत॥ ७८॥

((rudrāya rudrahotre svāhetyāha |
rudrameva bhāgadheyena samardhayati |
sarvatassamanakti |
sarvata eva rudram niravadayate |
udañcam nirasyati |
eṣā vai rudrasya dik |
svāyameva diśi rudram niravadayate |
apa upaspṛśati medhyatvāya |
nānvīkṣeta |
yadanvīkṣeta || 78 ||))

[[5-8-10]]
चक्षुरस्य प्रमायुकꣳ स्यात्।
तस्मान्नान्वीक्ष्यः।
अपीपरो माऽह्नो रात्रियै मा पाह्येषा ते अग्ने समित्तया समिध्यस्वायुर्मे दा वर्चसा माऽऽञ्जीरित्याह।
आयुरेवास्मिन्वर्चो दधाति।
अपीपरो मा रात्रिया अह्नो मा पाह्येषा ते अग्ने समित्तया समिध्यस्वायुर्मे दा वर्चसा
माऽऽञ्जीरित्याह।
आयुरेवास्मिन्वर्चो दधाति।
अग्निर्ज्योतिर्ज्योतिरग्निस्स्वाहा सूर्यो ज्योतिर्ज्योतिस्सूर्यः स्वाहेत्याह।
यथा यजुरेवैतत्।
ब्रह्मवादिनो वदन्ति।
होतव्यमग्निहोत्रां३ न होतव्या३मिति॥ ७९॥

((cakṣurasya pramāyukaꣳ syāt |
tasmānnānvīkṣyaḥ |
apiparo mā'hno rātriyai mā pāhyeṣā te agne samittayā samidhyasvāyurme dā
varcasā mā''ñjīrityāha |
āyurevāsminvarco dadhāti |
apiparo mā rātriyā ahno mā pāhyeṣā te agne samittayā samidhyasvāyurme dā

varcásā mā''ñjīrityā́ha ।
āyúrevāsminvarcó dadhāti ।
agnirjyotirjyotiragnissvāhā sūryo jyotirjyotissūryaḥ svāhetyā́ha ।
yathā yajurevaitat ।
brahmavādinó vadanti ।
hotavyámagnihotrām 3 na hótavyā3miti ॥ 79 ॥))

[[5-8-11]]

यद्यजुषा जुहुयात्।
अयथापूर्वमाहुती जुहुयात्।
यन्न जुहुयात्।
अग्निः पराभवेत्।
भूस्स्वाहेत्येव होतव्यम्।
यथापूर्वमाहुती जुहोति।
नाग्निः पराभवति।
हुतꣳ हविर्मधु हविरित्याह।
स्वदयत्येवैनम्।
इन्द्रतमेऽग्नावित्याह॥ ८०॥

((yadyajúṣā juhuyāt ।
ayáthāpūrvamāhútī juhuyāt ।
yanna júhuyāt ।
agniḥ parā́bhavet ।
bhūssvāhetyeva hótavyam̈ ।
yathāpūrvamāhútī juhotí ।
nāgniḥ parā́bhavati ।
hutam̐ havirmadhú havirityā́ha ।
svadayátyevainam̈ ।
indrátame'gnāvityā́ha ॥ 80 ॥))

[[5-8-12]]

प्राणो वा इन्द्रतमोऽग्निः।
प्राण एवैनमिन्द्रतमेऽग्नौ जुहोति।
पिता नोऽसि मा मा हिꣳसीरित्याहाहिꣳसायै।
अश्याम ते देव घर्म मधुमतो वाजवतः पितुमत इत्याह।
आशिषमेवैतामाशास्ते।
स्वधाविनोऽशीमहि त्वा मा मा हिꣳसीरित्याहाहिꣳसायै।

तेज॑सा॒ वा ए॒ते व्यृ॑ध्यन्ते।
ये प्र॑व॒र्ग्ये॑ण॒ चर॑न्ति।
प्राश्ञ॑न्ति।
तेज॑ ए॒वात्मन्द॑धते॥ ८१ ॥

((prā̱ṇo vā indra̍tamo̱'gniḥ I
prā̱ṇa e̱vaina̱mindra̍tame̱'gnau ju̍hoti I
pi̱tā no̍'si̱ mā mā̍ him̐sī̱rityā̱hāhim̐sāyai I
a̱śyāmā̍ te deva gharma̱ madhu̍mato̱ vāja̍vataḥ pitu̱mata̱ ityā̍ha I
ā̱śiṣa̍me̱vaitāmāśā̎ste I
sva̱dhā̱vino̍'śī̱mahi̍ tvā̱ mā mā̍ him̐sī̱rityā̱hāhim̐sāyai I
teja̍sā̱ vā e̱te vyṛ̍dhyante I
ye pra̍va̱rgye̍ṇa̱ cara̍nti I
prāśña̍nti I
teja̍ e̱vātmanda̍dhate II 81 II))

[[5-8-13]]
सं॒व॒थ्स॒रं न मा॒ꣳसम॑श्ञीयात्।
न रा॒मामुपे॑यात्।
न मृ॒न्मये॑न पिबेत्।
नास्य॑ रा॒म उच्छि॑ष्टं पिबेत्।
तेज॑ ए॒व तथ्सꣳश्य॑ति।
दे॒वा॒सु॒रास्संय॑त्ता आसन्न्।
ते दे॒वा वि॑जय॒मु॑पयन्त॑ः।
वि॒भ्राजि॑ सौ॒र्ये ब्रह्म॒ संन्य॑दधत।
यत्किंच॑ दिवाकी॒र्त्य॑म्।
तदे॒तेनै॒व व्र॒तेना॑गोपायत्।
तस्मा॑दे॒तद्व्र॒तं चा॒र्य॑म्।
तेज॑सो गोपी॒थाय॑।
तस्मा॑दे॒तानि॒ यजूꣳ॑षि वि॒भ्राज॑स्सौ॒र्य॑स्येत्या॑हुः।
स्वाहा॑ त्वा॒ सूर्य॑स्य र॒श्मिभ्य॒ इति॑ प्रा॒तस्सꣳ सा॑दयति।
स्वाहा॑ त्वा॒ नक्ष॑त्रेभ्य॒ इति॑ सा॒यम्।
ए॒ता वा ए॒तस्य॑ दे॒वता॑ः।
ताभि॑रे॒वैन॒ꣳ सम॑र्धयति॥ ८२ ॥

अकरश्विनेत्याह प्रदिशो गच्छेत्याह पितृणामन्तःपरिधि पिन्वयति धारयेत्याह वाचो घर्मपास्तेभ्य एवैनं जुहोत्यन्वीक्षेत होतव्या३मित्यग्नावित्याह दधतेऽगोपायथ्सप्त च॥ ८॥

((saṃvathsaraṃ na māṃ̐samaśñīyāt |
na rāmāmupeyāt |
na mṛnmayena pibet |
nāsya rāma ucchiṣṭaṃ pibet |
teja eva tathsaṃ̐śyati |
devāsurāssaṃyattā āsann |
te devā vijayamupayantaḥ |
vibhrāji saurye brahma saṃnyadadhata |
yatkiṃca divākīrtyam |
tadetenaiva vratenāgopāyat |
tasmādetadvrataṃ cāryam |
tejaso gopīthāya |
tasmādetāni yajūṃ̐ṣi vibhrājassauryasyetyāhuḥ |
svāhā tvā sūryasya raśmibhya iti prātassaṃ̐ sādayati |
svāhā tvā nakṣatrebhya iti sāyam |
etā vā etasya devatāḥ |
tābhirevainaṃ̐ samardhayati || 82 ||
akaraśvinetyāha pradiśo gacchetyāha pitṛṇāmantaḥparidhi pinvayati dhārayetyāha vāco gharmapāstebhya evainaṃ juhotyanvīkṣeta hotavyā3mityagnāvityāha dadhate'gopāyathsapta ca || 8 ||))

[[5-9-1]]
घर्म या ते दिवि शुगिति तिस्र आहुतीर्जुहोति।
छन्दोभिरेवास्यैभ्यो लोकेभ्यश्शुचमवयजते।
इयत्यग्रे जुहोति।
अथेयत्यथेयति।
त्रय इमे लोकाः।
एभ्य एव लोकेभ्यश्शुचमवयजते।
अनु नोऽद्यानुमतिरित्याहानुमत्यै।
दिवस्त्वा परस्पाया इत्याह।
दिव एवेमाँल्लोकान्दाधार।
ब्रह्मणस्त्वा परस्पाया इत्याह॥ ८३॥

((gharma yā te divi śugiti tisra āhutīrjuhoti |
chandobhirevāsyaibhyo lokebhyaśśucamavayajate |
iyatyagre juhoti |
atheyatyatheyati |

trayȧ i̱me lo̱kāḥ ।
e̱bhya e̱va lo̱kebhya̱śśuca̱mavȧyajate ।
anu̇ no̱'dyānu̇mati̱rityā̱hānu̇matyai ।
di̱vastvȧ para̱spāyā̱ ityȧha ।
di̱va e̱vemām̐llo̱kāndȧdhāra ।
brahmȧṇastvā para̱spāyā̱ ityȧha ॥ 83 ॥))

[[5-9-2]]

ए॒ष्वे॑व लो॒के॒षु॑ प्र॒जा दा॑धार।
प्रा॒णस्य॑ त्वा प॒र॒स्पाया॒ इत्या॑ह।
प्र॒जास्वे॒व प्रा॒णान्दा॑धार।
शिरो॒ वा ए॒तद्य॒ज्ञस्य॑।
यत्प्र॑व॒र्ग्यः॑।
अ॒सौ खलु॒ वा आ॑दि॒त्यः प्र॑व॒र्ग्यः॑।
तं यद्द॑क्षि॒णा प्र॒त्यञ्च॒मुद॑ञ्चमुद्वा॒सये॑त्।
जि॒ह्मं य॒ज्ञस्य॒ शिरो॑ हरेत्।
प्राञ्च॒मुद्वा॑सयति।
पु॒रस्ता॑दे॒व य॒ज्ञस्य॒ शिरः॒ प्रति॑दधाति॥ ८४॥

((e̱ṣveva lo̱keṣu̇ pra̱jā dȧdhāra ।
prā̱ṇasyȧ tvā para̱spāyā̱ ityȧha ।
pra̱jāsve̱va prā̱ṇāndȧdhāra ।
śiro̱ vā e̱tadya̱jñasyȧ ।
yatprȧva̱rgyȧḥ ।
a̱sau khalu̱ vā ȧdi̱tyaḥ prȧva̱rgyȧḥ ।
taṃ yaddȧkṣi̱ṇā pra̱tyañca̱mudȧñcamudvā̱sayë̱t ।
ji̱hmaṃ ya̱jñasya̱ śirȯ haret ।
prāñca̱mudvȧsayati ।
pu̱rastȧde̱va ya̱jñasya̱ śira̱ḥ pratiˈdadhāti ॥ 84 ॥))

[[5-9-3]]

प्राञ्च॒मुद्वा॑सयति।
तस्मा॑द॒सावा॑दि॒त्यः पु॒रस्ता॒दुदे॑ति।
श॒फो॒पय॒मान्धवि॒त्रा॒णि धृ॒ष्टी॒ इत्य॒न्वव॑हरन्ति।
सात्मा॑नम॒मे॒वैन॒ꣳ सत॑नुं करोति।
सात्मा॒ऽमुष्मिँ॑ल्लो॒के भ॑वति।
य ए॒वं वेद॑।

औदु॑म्बराणि भवन्ति।
ऊर्ग्वा उ॑दु॒म्बर॑ः।
ऊर्ज॑मे॒वाव॑रुन्धे।
वर्त्म॑ना॒ वा अ॒न्वित्य॑॥ ८५॥

((prāñca̱mudva̍sayati |
tasma̍da̱sāva̍di̱tyaḥ pu̱rastā̱dude̍ti |
śa̱pho̱pa̱ya̱māndha̱vitrā̍ṇi̱ dhṛṣṭī̱ itya̱nvava̍haranti |
sātma̍name̱vaina̱m̐ sata̍nuṃ karoti |
sātmā̱'muṣmi̍m̐llo̱ke bha̍vati |
ya e̱vaṃ veda̍ |
audu̍mbarāṇi bhavanti |
ūrgvā u̍du̱mbara̍ḥ |
ūrja̍me̱vāva̍rundhe |
vartma̍nā̱ vā a̱nvitya̍ || 85 ||))

[[5-9-4]]
य॒ज्ञꣳ रक्षाꣳ॑सि जिघाꣳसन्ति।
साम्ना॓ प्रस्तो॒ताऽन्ववै॑ति।
साम॒ वै र॑क्षो॒हा।
रक्ष॑सा॒मप॑हत्यै।
त्रिर्नि॒धन॒मुपै॑ति।
त्रय॑ इ॒मे लो॒काः।
ए॒भ्य ए॒व लो॒केभ्यो॒ रक्षा॒ꣳ॒स्यप॑हन्ति।
पुरु॑षःपुरुषो नि॒धन॒मुपै॑ति।
पुरु॑षःपुरुषो॒ हि र॑क्ष॒स्वी।
रक्ष॑सा॒मप॑हत्यै॥ ८६॥

((ya̱jñam̐ rakṣām̐̍si jighām̐santi |
sāmnā̎ prasto̱tā'nvavai̍ti |
sāma̱ vai ra̍kṣo̱hā |
rakṣa̍sā̱mapa̍hatyai |
trirni̱dhana̱mupai̍ti |
traya̍ i̱me lo̱kāḥ |
e̱bhya e̱va lo̱kebhyo̱ rakṣā̱m̱̐syapa̍hanti |
puru̍ṣaḥpuruṣo ni̱dhana̱mupai̍ti |
puru̍ṣaḥpuruṣo̱ hi ra̍kṣa̱svī |
rakṣa̍sā̱mapa̍hatyai || 86 ||))

[[5-9-5]]

यत्पृथिव्यामुद्वासयेत्।
पृथिवीꣳ शुचाऽर्पयेत्।
यदप्सु।
अपश्शुचाऽर्पयेत्।
यदोषधीषु।
ओषधीश्शुचाऽर्पयेत्।
यद्वनस्पतिषु।
वनस्पतीञ्छुचाऽर्पयेत्।
हिरण्यं निधायोद्वासयति।
अमृतं वै हिरण्यम्॥ ८७॥

((yatpṛthivyāmudvāsayet |
pṛthivīṁ śucā'rpayet |
yadaphsu |
apaśśucā'rpayet |
yadoṣadhīṣu |
oṣadhīśśucā'rpayet|
yadvanaspatiṣu |
vanaspatīñchucā'rpayet |
hiraṇyaṃ nidhāyodvāsayati |
amṛtaṃ vai hiraṇyam || 87 ||))

[[5-9-6]]

अमृत एवैनं प्रतिष्ठापयति।
वल्गुरसि शंयुधाया इति त्रिः परिषिञ्चन्पर्येति।
त्रिवृद्वा अग्निः।
यावानेवाग्निः।
तस्य शुचꣳ शमयति।
त्रिः पुनः पर्येति।
षट्थ संपद्यन्ते।
षड्वा ऋतवः।
ऋतुभिरेवास्य शुचꣳ शमयति।
चतुस्स्रक्तिर्नाभिर्ऋतस्येत्याह॥ ८८॥

((a̱mṛta̍ e̱vainam̱ prati̍ṣṭhāpayati ।
va̱lgura̍si śa̱myudha̍yā̱ iti̱ triḥ pa̍riṣi̱ñcanparye̍ti ।
tri̱vṛdvā a̱gniḥ ।
yāva̍ne̱vāgniḥ ।
tasya̱ śucam̐ śamayati ।
triḥ puna̱ḥ parye̍ti ।
ṣaṭtha sam̱pa̍dyante ।
ṣa̱dvā ṛ̱tava̍ḥ ।
ṛ̱tubhi̍re̱vāsya̱ śucam̐ śamayati ।
catu̍ssrakti̱rnābhi̍rṛ̱tasyetya̍ha ॥ 88 ॥))

[[5-9-7]]

इ॒यं वा ऋ॒तम्।
तस्या॑ ए॒ष ए॒व नाभिः॑।
यत्प्र॑व॒र्ग्यः॑।
तस्मा॑दे॒वमा॑ह।
सदो॑ वि॒श्वायु॒रित्या॑ह।
सदो॒ हीयम्।
अप॒ द्वेषो॒ अप॒ ह्वर॒ इत्या॑ह॒ भ्रातृ॑व्यापनुत्यै।
घ॒र्मैतत्तेऽन्न॑मे॒तत्पुरी॑ष॒मिति॑ द॒ध्ना मधु॑मि॒श्रेण॑ पूरयति।
ऊर्ग्वा अ॒न्नाद्यं॑ दधि॑।
ऊ॒र्जैवैन॑म॒न्नाद्ये॑न॒ सम॑र्धयति॥ ८९॥

((i̱yam̱ vā ṛ̱tam ।
tasya̍ e̱ṣa e̱va nābhi̍ḥ ।
yatpra̍va̱rgya̍ḥ ।
tasmā̍de̱vamā̍ha ।
sado̍ vi̱śvāyu̱rityā̍ha ।
sado̱ hīyam ।
apa̱ dveṣo̱ apa̱ hvara̱ ityā̍ha̱ bhrātṛ̍vyāpanutyai ।
gharmai̱tatte'nna̍me̱tatpurī̍ṣa̱miti̍ da̱dhnā ma̍dhumi̱śreṇa̍ pūrayati ।
ūrgvā a̱nnādyam̱ dadhi̍ ।
ū̱rjaivaina̍ma̱nnādye̍na̱ sama̍rdhayati ॥ 89 ॥))

[[5-9-8]]

अन॑शनायुको भवति।
य ए॒वं वेद॑।
रन्ति॒र्नामा॑सि दि॒व्यो ग॑न्ध॒र्व इत्या॑ह।
रू॒पमे॒वास्यै॒तन्म॑हि॒मान॒ꣳ रन्ति॑ं ब॒न्धुता॑ं व्याच॑ष्टे।

समहमायुषा सं प्राणेनेत्याह।
आशिषमेवैतामाशास्ते।
व्यसौ योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह।
अभिचार एवास्यैषः।
अचिक्रदद्वृषा हरिरित्याह।
वृषा ह्येषः॥ ९०॥

((anaśanāyuko bhavati |
ya evaṃ veda |
rantirnāmāsi divyo gandharva ityāha |
rūpamevāsyaitanmahimānaṃ rantiṃ bandhutāṃ vyācaṣṭe |
samahamāyuṣā saṃ prāṇenetyāha |
āśiṣamevaitāmāśāste |
vyasau yo'smāndveṣṭi yaṃ ca vayaṃ dviṣma ityāha |
abhicāra evāsyaiṣaḥ |
acikradadvṛṣā harirityāha |
vṛṣā hyeṣaḥ || 90 ||))

[[5-9-9]]
वृषा हरिः।
महान्मित्रो न दर्शत इत्याह।
स्तौत्येवैनमेतत्।
चिदसि समुद्रयोनिरित्याह।
स्वामेवैनं योनिं गमयति।
नमस्ते अस्तु मा मा हिꣳसीरित्याहाहिꣳसायै।
विश्वावसुꣳ सोमगन्धर्वमित्याह।
यदेवास्य क्रियमाणस्यान्तर्यन्ति।
तदेवास्यैतेनाप्यायति।
विश्वावसुरभि तन्नो गृणात्वित्याह॥ ९१॥

((vṛṣā hariḥ |
mahānmitro na darśata ityāha |
stautyevainametat |
cidasi samudrayonirityāha |
svāmevainaṃ yoniṃ gamayati |
namaste astu mā mā hiṃsīrityāhāhiṃsāyai |
viśvāvasuṃ somagandharvamityāha |
yadevāsya kriyamāṇasyāntaryanti |

tadevāsyaitenāpyāyayati ।
viśvāvasurabhi tanno gṛṇātvityāha ॥ 91 ॥))

[[5-9-10]]
पूर्वमेवोदितम्।
उत्तरेणाभिगृणाति।
धियो हिन्वानो धिय इन्नो अव्यादित्याह।
ऋतूनेवास्मै कल्पयति।
प्रासां गन्धर्वो अमृतानि वोचदित्याह।
प्राणा वा अमृताः।
प्राणानेवास्मै कल्पयति।
एतत्त्वं देव घर्म देवो देवानुपागा इत्याह।
देवो ह्येष सन्देवानुपैति।
इदमहं मनुष्यो मनुष्यानित्याह॥ ९२॥

((pūrvamevoditam ।
uttareṇābhigṛṇāti ।
dhiyo hinvāno dhiya inno avyādityāha ।
ṛtūnevāsmai kalpayati ।
prāsāṃ gandharvo amṛtāni vocadityāha ।
prāṇā vā amṛtāḥ ।
prāṇānevāsmai kalpayati ।
etattvaṃ deva gharma devo devānupāgā ityāha ।
devo hyeṣa sandevānupaiti ।
idamahaṃ manuṣyo manuṣyānityāha ॥ 92 ॥))

[[5-9-11]]
मनुष्यो हि।
एष सन्मनुष्यानुपैति।
ईश्वरो वै प्रवर्ग्यमुद्वासयन्न्।
प्रजां पशून्थ्सोमपीथमनूद्वासस्सोमपीथानुमेहि।
सह प्रजया सह रायस्पोषेणेत्याह।
प्रजामेव पशून्थ्सोमपीथमात्मन्धत्ते।
सुमित्रा न आप ओषधयस्सन्त्वित्याह।
आशिषमेवैतामाशास्ते।
दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह।

अ॒भि॒चा॒र ए॒वास्यै॒षः।
प्र वा ए॒षो॑ऽस्माल्लो॒काच्च्य॑वते।
यः प्र॑व॒र्ग्य॑मुद्वा॒सय॑ति।
उदु॒ त्यं चि॒त्रमिति॑ सौ॒रीभ्या॑मृ॒ग्भ्यां पु॒नरे॒त्य गार्ह॑पत्ये जुहोति।
अ॒यं वै लो॒को गार्ह॑पत्यः।
अ॒स्मिन्ने॒व लो॒के प्रति॑तिष्ठति।
अ॒सौ खलु॒ वा आ॑दि॒त्यस्सु॑व॒र्गो लो॒कः।
यथ्सौ॒री भव॑तः।
तेनै॒व सु॑व॒र्गाल्लो॒कान्नैति॑॥ ९३॥
ब्रह्म॑णस्त्वा प॒रस्पाया॒ इत्या॑ह द॒धात्य॒न्वित्य॑ रक्ष॒स्वी रक्ष॑सा॒मप॑हत्यै॒ वै हिर॑ण्यमाहार्धयति॒ ह्ये॑ष गृ॒णा॒त्वित्या॑ह मनु॒ष्या॑नित्या॑हास्यै॒षो॑ऽष्टौ च॑॥ ९॥

((ma̱nu̱ṣyȯ hi |
e̱ṣa sanmȧnu̱ṣyȧnu̱paiti̍ |
ī̱śva̱ro vai prȧva̱rgyȧmudvā̱sayann̍ |
pra̱jāṃ pa̱śūnthsȯmapī̱thamȧnū̱dvāsa̱ssomȧpī̱thānu̱mehi̍ |
sa̱ha pra̱jayȧ sa̱ha rā̱yaspo̱ṣe̱ṇetyȧha |
pra̱jāme̱va pa̱śūnthsȯmapī̱thamā̱tmandhȧtte |
su̱mi̱trā na̱ āpa̱ o̱ṣȧdhayassa̱ntvityȧha |
ā̱śi̱ṣȧme̱vaitāmāśā̈ste |
du̱rmi̱trāstasmai̍ bhūyāsu̱ryȍ'smāndve̱ṣṭi̱ yaṃ cȧ va̱yaṃ dvi̱ṣma ityȧha |
a̱bhi̱cā̱ra e̱vāsyai̱ṣaḥ |
pra vā e̱ṣȍ'smāllo̱kāccyȧvate |
yaḥ prȧva̱rgyȧmudvā̱sayȧti |
udu̱ tyaṃ ci̱tramiti̍ sau̱rībhyȧmṛ̱gbhyāṃ pu̱nare̱tya̱ gārhȧpatye juhoti |
a̱yaṃ vai lo̱ko gārhȧpatyaḥ |
a̱sminne̱va lo̱ke prati̍tiṣṭhati |
a̱sau khalu̱ vā ȧdi̱tyassu̍va̱rgo lo̱kaḥ |
yathsau̱rī bhavȧtaḥ |
tenai̱va su̍va̱rgāllo̱kānnaiti̍ || 93 ||
brahmȧṇastvā pa̱ra̱spāyā̱ ityȧha dadhātya̱nvityȧ rakṣa̱svī rakṣȧsā̱mapȧhatyai̱ vai hirȧṇyamāhārdhayati̱ hyė̱ṣa gṛ̱ṇā̱tvityȧha manu̱ṣyȧnityȧhāsyai̱ṣȍ'ṣṭau cȧ || 9 ||))

[[5-10-1]]
प्र॒जाप॑तिं॒ वै दे॒वाश्शु॒क्रं पयो॑ऽदुहन्न्।
तद॑भ्यो॒ न व्य॑भवत्।
तद॒ग्निर्व्य॑करोत्।
तानि॒ शु॒क्रि॑याणि॒ सामा॑न्यभवन्न्।

तेषां यो रसोऽत्यक्षरत्।
तानि शुक्रयजूꣳष्यभवन्।
शुक्रियाणां वा एतानि शुक्रियाणि।
सामपयसं वा एतयोरन्यत्।
देवानामन्यत्पयः।
यद्गोः पयः॥ ९४॥

((prajāpatim vai devāśśukram payo'duhrann |
tadebhyo na vyabhavat |
tadagnirvyakarot |
tāni śukriyāṇi sāmānyabhavann |
teṣām yo raso'tyakṣarat |
tāni śukrayajūꣳṣyabhavan |
śukriyāṇām vā etāni śukriyāṇi |
sāmapayasam vā etayoranyat |
devānāmanyatpayaḥ |
yadgoḥ payaḥ || 94 ||))

[[5-10-2]]
तत्साम्नः पयः।
यदजायै पयः।
तद्देवानां पयः।
तस्माद्यत्रैतैर्यजुर्भिश्चरन्ति।
तत्पयसा चरन्ति।
प्रजापतिमेव तद्देवान्पयसाऽन्नाद्येन समर्धयन्ति।
एष ह त्वै साक्षात्प्रवर्ग्यं भक्षयति।
यस्यैवं विदुषः प्रवर्ग्यः प्रवृज्यते।
उत्तरवेद्यामुद्वासयेत्तेजस्कामस्य।
तेजो वा उत्तरवेदिः॥ ९५॥

((tatsāmnaḥ payaḥ |
yadajāyai payaḥ |
taddevānām payaḥ |
tasmādyatraitairyajurbhiścaranti |
tatpayasā caranti |
prajāpatimeva taddevānpayasā'nnādyena samardhayanti |
eṣa ha tvai sākṣātpravargyam bhakṣayati |
yasyaivam viduṣaḥ pravargyaḥ pravṛjyate |

u̱ttaṟaveḏyāmudvásayeṯtejáskāmasya |
tejo̱ vā úttaraveḏiḥ || 95 ||))

[[5-10-3]]

तेज॑ः प्रव॒र्ग्य॑ः।
तेज॑सै॒व ते॒जस्सम॑र्धयति।
उ॒त्त॒र॒वे॒द्यामु॑द्वा॑सये॒दन्न॑कामस्य।
शिरो॒ वा ए॒तद्य॒ज्ञस्य॑।
यत्प्र॑व॒र्ग्य॑ः।
मुख॑मुत्तरवे॒दिः।
शी॒र्ष्णैव मु॒ख॒ꣳ सं द॑धात्य॒न्नाद्या॑य।
अ॒न्ना॒द ए॒व भ॑वति।
यत्र॒ खलु॒ वा ए॒तमुद्वा॑सितं॒ वया॑ꣳसि प॒र्यास॑ते।
परि॒ वै ताꣳ समाꣳ प्र॒जा वया॑ꣳस्यासते॥ ९६॥

((tejáḥ pravaṟgyáḥ |
tejásai̱va teja̱ssamárdhayati |
u̱tta̱ra̱ve̱dyāmudvásaye̱dannákāmasya |
śiro̱ vā e̱tadya̱jñasyá |
yatprávaṟgyáḥ |
mukhámuttaraveḏiḥ |
śī̱rṣṇaiva mukha̱m̐ saṃdádhātya̱nnādyáya |
a̱nnā̱da e̱va bhávati |
yatra̱ khalu̱ vā e̱tamudvásitam̱ vayām̐si pa̱ryāsáte |
pari̱ vai tām̐ samām̐ pra̱jā vayām̐syāsate || 96 ||))

[[5-10-4]]

तस्मा॑दुत्तरवे॒द्याम॒वोद्वा॑सयेत्।
प्र॒जानाꣳ गोपी॒थाय॑।
पु॒रो वा॑ प॒श्चाद्वोद्वा॑सयेत्।
पु॒रस्ता॒द्वा ए॒तज्ज्योति॒रुदे॑ति।
तत्प॒श्चान्निम्रो॑चति।
स्वामे॒वैन॒ं योनि॒मनूद्वा॑सयति।
अ॒पां मध्य॒ उद्वा॑सयेत्।
अ॒पां वा ए॒तन्मध्या॒ज्ज्योति॑रजायत।
ज्योति॑ः प्रव॒र्ग्य॑ः।

स्व ए॒वैन॒ं योनौ॒ प्रति॑ष्ठापयति॥ ९७॥

((tasma̍duttarave̱dyāme̱vodva̍sayet ।
pra̱jānā̍ṃ gopī̱thāya̍ ।
pu̱ro va̍ pa̱ścādvodva̍sayet ।
pu̱rastā̱dvā e̱tajjyoti̱rude̍ti ।
tatpa̱ścānnimro̍cati ।
svāme̱vaina̱ṃ yoni̱manūdva̍sayati ।
a̱pāṃ madhya̱ udva̍sayet।
a̱pāṃ vā e̱tanmadhyā̱jjyoti̍rajāyata ।
jyoti̍ḥ prava̱rgya̍ḥ ।
sva e̱vaina̱ṃ yonau̱ prati̍ṣṭhāpayati ॥ 97 ॥))

[[5-10-5]]
यं द्वि॒ष्यात्।
यत्र॒ स स्यात्।
तस्या॑ं दि॒श्युद्वा॑सयेत्।
ए॒ष वा अ॒ग्निर्वै᳚श्वान॒रः।
यत्प्र॑व॒र्ग्य॑ः।
अ॒ग्निनै॒वैनं॑ वैश्वान॒रेणा॒भिप्रव॑र्तयति।
औदु॑म्बर्या॒ꣳ शाखा॑या॒मुद्वा॑सयेत्।
ऊर्ग्वा उ॑दु॒म्बर॑ः।
अन्नं॑ प्रा॒णः।
शुग्घ॒र्मः॥ ९८॥

((yaṃ dvi̱ṣyāt ।
yatra̱ sa syāt ।
tasyā̍ṃ di̱śyudva̍sayet ।
e̱ṣa vā a̱gnirvai̎śvāna̱raḥ ।
yatpra̍va̱rgya̍ḥ ।
a̱gninai̱vaina̍ṃ vaiśvāna̱reṇā̱bhiprava̍rtayati ।
audu̍mbaryā̱ṃ̐ śākha̍yā̱mudva̍sayet ।
ūrgvā u̍du̱mbara̍ḥ ।
anna̍ṃ prā̱ṇaḥ ।
śuggha̱rmaḥ ॥ 98 ॥))

[[5-10-6]]
इ॒द॒म॒ह॒म॒मुष्या॑मुष्याय॒णस्य॑ शु॒चा प्रा॒णमपि॑ दहा॒मीत्या॑ह।
शु॒चैवास्य॑ प्रा॒णमपि॑ दहति।

ताजगार्तिमार्च्छति।
यत्र दर्भा उपदीकसन्ततास्स्युः।
तदुद्वासयेद्वृष्टिकामस्य।
एता वा अपामनूज्झावर्यो नाम।
यद्दर्भाः।
असौ खलु वा आदित्य इतो वृष्टिमुदीरयति।
असावेवास्मा आदित्यो वृष्टिं नियच्छति।
ता आपो नियता धन्वना यन्ति॥ ९९॥
गोः पय उत्तरवेदिरासते स्थापयति घर्मो यन्ति॥ १०॥

((idamahamamuṣyāmuṣyāyaṇasya śucā prāṇamapi dahāmītyāha |
śucaivāsya prāṇamapi dahati |
tājagārtimārcchati |
yatra darbhā upadīkasantatāssyuḥ |
tadudvāsayedvṛṣṭikāmasya |
etā vā apāmanūjjhāvaryo nāma |
yaddarbhāḥ |
asau khalu vā āditya ito vṛṣṭimudīrayati |
asāvevāsmā ādityo vṛṣṭim niyacchati |
tā āpo niyatā dhanvanā yanti || 99 ||
goḥ paya uttaravedirāsate sthāpayati gharmo yanti || 10 ||))

[[5-11-1]]
प्रजापतिस्संभ्रियमाणः।
संराट्थ संभृतः।
घर्मः प्रवृक्तः।
महावीर उद्वासितः।
असौ खलु वावैष आदित्यः।
यत्प्रवर्ग्यः।
स एतानि नामान्यकुरुत।
य एवं वेद।
विदुरेनं नाम्ना।
ब्रह्मवादिनो वदन्ति॥ १००॥

((prajāpatissambhriyamāṇaḥ |
samrāṭtha sambhṛtaḥ |

gha̱rmaḥ pravṛ̍ktaḥ ।
ma̱hā̱vī̱ra udva̍sitaḥ ।
a̱sau khalu̱ vāvaiṣa ā̍di̱tyaḥ ।
yatpra̍vā̱rgya̍ḥ ।
sa e̱tāni̱ nāmā̎nyakuruta ।
ya e̱vaṃ vedạ ।
vi̱dure̍naṃ̱ nāmnā̎ ।
bra̱hma̱vā̱dino̍ vadanti ॥ 100 ॥))

[[5-11-2]]

यो वै वसी॑यांꣳसं यथाना॒मम॑ुप॒चर॑ति।
पुण्या॒र्तिं॑ वै स तस्मै॑ कामयते।
पुण्या॒र्तिमस्मै कामयन्ते।
य ए॒वं वेद॑।
तस्मा॑दे॒वं वि॒द्वान्।
घ॒र्म इ॒ति दि॒वाऽऽच॑क्षीत।
स॒म्राडि॒ति नक्त॒ꣳम्।
ए॒ते वा ए॒तस्य॑ प्रि॒ये त॒नुवौ॒।
ए॒ते अ॑स्य प्रि॒ये नाम॑नी।
प्रि॒यये॒वैनं॑ त॒नुवा॒॥ १०१ ॥

((yo vai vasī̍yām̐saṃ yathānā̱mamu̍pa̱carā̍ti ।
puṇyā̎rtiṃ̱ vai sa tasmai̍ kāmayate ।
puṇyā̎rtimasmai kāmayante ।
ya e̱vaṃ veda̍ ।
tasmā̍de̱vaṃ vi̱dvān ।
gha̱rma iti̱ divā''ca̍kṣīta ।
sa̱mrā̱ḍiti̱ naktā̎m ।
e̱te vā e̱tasya̍ pri̱ye ta̱nuvau̎ ।
e̱te a̍sya pri̱ye nāmā̍nī ।
pri̱yayai̱vaina̍ṃ ta̱nuvā̎ ॥ 101 ॥))

[[5-11-3]]

प्रि॒येण॒ नाम्ना॒ सम॑र्धयति।
कीर्ति॑रस्य॒ पूर्वा॑ ग॑च्छति ज॒नता॑माय॒तः।
गा॒य॒त्री दे॒वेभ्योऽपा॒क्रामत्।
तां दे॒वाः प्र॑व॒र्ग्येणै॒वानु॒ व्य॑भवन्न्।
प्र॒व॒र्ग्ये॒णाप्नुवन्।

यच्च॑तुर्वि॒ꣳश॒तिः कृत्वः॑ प्रव॒र्ग्यं॑ प्रवृ॒णक्ति॑।
गा॒य॒त्रीमे॒व तदनु॒ विभ॑वति।
गा॒य॒त्रीमा॑प्नोति।
पूर्वा॒ऽस्य॒ जनं॑ य॒तः की॒र्तिर्ग॑च्छति।
वै॒श्व॒दे॒वस्स॒ꣳस॑न्नः॥ १०२॥

((priyeṇa nāmnā samardhayati |
kīrtirasya pūrvā gacchati janatāmāyataḥ |
gāyatrī devebhyo'pākrāmat |
tāṃ devāḥ pravargyeṇaivānu vyabhavann |
pravargyeṇāpnuvan |
yaccaturviṃśatiḥ kṛtvaḥ pravargyaṃ pravṛṇakti |
gāyatrīmeva tadanu vibhavati |
gāyatrīmāpnoti |
pūrvā'sya janaṃ yataḥ kīrtirgacchati |
vaiśvadevassaṃsannaḥ || 102 ||))

[[5-11-4]]
वस॑वः प्रवृ॑क्तः।
सोमो॑ऽभिकी॒र्यमा॑णः।
आ॒श्वि॒नः पय॑स्यानी॒यमा॑ने।
मा॒रु॒तः क्वथ॑न्न्।
पौ॒ष्ण उद॑न्तः।
सा॒र॒स्व॒तो वि॒ष्यन्द॑मानः।
मै॒त्रश्श॒रो॑ गृ॒हीतः।
तेज॒ उद्य॑तो वा॒युः।
ह्रि॒यमा॑णः प्र॒जाप॑तिः।
हू॒यमा॑नो॒ वाग्घुतः॥ १०३॥

((vasavaḥ pravṛktaḥ |
somo'bhikīryamāṇaḥ |
āśvinaḥ payasyānīyamāne |
mārutaḥ kvathann |
pauṣṇa udantaḥ |
sārasvato viṣyandamānaḥ |
maitraśśaro gṛhītaḥ |
teja udyato vāyuḥ |
hriyamāṇaḥ prajāpatiḥ |

hūyamāno vāgghutaḥ || 103 ||))

[[5-11-5]]
असौ खलु वावैष आदित्यः।
यत्प्रवर्ग्यः।
स एतानि नामान्यकुरुत।
य एवं वेद।
विदुरेनं नाम्ना।
ब्रह्मवादिनो वदन्ति।
यन्मृन्मयमाहुतिं नाश्नुतेऽथ।
कस्मादेषोऽश्नुत इति।
वागेष इति ब्रूयात्।
वाच्येव वाचं दधाति॥ १०४॥

((asau khalu vāvaiṣa ādityaḥ |
yatpravargyaḥ |
sa etāni nāmānyakuruta |
ya evaṃ veda |
vidurenaṃ nāmnā |
brahmavādino vadanti |
yanmṛnmayamāhutiṃ nāśnute'tha |
kasmādeṣo'śnuta iti |
vāgeṣa iti brūyāt |
vācyeva vācaṃ dadhāti || 104 ||))

[[5-11-6]]
तस्मादश्नुते।
प्रजापतिर्वा एष द्वादशधा विहितः।
यत्प्रवर्ग्यः।
यत्प्रागवकाशेभ्यः।
तेन प्रजा असृजत।
अवकाशैर्देवासुरानसृजत।
यदूर्ध्वमवकाशेभ्यः।
तेनान्नमसृजत।
अन्नं प्रजापतिः।

प्र॒जाप॑ति॒र्वावै॒षः ॥ १०५॥
व॒द॒न्ति॒ त॒नुवा॒ स॒ꣳस॑न्नो॒ हू॒यमा॑नो॒ वाग्घु॒तो द॑धात्ये॒षः ॥ ११ ॥

((tasmådaśnute ।
prajāpátirvā eṣa dvådaśadhā vihítaḥ ।
yatprávargyáḥ ।
yatprāgávakāśebhyáḥ ।
tená prajā ásṛjata ।
avakāśairdévāsurānásṛjata ।
yadūrdhvamávakāśebhyáḥ ।
tenānnámasṛjata ।
annaṁ prajāpátiḥ ।
prajāpátirvāvaiṣaḥ ॥ 105 ॥
vadanti tanuvā saṁsánno hūyamåno vāgghuto dádhātyeṣaḥ ॥ 11 ॥))

[[5-12-1]]
स॒वि॒ता भू॒त्वा प्र॑थ॒मेऽह॒न्प्रवृ॑ज्यते।
ते॒न कामा॒ꣳ॑ एति।
यद्द्वि॒तीये॒ऽह॑न्प्रवृ॒ज्यते॑।
अ॒ग्निर्भू॒त्वा दे॒वाने॑ति।
यत्तृ॒तीये॒ऽह॑न्प्रवृ॒ज्यते॑।
वा॒युर्भू॒त्वा प्रा॒णाने॑ति।
यच्च॑तु॒र्थेऽह॑न्प्रवृ॒ज्यते॑।
आ॒दि॒त्यो भू॒त्वा र॒श्मीने॑ति।
यत्प॑ञ्च॒मेऽह॑न्प्रवृ॒ज्यते॑।
च॒न्द्रमा॑ भू॒त्वा नक्ष॑त्राण्येति॥ १०६ ॥

((savitā bhūtvā práthame'hanpravṛ́jyate ।
tena kāmām̐ eti ।
yaddvitīye'hánpravṛjyatë ।
agnirbhūtvā devānéti ।
yattṛtīye'hánpravṛjyatë ।
vāyurbhūtvā prāṇānéti ।
yaccáturthe'hánpravṛjyatë ।
ādityo bhūtvā raśmīnéti ।
yatpáñcame'hánpravṛjyatë ।
candramå bhūtvā nakṣátrāṇyeti ॥ 106 ॥))

[[5-12-2]]
यत्ष॒ष्ठेऽह॑न्प्रवृ॒ज्यते॑।

ऋतुर्भूत्वा संवथ्सरमेति।
यथ्सप्तमेऽहन्प्रवृज्यते।
धाता भूत्वा शक्वरीमेति।
यदष्टमेऽहन्प्रवृज्यते।
बृहस्पतिर्भूत्वा गायत्रीमेति।
यन्नवमेऽहन्प्रवृज्यते।
मित्रो भूत्वा त्रिवृत इमाँल्लोकानेति।
यद्दशमेऽहन्प्रवृज्यते।
वरुणो भूत्वा विराजमेति॥ १०७॥

((yatṣaṣṭhe'hanpravṛjyate |
ṛturbhūtvā saṁvathsarameti |
yathsaptame'hanpravṛjyate |
dhātā bhūtvā śakvarīmeti |
yadaṣṭhame'hanpravṛjyate |
bṛhaspatirbhūtvā gāyatrīmeti |
yannavame'hanpravṛjyate |
mitro bhūtvā trivṛta imām̐llokāneti |
yaddaśame'hanpravṛjyate |
varuṇo bhūtvā virājameti || 107 ||))

[[5-12-3]]
यदेकादशेऽहन्प्रवृज्यते।
इन्द्रो भूत्वा त्रिष्टुभमेति।
यद्द्वादशेऽहन्प्रवृज्यते।
सोमो भूत्वा सुत्यामेति।
यत्पुरस्तादुपसदां प्रवृज्यते।
तस्मादितः पराङमूँल्लोकाꣳस्तपन्नेति।
यदुपरिष्टादुपसदां प्रवृज्यते।
तस्मादमुतोऽर्वाङिमाँल्लोकाꣳस्तपन्नेति।
य एवं वेद।
ऐव तपति॥ १०८॥
नक्षत्राण्येति विराजमेति तपति॥ १२॥

देवा वै सत्रꣳ सावित्रं परिश्रिते ब्रह्मन्प्रचरिष्यामोऽग्निष्ट्वा शिरो ग्रीवा देवस्य रशनां विश्वा आशा घर्म या ते प्रजापतिꣳ शुक्रं प्रजापतिस्संभ्रियमाणस्सविता भूत्वा द्वादश॥ १२॥

देवा वै सत्रꣳ स खदिरः परिश्रितेऽभिपूर्वमथो रक्षसां ग्रैष्मावेवास्मै ब्रह्म वै देवानामश्विना घर्मं पातं प्राणो वै वृषा हरियो वै वसीयाꣳसं यथानाममष्टोत्तरशतम्॥ १०८॥

((yadekādaśe'hanpravṛjyate |
indro bhūtvā triṣṭubhameti |
yaddvādaśe'hanpravṛjyate |
somo bhūtvā sutyāmeti |
yatpurastādupasadām̐ pravṛjyate |
tasmāditaḥ parāṅamūm̐llokām̐stapanneti |
yaduparisṭādupasadām̐ pravṛjyate |
tasmādamuto'rvāṅimām̐llokām̐stapanneti |
ya evaṃ veda |
aiva tapati || 108 ||
nakṣatrāṇyeti virājameti tapati || 12 ||

devā vai satram̐ sāvitraṃ pariśrite brahmanpracariṣyāmo'gniṣṭvā śiro grīvā devasya raśanāṃ viśvā āśā gharma yā te prajāpatim̐ śukraṃ prajāpatissaṃbhriyamāṇassavitā bhūtvā dvādaśa || 12 ||

devā vai satram̐ sa khadiraḥ pariśrite'bhipūrvamatho rakṣasāṃ graiṣmāvevāsmai brahma vai devānāmaśvinā gharmaṃ pātaṃ prāṇo vai vṛṣā hariryo vai vasīyām̐saṃ yathānāmamaṣṭottaraśatam || 108 ||))

[[5-0-0]]

शं नस्तन्नो मा हासीत्।
ओं शान्तिः शान्तिः शान्तिः॥

((śaṃ nastanno mā hāsīt |
oṃ śāntiḥ śāntiḥ śāntiḥ ||))

# Taittirīya-Āraṇyaka

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 6

[[6-0-0]]

सं त्वा॑ सिञ्चामि॒ यजु॑षा प्र॒जामायु॒र्धनं॑ च॥
ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

((saṃ tvā̍ siñcāmi̱ yaju̍ṣā pra̱jāmāyu̱rdhanam̍ ca ||
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ ||))

[[6-1-1]]

प॒रे॒यु॒वाꣳसं॑ प्र॒वतो॑ म॒हीरनु॑ ब॒हुभ्य॒ः पन्था॑मनपस्पशा॒नम्।
वै॒व॒स्व॒तꣳ॒ सं॒गम॑नं॒ जना॑नां य॒मꣳ॒ राजा॑नꣳ ह॒विषा॑ दुवस्यत।
इ॒दं त्वा॒ वस्त्रं॑ प्रथ॒मं न्वाग॒न्नप॒तदू॑ह॒ यदि॒हाबि॑भः पु॒रा।
इ॒ष्टा॒पू॒र्तमनु॒संप॑श्य॒ दक्षि॑णां॒ यथा॑ ते द॒त्तं ब॑हु॒धा वि ब॑न्धुषु।
इ॒मौ यु॑नज्मि ते व॒ह्नी असु॑नीथाय वो॒ढवे᳚।
याभ्या॒ꣳ॒ य॒मस्य॒ साद॑नꣳ सु॒कृता॒ं चापि॑ गचछतात्।
पू॒षा त्वे॒तश्च्या॑वयतु॒ प्रवि॒द्वाननष्ट॑पशु॒र्भुव॑नस्य गो॒पाः।
स त्वै॒तेभ्य॒ः परि॑ददात्पि॒तृभ्यो॒ऽग्निर्दे॒वेभ्य॒स्सुवि॒दत्रे᳚भ्यः।
पू॒षेमा आशा॒ अनु॑वेद॒ सर्वा॒स्सो अ॒स्माꣳ अभ॑यतमेन नेषत्।
स्व॒स्ति॒दा अघृ॑णि॒स्सर्व॑वीरोऽप्र॑युच्छन्पुर ए॑तु प्रवि॒द्वान्॥ १॥

((pa̱re̱yu̱vām̐sam̍ pra̱vato̍ ma̱hīranu̍ ba̱hubhya̱ḥ panthā̍manapaspaśa̱nam |
vai̱va̱sva̱tam̐ sa̱ṃgama̍nam̱ janā̍nām̱ ya̱mam̐ rājā̍nam̐ ha̱viṣā̍ duvasyata |
i̱dam tvā̱ vastram̍ pratha̱mam̱ nvāga̱nnapa̱tadū̍ha̱ yadi̱hābi̍bhaḥ pu̱rā |
i̱ṣṭā̱pū̱rtamanu̱sampa̍śya̱ dakṣi̍ṇām̱ yathā̍ te da̱ttam̱ ba̍hu̱dhā vi ba̍ndhuṣu̱ |
i̱mau yu̍najmi te va̱hnī asu̍nīthāya vo̱ḍhave̎ |
yābhyā̱m̐ ya̱masya̱ sāda̍nam̐ su̱kṛtā̱m cāpi̍ gacachatāt |
pū̱ṣā tve̱taścyā̍vayatu̱ pravi̱dvānanaṣṭa̍paśu̱rbhuva̍nasya go̱pāḥ |
sa tvai̱tebhya̱ḥ pari̍dadātpi̱tṛbhyo̱'gnirde̱vebhya̍ssuvi̱datre̎bhyaḥ |
pū̱ṣemā āśā̱ anu̍veda̱ sarvā̱sso a̱smām̐ abha̍yatamena neṣat |

svastidā aghṛṇissarvavīro'prayucchanpura etu pravidvān || 1 ||))

[[6-1-2]]
अयुर्विश्वायुः परिपासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात्।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवस्सविता दधातु।
भुवनस्य पत इदꣳ हविः।
अग्नये रयिमते स्वाहा।
पुरुषस्य स्यावर्यपेदधानि मृज्महे।
यथा नो अत्र नापरः पुरा जरस आयति।
पुरुषस्य सयावरि वि ते प्राणमसिस्रसम्।
शरीरेण महीमिहि स्वधयेहि पितृनुप प्रजयाऽस्मानिहावह।
मैवं माꣳस्ता प्रियेऽहं देवी सती पितृलोकं यदैषि।
विश्ववारा नभसा संव्ययन्त्यन्त्युभौ नो लोकौ पयसाऽभ्याववृथ्स्व॥ २॥

((ayurviśvāyuḥ paripāsati tvā pūṣā tvā pātu prapathe purastāt |
yatrāsate sukṛto yatra te yayustatra tvā devassavitā dadhātu |
bhuvanasya pata idaṁ haviḥ |
agnaye rayimate svāhā |
puruṣasya syāvaryapedadhāni mṛjmahe |
yathā no atra nāparaḥ purā jarasa āyati |
puruṣasya sayāvari vi te prāṇamasisrasam |
śarīreṇa mahīmihi svadhayehi pitṛnupa prajayā'smānihāvaha |
maivaṁ māṁstā priye'haṁ devī satī pitṛlokaṁ yadaiṣi |
viśvavārā nabhasā saṁvyayantyantyubhau no lokau payasā'bhyāvavṛthsva || 2 ||))

[[6-1-3]]
इयं नारी पतिलोकं वृणाना निपद्यत उप त्वा मर्त्य प्रेतम्।
विश्वं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि।
उदीर्ष्व नार्यभि जीवलोकमितासुमेतमुपशेष एहि।
हस्तग्राभस्य दिधिषोस्त्वमेतत्पत्युर्जनित्वमभि संबभूव।
सुवर्णꣳ हस्तादाददाना मृतस्य श्रियै ब्रह्मणे तेजसे बलाय।
अत्रैव त्वमिह वयꣳसुशेवा विश्वास्स्पृधो अभिमातीर्जयेम।
धनुर्हस्तादाददाना मृतस्य श्रियै क्षत्रायौजसे बलाय।
अत्रैव त्वमिह वयꣳ सुशेवा विश्वास्स्पृधो अभिमातीर्जयेम।
मणिꣳ हस्तादाददाना मृतस्य श्रियै विशे पुष्ट्यै बलाय।

अ॒त्रैव त्वमि॒ह व॒यꣳ सु॒शेवा॒ विश्वा॒स्स्पृधो॑ अ॒भिमा॑तीर्जयेम॥ ३॥

((i̱yaṃ nārī̎ patilo̱kaṃ vṛ̍ṇā̱nā nipa̍dyata̱ upa̍ tvā martya̱ pretā̎m |
viśvaṃ̍ purā̱ṇamanu̍pālaya̍ntī̱ tasyai̎ pra̱jāṃ̍ dravi̍ṇaṃ ce̱ha dhe̍hi |
udī̎rṣva nārya̱bhi jī̍valo̱kami̱tāsu̍me̱tamupa̍śeṣa̱ ehi̍ |
ha̱sta̱grā̱bhasya̍ didhi̱ṣostvame̱tatpatyu̍rjani̱tvama̱bhi saṃba̍bhūva |
su̱varṇa̱m̐ hastā̍dā̱dada̍nā mṛ̱tasya̍ śri̱yai brahma̍ṇe̱ teja̍se̱ balā̍ya |
atra̱iva tvami̱ha va̱yam̐su̱śevā̱ viśvā̱sspṛdho̍ a̱bhimā̍tīrjayema |
dhanu̱rhastā̍dā̱dada̍nā mṛ̱tasya̍ śri̱yai kṣa̱trāyaujā̍se̱ balā̍ya |
atra̱iva tvami̱ha va̱yam̐ su̱śevā̱ viśvā̱sspṛdho̍ a̱bhimā̍tīrjayema |
maṇi̱m̐ hastā̍dā̱dada̍nā mṛ̱tasya̍ śri̱yai vi̱śe puṣṭya̱i balā̍ya |
atra̱iva tvami̱ha va̱yam̐ su̱śevā̱ viśvā̱sspṛdho̍ a̱bhimā̍tīrjayema || 3 ||))

[[6-1-4]]
इ॒मम॑ग्ने चम॒सं मा विजी॒॑ह्वरः प्रि॒यो दे॒वाना॑मु॒त सो॒म्याना॒॑म्।
ए॒ष यश्च॑म॒सो दे॑व॒पान॒स्तस्मि॑न्दे॒वा अ॒मृता॑ मादयन्ताम्।
अ॒ग्नेर्वर्म॒ परि॒ गोभि॒र्व्ययस्व॒ संप्रोर्णु॑ष्व॒ मेद॑सा॒ पीव॑सा च।
नेत्त्वा॑ धृ॒ष्णुर्हर॑सा॒ जर्हृ॑षाणो॒ दधृ॑ग्विध॒क्ष्यन्पर्य॒ङ्खया॑तै।
मैन॑मग्ने॒ विद॑हो॒ माऽभिशो॑चो॒ माऽस्य॒ त्वचं॑ चिक्षिपो॒ मा शरी॑रम्।
य॒दा शृ॒तं क॒रवो॑ जातवे॒दोऽथे॑मेन॒ं प्रहि॑णुतात्पि॒तृभ्यः॑।
शृ॒तं य॒दाऽकर॑सि जातवे॒दोऽथे॑मेन॒ं परि॑दत्तात्पि॒तृभ्यः॑।
य॒दा गच्छा॒त्यसु॑नीतिमे॒तामथा॑ दे॒वाना॒॑ं वश॒नीर्भ॑वाति।
सूर्यं॑ ते॒ चक्षु॑र्गच्छतु॒ वात॑मा॒त्मा द्यां च॒ गच्छ॑ पृथि॒वीं च॒ धर्म॑णा।
अ॒पो वा॑ गच्छ॒ यदि॒ तत्र॑ ते हि॒तमोष॑धीषु॒ प्रति॑तिष्ठा॒ शरी॑रैः।
अ॒जोऽभा॒गस्तप॑सा॒ तं तप॑स्व॒ तं ते॑ शो॒चिस्तप॑तु॒ तं ते॑ अ॒र्चिः।
यास्ते॑ शि॒वास्त॒नुवो॑ जातवे॒दस्ताभि॑र्वहे॒मꣳ सु॒कृतां॒ यत्र॑ लो॒काः।
अ॒यं वै त्वम॒स्मादधि॒ त्वमे॒तद॒यं वै तद॑स्य॒ योनि॑रसि।
वै॒श्वा॒न॒रः पु॒त्रः पि॒त्रे लो॑ककृ॒ज्जा॒तवे॑दो॒ वहे॒मꣳ सु॒कृतां॒ यत्र॑ लो॒काः॥ ४॥
वि॒द्वान॒भ्याव॑वृथ्स्वा॒भिमा॑तीर्जयेम॒ शरी॑रैश्च॒त्वारि॑ च॥ १॥

((i̱mamagne camasa̱ṃ mā vijī̎hvaraḥ pri̱yo de̱vānā̍mu̱ta so̱myānā̎m |
e̱ṣa yaścama̱so de̍va̱pāna̱stasmi̍nde̱vā a̱mṛtā̍ mādayantām |
a̱gnervarma̱ pari̱ gobhi̍rvyayasva̱ saṃprorṇu̍ṣva̱ medā̍sā̱ pīvā̍sā ca |
nettvā̍ dhṛ̱ṣṇurharā̍sā̱ jarhṛ̍ṣāṇo̱ dadhṛ̍gvidha̱kṣyanparya̱ṅkhayā̍tai |
mainā̍magne̱ vidā̍ho̱ mā'bhiśo̍co̱ mā'sya̱ tvacaṃ̍ cikṣipo̱ mā śarī̍ram |
ya̱dā śṛ̱taṃ ka̱ravo̍ jātave̱do'the̍menaṃ̱ prahi̍ṇutātpi̱tṛbhyaḥ̍ |
śṛ̱taṃ ya̱dā'kara̍si jātave̱do'the̍mena̱ṃ pari̍dattātpi̱tṛbhyaḥ̍ |
ya̱dā gacchā̱tyasu̍nītime̱tāmathā̍ de̱vānā̎ṃ vaśa̱nīrbha̍vāti |

sūryaṃ te cakṣurgacchatu vātamātmā dyāṃ ca gaccha pṛthivīṃ ca dharmaṇā ।
apo vā gaccha yadi tatra te hitamoṣadhīṣu pratitiṣṭhā śarīraiḥ ।
ajo'bhāgastapasā taṃ tapasva taṃ te śocistapatu taṃ te arciḥ ।
yāste śivāstanuvo jātavedastābhirvahemam̐ sukṛtām yatra lokāḥ ।
ayaṃ vai tvamasmādadhi tvametadayaṃ vai tadasya yonirasi ।
vaiśvānaraḥ putraḥ pitre lokakṛjjātavedo vahemam̐ sukṛtām yatra lokāḥ ॥ 4 ॥
vidvānabhyāvavṛthsvābhimātīrjayema śarīraiścatvāri ca ॥ 1 ॥))

[[6-2-1]]

य एतस्य पथो गोप्तारस्तेभ्यस्स्वाहा य एतस्य पथो रक्षितारस्तेभ्यस्स्वाहा य एतस्य पथोऽभिरक्षितारस्तेभ्यस्स्वाहाऽऽख्यात्रे स्वाहाऽपाख्यात्रे स्वाहाऽभिलालपते स्वाहाऽपलालपते स्वाहाऽग्नये कर्मकृते स्वाहा यमत्र नाधीमस्तस्मै स्वाहा।
यस्त इध्मं जभरथ्सिष्विदानो मूर्धानं वा ततपते त्वाया।
दिवो विश्वस्माथ्सीमघायत उरुष्यः।
अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः।
अग्नये वैश्वानराय सुवर्गाय लोकाय स्वाहा॥ ५॥
य एतस्य त्वत्पञ्च॥ २॥

((ya etasya patho goptārastebhyassvāhā ya etasya patho rakṣitārastebhyassvāhā ya etasya patho'bhirakṣitārastebhyassvāhā''khyātre svāhā'pākhyātre svāhā'bhilālapate svāhā'palālapate svāhā'gnaye karmakṛte svāhā yamatra nādhīmastasmai svāhā ।
yasta idhmaṃ jabharathsiṣvidāno mūrdhānaṃ vā tatapate tvāyā ।
divo viśvasmāthsīmaghāyata uruṣyaḥ ।
asmāttvamadhi jāto'si tvadayaṃ jāyatāṃ punaḥ ।
agnaye vaiśvānarāya suvargāya lokāya svāhā ॥ 5 ॥
ya etasya tvatpañca ॥ 2 ॥))

[[6-3-1]]

प्र केतुना बृहता भात्यग्निराविर्विश्वानि वृषभो रोरवीति।
दिवश्चिदन्तादुप मामुदानडपामुपस्थे महिषो ववर्ध।
इदं त एकं पर ऊं त एकं तृतीयेन ज्योतिषा संविशस्व।
संवेशनस्तनुवै चारुरेधि प्रियो देवानां परमे सधस्थे।
नाके सुपर्णमुप यत्पतन्तꣳ हृदा वेनन्तो अभ्यचक्षत त्वा।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम्।
अतिद्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा।
अथा पितृन्थ्सुविदत्राꣳ अपीहि यमेन ये सधमादं मदन्ति।
यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसा।

ताभ्याꣳ राजन्परिदेह्येनꣳ स्वस्ति चास्मा अनमीवं च धेहि॥ ६॥

((pra ketunā bṛhatā bhātyagnirāvirviśvāni vṛṣabho roravīti |
divaścidantādupa māmudānaḍapāmupasthe mahiṣo vavardha |
idaṃ ta ekaṃ para ū ta ekaṃ tṛtīyena jyotiṣā saṃviśasva |
saṃveśanastanuvai cārudhi priyo devānāṃ parame sadhasthe |
nāke suparṇamupa yatpatantaṃ hṛdā venanto abhyacakṣata tvā |
hiraṇyapakṣaṃ varuṇasya dūtaṃ yamasya yonau śakunaṃ bhuraṇyum |
atidrava sārameyau śvānau caturakṣau śabalau sādhunā pathā |
athā pitṝnthsuvidatrāṃ apihi yamena ye sadhamādaṃ madanti |
yau te śvānau yama rakṣitārau caturakṣau pathirakṣī nṛcakṣasā |
tābhyāṃ rājanparidehyenaṃ svasti cāsmā anamīvaṃ ca dhehi || 6 ||))

[[6-3-2]]

उरुणसावसुतृपावुलूम्बलौ यमस्य दूतौ चरतोऽवशाꣳ अनु।
तावस्मभ्यं दृशये सूर्याय पुनर्दत्तावसुमद्येह भद्रम्।
सोम एकेभ्यः पवते घृतमेक उपासते।
येभ्यो मधु प्रधावति ताꣳश्चिदेवापि गच्छतात्।
ये युध्यन्ते प्रधनेषु शूरासो ये तनुत्यजः।
ये वा सहस्रदक्षिणास्ताꣳश्चिदेवापि गच्छतात्।
तपसा ये अनाधृष्यास्तपसा ये सुवर्गताः।
तपो ये चक्रिरे महत्ताꣳश्चिदेवापि गच्छतात्।
अश्मन्वती रेवतीस्सꣳरभध्वमुत्तिष्ठत प्रतरता सखायः।
अत्रा जहाम ये असन्नशेवाश्शिवान्वयमभि वाजानुत्तरेम॥ ७॥

((uruṇasāvasutṛpāvulumbalau yamasya dūtau carato'vaśāṃanu |
tāvasmabhyaṃ dṛśaye sūryāya punardattāvasumadyeha bhadram |
soma ekebhyaḥ pavate ghṛtameka upāsate |
yebhyo madhu pradhāvati tāṃścidevāpi gacchatāt |
ye yudhyante pradhaneṣu śūrāso ye tanutyajaḥ |
ye vā sahasradakṣiṇāstāṃścidevāpi gacchatāt |
tapasā ye anādhṛṣyāstapasā ye suvargatāḥ |
tapo ye cakrire mahattāṃścidevāpi gacchatāt |
aśmanvatī revatīssaṃrabhadhvamuttiṣṭhata pratarata sakhāyaḥ |
atrā jahāma ye asannaśevāśśivānvayamabhi vājānuttarema || 7 ||))

[[6-3-3]]

यद्वै देवस्य सवितुः पवित्रꣳ सहस्रधारं विततमन्तरिक्षे।
येनापुनादिन्द्रमनार्तमार्त्यै तेनाहं माꣳसर्वतनुं पुनामि।

या रा॒ष्ट्रात्प॒न्नाद॒प॒यन्ति॒ शाखा॑ अ॒भिमृ॑ता नृ॒पति॑मि॒च्छमा॑नाः।
धा॒तुस्तास्सर्वाः॑ पव॑नेन पू॒ताः प्र॒जया॒ऽस्मान्र॒य्या वर्च॑सा॒ सꣳसृ॑जाथ।
उ॒द्व॒यं तम॑स॒स्परि॒ पश्य॑न्तो॒ ज्योति॒रुत्त॑रम्।
दे॒वं दे॑व॒त्रा सूर्य॒मग॑न्म॒ ज्योति॑रुत्त॒मम्।
धा॒ता पु॑नातु सवि॒ता पु॑नातु।
अ॒ग्नेस्तेज॑सा॒ सूर्य॑स्य॒ वर्च॑सा॥ ८॥
धे॒ह्युत्त॑रेमा॒ष्टौ च॑॥ ३॥

((yadvai de̱vasya̍ savi̱tuḥ pra̱vitram̐ sa̱hasra̍dhāra̱m vita̍tamantari̍kṣe |
yenāpu̍nā̱dindra̱mana̱̎rta̱mārtyai̱ tena̱ham̱ mām̐sarvata̍nuṃ punāmi |
yā rā̱ṣṭrātpa̱nnādapa̱yanti̱ śākha̍ a̱bhimṛ̍tā nṛ̱pati̍mi̱cchamā̍nāḥ |
dhā̱tustāssarvā̍ḥ pava̍nena pū̱tāḥ pra̱jayā̱'smānra̱yyā varca̍sā̱ sam̐sṛ̍jātha |
udva̱yaṃ tama̍sa̱spari̱ paśya̍nto̱ jyoti̱rutta̍ram |
de̱vaṃ de̍va̱trā sūrya̱maga̍nma̱ jyoti̍rutta̱mam |
dhā̱tā pu̍nātu savi̱tā pu̍nātu |
a̱gnesteja̍sā̱ sūrya̍sya̱ varca̍sā || 8 ||
dhe̱hyutta̍remā̱ṣṭau ca̍ || 3 ||))

[[6-4-1]]
यं ते॑ अ॒ग्निमम॑न्थाम वृष॒भाये॑व॒ पक्त॑वे।
इ॒मं तꣳ श॑मयामसि क्षी॒रेण॑ चोद॒केन॑ च।
यं त्वम॑ग्ने स॒मद॑ह॒स्त्वमु॒ निर्वा॑पया॒ पुन॑ः।
क्याम्बू॒रत्र॑ जायतां पाकदू॒र्वाव्य॑लकशा।
शीति॑के॒ शीति॑काव॒ति॒ ह्लादु॑के॒ ह्लादु॑कावति।
म॒ण्डू॒क्या॒ सुसङ्ग॒मये॒मꣳ स्व॑ग्निꣳ श॒मय॑।
शं ते॑ धन्व॒न्या आप॒श्शमु॑ ते सन्त्वनू॒क्या॑ः।
शं ते॑ समु॒द्रिया॒ आप॒श्शमु॑ ते सन्तु व॒र्ष्या॑ः।
शं ते॒ स्रव॑न्तीस्त॒नुवे॒ शमु॑ ते सन्तु कू॒प्या॑ः।
शं ते॑ नीहा॒रो व॑र्षतु॒ शमु॒ पृष्वाऽव॑शीयताम्॥ ९॥

((yaṃ te̍ a̱gnimama̍nthāma vṛ̱ṣa̱bhāye̍va̱ pakta̍ve |
i̱maṃ tam̐ śa̍mayāmasi kṣī̱reṇa̍ coda̱kena̍ ca |
yaṃ tvama̍gne sa̱mada̍ha̱stvamu̱ nirvā̍payā̱ puna̍ḥ |
kyāmbūratra̍ jāyatāṃ pākadū̱rvāvya̍lakaśā |
śīti̍ke̱ śīti̍kāvati̱ hlādu̍ke̱ hlādu̍kāvati |
ma̱ṇḍūkyā̱ susaṅga̱maye̱mam̐ sva̍gnim̐ śa̱maya̍ |
śaṃ te̍ dhanva̱nyā āpa̱śśamu̍ te santvanū̱kyā̎ḥ |

śaṃ tė samu̱driyā̱ āpa̱śśamu̇ te santu̱ varṣyā̱̈ḥ ।
śaṃ te̱ sravȧntīsta̱nuve̱ śamu̇ te santu̱ kūpyā̱̈ḥ ।
śaṃ tė nīhā̱ro vȧrṣatu̱ śamu̱ pṛṣvā'vȧśīyatām ॥ 9 ॥))

[[6-4-2]]

अवसृज पनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः।
आयुर्वसान उपयातु शेषꣳ संगच्छतां तनुवा जातवेदः।
संगच्छस्व पितृभिस्सꣳ स्वधाभिस्समिष्टापूर्तेन परमे व्योमन्न्।
यत्र भूम्यै वृणसे तत्र गच्छ तत्र त्वा देवस्सविता दधातु।
यत्ते कृषणश्शकुन आतुतोद पिपीलस्सर्प उत वा श्वापदः।
अग्निष्टद्विश्वादनृणं कृणोतु सोमश्च यो ब्राह्मणमाविवेश।
उत्तिष्ठातस्तनुवꣳ सम्भरस्व मेह गात्रमवहा मा शरीरम्।
यत्र भूम्यै वृणसे तत्र गच्छ तत्र त्वा देवस्सविता दधातु।
इदं त एकं पर ऊं त एकं तृतीयेन ज्योतिषा संविशस्व।
संवेशनस्तनुवै चारुरेधि प्रियो देवानां परमे सधस्थे।
उत्तिष्ठ प्रेहि प्रद्रवौकः कृणुष्व परमे व्योमन्।
यमेन त्वं यम्या संविदानोत्तमं नाकमधिरोहेमम्।
अश्मन्वती रेवतीर्यद्वै देवस्य सवितुः पवित्रं या राष्ट्रात्पन्नादुद्वयं तमसस्परि धाता पुनातु।
अस्मात्त्वमधिजातोऽस्ययं त्वदधिजायताम्।
अग्नये वैश्वानराय सुवर्गाय लोकाय स्वाहा॥ १०॥
अवशीयताꣳ सधस्थे पञ्च च॥ ४॥

((avȧsṛja̱ panȧragne pi̱tṛbhyo̱ yasta̱ āhu̇ta̱ścarȧti sva̱dhābhi̇ḥ ।
āyu̱rvasȧna̱ upȧyātu̱ śeṣa̱m̐ saṃgȧcchatāṃ ta̱nuvȧ jātavedaḥ ।
saṃgȧcchasva pi̱tṛbhi̱ssa̱m̐ sva̱dhābhi̱ssami̇ṣṭāpū̱rtenȧ para̱me vyȯmann ।
yatra̱ bhūmyai̇ vṛ̱ṇase̱ tatrȧ gaccha̱ tatrȧ tvā de̱vassȧvi̱tā dȧdhātu ।
yattė kṛṣa̱ṇaśśȧku̱na ȧtu̱todȧ pipī̱lassa̱rpa u̱ta vā̱ śvāpȧdaḥ ।
a̱gniṣṭadviśvȧdanṛ̱ṇaṃ kṛ̇ṇotu̱ somȧśca̱ yo brā̱̈hma̱ṇamȧvi̱veśȧ ।
utti̱ṣṭhātȧsta̱nuva̱m̐ sambhȧrasva̱ meha gātra̱mavȧhā̱ mā śarī̇ram ।
yatra̱ bhūmyai̇ vṛ̱ṇase̱ tatrȧ gaccha̱ tatrȧ tvā de̱vassȧvi̱tā dȧdhātu ।
i̱daṃ ta̱ ekȧṃ pa̱ra u̇ ta̱ ekȧṃ tṛ̱tīyėna̱ jyoti̇ṣā̱ saṃvi̇śasva ।
saṃveśȧnasta̱nuvai̱ cāru̇redhi pri̱yo de̱vānā̱̈ṃ para̱me sa̱dhasthė̈ ।
utti̱ṣṭha̱ prehi̱ pradra̱vaukȧḥ kṛṇu̱ṣva para̱me vyȯman ।
ya̱mena̱ tvaṃ ya̱myȧ saṃvidā̱nottamaṃ nāka̱madhi̇rohe̱mam ।
aśmȧnvatī revatī̱ryadvai de̱vasyȧ savi̱tuḥ pa̱vitra̱ṃ yā rā̱ṣṭrātpa̱nnādudva̱yaṃ
tamȧsa̱spari̇ dhā̱tā pu̇nātu ।
a̱smāttvamadhi̇jā̱tȯ'sya̱yaṃ tvadadhi̇jāyatām ।
a̱gnayė vaiśvāna̱rāyȧ suva̱rgāyȧ lo̱kāya̱ svāhā̱̈ ॥ 10 ॥

avá̍śīyatām̐ sa̱dhasthe̱ pañcá̍ ca || 4 ||))

[[6-5-1]]

आया॑तु दे॒वस्सु॒मना॑भिरू॒तिभि॑र्य॒मो ह॑ वे॒ह प्रय॑ताभिर॒क्ता।
आसी॑दता॒ꣳ सु॒प्रय॑ते ह ब॒र्हिष्यू॒र्जाय॑ जा॒त्यै मम॑ शत्रु॒हत्यै᳚।
य॒मे इ॑व॒ यत॑माने॒ यदै॒तं॒ प्र वा॒ꣳ᳚ भर॒न्मानु॑षा दे॒वयन्त॑ः।
आसी॑द॒त॒ꣳ॒ स्वमु॑ लो॒कं वि॒दा॑ने स्वा॒स॒स्थे भ॑वत॒मिन्द॑वे नः।
य॒माय॒ सोम॒ꣳ॒सुनुत य॒माय॑ जुहुता ह॒विः।
य॒म॒ꣳ॒ह॑ य॒ज्ञो ग॑च्छत्य॒ग्निदू॑तो॒ अर॑ंकृतः।
य॒माय॑ घृ॒तव॑द्ध॒विर्जु॒होत॒ प्र च॑ तिष्ठत।
स नो॑ दे॒वेष्वाय॑मद्दी॒र्घमायु॒ः प्रजी॒वसे᳚।
य॒माय॒ मधु॑मत्तम॒ꣳ॒ राज्ञे॑ ह॒व्यं जु॑होतन।
इ॒दं नम॒ ऋषि॑भ्यः पूर्व॒जेभ्य॒ः पूर्वे᳚भ्यः पथि॒कृद्भ्य॑ः॥ ११॥

((āyá̍tu de̱vassu̱manā́̍bhirū̱tibhi̍ryā̱mo há̍ ve̱ha prayá̍tābhira̱ktā |
āsí̍datām̐ supra̱yaté̍ ha ba̱rhiṣyūrjá̍ya jā̱tyai mamá̍ śatru̱hatyai̎ |
ya̱me í̍va̱ yatá̍māne̱ yadaitam̱ pra vām̐̍ bhara̱nmānú̍ṣā deva̱yantá̍ḥ |
āsí̍datam̱̐ svamú̍ lo̱kam vidá̍ne svāsa̱sthe bhá̍vata̱mindá̍ve naḥ |
ya̱māya̱ somam̐̍sunuta ya̱māyá̍ juhutā ha̱viḥ |
ya̱mam̐há̍ ya̱jño gá̍cchatya̱gnidū́̍to̱ aram̐̍kṛtaḥ |
ya̱māyá̍ ghṛ̱tavá̍ddha̱virju̱hota̱ pra cá̍ tiṣṭhata |
sa nó̍ de̱veṣvāyá̍maddī̱rghamāyu̱ḥ prajī̱vase̎ |
ya̱māya̱ madhú̍mattama̱m̐ rājñé̍ ha̱vyam jú̍hotana |
i̱daṃ nama̱ ṛṣibhyaḥ pūrva̱jebhya̱ḥ pūrve̎bhyaḥ pathi̱kṛdbhyá̍ḥ || 11 ||))

[[6-5-2]]

योऽस्य॒ कौष्ठ्य॒ जग॑तः पार्थि॑व॒स्यैक॑ इ॒द्वशी।
य॒मं भ॑ङ्ग्यश्रवो गा॑य॒ यो राजा॑ऽनप॒रोध्य॑ः।
य॒मं गाय॑ भङ्ग्यश्रवो॒ यो राजा॑ऽनप॒रोध्य॑ः।
येना॒पो न॒द्यो॑ धन्वा॑नि॒ येन॒ द्यौः पृ॑थि॒वी दृ॒ढा।
हि॒र॒ण्य॒क॒क्ष्यान्थ्सुधुरा॑न्हिर॒ण्या॒क्षान॑यश्शफान्।
अश्वा॑ननश्य॑तो दा॒नं य॒मो रा॑जाऽभि॒तिष्ठ॑ति।
य॒मो दा॑धार पृ॒थि॒वीं य॒मो विश्व॑मि॒दं जग॑त्।
य॒माय॒ सर्व॒मित्र॑स्थे॒ यत्प्रा॒णद्वा॒युर॑क्षितम्।
यथा॒ पञ्च॒ यथा॒ षड्यथा पञ्च॑द॒षर्य॑ः।

यमं यो विद्याथ्स ब्रूयाद्यथैक ऋषिर्विजानते॥ १२॥

((yo'sya kauṣṭhya jagataḥ pārthivasyaika idvaśī |
yamaṃ bhaṅgyaśravo gāya yo rājā'naparodhyaḥ |
yamaṃ gāya bhaṅgyaśravo yo rājā'naparodhyaḥ |
yenāpo nadyo dhanvāni yena dyauḥ pṛthivī dṛḍhā |
hiraṇyakakṣyānthsudhurān hiraṇyākṣānayaśśaphān |
aśvānanaśyato dānam yamo rājā'bhitiṣṭhati |
yamo dadhāra pṛthivīm yamo viśvamidaṃ jagat |
yamāya sarvamitrasthe yatprāṇadvāyurakṣitam |
yathā pañca yathā ṣadyathā pañcadarṣayaḥ |
yamaṃ yo vidyāthsa brūyādyathaika ṛṣirvijānate || 12 ||))

[[6-5-3]]

त्रिकद्रुकेभिः पतति षडुर्वीरेकमिद्बृहत्।
गायत्री त्रिष्टुप्छन्दाꣳसि सर्वा ता यम आहिता।
अहरहर्नयमानो गामश्वं पुरुषं जगत्।
वैवस्वतो न तृप्यति पञ्चभिर्मानवैर्यमः।
वैवस्वते विविच्यन्ते यमे राजनि ते जनाः।
ये चेह सत्येनेच्छन्ते य उ चानृतवादिनः।
ते राजन्निह विविच्यन्तेऽथा यन्ति त्वामुप।
देवाꣳश्च ये नमस्यन्ति ब्राह्मणाꣳश्चापचित्यति।
यस्मिन्वृक्षे सुपलाशे देवैस्संपिबते यमः।
अत्रा नो विश्पतिः पिता पुराणा अनुवेनति॥ १३॥
पथिकृद्भ्यो विजानतेऽनुवेनति॥ ५॥

((trikadrukebhiḥ patati ṣadurvīrekamidbṛhat |
gāyatrī triṣṭupchandāꣳsi sarvā tā yama āhitā |
aharaharnayamāno gāmaśvam puruṣam jagat |
vaivasvato na tṛpyati pañcabhirmānavairyamaḥ |
vaivasvate vivicyante yame rājani te janāḥ |
ye ceha satyenecchante ya u cānṛtavādinaḥ |
te rājanniha vivicyante'thā yanti tvāmupa |
devāꣳśca ye namasyanti brāhmaṇāꣳścāpacityati |
yasminvṛkṣe supalāśe devaissampibate yamaḥ |
atrā no viśpatiḥ pitā purāṇā anuvenati || 13 ||
pathikṛdbhyo vijānate'nuvenati || 5 ||))

[[6-6-1]]

वैश्वानरे हविरिदं जुहोमि साहस्रमुथ्सꣳशतधारमेतम्।

तस्मिन्नेष पितरं पितामहं प्रपितामहं बिभरत्पिन्वमाने।
द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः।
तृतीयं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः।
इमꣳ समुद्रꣳशतधारमुत्सं व्यच्यमानं भुवनस्य मध्ये।
घृतं दुहानामदितिं जनायाग्ने मा हिꣳसीः परमे व्योमन्न्।
अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै।
सवितैतानि शरीराणि पृथिव्यै मातुरुपस्थ आदधे।
तेभिर्युज्यन्तामघ्नियाः॥ १४॥

((vaiśvānare haviridaṃ juhomi sāhasramuthsaṁśatadhārametam |
tasminneṣa pitaraṁ pitāmahaṃ prapitāmahaṃ bibharatpinvamāne |
drapsaścaskanda pṛthivīmanu dyāmimaṃ ca yonimanu yaśca pūrvaḥ |
tṛtīyaṃ yonimanu saṃcarantaṃ drapsaṃ juhomyanu sapta hotrāḥ |
imaṁ samudraṁśatadhāramuthsaṁ vyacyamānaṃ bhuvanasya madhye |
ghṛtaṃ duhānāmaditiṃ janāyāgne mā hiṁsīḥ parame vyomann |
apeta vīta vi ca sarpatāto ye'tra stha purāṇā ye ca nūtanāḥ |
ahobhiradbhiraktubhirvyaktaṃ yamo dadātvavasānamasmai |
savitaitāni śarīrāṇi pṛthivyai māturupastha ādadhe |
tebhiryujyantāmaghniyāḥ || 14 ||))

[[6-6-2]]
शुनं वाहाश्शुनं नाराश्शुनं कृषतु लाङ्गलम्।
शुनं वरत्रा बध्यन्ताꣳ शुनमष्ट्रामुदिङ्गय शुनासीरा शुनमस्मासु धत्तम्।
शुनासीराविमां वाचं यद्दिवि चक्रथुः पयः।
तेनेमामुपसिञ्चतम्।
सीते वन्दामहे त्वाऽर्वाची सुभगे भव।
यथा नस्सुभगा ससि यथा नस्सुफला ससि।
सवितैतानि शरीराणि पृथिव्यै मातुरुपस्थ आदधे।
तेभिरदिते शम्भव।
विमुच्यध्वमघ्निया देवयाना अतारिष्म तमसस्पारमस्य।
ज्योतिरापाम सुवरगन्म॥ १५॥

((śunaṃ vāhāśśunaṃ nārāśśunaṃ kṛṣatu lāṅgalam |
śunaṃ varatrā badhyantāṁ śunamaṣṭrāmudiṅgaya śunāsīrā śunamasmāsu dhattam
|

śunā̍sīrāvi̱mām̱ vācam̱ yaddi̱vi ca̍kra̱thuḥ payā̍ḥ |
tene̱māmupa̍siñcatam |
sīte̱ vandā̍mahe tvā̱'rvāci̍ subhage bhava |
yathā̍ nassu̱bhagā sā̍si̱ yathā̍ nassu̱phalā sā̍si |
sa̱vi̱taitāni̱ śarī̍rāṇi pṛthi̱vyai mā̱turu̱pastha̱ ādā̍dhe |
tebhi̍radite̱ śambha̍va |
vimu̍cyadhvamaghni̱yā de̍va̱yānā̱ atā̍riṣma̱ tama̍saspā̱rama̱sya |
jyoti̍rāpāma̱ suva̍raganma || 15 ||))

[[6-6-3]]

प्र वाता॒ वान्ति॑ प॒तय॑न्ति वि॒द्युत॒ उदोष॑धीर्जिहते॒ पिन्व॑ते॒ सुव॑ः।
इरा॒ विश्व॑स्मै॒ भुव॑नाय जायते॒ यत्प॒र्जन्य॑ः पृथि॒वीꣳ रेत॒साऽव॑ति।
यथा॑ य॒माय॑ हा॒र्म्यमव॑प॒न्पञ्च॑ मान॒वाः।
ए॒वं व॑पामि हा॒र्म्यं यथाऽसा॑म जीवलो॒के भूर॑यः।
च्चित॑स्स्थ परि॒चित॑ ऊर्ध्व॒चित॑श्श्रयध्वं पि॒तरो॑ दे॒वता᳚।
प्र॒जाप॑तिर्व॒स्सादयतु॒ तया॑ दे॒वत॑या।
आप्या॑यस्व॒ सं ते᳚॥ १६॥
अ॒घ्नि॒या अ॑गन्म स॒प्त च॑॥ ६॥

((pra vātā̱ vānti̍ pa̱tayā̍nti vi̱dyuta̱ udoṣā̍dhīrjihate̱ pinvā̍te̱ suvā̍ḥ |
irā̱ viśvā̍smai̱ bhuvā̍nāya jāyate̱ yatparjanyā̍ḥ pṛthi̱vīm̐ reta̱sā'vā̍ti |
yathā̍ ya̱māyā̍ hā̱rmyamavā̍pa̱npañcā̍ māna̱vāḥ |
e̱vam̱ vā̍pāmi hā̱rmyam̱ yathā'sā̍ma jīvalo̱ke bhūrā̍yaḥ |
citā̍sstha pari̱citā̍ ūrdhva̱citā̍śśrayadhvam̱ pi̱tarō̍ de̱vatā̎ |
pra̱jāpā̍tirvassādayatu̱ tayā̍ de̱vatā̍yā |
āpyā̍yasva̱ sam̱ te̎ || 16 ||
a̱ghni̱yā ā̍ganma sa̱pta cā̍ || 6 ||))

[[6-7-1]]

उत्ते॑ तभ्नोमि पृथि॒वीं त्वपरी॒मं लो॒कं नि॒दध॒न्मो अ॒हꣳरि॑षम्।
ए॒ताꣳ स्थूणां᳚ पि॒तरो॑ धारयन्तु॒ तेऽत्रा॑ य॒मस्साद॑नात्ते मिनोतु।
उप॑सर्प मा॒तरं॒ भूमि॑मे॒तामु॑रु॒व्यच॑सं पृथि॒वीꣳ सु॒शेवा᳚म्।
ऊर्ण॑म्रदा युव॒तिर्दक्षि॑णावत्ये॒षा त्वा॑ पातु॒ निर्ऋ॑त्या उ॒पस्थे᳚।
उच्छ्व॑ञ्चस्व पृथिवि॒ मा विबा॑धिथास्सूपाय॒नाऽस्मै॑ भव सूपवञ्च॒ना।
मा॒ता पु॒त्रं यथा॑ सि॒चाऽभ्ये॑नं भूमि वृणु।
उ॒च्छ्वञ्च॑माना पृथि॒वी हि तिष्ठ॑सि स॒हस्र॒ं मित॒ उप॒ हि श्रय॑न्ताम्।
ते गृ॒हासो॑ मधु॒श्चुतो॒ विश्वाहा᳚ऽस्मै शर॒णास्स॒न्त्वत्र॑।

एणीर्धाना हरिणीरर्जुनीस्सन्तु धेनवः।
तिलवथ्सा ऊर्जमस्मै दुहाना विश्वाहा सन्त्वनपस्फुरन्तीः॥ १७॥

((*utte tabhnomi pṛthivīm tvaparīmam lokam nidadhanmo ahamṛiṣam |
etāṁ sthūṇāṁ pitaro dhārayantu te'tra yamassādanātte minotu |
upasarpa mātaram bhūmimetāmuruvyacasam pṛthivīm suśevām |
ūrṇamradā yuvatirdakṣiṇāvatyeṣā tvā pātu nirṛtyā upasthe |
ucchmañcasva pṛthivi mā vibādhithāssūpāyanā'smai bhava sūpavañcanā |
mātā putram yathā sicā'bhyenam bhūmi vṛṇu |
ucchmañcamānā pṛthivī hi tiṣṭhasi sahasram mita upa hi śrayantām |
te gṛhāso madhuścuto viśvāhā'smai śaraṇāssantvatra |
eṇīrdhānā hariṇīrarjunīssantu dhenavaḥ |
tilavathsā ūrjamasmai duhānā viśvāhā santvanapasphurantīḥ || 17 ||))

[[6-7-2]]
एषा ते यमसादने स्वधा निधीयते गृहे।
अक्षितिर्नाम ते असौ।
इदं पितृभ्यः प्रभरेम बर्हिर्देवेभ्यो जीवन्त उत्तरं भरेम।
तत्त्वमारोहासो मेध्यो भवं यमेन त्वं यम्या संविदानः।
मा त्वा वृक्षौ संबाधिष्टां मा माता पृथिवि त्वम्।
पितॄन् ह्यत्र गच्छास्येधासं यमराज्ये।
मा त्वा वृक्षौ संबाधेथां मा माता पृथिवी मही।
वैवस्वतꣳ हि गच्छासि यमराज्ये विराजसि।
नळं प्लवमारोहैतं नळेन पथोऽन्विहि।
स त्वं नळप्लवो भूत्वा संतर प्रतरोत्तर॥ १८॥

((eṣā te yamasādane svadhā nidhīyate gṛhe |
akṣitirnāma te asau |
idam pitṛbhyaḥ prabharema barhirdevebhyo jīvanta uttaram bharema |
tattvamārohāso medhyo bhavam yamena tvam yamyā samvidānaḥ |
mā tvā vṛkṣau sambādhiṣṭām mā mātā pṛthivi tvam |
pitṝn hyatra gacchāsyedhāsam yamarājye |
mā tvā vṛkṣau sambādhethām mā mātā pṛthivī mahī |
vaivasvatam hi gacchāsi yamarājye virājasi |
nalam plavamārohaitam nalena patho'nvihi |
sa tvam nalaplavo bhūtvā samtara pratarottara || 18 ||))

[[6-7-3]]
सवितैतानि शरीराणि पृथिव्यै मातुरुपस्थ आदधे।

तेभ्यः पृथिवि शम्भव।
षड्ढोता सूर्यं ते चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा।
अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः।
परं मृत्यो अनुपरेहि पन्थां यस्ते स्व इतरो देवयानात्।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान्।
शं वातश्शꣳहि ते घृणिश्शमु ते सन्त्वोषधीः।
कल्पन्तां मे दिशश्शग्माः।
पृथिव्यास्त्वा लोके सादयाम्यमुष्य शर्मासि पितरो देवाता।
प्रजापतिस्त्वा सादयतु तया देवतया।
अन्तरिक्षस्य त्वा दिवस्त्वा दिशां त्वा नाकस्य त्वा पृष्ठे ब्रध्नस्य त्वा विष्टपे सादयाम्यमुष्य शर्मासि पितरो देवता।
प्रजापतिस्त्वा सादयतु तया देवतया॥ १९॥
अनपस्फुरन्तीरुत्तर देवतया द्वे च॥ ७॥

((savitaitāni śarīrāṇi pṛthivyai māturupastha ādadhe |
tebhyaḥ pṛthivi śambhava |
ṣaḍḍhotā sūryaṁ te cakṣurgacchatu vātamātmā dyāṃ ca gaccha pṛthivīṃ ca dharmaṇā |
apo vā gaccha yadi tatra te hitamoṣadhīṣu pratitiṣṭhā śarīraiḥ |
paraṁ mṛtyo anuparehi panthāṃ yaste sva itaro devayānāt |
cakṣuṣmate śṛṇvate te bravīmi mā naḥ prajāṁ rīriṣo mota vīrān |
śaṃ vātaśśaṁhi te ghṛṇiśśamu te santvoṣadhīḥ |
kalpantāṃ me diśaśśagmāḥ |
pṛthivyāstvā loke sādayāmyamuṣya śarmāsi pitaro devātā |
prajāpatistvā sādayatu tayā devatayā |
antarikṣasya tvā divastvā diśāṃ tvā nākasya tvā pṛṣṭhe bradhnasya tvā viṣṭape sādayāmyamuṣya śarmāsi pitaro devatā |
prajāpatistvā sādayatu tayā devatayā || 19 ||
anapasphurantīruttara devatayā dve ca || 7 ||))

[[6-8-1]]
अपूपवान्घृतवाꣳश्चरुरेह सीदतूत्तभ्नुवन्पृथिवीं द्यामुतोपरि।
योनिकृतः पथिकृतस्सपर्यत ये देवानां घृतभागा इह स्थ।
एषा ते यमसादने स्वधा निधीयते गृहेऽसौ।
दशाक्षरा ताꣳ रक्षस्व तां गोपायस्व तां ते परिददामि तस्यां त्वा मा दभन्पितरो देवता।
प्रजापतिस्त्वा सादयतु तया देवतया।

अ॒पू॒पवा᳚ञ्छृतवा᳚न्क्षी॒रवा॒न्दधि॑वा॒न्मधु॑माꣳश्च॒रुरेह सी॑दतूत्तभ्नु॒वन्पृ॑थि॒वीं द्यामु॒तोपरि॑।
यो॒नि॒कृत॑ः पथि॒कृत॑स्सपर्यत॒ ये दे॒वानाꣳ॑ श्रृ॒तभा॑गाः क्षी॒रभा॑गा॒ दधि॑भागा॒ मधु॑भागा इ॒ह स्थ।
ए॒षा ते॑ यम॒साद॑ने स्व॒धा निधी॑यते गृ॒हे॑ऽसौ।
श॒ताक्ष॑रा स॒हस्रा᳚क्षरा॒ऽयुता᳚क्ष॒राऽच्यु॑ताक्षरा॒ ताꣳ र॑क्षस्व॒ तां गोपा॑यस्व॒ तां ते॒ परि॑ददामि॒ तस्यां᳚
त्वा॒माद॑भन्पि॒तरो॑ दे॒वता᳚।
प्र॒जाप॑तिस्त्वा सादयतु॒ तया॑ दे॒वत॑या॥ २०॥
अ॒पू॒पवा॑नसौ॒ दश॑॥ ८॥

((a̱pū̱pavā̐̈nghr̥̱tavām̐ścaṟureha sı̍datūttabhnu̱vanpr̥̍thi̱vīm̐ dyāmu̱topari̍ |
yo̱ni̱kr̥tá̱ḥ pathi̱kr̥tá̱ssaparyata̱ ye de̱vānām̐̈ ghr̥tabhá̱gā i̱ha stha |
e̱ṣā tė yama̱sādȧne sva̱dhā nidhı̍yate gr̥̱hė'sau |
daśä̐kṣarā̱ tām̐ ráḳṣasva̱ tām̐ gȯpāyasva̱ tām̐ te̱ parı̍dadāmi̱ tasyām̐̈ tvā̱ mā
dȧbhanpi̱tarȯ de̱vatā̈ |
pra̱jāpȧtistvā sādayatu̱ tayȧ de̱vatȧyā |
a̱pū̱pavā̐̈ñchr̥̱tavā̐̈nkṣī̱ravā̱ndadhı̍vā̱nmadhu̇māṁ̐ścaṟureha
sı̍datūttabhnu̱vanpr̥̍thi̱vīm̐ dyāmu̱topari̍ |
yo̱ni̱kr̥tá̱ḥ pathi̱kr̥tȧssaparyata̱ ye de̱vānām̐ śr̥̱tabhä̐gāḥ kṣī̱rabhä̐gā̱ dadhı̍bhāgā̱
madhu̇bhāgā i̱ha stha |
e̱ṣā tė yama̱sādȧne sva̱dhā nidhı̍yate gr̥̱hė'sau |
śa̱tākṣȧrā sa̱hasrä̐kṣarā̱'yutä̐kṣa̱rā'cyu̇tākṣarā̱ tām̐ ráḳṣasva̱ tām̐ gȯpāyasva̱ tām̐ te̱
parı̍dadāmi̱ tasyām̐̈ tva̱mādȧbhanpi̱tarȯ de̱vatā̈ |
pra̱jāpȧtistvā sādayatu̱ tayȧ de̱vatȧyā || 20 ||
a̱pū̱pavȧnasau̱ daśȧ || 8 ||))

[[6-9-1]]
ए॒तास्ते᳚ स्व॒धा अ॒मृता᳚ः करोमि॒ यास्ते॑ धा॒नाः प॑रि॒किरा॒म्यत्र॑।
तास्ते॑ य॒मः पि॒तृभि॑स्संविदा॒नोऽत्र॑ धे॒नूः का॑म॒दुघा᳚ः करोतु।
त्वाम॒र्जुनौष॑धीनां॒ पयो᳚ ब्र॒ह्माण॒ इद्धि॑दुः।
तासा᳚ं त्वा॒ मध्या॒दाद॑दे च॒रुभ्यो॒ अपि॑धातवे।
दू॒र्वाणाꣳ॑ स्त॒म्बमाह॑रै॒तां प्रि॒यत॑मां॒ मम॑।
इ॒मां दिश॑ं मनु॒ष्या॑णां॒ भूयि॒ष्ठाऽनु॒ विरो॑हतु।
काशा॑नाꣳ स्त॒म्बमाह॑र॒ रक्ष॑सा॒मप॑हत्यै।
य ए॒तस्यै॑ दि॒शः प॒राभ॑वन्नघा॒यवो॒ यथा॒ ते नाभ॑वा॒न्पुन॑ः।
द॒र्भाणाꣳ॑ स्त॒म्बमाह॑र पि॒तृणामोष॑धीं प्रि॒याम्।
अन्व॒स्यै मू॒लं जीवा॒दनु॒ काण्ड॒मथो॒ फल᳚म्॥ २१॥

((e̱tāstë sva̱dhā a̱mr̥tā̈ḥ karomi̱ yāstė dhā̱nāḥ pȧri̱kirā̱myatrȧ |

tāste yamaḥ pitṛbhissaṃvidāno'tra dhenūḥ kāmadughāḥ karotu |
tvāmarjunauṣadhīnām payo brahmāṇa idviduḥ |
tāsāṃ tvā madhyādādade carubhyo apidhātave |
dūrvāṇām̐ stambamāharaitām priyatamām mama |
imāṃ diśaṃ manuṣyāṇām bhūyiṣṭhā'nu virohatu |
kāśānām̐ stambamāhara rakṣasāmapahatyai |
ya etasyai diśaḥ parābhavannaghāyavo yathā te nābhavānpunaḥ |
darbhāṇām̐ stambamāhara pitṛṇāmoṣadhīm priyām |
anvasyai mūlaṃ jīvādanu kāṇḍamatho phalām || 21 ||))

[[6-9-2]]

लोकं पृण ता अस्य सूददोहसः।
शं वातश्शꣳ हिते घृणिश्शमु ते सन्त्वोषधीः।
कल्पन्तां ते दिशस्सर्वाः।
इदमेव मेतोऽपरामार्तिमाराम कांचन।
तथा तदश्विभ्यां कृतं मित्रेण वरुणेन च।
वरणो वारयादिदं देवो वनस्पतिः।
आर्त्यै निर्ऋत्यै द्वेषाच्च वनस्पतिः।
विधृतिरसि विधारयास्मदघा द्वेषाꣳसि शमि शमयास्मदघा द्वेषाꣳसि यव यवयास्मदघा द्वेषाꣳसि।
पृथिवीं गच्छान्तरिक्षं गच्छ दिवं गच्छ दिशो गच्छ सुवर्गच्छ सुवर्गच्छ दिशो गच्छ दिवं
गच्छान्तरिक्षं गच्छ पृथिवीं गच्छापो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः।
अश्मन्वती रेवतीर्यद्वै देवस्य सवितुः पवित्रं या राष्ट्रात्पन्नादुद्वयं तमसस्परि धाता पुनातु॥ २२॥
फलं पुनातु॥ ९॥

((lokaṃ pṛṇa tā asya sūdadohasaḥ |
śaṃ vātaśśam̐ hite ghṛṇiśśamu te santvoṣadhīḥ |
kalpantām te diśassarvāḥ |
idameva meto'parāmārtimārāma kāṃcana |
tathā tadaśvibhyāṃ kṛtaṃ mitreṇa varuṇena ca |
varaṇo vārayādidaṃ devo vanaspatiḥ |
ārtyai nirṛtyai dveṣācca vanaspatiḥ |
vidhṛtirasi vidhārayāsmadaghā dveṣām̐si śami śamayāsmadaghā dveṣām̐si yava
yavayāsmadaghā dveṣām̐si |
pṛthivīṃ gacchāntarikṣaṃ gaccha divaṃ gaccha diśo gaccha suvargaccha
suvargaccha diśo gaccha divaṃ gacchāntarikṣaṃ gaccha pṛthivīṃ gacchāpo vā
gaccha yadi tatra te hitamoṣadhīṣu pratitiṣṭhā śarīraiḥ |
aśmanvatī revatīryadvai devasya savituḥ pavitraṃ yā rāṣṭrātpannādudvayaṃ
tamasaspari dhātā punātu || 22 ||
phalaṃ punātu || 9 ||))

[[6-10-1]]

आरोहताऽऽयुर्जरसं गृणाना अनुपूर्वं यतमाना यतिष्ट।
इह त्वष्टा सुजनिमा सुरत्नो दीर्घमायुः करतु जीवसे वः।
यथाऽहान्यनुपूर्वं भवन्ति यथर्तव ऋतुभिर्यन्ति क्लृप्ताः।
यथा न पूर्वमपरो जहात्येवा धातरायूꣳषि कल्पयैषाम्।
न हि ते अग्ने तनुवै क्रूरं चकार मर्त्यः।
कपिर्बभस्ति तेजनं पुनर्जरायु गौरिव।
अप नश्शोशुचदघमग्ने शुशुद्ध्या रयिम्।
अप नश्शोशुचदघं मृत्यवे स्वाहा।
अनड्वाहमन्वारभामहे स्वस्तये।
स न इन्द्र इव देवेभ्यो वह्निस्संपारणो भव॥ २३॥

((ārohatā''yurjarasaṃ gṛṇānā anupūrvaṃ yatamānā yatiṣṭa |
iha tvaṣṭā sujanimā suratno dīrghamāyuḥ karatu jīvase vaḥ |
yathā'hānyanupūrvaṃ bhavanti yathartava ṛtubhiryanti klṛptāḥ |
yathā na pūrvamaparo jahātyevā dhātarāyūṃṣi kalpayaiṣām |
na hi te agne tanuvai krūraṃ cakāra martyaḥ |
kapirbabhasti tejanaṃ punarjarāyu gauriva |
apa naśśośucadaghamagne śuśuddhyā rayim |
apa naśśośucadaghaṃ mṛtyave svāhā |
anaḍvāhamanvārabhāmahe svastaye |
sa na indra iva devebhyo vahnissampārano bhava || 23 ||))

[[6-10-2]]

इमे जीवा वि मृतैराववर्तिन्नभूद्भद्रा देवहूतिं नो अद्य।
प्राञ्चोऽगामा नृतये हसाय द्राघीय आयुः प्रतरां दधानाः।
मृत्योः पदं योपयन्तो यदैम द्राघीय आयुः प्रतरां दधानाः।
आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवथ यज्ञियासः।
इमं जीवेभ्यः परिधिं दधामि मा नोऽनु गादपरो अर्धमेतम्।
शतं जीवन्तु शरदः पुरूचीस्तिरो मृत्युं दध्महे पर्वतेन।
इमा नारीरविधवास्सुपत्नीराञ्जनेन सर्पिषा संमृशन्ताम्।
अनश्रवो अनमीवास्सुशेवा आरोहन्तु जनयो योनिमग्रे।
यदाञ्जनं त्रैककुदं जातꣳ हिमवतस्परि।
तेनामृतस्य मूलेनारातीर्जम्भयामसि।
यथा त्वमुद्भिनत्थ्स्योषधे पृथिव्या अधि।

ए॒वमि॒म उ॒द्भिन्द॑न्तु की॒र्त्या यश॑सा ब्रह्मवर्च॒सेन॑।
अ॒जो॑ऽस्यजा॒स्मद॒घा द्वेषा॑ꣳसि य॒वो॑ऽसि य॒वया॒स्मद॒घा द्वेषा॑ꣳसि॥ २४॥
भ॒व॒ ज॒म्भ॒या॒म॒सि॒ त्रीणि॑ च॥ १०॥

((i̱me jī̱vā vi mṛ̱tairāvavarti̱nnabhūdbha̱drā de̱vahūtiṃ no a̱dya |
prāñco'gāmā nṛ̱taye̱ hasāya̱ drāghīya̱ āyuḥ prata̱rāṃ dadhānāḥ |
mṛ̱tyoḥ pa̱daṃ yo̱payanto̱ yadaima̱ drāghīya̱ āyuḥ prata̱rāṃ dadhānāḥ |
ā̱pyāyamānāḥ pra̱jayā̱ dhanena śu̱ddhāḥ pū̱tā bhavatha yajñiyāsaḥ |
i̱maṃ jī̱vebhyaḥ pari̱dhiṃ dadhāmi̱ mā no'nu gā̱daparo̱ ardhame̱tam |
śa̱taṃ jīvantu śa̱radaḥ puru̱cīsti̱ro mṛ̱tyuṃ dadmahe̱ parvatena |
i̱mā nārīravidha̱vāssu̱patnī̱rāñjanena sa̱rpiṣā̱ saṃmṛśantām |
a̱na̱śravo anamī̱vāssu̱śevā̱ ārohantu̱ jana̱yo̱ yoni̱magre |
yadāñjanaṃ traikaku̱daṃ jā̱taṃ hi̱mava̱ta̱spari |
tenā̱mṛtasya̱ mūle̱nārātīrjambhayāmasi |
yathā̱ tvamudbhi̱nathsyoṣadhe pṛ̱thi̱vyā adhi |
e̱vami̱ma udbhindantu kī̱rtyā yaśasā brahmavarca̱sena |
a̱jo'syajā̱smada̱ghā dveṣāṃsi ya̱vo'si ya̱vayā̱smada̱ghā dveṣāṃsi || 24 ||
bha̱va̱ ja̱mbha̱yā̱ma̱si̱ trīṇi ca || 10 ||))

[[6-11-1]]
अप॑ नः॒ शोशु॑चद॒घमग्ने॑ शुशु॒ध्या र॒यिम्।
अप॑ नः॒ शोशु॑चद॒घम्।
सु॒क्षे॒त्रि॒या सु॑गातु॒या व॑सू॒या च॑ यजामहे।
अप॑ नः॒ शोशु॑चद॒घम्।
प्र यद्भन्दि॑ष्ठ ए॒षां॒ प्रास्माका॑सश्च सू॒रय॑ः।
अप॑ नः॒ शोशु॑चद॒घम्।
प्र यद॒ग्नेस्सह॑स्वतो वि॒श्वतो॒ यन्ति॑ सू॒रय॑ः।
अप॑ नः॒ शोशु॑चद॒घम्।
प्र यत्ते॑ अग्ने सू॒रयो॒ जाये॑महि॒ प्र ते॑ व॒यम्।
अप॑ नः॒ शोशु॑चद॒घम्॥ २५॥

((apa na̱śśośucada̱ghamagne śuśu̱ddhyā ra̱yim |
apa na̱śśośucada̱gham |
su̱kṣe̱tri̱yā sugātu̱yā vasū̱yā ca yajāmahe |
apa na̱śśośucada̱gham |
pra yadbhandiṣṭha eṣā̱ṃ prāsmākāsaśca sū̱rayaḥ |
apa na̱śśośucada̱gham |
pra yada̱gnessahasvato vi̱śvato̱ yanti sū̱rayaḥ |
apa na̱śśośucada̱gham |
pra yatte agne sū̱rayo̱ jāyemahi̱ pra te va̱yam |

apa̍ na̱śśośu̍cada̱gham || 25 ||))

[[6-11-2]]

त्वꣳ हि वि॑श्वतोमुख वि॒श्वत॑ः परि॒भूर॑सि।
अप॑ न॒श्शोशु॑चद॒घम्।
द्वि॒षो॑ नो विश्वतो मु॒खाऽति॑ ना॒वेव॑ पारय।
अप॑ न॒श्शोशु॑चद॒घम्।
स न॒स्सिन्धु॑मिव ना॒वयाऽति॑पर्षा स्व॒स्तये॑।
अप॑ न॒श्शोशु॑चद॒घम्।
आप॑ः प्रव॒णादि॑व य॒तीरपा॒स्मथ्स्य॑न्दताम॒घम्।
अप॑ न॒श्शोशु॑चद॒घम्।
उ॒द्व॒नादु॑द॒कानी॒वापा॒स्मथ्स्य॑न्दताम॒घम्।
अप॑ न॒श्शोशु॑चद॒घम्।
आ॒न॒न्दाय॑ प्रमो॒दाय॒ पुन॒रागा॒ꣳ स्वान्गृ॒हान्।
अप॑ न॒श्शोशु॑चद॒घम्।
न वै तत्र॒ प्रमी॑यते॒ गौरश्व॒ः पुरु॑षः प॒शुः।
यत्रे॒दं ब्रह्म॑ क्रि॒यते॑ परि॒धिर्जीव॑नाय॒ कमप॑ न॒श्शोशु॑चद॒घम्॥ २६॥
अ॒घम॒घं च॒त्वारि॑ च॥ ११॥

((tvam̐ hi vi̍śvatomukha vi̱śvata̍ḥ pari̱bhūrasi̍ |
apa̍ na̱śśośu̍cada̱gham |
dviṣo̍ no viśvato mu̱khā'ti̍ nā̱veva̍ pāraya |
apa̍ na̱śśośu̍cada̱gham |
sa na̱ssindhu̍miva nā̱vayā'ti̍parṣā sva̱staye̍ |
apa̍ na̱śśośu̍cada̱gham |
āpa̍ḥ prava̱ṇādi̍va ya̱tīrapā̱smathsya̍ndatāma̱gham |
apa̍ na̱śśośu̍cada̱gham |
u̱dva̱nādu̍da̱kānī̱vāpā̱smathsya̍ndatāma̱gham |
apa̍ na̱śśośu̍cada̱gham |
ā̱na̱ndāya̍ pramo̱dāya̱ puna̱rāgā̱m̐ svāngṛ̱hān |
apa̍ na̱śśośu̍cada̱gham |
na vai tatra̱ pramī̍yate̱ gauraśva̱ḥ puru̍ṣaḥ pa̱śuḥ |
yatre̱dam̱ brahma̍ kri̱yate̍ pari̱dhirjīva̍nāya̱ kamapa̍ na̱śśośu̍cada̱gham || 26 ||
a̱ghama̱gham̱ ca̱tvāri̍ ca || 11 ||))

[[6-12-1]]

अप॑श्याम युव॒तिमा॒चर॑न्तीं मृ॒ताय॑ जी॒वां परि॑णी॒यमा॑नाम्।

अन्धेन या तमसा प्रावृताऽसि प्राचीमवाचीमवयन्नरिष्ट्यै।
मयैतां माꣳस्तां भ्रियमाणा देवी सती पितृलोकं यदैषि।
विश्ववारा नभसा संव्ययन्त्युभौ नो लोकौ पयसाऽऽवृणीहि।
रयिष्ठामग्निं मधुमन्तमूर्मिणमूर्जस्सन्तं त्वा पयसोपसꣳसदेम।
सꣳ रय्या समु वर्चसा सचस्वा नस्स्वस्तये।
ये जीवा ये च मृता ये जाता ये च जन्त्याः।
तेभ्यो घृतस्य धारयितुं मधुधारा व्युन्दती।
माता रुद्राणां दुहिता वसूनाꣳ स्वसाऽऽदित्यानाममृतस्य नाभिः।
प्र णु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट।
पिबतूदकं तृणान्यत्तु।
ओमुथ्सृजत॥ २७॥
वधिष्ट द्वे च॥ १२॥

परे युवाꣳसं प्रविद्वान्भुवनस्याभ्याववृथ्स्वाजो भागोऽयं वै चतुश्चत्वारिꣳशत्।
य एतस्य त्वत्पञ्च।
प्र केतुनेदं ते नाके सुपर्णमपीहि यौ ते ये युध्यन्ते तपसाऽश्मन्वती रेवतीस्सꣳ रभध्वꣳ
सहस्रधारमष्टाविꣳशतिः।
यं ते यत्त उत्तिष्ठात इदं त उत्तिष्ठ प्रेह्यश्मन्यद्वा उद्वयमयं पञ्चविꣳशतिः।
आयातु त्रिꣳशत्।
वैश्वानरे तस्मिन्द्रप्स इममपेताहोभिर्युज्यन्तामग्निया अदिते पारं व आप्यायस्व सप्तविꣳशतिः।
उत्ते गृहेऽक्षितिस्तेभ्यः पृथिवि षड्ढोता परं मे शग्माः पृथिव्या अन्तरिक्षस्य द्वात्रिꣳशत्।
अपूपवानसौ दश शतं दश।
एतास्ते ते दिशस्सर्वा इदमश्मन्विꣳशतिः।
आरोहत तनुवं क्रूरं चकार पुनर्मृत्यवे मा नोऽनु गाद्ब्रह इमा नारीः परि त्रयोविꣳशतिः।
अप नस्सुक्षेत्रिया प्र यद्भन्दिष्ठः प्रयदग्नेः प्र यत्ते अग्ने त्वꣳहि द्विषस्स नस्सिन्धुमापः
प्रवणादुद्वनादानन्दाय न वै तत्र चतुर्विꣳशतिः।
अपश्यामाऽऽवृणीहि द्वादश द्वादश॥ १२॥

परे युवाꣳसमायात्वेतास्ते सप्तविꣳशतिः॥ २७॥

परेयुवाꣳसमोमुथ्सृजत्॥

((apáśyāma yuvạtimā̱carántīṃ mṛ̱tāyá jī̱vāṃ páriṇī̱yamā̍nām ।
a̱ndhena̱ yā tamásā̱ prāvṛ̍tā'si̱ prācī̱mavā̍cī̱mava̱yannariṣ̍ṭyai ।
maya̱itāṃ mā̱ꣳstāṃ bhri̱yamā̍ṇā de̱vī sa̱tī pi̍tṛ̱lo̱kaṃ yadaiṣi̍ ।
vi̱śvavā̍rā̱ nabhásā̱ saṃvyáyantyu̱bhau nó lo̱kau pay̱asā''vṛ̍ṇīhi ।
rayi̍ṣṭhāma̱gniṃ madhúmantamū̱rmiṇa̱mūrjásantaṃ tvā̱ paya̱sopa̱saꣳsádema ।
saꣳ ra̱yyā samu̱ varcásā̱ sacásvā nassva̱stayĕ ।
ye jī̱vā ye cá mṛ̱tā ye jā̱tā ye ca̱ jantyā̎ḥ ।
tebhyó ghṛ̱tasyá dhārayitu̱ṃ madhúdhārā vyunda̱tī ।
mā̱tā ru̱drāṇā̎ṃ duhi̱tā vasū̍nā̎ṃ svasā̍''di̱tyānā̍ma̱mṛtásya̱ nābhi̍ḥ ।
pra ṇu̱ vocaṃ̍ ciki̱tuṣe̱ janā̍ya̱ mā gāmanā̍gā̱madi̍tiṃ vadhiṣṭa̱ ।
pibátūda̱kaṃ tṛ̱ṇā̎nyattu ।
omuthsṛ̱jata ॥ 27 ॥
va̱dhi̱ṣṭa̱ dve cá ॥ 12 ॥

pa̱re̱ yu̱vāꣳsa̱ṃ pravi̱dvānbhuvánasyā̱bhyāvávṛthsvā̱jo bhā̱gó'yaṃ vai catúścatvāriꣳśa̱t ।
ya e̱tasya̱ tvatpañcá ।
pra ke̱tune̱daṃ te̱ nāké supa̱rṇamapīhi yau te̱ ye yudhyánte̱ tapa̱sā'śmánvatī revatī̱ssaꣳ rábhadhvaꣳ sa̱hasrádhāramaṣṭāviꣳśatiḥ ।
yaṃ te̱ yatta̱ utti̱ṣṭhātá i̱daṃ ta̱ utti̍ṣṭha̱ prehyaśma̱nyadvā udva̱yama̱yaṃ pañcáviꣳśatiḥ ।
āyā̍tu tri̱ꣳśat ।
vai̍śvāna̱re tasmi̍ndra̱psa i̱mamape̱tāhóbhiryujyantāmaghni̱yā ádite pāra̱ṃ va̱ āpyā̍yasva̱ sa̱ptaviꣳśatiḥ ।
utté gṛ̱he'kṣi̍ti̱stebhyáḥ pṛthivi̱ ṣa̱ḍ̱dhóta̱ para̍ṃ me śa̱gmāḥ pṛ̍thi̱vyā a̱ntari̍kṣasya̱ dvātriꣳśat ।
apū̱pavā̍nasau̱ daśá śa̱tá dáśa ।
e̱tāsté te̱ diśa̱ssarvā̍ idamaśmánviꣳśa̱tiḥ ।
ārо́hata ta̱nuvai̎ krū̱raṃ ca̱kāra̱ punármṛ̱tyave̱ mā no'nú gāddadmaha i̱mā nārī̱ḥ pari̱ trayóviꣳśatiḥ ।
apá nassukṣetri̱yā pra yadbhandi̍ṣṭha̱ḥ prayada̱gneḥ pra yatté agne̱ tvaꣳhi dviṣa̱ssa na̱ssindhu̱māpáḥ prava̱ṇādúdva̱nādā̍na̱ndāya̱ na vai tatra̱ catúrviꣳśati̱ḥ ।
apáśyā̱mā''vṛ̍ṇīhi̱ dvādáśa dvādaśa ॥ 12 ॥

pa̱re̱ yu̱vāꣳsa̱māyā̎tve̱tāsté sa̱ptaviꣳśatiḥ ॥ 27 ॥

pa̱re̱yu̱vāꣳsa̱momuthsṛ̱jat ॥))

[[6-0-0]]
सं त्वां सिञ्चामि यजुंषा प्रजामायुर्धनं च॥
ॐ शान्तिः शान्तिः शान्तिः॥

((saṃ tvȁ siñcāmi̱ yaju̍ṣā pra̱jāmāyu̱rdhanaṃ̍ ca ||
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ ||))

# Taittirīya-Āraṇyaka

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 7

[[7-1-1]]

शं नो᳚ मि॒त्रश्शं वरु॑णः ।
शं नो᳚ भवत्वर्य॒मा ।
शं न॒ इन्द्रो॒ बृह॒स्पतिः॑ ।
शं नो॒ विष्णु॑रुरुक्र॒मः ।
नमो॒ ब्रह्म॑णे ।
नम॑स्ते वायो ।
त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि ।
त्वमे॒व प्र॒त्यक्षं॒ ब्रह्म॑ वदिष्यामि ।
ऋ॒तं व॑दिष्यामि ।
स॒त्यं व॑दिष्यामि ।
तन्माम॑वतु ।
तद्व॒क्तार॑मवतु ।
अव॑तु माम् ।
अव॑तु व॒क्तार᳚म् ।
ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥ १ ॥
स॒त्यं व॑दिष्यामि॒ पञ्च॑ च ॥ १ ॥

((śaṃ no̍ mi̱traśśaṃ varu̍ṇaḥ |
śaṃ no̍ bhavatvarya̱mā |
śaṃ na̱ indro̱ bṛha̱spati̍ḥ |
śaṃ no̱ viṣṇu̍rurukra̱maḥ |
namo̱ brahma̍ṇe |
nama̍ste vāyo |
tvame̱va pra̱tyakṣa̱ṃ brahmā̍si |
tvame̱va pra̱tyakṣa̱ṃ brahma̍ vadiṣyāmi |

ṛtaṃ va̍diṣyāmi ।
sa̱tyaṃ va̍diṣyāmi ।
tanmāma̍vatu ।
tadva̱ktāra̍mavatu ।
ava̍tu̱ mām ।
ava̍tu va̱ktāra̎m ।
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ ॥ 1 ॥
sa̱tyaṃ va̍diṣyāmi̱ pañca̍ ca ॥ 1 ॥))

[[7-2-1]]

ॐ शीक्षां व्या॒ख्यास्या॒मः।
व॒र्णस्स्वरः।
मात्रा॒ बलम्।
साम॑ सन्ता॒नः।
इत्युक्तश्शी॒क्षाध्या॒यः॥ २॥
शीक्षां पञ्च॑॥ २॥

((āūṃ śīkṣāṃ vyā̎khyāsyā̱maḥ ।
varṇa̱ssvaraḥ ।
mātrā̱ balam ।
sāma̍ santā̱naḥ ।
ityuktaśśī̎kṣādhyā̱yaḥ ॥ 2 ॥
śīkṣāṃ pañca̍ ॥ 2 ॥))

[[7-3-1]]

स॒ह नौ॒ यशः।
सह नौ ब्र॑ह्मव॒र्चसम्।
अथातस्सꣳहिताया उपनिषदं व्या॒ख्यास्या॒मः।
पञ्चस्वधिक॑रणे॒षु।
अधिलोकमधिज्यौतिषमधिविद्यमधिप्रजमध्या॒त्मम्।
ता महासꣳहिता इ॑त्याच॒क्षते।
अथा॑धिलो॒कम्।
पृथिवी पू॒र्वरू॒पम्।
द्यौरुत्त॑ररू॒पम्।
आका॑शस्स॒न्धिः॥ ३॥

((sa̱ha nau̱ yaśaḥ ।
saha nau bra̍hmavaṟcasam ।

athātassam̐̎hitāyā upaniṣadaṃ vyā̎khyāsyā̱maḥ |
pañcasvadhikā̍raṇe̱ṣu |
adhilokamadhijyautiṣamadhividyamadhiprajā̍madhyā̱tmam |
tā mahāsam̐̎hitā i̍tyāca̱kṣate |
athā̎dhilo̱kam |
pṛthivī pū̎rvarū̱pam |
dyauruttā̍rarū̱pam |
ākā̎śassa̱ndhiḥ || 3 ||))

[[7-3-2]]

वायु॑स्सन्धा॒नम्।

इत्य॑धिलो॒कम्।

अथा॑धिज्यौ॒तिषम्।

अ॒ग्निः पू᳚र्वरू॒पम्।

आदित्य उत्त॑ररू॒पम्।

आ॑पस्स॒न्धिः।

वैद्युत॑स्सन्धा॒नम्।

इत्य॑धिज्यौ॒तिषम्।

अथा॑धिवि॒द्यम्।

आचार्यः पू᳚र्वरू॒पम्॥ ४॥

((vāyu̍ssandhā̱nam |
ityā̍dhilo̱kam |
athā̎dhijyau̱tiṣam |
agniḥ pū̎rvarū̱pam |
āditya uttā̍rarū̱pam |
ā̍passa̱ndhiḥ |
vaidyutā̍ssandhā̱nam |
ityā̍dhijyau̱tiṣam |
athā̎dhivi̱dyam |
ācāryaḥ pū̎rvarū̱pam || 4 ||))

[[7-3-3]]

अन्तेवास्युत्त॑ररू॒पम्।

वि॑द्या स॒न्धिः।

प्रवचन॑ꣳ सन्धा॒नम्।

इत्य॑धिवि॒द्यम्।

अथा॒धिप्रजम्।

माता पूर्वरूपम्।
पितोत्तररूपम्।
प्रजा सन्धिः।
प्रजननꣳ सन्धानम्।
इत्यधिप्रजम्॥ ५॥

((antevāsyuttararūpam ।
vidyā sandhiḥ ।
pravacanaꣳ sandhānam ।
ityadhividyam ।
athādhiprajam ।
mātā pūrvarūpam ।
pitottararūpam ।
prajā sandhiḥ ।
prajananaꣳ sandhānam ।
ityadhiprajam ॥ 5 ॥))

[[7-3-4]]
अथाध्यात्मम्।
अधरा हनुः पूर्वरूपम्।
उत्तरा हनुरुत्तररूपम्।
वाक्सन्धिः।
जिह्वा सन्धानम्।
इत्यध्यात्मम्।
इतीमा महासꣳहिताः।
य एवमेता महासꣳहिता व्याख्याता वेद।
सन्धीयते प्रजया पशुभिः।
ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन॥ ६॥
सन्धिराचार्यः पूर्वरूपमित्यधिप्रजं लोकेन॥ ३॥

((athādhyātmam ।
adharā hanuḥ pūrvarūpam ।
uttarā hanuruttararūpam ।
vāksandhiḥ ।
jihvā sandhānam ।
ityadhyātmam ।
itīmā mahāsaꣳhitāḥ ।
ya evametā mahāsaꣳhitā vyākhyātā veda ।

sandhīyate prajáyā pa̱śubhiḥ |
brahmavarcasenānnādyena suvargyeṇá loke̱na || 6 ||
sa̱ndhirācāryaḥ pū̎rvarū̱pamityadhi̱praja̱m lóke̱na || 3 ||))

[[7-4-1]]
यश्छन्द॑सामृष॒भो वि॒श्वरू॑पः।
छन्दो॒भ्योऽध्य॒मृता᳚थ्सं ब॒भूव॑।
स मेन्द्रो॑ मे॒धया᳚ स्पृणोतु।
अ॒मृत॑स्य देव॒ धार॑णो भूयासम्।
शरी॑रं मे॒ विच॑र्षणम्।
जि॒ह्वा मे॒ मधु॑मत्तमा।
कर्णा᳚भ्यां भूरि॒ विश्रु॑वम्।
ब्रह्म॑णः को॒शो॑ऽसि मे॒धयाऽपि॑हितः।
श्रु॒तं मे॑ गोपाय।
आ॒वह॑न्ती वितन्वा॒ना॥ ७॥

((yaśchandásāmṛṣa̱bho vi̱śvarū́paḥ |
chando̱bhyo'dhya̱mṛtā̎thsaṃ ba̱bhūvá |
sa mendró me̱dhayā̎ spṛṇotu |
a̱mṛtásya deva̱ dhāráṇo bhūyāsam |
śarī́raṃ me̱ vicárṣaṇam |
ji̱hvā me̱ madhúmattamā |
karṇā̎bhyāṃ bhūri̱ viśrúvam |
brahmáṇaḥ ko̱śó'si me̱dhayā'pí̱hitaḥ |
śru̱taṃ mé gopāya |
ā̱vahántī vitanvā̱nā || 7 ||))

[[7-4-2]]
कु॒र्वा॒णा चीर॑मा॒त्मन॑ः।
वासाꣳ॑सि॒ मम॒ गाव॑श्च।
अ॒न्न॒पा॒ने च॑ स॒र्वदा।
ततो॑ मे॒ श्रिय॒माव॑ह।
लो॒म॒शां प॒शुभि॑स्स॒ह स्वाहा᳚।
आ मा॑ यन्तु ब्रह्मचा॒रिण॒स्स्वाहा᳚।
वि मा॑ऽऽयन्तु ब्रह्मचा॒रिण॒स्स्वाहा᳚।
प्र मा॑ऽऽयन्तु ब्रह्मचा॒रिण॒स्स्वाहा᳚।

दमा॑यन्तु ब्रह्मचा॒रिण॒स्स्वाहा॑।
शमा॑यन्तु ब्रह्मचा॒रिण॒स्स्वाहा॑॥ ८॥

((ku̱rvā̱ṇā cīrá̱mā̱tmanáḥ ।
vāsā̍ṁ si̱ mama̱ gāváśca ।
a̱nna̱pā̱ne cá sarva̱dā ।
tató me̱ śriya̱māváha ।
lo̱ma̱śā̱ṃ pa̱śubhi̍ssa̱ha svāhā̎ ।
ā má yantu brahmacā̱riṇa̱ssvāhā̎ ।
vi má''yantu brahmacā̱riṇa̱ssvāhā̎ ।
pra má''yantu brahmacā̱riṇa̱ssvāhā̎ ।
damáyantu brahmacā̱riṇa̱ssvāhā̎ ।
śamáyantu brahmacā̱riṇa̱ssvāhā̎ ॥ 8 ॥))

[[7-4-3]]
यशो॒ जने॑ऽसानि॒ स्वाहा॑।
श्रेया॒न्वस्य॑सोऽसानि॒ स्वाहा॑।
तं त्वा॑ भग॒ प्रवि॑शानि॒ स्वाहा॑।
स मा॑ भग॒ प्रवि॑श॒ स्वाहा॑।
तस्मि॑न्थ्स॒हस्र॑शाखे।
नि भ॑गा॒हं त्वयि॑ मृजे॒ स्वाहा॑।
यथाऽऽप॒ः प्रव॑ता॒ऽऽयन्ति॑।
यथा॒ मासा॑ अह॒र्जरम्।
ए॒वं मां ब्र॑ह्मचा॒रिण॑ः।
धात॒राय॑न्तु स॒र्वत॒स्स्वाहा॑।
प्र॒ति॒वे॒शो॑ऽसि॒ प्र मा॑ भाहि॒ प्र मा॑ पद्यस्व॥ ९॥
वि॒त॒न्वा॒ना शमा॑यन्तु ब्रह्मचा॒रिण॒स्स्वाहा॒ धात॒राय॑न्तु स॒र्वत॒स्स्वाहैकं॑ च॥ ४॥

((yaśo̱ janésā̱ni̱ svāhā̎ ।
śreyā̱nvasyáso'sā̱ni̱ svāhā̎ ।
taṃ tvá bhaga̱ pravi̍śā̱ni̱ svāhā̎ ।
sa má bhaga̱ pravi̍śa̱ svāhā̎ ।
tasmi̎nthsa̱hasráśākhe ।
ni bhágā̱haṃ tvayi̍ mṛje̱ svāhā̎ ।
yathā''pa̱ḥ pravátā̱''yanti̍ ।
yathā̱ māsá aharja̱ram ।
e̱vaṃ māṃ bráhmacā̱riṇáḥ ।
dhāta̱rāyántu sa̱rvata̱ssvāhā̎ ।
pra̱ti̱ve̱śó'si̱ pra má bhāhi̱ pra má padyasva ॥ 9 ॥

vi̱ta̱nvā̱nā śamá̍yantu brahmacā̱ri̱ṇa̱ssvāhā̱ dhāta̱rāyá̍ntu sa̱rvata̱ssvāhaikaṃ̍ ca || 4 ||))

[[7-5-1]]

भूर्भुव॒स्सुव॒रिति॒ वा ए॒तास्ति॒स्रो व्याहृ॑तयः।
तासा॑मु ह स्मै॒ तां च॑तु॒र्थीम्।
माहा॑चमस्यः॒ प्रवे॑दयते।
मह॒ इति॑।
तद्ब्रह्म॑।
स आ॒त्मा।
अङ्गा᳚न्य॒न्या दे॒वताः᳚।
भूरिति॒ वा अ॒यं लो॒कः।
भुव॒ इत्य॒न्तरि॑क्षम्।
सुव॒रित्य॒सौ लो॒कः॥ १०॥

((bhūrbhuva̱ssuva̱riti̱ vā e̱tāsti̱sro vyāhṛ̍tayaḥ |
tāsá̍mu ha smai̱ tāṃ cá̍tu̱rthīm |
māhá̍camasya̱ḥ pravé̍dayate |
maha̱ iti̍ |
tadbrahmá̍ |
sa ā̱tmā |
aṅgā̎nya̱nyā de̱vatā̎ḥ |
bhūriti̱ vā a̱yaṃ lo̱kaḥ |
bhuva̱ itya̱ntari̍kṣam |
suva̱ritya̱sau lo̱kaḥ || 10 ||))

[[7-5-2]]

मह॒ इत्या॑दि॒त्यः।
आ॒दि॒त्ये॒न वाव सर्वे॑ लो॒का महीं॑यन्ते।
भूरिति॒ वा अ॒ग्निः।
भुव॒ इति॑ वा॒युः।
सुव॒रित्या॑दि॒त्यः।
मह॒ इति॑ च॒न्द्रमाः᳚।
च॒न्द्रम॑सा॒ वाव सर्वा॑णि॒ ज्योती॑ꣳषि॒ मही॑यन्ते।
भूरिति॒ वा ऋचः॑।
भुव॒ इति॒ सामा॑नि।

सुवरिति यजूꣳषि॥ ११॥

((maha ityādityaḥ ।
ādityena vāva sarve lokā mahīyante ।
bhūriti vā agniḥ ।
bhuva iti vāyuḥ ।
suvarityādityaḥ ।
maha iti candramāḥ ।
candramasā vāva sarvāṇi jyotīṁṣi mahīyante ।
bhūriti vā ṛcaḥ ।
bhuva iti sāmāni ।
suvariti yajūṁṣi ॥ 11 ॥))

[[7-5-3]]

मह इति ब्रह्म।
ब्रह्मणा वाव सर्वे वेदा महीयन्ते।
भूरिति वै प्राणः।
भुव इत्यपानः।
सुवरिति व्यानः।
मह इत्यन्नम्।
अन्नेन वाव सर्वे प्राणा महीयन्ते।
ता वा एताश्चतस्रश्चतुर्धा।
चतस्रश्चतस्रो व्याहृतयः।
ता यो वेद।
स वेद ब्रह्म।
सर्वेऽस्मै देवा बलिमावहन्ति॥ १२॥
असौ लोको यजूꣳषि वेद द्वे च॥ ५॥

((maha iti brahma ।
brahmaṇā vāva sarve vedā mahīyante ।
bhūriti vai prāṇaḥ ।
bhuva ityapānaḥ ।
suvariti vyānaḥ ।
maha ityannam ।
annena vāva sarve prāṇā mahīyante ।
tā vā etāścatasraścaturdhā ।
catasraścatasro vyāhṛtayaḥ ।
tā yo veda ।
sa veda brahma ।

sarvē̎'smai de̱vā ba̱limāva̍hanti || 12 ||
a̱sau lo̱ko yaju̍m̐ṣi̱ veda̱ dve ca̍ || 5 ||))

[[7-6-1]]

स य ए̱षो̎ऽन्तर॑हृदय आका̱शः।
तस्मि॑न्न॒यं पु॑रु॑षो मनो̱मय॑ः।
अमृ॑तो हि॒र॒ण्मय॑ः।
अन्त॑रेण॒ ताल॑के।
य ए̱ष स्तन॑ इवाव̱लम्ब॑ते।
सै̎न्द्रयो̱निः।
यत्रा̱सौ के॑शा̱न्तो वि̱वर्त॑ते।
व्य̱पोह्य॑ शीर्षकपा̱ले।
भूरित्य̱ग्नौ प्रति॑तिष्ठति।
भुव̱ इति॑ वा̱यौ॥ १३॥

((sa ya e̱ṣō̎'ntarahṛ̍daya ākā̱śaḥ |
tasmi̍nna̱yam puru̍ṣo mano̱maya̍ḥ |
amṛ̍to hira̱ṇmaya̍ḥ |
anta̍reṇa̱ tālu̍ke |
ya e̱ṣa stana̍ ivāva̱lamba̍te |
sē̎ndrayo̱niḥ |
yatrā̱sau ke̍śā̱nto vi̱varta̍te |
vya̱pohya̍ śīrṣakapā̱le |
bhūritya̱gnau prati̍tiṣṭhati |
bhuva̱ iti̍ vā̱yau || 13 ||))

[[7-6-2]]

सुव॒रित्या॑दि॒त्ये।
मह॒ इति॒ ब्रह्म॑णि।
आ॒प्नोति॒ स्वारा̎ज्यम्।
आ॒प्नोति॒ मन॑स॒स्पति̎म्।
वाक्प॑ति॒श्चक्षु॑ष्पतिः।
श्रोत्र॑पति॒र्वि॒ज्ञान॑पतिः।
ए॒तत्तत॑ो भवति।
आ॒का॒शश॑रीरं॒ ब्रह्म॑।
स॒त्यात्म॑ प्रा॒णारा॑मं॒ मन॑ आनन्दम्।

शान्ति॑समृद्धम॒मृत᳚म्।
इति॑ प्राचीनयो॒ग्योपा᳚स्स्व॥ १४॥
वा॒या॒व॒मृ॒त॒मेकं॑ च॥ ६॥

((suva̱rityá̍di̱tye ।
maha̱ iti̱ brahmá̍ṇi ।
ā̱pnoti̱ svārā̎jyam ।
ā̱pnoti̱ maná̍sa̱spati̎m ।
vākpá̍ti̱ścakṣú̍ṣpatiḥ ।
śrotrá̍patirvijñāná̍patiḥ ।
e̱tattató̍ bhavati ।
ā̱kā̱śaśá̍rīra̱ṃ brahmá̍ ।
sa̱tyātmá̍ prā̱ṇārā̍ma̱ṃ maná̍ ānandam ।
śānti̍samṛddhama̱mṛtā̎m ।
iti̍ prācīnayo̱gyopā̎ssva ॥ 14 ॥
vā̱yā̱va̱mṛ̱ta̱mekaṃ̍ ca ॥ 6 ॥))

[[7-7-1]]
पृ॒थि॒व्य॑न्तरि॑क्ष॒ं द्यौर्दिशो॑ऽवान्तरदि॒शाः।
अ॒ग्निर्वा॒युरा॑दि॒त्यश्च॒न्द्रमा॒ नक्ष॑त्राणि।
आप॒ ओष॑धयो॒ व॒नस्पत॑य आका॒श आ॒त्मा।
इत्य॑धिभू॒तम्।
अथाध्या॒त्मम्।
प्रा॒णो व्या॒नो॑ऽपा॒न उ॑दा॒नस्स॑मा॒नः।
च॒क्षुश्श्रोत्र॒ं मनो॒ वाक्त्वक्।
चर्म᳚ मा॒ꣳस॒ꣳ स्नावास्थि॑ म॒ज्जा।
ए॒तद॑धिवि॒धाय॒ ऋषि॒रवो॑चत्।
पाङ्क्त॒ं वा इ॒दꣳ सर्व᳚म्।
पाङ्क्ते॑नैव पाङ्क्त॒ꣳ स्पृणो॒तीति॑॥ १५॥
सर्व॒मेकं॑ च॥ ७॥

((pṛ̱thi̱vyá̍ntari̍kṣa̱ṃ dyaurdiśó̍'vāntaradi̱śāḥ ।
a̱gnirvā̱yurā̍di̱tyaśca̱ndramā̱ nakṣa̍trā̱ṇi ।
āpa̱ oṣá̍dhayo̱ vana̱spatá̍ya ākā̱śa ā̱tmā ।
ityá̍dhibhū̱tam ।
athādhyā̱tmam ।
prā̱ṇo vyā̱nó̍'pā̱na ú̍dā̱nassá̍mā̱naḥ ।
cakṣu̱śśrotra̱ṃ mano̱ vāktvak ।

carma̍ mā̎m̐sam̐ snāvāsthi̍ ma̱jjā |
e̱tada̍dhivi̱dhāya̱ ṛ̱ṣi̱ravo̍cat |
pāṅkta̱ṃ vā i̱dam̐ sarva̎m |
pāṅkte̍nai̱va pāṅktam̐̎ spṛṇo̱tīti̍ || 15 ||
sarva̱mekaṃ̍ ca || 7 ||))

[[7-8-1]]

ओमिति॒ ब्रह्म॑।

ओमिती॒दꣳ सर्व᳚म्।

ओमित्ये॒तद॑नुकृति ह स्म॒ वा अ॒प्यो श्रा॑व॒येत्याश्रा॑वयन्ति।

ओमिति॒ सामा॑नि गायन्ति।

ओꣳ शोमिति॑ श॒स्त्राणि॑ शꣳसन्ति।

ओमित्य॑ध्व॒र्युः प्र॑तिग॒रं प्रति॑गृणाति।

ओमिति॒ ब्रह्मा॒ प्रसौ॑ति।

ओमित्य॑ग्निहो॒त्रमनु॑जानाति।

ओमिति॑ ब्राह्म॒णः प्र॑व॒क्ष्यन्ना॑ह॒ ब्रह्मोपा᳚प्नवा॒नीति॑।

ब्रह्मै॒वोपा᳚प्नोति॥ १६॥

ओं दश॑॥ ८॥

((omiti̱ brahma̍ |
omitī̱dam̐ sarva̎m |
omitye̱tada̍nukṛti ha sma̱ vā a̱pyo śrā̍va̱yetyāśrā̍vayanti |
omiti̱ sāmā̍ni gāyanti |
om̐ śomiti̍ śa̱strāṇi̍ śam̐santi |
omitya̍dhva̱ryuḥ pra̍tiga̱raṃ prati̍gṛṇāti |
omiti̱ brahmā̱ prasau̍ti |
omitya̍gniho̱tramanu̍jānāti |
omiti̍ brāhma̱ṇaḥ pra̍va̱kṣyannā̍ha̱ brahmopā̎pnavā̱nīti̍ |
brahmai̱vopā̎pnoti || 16 ||
oṃ daśa̍ || 8 ||))

[[7-9-1]]

ऋतं च स्वाध्यायप्रव॑चने॒ च।

सत्यं च स्वाध्यायप्रव॑चने॒ च।

तपश्च स्वाध्यायप्रव॑चने॒ च।

दमश्च स्वाध्यायप्रव॑चने॒ च।

शमश्च स्वाध्यायप्रव॑चने॒ च।

अग्नयश्च स्वाध्यायप्रव॑चने॒ च।
अग्निहोत्रं च स्वाध्यायप्रव॑चने॒ च।
अतिथयश्च स्वाध्यायप्रव॑चने॒ च।
मानुषं च स्वाध्यायप्रव॑चने॒ च।
प्रजा च स्वाध्यायप्रव॑चने॒ च।
प्रजनश्च स्वाध्यायप्रव॑चने॒ च।
प्रजातिश्च स्वाध्यायप्रव॑चने॒ च।
सत्यमिति सत्यवचा॑ राथी॒तरः।
तप इति तपोनित्यः पौ॑रुशि॒ष्टिः।
स्वाध्यायप्रवचने एवेति नाको॑ मौद्ग॒ल्यः।
तद्धि तप॑स्तद्धि॒ तपः॥ १७॥
प्रजा च स्वाध्यायप्रव॑चने॒ च षट्च॑॥ ९॥

((ṛtaṃ ca svādhyāyapravácane̱ ca |
satyaṃ ca svādhyāyapravácane̱ ca |
tapaśca svādhyāyapravácane̱ ca |
damaśca svādhyāyapravácane̱ ca |
śamaśca svādhyāyapravácane̱ ca |
agnayaśca svādhyāyapravácane̱ ca |
agnihotraṃ ca svādhyāyapravácane̱ ca |
atithayaśca svādhyāyapravácane̱ ca |
mānuṣaṃ ca svādhyāyapravácane̱ ca |
prajā ca svādhyāyapravácane̱ ca |
prajanaśca svādhyāyapravácane̱ ca |
prajātiśca svādhyāyapravácane̱ ca |
satyamiti satyavacā́ rāthī̱taraḥ |
tapa iti taponityaḥ paúruśi̱ṣṭiḥ |
svādhyāyapravacane eveti nākó maudga̱lyaḥ |
taddhi tapástaddhi̱ tapaḥ || 17 ||
prajā ca svādhyāyapravácane̱ ca ṣaṭcá || 9 ||))

[[7-10-1]]
अ॒हं वृ॒क्षस्य॒ रेरि॑वा।
की॒र्तिः पृ॒ष्ठं गि॒रेरि॑व।
ऊ॒र्ध्वप॑वित्रो वा॒जिनी॑व स्व॒मृत॑मस्मि।
द्रवि॑ण॒ꣳ॒ सव॑र्चसम्।
सुमेधा अ॑मृतो॒क्षितः।

इति त्रिशङ्कोर्वेदानुवचनम्॥ १८॥
अहं षट्॥ १०॥

((aham vṛkṣasya rerivā ।
kīrtiḥ pṛṣṭhaṃ gireriva ।
ūrdhvapavitro vājinīva svamṛtamasmi ।
draviṇam̐ savarcasam ।
sumedhā amṛtokṣitaḥ ।
iti triśaṅkorvedānuvacanam ॥ 18 ॥
aham̐ ṣaṭ ॥ 10 ॥))

[[7-11-1]]
वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति।
सत्यं वद।
धर्मं चर।
स्वाध्यायान्मा प्रमदः।
आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।
सत्यान्न प्रमदितव्यम्।
धर्मान्न प्रमदितव्यम्।
कुशलान्न प्रमदितव्यम्।
भूत्यै न प्रमदितव्यम्।
स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्॥ १९॥

((vedamanūcyācāryo'ntevāsinamanuśāsti ।
satyaṃ vada ।
dharmaṃ cara ।
svādhyāyānmā pramadaḥ ।
ācāryāya priyaṃ dhanamāhṛtya prajātantuṃ mā vyavacchetsīḥ ।
satyānna pramaditavyam ।
dharmānna pramaditavyam ।
kuśalānna pramaditavyam ।
bhūtyai na pramaditavyam ।
svādhyāyapravacanābhyāṃ na pramaditavyam ॥ 19 ॥))

[[7-11-2]]
देवपितृकार्याभ्यां न प्रमदितव्यम्।
मातृदेवो भव।
पितृदेवो भव।

आचार्यदे॑वो॒ भव।
अति॑थिदे॒वो॒ भव।
यान्यनवद्या॑नि कर्मा॒णि।
तानि सेवि॑तव्या॒नि।
नो इ॑तरा॒णि।
यान्यस्माकꣳ॑ सुच॑रिता॒नि।
तानि त्वयो॑पास्या॒नि॥ २०॥

((devapitṛkāryābhyāṃ na pramaditavyam |
mātṛdevo bhava |
pitṛdevo bhava |
ācāryadevo bhava |
atithidevo bhava |
yānyanavadyāni karmāṇi |
tāni sevitavyāni |
no itarāṇi |
yānyasmākam̐ sucaritāni |
tāni tvayopāsyāni || 20 ||))

[[7-11-3]]
नो इ॑तरा॒णि।
ये के चारुमच्छ्रेया॑ꣳसो ब्रा॒ह्मणाः।
तेषां त्वयाऽऽसने न प्रश्व॑सित॒व्यम्।
श्रद्ध॑या दे॒यम्।
अश्रद्ध॑याऽदे॒यम्।
श्रि॑या दे॒यम्।
ह्रि॑या दे॒यम्।
भि॑या दे॒यम्।
संवि॑दा दे॒यम्।
अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकि॑त्सा वा॒ स्यात्॥ २१॥

((no itarāṇi |
ye ke cārumacchreyām̐so brāhmaṇāḥ |
teṣāṃ tvayā''sane na praśvasitavyam |
śraddhayā deyam |
aśraddhayā'deyam |
śriyā deyam |

hri̍yā de̠yam ।
bhi̍yā de̠yam ।
saṃvi̍dā de̠yam ।
atha yadi te karmavicikithsā vā vṛttavicikiˈthsā vā̠ syāt ॥ 21 ॥))

[[7-11-4]]
ये तत्र ब्राह्मणाः᳚स्संम॒र्शिनः।
युक्ता॑ आयु॒क्ताः।
अलूक्षा॑ धर्म॑कामा॒स्स्युः।
यथा ते॑ तत्र॑ वर्ते॒रन्न्।
तथा तत्र॑ वर्ते॒थाः।
अथाभ्याः᳚ख्याते॒षु।
ये तत्र ब्राह्मणाः᳚स्संम॒र्शिनः।
युक्ता॑ आयु॒क्ताः।
अलूक्षा॑ धर्म॑कामा॒स्स्युः।
यथा ते॑ तेषु॑ वर्ते॒रन्न्।
तथा तेषु॑ वर्ते॒थाः।
एष॑ आदे॒शः।
एष उ॑पदे॒शः।
एषा वे॑दोप॒निषत्।
एतद॑नुशा॒सनम्।
एवमुपा॑सित॒व्यम्।
एवमु चैत॑दुपा॒स्यम्॥ २२॥
स्वाध्यायप्रवचनाभ्यां न प्रम॑दित॒व्यं तानि त्वयो॑पास्या॒नि स्यात्तेषु॑ वर्ते॒रन्थ्स॒प्त च॑॥ ११॥

((ye tatra brāhmaṇā᳚ssaṃma̠rśinaḥ ।
yukta̍ āyu̠ktāḥ ।
alūkṣa̍ dharma̍kāmā̠ssyuḥ ।
yathā te̍ tatra̍ varte̠rann ।
tathā tatra̍ varte̠thāḥ ।
athābhyā᳚khyā̠teṣu ।
ye tatra brāhmaṇā᳚ssaṃma̠rśinaḥ ।
yukta̍ āyu̠ktāḥ ।
alūkṣa̍ dharmakāmā̠ssyuḥ ।
yathā te̍ teṣu̍ varte̠rann ।
tathā teṣu̍ varte̠thāḥ ।
eṣa̍ āde̠śaḥ ।

eṣa u̍padeṣ̱aḥ ।
eṣā ve̍dopa̱niṣat ।
etada̍nuśa̱̍sanam ।
evamupa̱̍sita̱vyam ।
evamu caita̍dupa̱syam ॥ 22 ॥
svādhyāyapravacanābhyāṃ na prama̍dita̱vyaṃ tāni tvayo̍pāsya̱ni syātteṣu̍ varte̱ranthsa̱pta ca̍ ॥ 11 ॥))

[[7-12-1]]
शं नो॑ मि॒त्रश्शं वरु॑णः।
शं नो॑ भवत्वर्य॒मा।
शं न॒ इन्द्रो॒ बृह॒स्पतिः॑।
शं नो॒ विष्णु॑रुरुक्र॒मः।
नमो॒ ब्रह्म॑णे।
नम॑स्ते वायो।
त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि।
त्वामे॒व प्र॒त्यक्षं॒ ब्रह्मावा॑दिषम्।
ऋ॒तम॑वादिषम्।
स॒त्यम॑वादिषम्।
तन्माम॑वीत्।
तद्व॒क्तार॑मावीत्।
आवी॒न्माम्।
आवी॑द्व॒क्तार᳚म्।
ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑॥ २३॥
स॒त्यम॑वादिषं॒ पञ्च॑ च॥ १२॥

शं न॒श्शीक्षा᳚ꣳ स॒ह नौ॒ यश्छन्द॑सां॒ भूस्स यः पृ॑थि॒व्योमित्यृतं चा॒हं वेदमनूच्य शं नो॒ द्वाद॑श॥ १२॥

शं नो॑ मह॒ इत्या॑दि॒त्यो नो इ॑तरा॒णि त्रयो॑विꣳशतिः॥ २३॥

शं न॒श्शान्ति॒श्शान्तिः॑॥

((śaṃ no̍ mi̱traśśaṃ varu̍ṇaḥ ।
śaṃ no̍ bhavatvarya̱mā ।

śaṃ na̱ indro̱ bṛha̱spatiḥ |
śaṃ no viṣṇ̍ururukra̱maḥ |
namo̱ brahma̍ṇe |
nama̍ste vāyo |
tvame̱va pra̱tyakṣa̱ṃ brahmā̍si |
tvāme̱va pra̱tyakṣa̱ṃ brahmāvā̍diṣam |
ṛ̱tama̍vādiṣam |
sa̱tyama̍vādiṣam |
tanmāmā̍vīt |
tadva̱ktāra̍māvīt |
āvī̱nmām |
āvī̎dva̱ktārā̎m |
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ || 23 ||
sa̱tyama̍vādiṣa̱m pañca̍ ca || 12 ||

śaṃ na̱śśīkṣāṃ̐ sa̱ha nau̱ yaśchanda̍sā̱m bhūssa yaḥ pṛthi̱vyomityṛtaṃ cā̱haṃ vedamanūcya śaṃ no̱ dvāda̍śa || 12 ||

śaṃ no̍ maha̱ ityā̍di̱tyo no i̍tarā̱ṇi trayo̍viṃ̐śatiḥ || 23 ||

śaṃ na̱śśānti̱śśānti̍ḥ ||))

[[7-0-0]]

शं नो̍ मि̱त्रश्शं वरु̍णः।
शं नो̍ भवत्वर्य̱मा।
शं न̱ इन्द्रो̱ बृह̱स्पति̍ः।
शं नो̱ विष्णु̍रुरुक्र̱मः।
नमो̱ ब्रह्म̍णे।
नम̍स्ते वायो।
त्वमे̱व प्र̱त्यक्ष̱ं ब्रह्मा̍सि।
त्वमे̱व प्र̱त्यक्ष̱ं ब्रह्म̍ वदिष्यामि।
ऋ̱तं व̍दिष्यामि।
स̱त्यं व̍दिष्यामि।
तन्माम̍वतु।
तद्व̱क्तार̍मवतु।
अव̍तु̱ माम्।
अव̍तु व̱क्तार̎म्।
ॐ शान्ति̱ः शान्ति̱ः शान्ति̍ः॥

((śaṃ no̍  mi̱traśśaṃ varu̍ṇaḥ |
śaṃ no̍ bhavatvarya̱mā |
śaṃ na̱ indro̱ bṛha̱spati̎ḥ |
śaṃ no̱ viṣṇu̍rurukra̱maḥ |
namo̱ brahma̍ṇe |
nama̍ste vāyo |
tvame̱va pra̱tyakṣaṃ̱ brahmā̎si |
tvme̱va pra̱tyakṣaṃ̱ brahma̍ vadiṣyāmi |
ṛ̱taṃ va̍diṣyāmi |
sa̱tyaṃ va̍diṣyāmi |
tanmāma̍vatu |
tadva̱ktāra̍mavatu |
ava̍tu̱ mām |
ava̍tu va̱ktārā̎m |
āūṃ śānti̱ḥ śānti̱ḥ śānti̎ḥ ||))

# Taittirīya-Āraṇyaka

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 8

[[8-0-0]]

स॒ह ना॑ववतु।

स॒ह नौ॑ भुनक्तु।

स॒ह वी॒र्यं॑ करवावहै।

ते॒ज॒स्वि ना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚।

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

((sa̱ha nā̍vavatu |
sa̱ha nau̍ bhunaktu |
sa̱ha vī̱ryaṁ̍ karavāvahai |
te̱ja̱svi nā̱vadhī̍tamastu̱ mā vi̍dviṣā̱vahai̎ |
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ ||))

[[8-1-1]]

ब्र॒ह्म॒विदा᳚प्नोति॒ पर᳚म्।

तदे॒षाऽभ्यु॑क्ता।

स॒त्यं ज्ञा॒नम॑न॒न्तं ब्रह्म॑।

यो वेद॒ निहि॑तं॒ गुहा॒यां प॑र॒मे व्यो॑मन्न्।

सो᳚ऽश्नुते॒ सर्वा॒न्कामा᳚न्थ्स॒ह।

ब्रह्म॑णा वि॒पश्चि॒तेति॑।

तस्मा॒द्वा ए॒तस्मा॑दा॒त्मन॑ आका॒शस्सं॑भू॒तः।

आ॒का॒शाद्वा॒युः।

वा॒योर॒ग्निः।

अ॒ग्नेराप॑ः।

अ॒द्भ्यः पृ॑थि॒वी।

पृ॒थि॒व्या ओष॑धयः।
ओष॑धी॒भ्योऽन्न॓म्।
अन्ना॒त्पुरु॑षः।
स वा एष पुरुषोऽन्न॑रस॒मयः।
तस्येद॑मेव॒ शिरः।
अयं द॒क्षिणः प॒क्षः।
अयमुत्त॑रः प॒क्षः।
अयमात्मा॓।
इदं पुच्छं॑ प्रति॒ष्ठा।
तदप्येष श्लोको॑ भ॒वति॥ १॥ ॥ १॥

((bra̱hma̱vidā̎pnoti̱ parā̎m ।
tade̱ṣā'bhyu̍ktā ।
sa̱tyaṃ jñā̱namana̱ntaṃ brahma̍ ।
yo veda̱ nihi̍taṃ guhā̱yāṃ para̱me vyo̍mann ।
so̎'śnu̱te sarvā̱nkāmā̎nthsa̱ha ।
brahma̍ṇā vipa̱ściteti̍ ।
tasmā̱dvā e̱tasmā̍dā̱tmana̍ ākā̱śassaṃbhū̍taḥ ।
ā̱kā̱śādvā̱yuḥ ।
vā̱yora̱gniḥ ।
a̱gnerāpa̍ḥ ।
a̱dbhyaḥ pṛ̍thi̱vī ।
pṛ̱thi̱vyā oṣa̍dhayaḥ ।
oṣa̍dhī̱bhyo'nnā̎m ।
annā̱tpuru̍ṣaḥ ।
sa vā eṣa puruṣo'nna̍rasa̱mayaḥ ।
tasyeda̍meva̱ śiraḥ ।
ayaṃ dakṣi̍ṇaḥ pa̱kṣaḥ ।
ayamutta̍raḥ pa̱kṣaḥ ।
ayamātmā̎ ।
idaṃ puccha̍ṃ prati̱ṣṭhā ।
tadapyeṣa ślo̍ko bha̱vati ॥ 1 ॥ ॥ 1 ॥))

[[8-2-1]]
अन्ना॒द्वै प्र॒जाः प्र॒जाय॑न्ते।
याः काश्च॑ पृथि॒वीꣳ श्रि॒ताः।
अथो॒ अन्ने॑नैव जीव॑न्ति।
अथै॑न॒दपि॑ यन्त्यन्त॒तः।

अन्नꣳ हि भूतानां ज्येष्ठम्।
तस्मात्सर्वौषधमुच्यते।
सर्वं वै तेऽन्नमाप्नुवन्ति।
येऽन्नं ब्रह्मोपासते।
अन्नꣳ हि भूतानां ज्येष्ठम्।
तस्मात्सर्वौषधमुच्यते।
अन्नाद्भूतानि जायन्ते।
जातान्यन्नेन वर्धन्ते।
अद्यतेऽत्ति च भूतानि।
तस्मादन्नं तदुच्यत इति।
तस्माद्वा एतस्मादन्नरसमयात्।
अन्योऽन्तर आत्मा प्राणमयः।
तेनैष पूर्णः।
स वा एष पुरुषविध एव।
तस्य पुरुषविधताम्।
अन्वयं पुरुषविधः।
तस्य प्राण एव शिरः।
व्यानो दक्षिणः पक्षः।
अपान उत्तरः पक्षः।
आकाश आत्मा।
पृथिवी पुच्छं प्रतिष्ठा।
तदप्येष श्लोको भवति॥ २॥ ॥ २॥

((annādvai prajāḥ prajāyante |
yāḥ kāśca pṛthivīm̐ śritāḥ |
atho annenaiva jīvanti |
athainadapi yantyantataḥ |
annam̐ hi bhūtānām jyeṣṭhām |
tasmāthsarvauṣadhamucyate |
sarvam vai te'nnamāpnuvanti |
ye'nnam brahmopāsate |
annam̐ hi bhūtānām jyeṣṭhām |
tasmāthsarvauṣadhamucyate |
annādbhūtāni jāyante |

jātānyannenȧ vardhante |
adyate'tti cȧ bhūtā̱ni |
tasmādannaṃ taducyȧta i̱ti |
tasmādvā etasmādannȧrasa̱mayāt |
anyo'ntara ātmā̈ prāṇa̱mayaḥ |
tenaiṣa pū̱rṇaḥ |
sa vā eṣa puruṣavidha e̱va |
tasya purủṣavi̱dhatām |
anvayȧṃ puruṣa̱vidhaḥ |
tasya prāṇȧ eva̱ śiraḥ |
vyāno dakṣiṇaḥ pa̱kṣaḥ |
apāna uttȧraḥ pa̱kṣaḥ |
ākȧśa ā̱tmā |
pṛthivī pucchȧṃ prati̱ṣṭhā |
tadapyeṣa ślȯko bha̱vati || 2 || || 2 ||))

[[8-3-1]]

प्रा॒णं दे॒वा अनु॒प्राण॑न्ति।
म॒नु॒ष्या॑ः प॒शव॑श्च॒ ये।
प्रा॒णो हि भू॒ताना॒मायु॑ः।
तस्मा॑थ्सर्वा॒यु॒षमु॑च्य॒ते।
सर्व॑मेव॒ त॒ आयु॑र्यन्ति।
ये प्रा॒णं ब्रह्मो॒पास॑ते।
प्राणो हि भूता॑नामा॒युः।
तस्माथ्सर्वा॑युषमुच्य॑त इ॒ति।
तस्यैष एव शारी॑र आ॒त्मा।
य॑ः पूर्व॑स्य।
तस्माद्वा एतस्मा॑त्प्राण॒मयात्।
अन्योऽन्तर आत्मा॑ मनो॒मयः।
तेनै॑ष पू॒र्णः।
स वा एष पुरुषवि॑ध ए॒व।
तस्य पुरु॑षवि॒धताम्।
अन्वयं॑ पुरुष॒विधः।
तस्य यजुरे॒व शिरः।
ऋग्दक्षि॑णः प॒क्षः।
सामोत्त॑रः प॒क्षः।

आदे॑श आ॒त्मा।
अथर्वाङ्गि॑रसः पुच्छं॑ प्रति॒ष्ठा।
तद॒प्येष श्लोको॑ भ॒वति॥ ३॥ ॥ ३॥

((prā̱ṇaṃ de̱vā anu̱prāṇa̍nti |
ma̱nu̱ṣyā̎ḥ pa̱śava̍śca̱ ye |
prā̱ṇo hi bhū̱tānā̱māyu̍ḥ |
tasmā̎thsarvāyu̱ṣamu̍cyate |
sarva̍me̱va ta̱ āyu̍ryanti |
ye prā̱ṇaṃ brahmo̱pāsa̍te |
prā̱ṇo hi bhūtā̍nāmā̱yuḥ |
tasmāthsarvāyuṣamucya̍ta i̱ti |
tasyaiṣa eva śārī̍ra ā̱tmā |
ya̍ḥ pūrva̱sya |
tasmādvā etasmā̎tprāṇa̱mayāt |
anyo'ntara ātmā̍ mano̱mayaḥ |
tenai̍ṣa pū̱rṇaḥ |
sa vā e̱ṣa puruṣavi̍dha e̱va |
tasya puru̍ṣavi̱dhatām |
anvaya̍ṃ puruṣa̱vidhaḥ |
tasya yaju̍reva̱ śiraḥ |
ṛgdakṣi̍ṇaḥ pa̱kṣaḥ |
sāmotta̍raḥ pa̱kṣaḥ |
āde̍śa ā̱tmā |
atharvāṅgirasaḥ puccha̍ṃ prati̱ṣṭhā |
tadapyeṣa ślo̍ko bha̱vati || 3 || || 3 ||))

[[8-4-1]]
यतो॒ वाचो॒ निव॑र्तन्ते।
अप्रा॑प्य॒ मन॑सा स॒ह।
आनन्दं ब्रह्म॑णो वि॒द्वान्।
न बिभेति कदा॑चने॒ति।
तस्यैष एव शारी॑र आ॒त्मा।
यः॑ पूर्व॒स्य।
तस्माद्वा एतस्मा॑न्मनो॒मयात्।
अन्योऽन्तर आत्मा वि॑ज्ञान॒मयः।
तेनै॑ष पू॒र्णः।
स वा एष पुरुषवि॑ध ए॒व।
तस्य पुरु॑षवि॒धताम्।

अन्वयं पुरुषविधः।
तस्य श्रद्धैव शिरः।
ऋतं दक्षिणः पक्षः।
सत्यमुत्तरः पक्षः।
योग आत्मा।
महः पुच्छं प्रतिष्ठा।
तदप्येष श्लोको भवति॥ ४॥ ॥ ४॥

((yato vāco nivartante |
aprāpya manasā saha |
ānandaṃ brahmaṇo vidvān |
na bibheti kadācaneti |
tasyaiṣa eva śārira ātmā |
yaḥ pūrvasya |
tasmādvā etasmānmanomayāt |
anyo'ntara ātmā vijñānamayaḥ |
tenaiṣa pūrṇaḥ |
sa vā eṣa puruṣavidha eva |
tasya puruṣavidhatām |
anvayaṃ puruṣavidhaḥ |
tasya śraddhaiva śiraḥ |
ṛtaṃ dakṣiṇaḥ pakṣaḥ |
satyamuttaraḥ pakṣaḥ |
yoga ātmā |
mahaḥ pucchaṃ pratiṣṭhā |
tadapyeṣa śloko bhavati || 4 || || 4 ||))

[[8-5-1]]
विज्ञानं यज्ञं तनुते।
कर्माणि तनुतेऽपि च।
विज्ञानं देवास्सर्वे।
ब्रह्म ज्येष्ठमुपासते।
विज्ञानं ब्रह्म चेद्वेद।
तस्माच्चेन्न प्रमाद्यति।
शरीरे पाप्मनो हित्वा।
सर्वान्कामान्थ्समश्नुत इति।
तस्यैष एव शारीर आत्मा।

यः पूर्वस्य।
तस्माद्वा एतस्माद्विज्ञानमयात्।
अन्योऽन्तर आत्माऽऽनन्दमयः।
तेनैष पूर्णः।
स वा एष पुरुषविध एव।
तस्य पुरुषविधताम्।
अन्वयं पुरुषविधः।
तस्य प्रियमेव शिरः।
मोदो दक्षिणः पक्षः।
प्रमोद उत्तरः पक्षः।
आनन्द आत्मा।
ब्रह्म पुच्छं प्रतिष्ठा।
तदप्येष श्लोको भवति॥ ५॥ ॥ ५॥

((vijñānaṁ yajñam tanute |
karmāṇi tanute'pi ca |
vijñānaṁ devāssarve |
brahma jyeṣṭhamupāsate |
vijñānaṁ brahma cedvedā |
tasmāccenna pramādyati |
śarīre pāpmano hitvā |
sarvānkāmānthsamaśnuta iti |
tasyaiṣa eva śārīra ātmā |
yaḥ pūrvasya |
tasmādvā etasmādvijñānamayāt |
anyo'ntara ātmā''nandamayaḥ |
tenaiṣa pūrṇaḥ |
sa vā eṣa puruṣavidha eva |
tasya puruṣavidhatām |
anvayaṁ puruṣavidhaḥ |
tasya priyameva śiraḥ |
modo dakṣiṇaḥ pakṣaḥ |
pramoda uttaraḥ pakṣaḥ |
ānanda ātmā |
brahma pucchaṁ pratiṣṭhā |
tadapyeṣa śloko bhavati || 5 || || 5 ||))

[[8-6-1]]
असन्नेव स भवति।

असद्ब्रह्मेति वेद चेत्।
अस्ति ब्रह्मेति चेद्वेद।
सन्तमेनं ततो विदुरिति।
तस्यैष एव शारीर आत्मा।
यः पूर्वस्य।
अथातोऽनुप्रश्नाः।
उताविद्वानमुं लोकं प्रेत्य।
कश्चन गच्छती ३।
आहो विद्वानमुं लोकं प्रेत्य।
कश्चित्समश्नुता ३ उ।
सोऽकामयत।
बहु स्यां प्रजायेयेति।
स तपोऽतप्यत।
स तपस्तप्त्वा।
इदꣳ सर्वमसृजत।
यदिदं किंच।
तत्सृष्ट्वा।
तदेवानुप्राविशत्।
तदनुप्रविश्य।
सच्च त्यच्चाभवत्।
निरुक्तं चानिरुक्तं च।
निलयनं चानिलयनं च।
विज्ञानं चाविज्ञानं च।
सत्यं चानृतं च सत्यमभवत्।
यदिदं किंच।
तत्सत्यमित्याचक्षते।
तदप्येष श्लोको भवति॥ ६॥ ॥ ६॥

((asánneva sá bhavati ।
asadbrahmeti veda cet ।
asti brahmeti cedveda ।

santamenaṃ tato vi̍duri̱ti |
tasyaiṣa eva śāri̍ra ā̱tmā |
ya̍ḥ pūrva̱sya |
athāto̍'nupra̱śnāḥ |
u̱tāvi̱dvāna̱muṃ lo̱kaṃ pretya̍ |
kaśca̱na ga̍ccha̱tī 3 |
āho̍ vi̱dvāna̱muṃ lo̱kaṃ pretya̍ |
kaści̱thsama̍śnu̱tā 3 u̱ |
so̍'kāmayata |
ba̱hu syā̱ṃ prajā̎ye̱yeti̍ |
sa tapo̍'tapyata |
sa tapa̍sta̱ptvā |
i̱dam̐ sarva̍masṛjata |
yadi̱daṃ ki̱ṃca̍ |
tathsṛ̱ṣṭvā |
tade̱vānu̱prāvi̍śat |
tada̍nupra̱viśya̍ |
sacca̱ tyaccā̎bhavat |
ni̱ruktaṃ̱ cāni̍ruktaṃ ca |
ni̱laya̍naṃ̱ cāni̍layanaṃ ca |
vi̱jñānaṃ̱ cāvi̍jñānaṃ ca |
satyaṃ cānṛ̱taṃ ca sa̍tyama̱bhavat |
yadi̍daṃ ki̱ṃca |
tatsatyami̍tyāca̱kṣate |
tadapyeṣa ślo̍ko bha̱vati || 6 || || 6 ||))

[[8-7-1]]

अ॒सद्वा इ॒दमग्र॑ आसीत्।
ततो॒ वै सद॑जायत।
तदात्मानꣳ स्वय॑मकुरुत।
तस्मात्तथ्सुकृतमुच्य॑त इ॒ति।
यद्वै॑ तथ्सु॒कृतम्।
र॑सो॒ वै सः।
रसꣳ ह्येवायं लब्ध्वाऽऽन॑न्दी भ॒वति।
को ह्येवान्या᳚त्कः प्रा॒ण्यात्।
यदेष आकाश आन॑न्दो न॒ स्यात्।
एष ह्येवाऽऽन॑न्दया॒ति।
य॒दा ह्येवै॑ष॒ एत॑स्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रति॑ष्ठां वि॒न्दते।
अथ सोऽभयं ग॑तो भ॒वति।
य॒दा ह्येवै॑ष॒ एतस्मिन्नुदरमन्त॑रं कु॒रुते।

अथ तस्य भयं भवति।
तत्त्वेव भयं विदुषोऽमन्वानस्य।
तदप्येष श्लोको भवति॥ ७॥ ॥ ७॥

((asadvā idamagra āsīt |
tato vai sadajāyata |
tadātmānaṁ svayamakuruta |
tasmāttathsukṛtamucyata iti |
yadvai tathsukṛtam |
raso vai saḥ |
rasaṁ hyevāyaṃ labdhvā''nandī bhavati |
ko hyevānyātkaḥ prāṇyāt |
yadeṣa ākāśa ānando na syāt |
eṣa hyevā''nandayāti |
yadā hyevaiṣa etasminnadṛśye'nātmye'nirukte'nilayane'bhayaṃ pratiṣṭhāṃ vindate |
atha so'bhayaṃ gato bhavati |
yadā hyevaiṣa etasminnudaramantaraṃ kurute |
atha tasya bhayaṃ bhavati |
tattveva bhayaṃ viduṣo'manvānasya |
tadapyeṣa śloko bhavati || 7 || || 7 ||))

[[8-8-1]]
भीषाऽस्माद्वातः पवते।
भीषोदेति सूर्यः।
भीषाऽस्मादग्निश्चेन्द्रश्च।
मृत्युर्धावति पञ्चम इति।
सैषाऽऽनन्दस्य मीमांसा भवति।
युवा स्याथ्साधुयुवाऽध्यायकः।
आशिष्ठो दृढिष्ठो बलिष्ठः।
तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्।
स एको मानुष आनन्दः।
ते ये शतं मानुषा आनन्दाः॥
स एको मनुष्यगन्धर्वाणामानन्दः।
श्रोत्रियस्य चाकामहतस्य।
ते ये शतं मनुष्यगन्धर्वाणामानन्दाः।
स एको देवगन्धर्वाणामानन्दः।

श्रोत्रियस्य चाकामहतस्य।
ते ये शतं देवगन्धर्वाणामानन्दाः।
स एकः पितृणां चिरलोकलोकानामानन्दः।
श्रोत्रियस्य चाकामहतस्य।
ते ये शतं पितृणां चिरलोकलोकानामानन्दाः।
स एक आजानजानां देवानामानन्दः॥
श्रोत्रियस्य चाकामहतस्य।
ते ये शतमाजानजानां देवानामानन्दाः।
स एकः कर्मदेवानां देवानामानन्दः।
ये कर्मणा देवानपियन्ति।
श्रोत्रियस्य चाकामहतस्य।
ते ये शतं कर्मदेवानां देवानामानन्दाः।
स एको देवानामानन्दः।
श्रोत्रियस्य चाकामहतस्य।
ते ये शतं देवानामानन्दाः।
स एक इन्द्रस्याऽऽनन्दः॥
श्रोत्रियस्य चाकामहतस्य।
ते ये शतमिन्द्रस्याऽऽनन्दाः।
स एको बृहस्पतेरानन्दः।
श्रोत्रियस्य चाकामहतस्य।
ते ये शतं बृहस्पतेरानन्दाः।
स एकः प्रजापतेरानन्दः।
श्रोत्रियस्य चाकामहतस्य।
ते ये शतं प्रजापतेरानन्दाः।
स एको ब्रह्मण आनन्दः।
श्रोत्रियस्य चाकामहतस्य॥
स यश्चायं पुरुषे।
यश्चासावादित्ये।
स एकः।

स य॑ ए॒वंवित्।
अस्माल्लो॑कात्प्रे॒त्य।
एतमन्नमयमात्मानमुप॑संक्रा॒मति।
एतं प्राणमयमात्मानमुप॑संक्रा॒मति।
एतं मनोमयमात्मानमुप॑संक्रा॒मति।
एतं विज्ञानमयमात्मानमुप॑संक्रा॒मति।
एतमानन्दमयमात्मानमुप॑संक्रा॒मति।
तदप्येष श्लोको भ॒वति॥ ८॥ ॥ ८॥

((bhī̱ṣā'smā̱dvātá̍ḥ pavate |
bhī̱ṣodé̍ti̱ sūryá̍ḥ |
bhīṣā'smādagní̍ścendra̱śca |
mṛtyurdhāvati pañcá̍ma i̱ti |
saiṣā''nandasya mīmā̍ṁsā bha̱vati |
yuvā syāthsādhuyú̍vā'dhyā̱yakaḥ |
āśiṣṭho dṛḍhiṣṭhó̍ bali̱ṣṭhaḥ |
tasyeyaṃ pṛthivī sarvā vittasyá̍ pūrṇā̱ syāt |
sa eko mānuṣá̍ āna̱ndaḥ |
te ye śataṃ mānuṣā̍ āna̱ndāḥ ||
sa eko manuṣyagandharvāṇā̍mānā̱ndaḥ |
śrotriyasya cākāmá̍hata̱sya |
te ye śataṃ manuṣyagandharvāṇā̍mānā̱ndāḥ |
sa eko devagandharvāṇā̍mānā̱ndaḥ |
śrotriyasya cākāmá̍hata̱sya |
te ye śataṃ devagandharvāṇā̍mānā̱ndāḥ |
sa ekaḥ pitṛṇāṃ ciralokalokānā̍mānā̱ndaḥ |
śrotriyasya cākāmá̍hata̱sya |
te ye śataṃ pitṛṇāṃ ciralokalokānā̍mānā̱ndāḥ |
sa eka ājānajānāṃ devānā̍mānā̱ndaḥ ||
śrotriyasya cākāmá̍hata̱sya |
te ye śatamājānajānāṃ devānā̍mānā̱ndāḥ |
sa ekaḥ karmadevānāṃ devānā̍mānā̱ndaḥ |
ye karmaṇā devāná̍piya̱nti |
śrotriyasya cākāmá̍hata̱sya |
te ye śataṃ karmadevānāṃ devānā̍mānā̱ndāḥ |
sa eko devānā̍mānā̱ndaḥ |
śrotriyasya cākāmá̍hata̱sya |
te ye śataṃ devānā̍mānā̱ndāḥ |
sa eka indrá̍syā''na̱ndaḥ ||
śrotriyasya cākāmá̍hata̱sya |
te ye śatamindrá̍syā''na̱ndāḥ |
sa eko bṛhaspaté̍rānā̱ndaḥ |
śrotriyasya cākāmá̍hata̱sya |

te ye śataṃ br̥haspate̍rāna̱ndāḥ |
sa ekaḥ prajāpate̍rāna̱ndaḥ |
śrotriyasya cākāma̍hata̱sya |
te ye śataṃ prajāpate̍rāna̱ndāḥ |
sa eko brahmaṇa̍ āna̱ndaḥ |
śrotriyasya cākāma̍hata̱sya ||
sa yaśca̍yaṃ pu̱ruṣe |
yaścāsa̍vādi̱tye |
sa eka̍ḥ |
sa ya̍ eva̱ṃvit |
asmāllo̍kātpre̱tya |
etamannamayamātmānamupa̍saṃkrā̱mati |
etaṃ prāṇamayamātmānamupa̍saṃkrā̱mati |
etaṃ manomayamātmānamupa̍saṃkrā̱mati |
etaṃ vijñānamayamātmānamupa̍saṃkrā̱mati |
etamānandamayamātmānamupa̍saṃkrā̱mati |
tadapyeṣa ślo̍ko bha̱vati || 8 || || 8 ||))

[[8-9-1]]

यतो॒ वाचो॒ निव॑र्तन्ते।
अप्रा॑प्य॒ मन॑सा स॒ह।
आनन्दं॒ ब्रह्म॑णो वि॒द्वान्।
न बिभेति कुत॑श्च॒नेति।
एत॑ꣳ ह वाव॑ न त॒पति।
किमह॑ꣳ साधु॑ नाक॒रवम्।
किमहं॒ पापमक॑रव॒मिति।
स य एवं विद्वानेते आत्मा॑नꣴ स्पृणुते।
उ॒भे ह्ये॑वैष॒ एते आत्मा॑नꣴ स्पृ॒णुते।
य ए॒वं वेद॑।
इत्यु॑पनि॒षत्॥ ९॥ ॥ ९॥

ब्र॒ह्मवि॑दिदमयमिदमेकं॑विꣳशति॒रन्ना॒दन्न॑रस॒मयात्प्राणो॒ व्यानोऽपान आका॑श॒ः पृथिवी पुच्छ॒ꣳ
षड्वि॑ꣳशतिः प्रा॒णं यजुरृ॑क्सामादे॒शोऽथर्वाङ्गिरसः पुच्छं॒ द्वावि॑ꣳशति॒र्यत॑श्श्र॒द्धर्त॑ꣳ सत्यं योगो॒
महो॑ऽष्टाद॑श वि॒ज्ञानं॒ प्रियं॒ मोदः प्रमोद आन॑न्दो॒ ब्रह्म पुच्छं॒
द्वावि॑ꣳशति॒रस॑न्ने॒वाष्टावि॑ꣳशति॒रस॒थ्षोड॑श भी॒षाऽस्मा॒न्मानुषो॒ मनुष्यगन्धर्वाणां॒ देवगन्धर्वाणा॒
पितृणां चिरलोकलोआना॒माजानजानां कर्म॑देवानां॒ ये कर्मणा देवाना॒मिन्द्र॑स्य बृहस्पते॒ः
प्रजापते॒र्ब्रह्मण॒स्स यश्च॑ संक्रा॒मत्येक॑पञ्चा॒शच्यु॒तः  कुत॑श्च॒ नैका॑दश॒ नव॑॥ ९॥

ब्र॒ह्म॒वि॒न्नव॑॥ ९॥

((yato̱ vāco̱ nivártante ।
aprā̎pya̱ manásā sa̱ha ।
ānandaṃ brahmáṇo vi̱dvān ।
na bibheti kutáścane̱ti ।
etaṁ ha vāvá na ta̱pati ।
kimahaṁ sādhú nāka̱ravam ।
kimahaṃ pāpamakarávami̱ti ।
sa ya evaṃ vidvānete ātmā̍naṁ̐ spṛ̱ṇute ।
u̱bhe hyévaiṣa̱ ete ātmā̍naṁ̐ spṛ̱ṇute ।
ya e̱vaṃ vedá ।
ityúpa̱niṣát ॥ 9 ॥ ॥ 9 ॥

bra̱hma̱vididamayamidamekáviṁśati̱rannā̱dannárasa̱mayātprā̱ṇo̱ vyāno'pāna ākā̍śa̱ḥ pṛthivī puccha̱ṁ̱ ṣa̱dviṁśatiḥ prā̱ṇaṃ yaju̱rṛksāmāde̱śo'tharvāṅgirasaḥ puccha̱ṃ dvāviṁśati̱ryatáśśra̱ddhartaṁ satyaṃ yógo̱ mahó'ṣṭādáśa vi̱jñānaṃ priyaṃ modaḥ pramoda ānándo̱ brahma puccha̱ṃ dvāviṁśati̱rasánne̱vāṣṭāviṁśati̱rasa̱thṣoḍáśa bhī̱ṣā'smā̱nmānuṣo̱ manuṣyagandharvāṇā̱ṃ devagandharvāṇā̱ pitṛṇāṃ ciralokaloānā̱mājānajānāṃ karmadevānā̱ṃ ye karmaṇā devānā̱mindrásya̱ bṛhaspate̱ḥ prajāpate̱rbrahmaṇa̱ssa yaścá saṃkrā̱matyekápañcā̱śadyuta̱ḥ kutáśca̱ naikā̍daśa̱ navá ॥ 9 ॥

bra̱hma̱vinnavá ॥ 9 ॥))

[[8-0-0]]

स॒ह ना॑ववतु।
स॒ह नौ॑ भुनक्तु।
स॒ह वी॒र्यं॑ करवावहै।
ते॒ज॒स्वि ना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै॑।
ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

((sa̱ha nā̍vavatu ।
sa̱ha naú bhunaktu ।
sa̱ha vī̱ryaṃ́ karavāvahaí ।
te̱ja̱svi nā̱vadhī́tamastu̱ mā vídviṣā̱vahaí ।
āūṃ śānti̱ḥ śānti̱ḥ śāntí̱ḥ ॥))

# Taittirīya-Āraṇyaka

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 9

[[9-0-0]]

स॒ह ना॑ववतु।

स॒ह नौ॑ भुनक्तु।

स॒ह वी॒र्यं॑ करवावहै।

ते॒ज॒स्वि ना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚।

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

((sa̱ha nā̍vavatu |
sa̱ha nau̍ bhunaktu |
sa̱ha vī̱ryaṁ̍ karavāvahai |
te̱ja̱svi nā̱vadhī̍tamastu̱ mā vi̍dviṣā̱vahai̎ |
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ ||))

[[9-1-1]]

भृगु॒र्वै वा॑रु॒णिः।

वरु॑णं॒ पित॑रमु॒प॑ससार।

अधी॑हि भगवो॒ ब्रह्मेति॑।

तस्मा॑ ए॒तत्प्रो॑वाच।

अन्नं॑ प्रा॒णं चक्षु॒श्श्रोत्रं॒ मनो॒ वाच॒मिति॑।

तꣳ हो॑वाच।

यतो॒ वा इ॒मानि॒ भूता॑नि॒ जाय॑न्ते।

येन॒ जाता॑नि॒ जीव॑न्ति।

यत्प्रय॑न्त्यभिसंवि॑शन्ति।

तद्विजि॑ज्ञासस्व।

तद्ब्रह्मेति॑।

स तपोऽतप्यत।
स तपस्तप्त्वा॥ १॥ ॥ १॥

((bhṛgurvai vāruṇiḥ |
varuṇam̐ pitaramupasasāra |
adhīhi bhagavo brahmeti |
tasmā etatprovāca |
annam̐ prāṇam̐ cakṣuśśrotram̐ mano vācamiti |
tam̐ hovāca |
yato vā imāni bhūtāni jāyante |
yena jātāni jīvanti |
yatprayantyabhisam̐viśanti |
tadvijijñāsasva |
tadbrahmeti |
sa tapo'tapyata |
sa tapastaptvā || 1 || || 1 ||))

[[9-2-1]]
अन्नं ब्रह्मेति व्यजानात्।
अन्नाद्ध्येव खल्विमानि भुतानि जायन्ते।
अन्नेन जातानि जीवन्ति।
अन्नं प्रयन्त्यभिसंविशन्तीति।
तद्विज्ञाय।
पुनरेव वरुणं पितरमुपससार।
अधीहि भगवो ब्रह्मेति।
तꣳ होवाच।
तपसा ब्रह्म विजिज्ञासस्व।
तपो ब्रह्मेति।
स तपोऽतप्यत।
स तपस्तप्त्वा॥ २॥ ॥ २॥

((annam̐ brahmeti vyajānāt |
annāddhyeva khalvimāni bhutāni jāyante |
annena jātāni jīvanti |
annam̐ prayantyabhisam̐viśantīti |
tadvijñāya |
punareva varuṇam̐ pitaramupasasāra |
adhīhi bhagavo brahmeti |
tam̐ hovāca |

tapásā̱ brahma̱ vijíjñāsasva ।
tapo̱ brahmetí ।
sa tapó'tapyata ।
sa tapástaptvā ॥ 2 ॥ ॥ 2 ॥))

[[9-3-1]]
प्रा॒णो ब्र॒ह्मेति॒ व्य॑जानात्।
प्रा॒णाद्ध्ये॑व खल्वि॒मानि॒ भूता॑नि॒ जाय॑न्ते।
प्रा॒णेन॒ जाता॑नि॒ जीव॑न्ति।
प्रा॒णं प्रय॑न्त्य॒भिसंवि॑श॒न्तीति॑।
तद्वि॒ज्ञाय॑।
पुन॑रे॒व वरु॑णं॒ पित॑र॒मुप॑ससार।
अधी॑हि भगवो॒ ब्रह्मेति॑।
तꣳ होवाच।
तप॑सा॒ ब्रह्म॒ विजि॑ज्ञासस्व।
तपो॒ ब्रह्मेति॑।
स तपो॑ऽतप्यत।
स तप॑स्त॒प्त्वा॥ ३॥ ॥ ३॥

((prā̱ṇo bra̱hmeti̱ vyájānāt ।
prā̱ṇāddhyéva khalvi̱māni̱ bhūtáni̱ jāyánte ।
prā̱ṇena̱ jātáni̱ jīvánti ।
prā̱ṇaṃ prayántya̱bhisaṃvíśa̱ntītí ।
tadvijñāyá ।
punáre̱va varúṇa̱ṃ pitára̱mupásasāra ।
adhíhi bhagavo̱ brahmetí ।
taṃ̐ hóvāca ।
tapásā̱ brahma̱ vijíjñāsasva ।
tapo̱ brahmetí ।
sa tapó'tapyata ।
sa tapásta̱ptvā ॥ 3 ॥ ॥ 3 ॥))

[[9-4-1]]
मनो॒ ब्रह्मेति॒ व्य॑जानात्।
मन॑सो॒ ह्ये॑व खल्वि॒मानि॒ भूता॑नि॒ जाय॑न्ते।
मन॑सा॒ जाता॑नि॒ जीव॑न्ति।
मनः॒ प्रय॑न्त्य॒भिसंवि॑श॒न्तीति॑।

तद्विज्ञाय॑।
पुन॑रेव वरु॑णं पि॒त॑रमुप॑ससार।
अधी॑हि भगवो ब्रह्मेति॑।
तꣳ हो॑वाच।
तप॑सा ब्रह्म विजि॑ज्ञासस्व।
तपो ब्रह्मेति॑।
स तपो॑ऽतप्यत।
स तप॑स्त॒प्त्वा॥ ४॥ ॥ ४॥

((mano brahmeti vyajānāt |
manaso hyeva khalvimāni bhūtāni jāyante |
manasā jātāni jīvanti |
manaḥ prayantyabhisaṃviśantīti |
tadvijñāya |
punareva varuṇam pitaramupasasāra |
adhīhi bhagavo brahmeti |
tam̐ hovāca |
tapasā brahma vijijñāsasva |
tapo brahmeti |
sa tapo'tapyata |
sa tapastaptvā || 4 || || 4 ||))

[[9-5-1]]
वि॒ज्ञानं॒ ब्रह्मेति॒ व्य॑जानात्।
वि॒ज्ञाना॒द्ध्ये॑व खल्वि॒मानि॒ भूता॑नि॒ जाय॑न्ते।
वि॒ज्ञाने॑न॒ जाता॑नि॒ जीव॑न्ति।
वि॒ज्ञानं॒ प्रय॑न्त्य॒भिसंवि॑श॒न्तीति॑।
तद्विज्ञाय॑।
पुन॑रेव वरु॑णं पि॒त॑रमुप॑ससार।
अधी॑हि भगवो ब्रह्मेति॑।
तꣳ हो॑वाच।
तप॑सा ब्रह्म विजि॑ज्ञासस्व।
तपो ब्रह्मेति॑।
स तपो॑ऽतप्यत।
स तप॑स्त॒प्त्वा॥ ५॥ ॥ ५॥

((vij̱ñānaṃ brahmeti vyájānāt |
vij̱ñānāddhyéva khalvimāni bhūtáni jāyánte |
vij̱ñānéna jātáni jīvánti |
vij̱ñānaṃ prayántyabhisaṃviśantīti |
tadvij̱ñāyá |
punáreva varúṇaṃ pitáramupásasāra |
adhīhi bhagavo brahmeti |
taṁ hóvāca |
tapásā brahma vijijñāsasva |
tapo brahmeti |
sa tapó'tapyata |
sa tapástaptvā || 5 || || 5 ||))

[[9-6-1]]

आ॒न॒न्दो ब्र॒ह्मेति॒ व्य॑जानात्।
आ॒न॒न्दा॒द्ध्ये॑व ख॒ल्वि॒मानि॒ भूता॑नि॒ जाय॑न्ते।
आ॒न॒न्दे॒न जाता॑नि॒ जीव॑न्ति।
आ॒न॒न्दं प्रय॑न्त्य॒भिसं॑विश॒न्तीति॑।
सैषा भा॑र्ग॒वी वा॑रु॒णी वि॒द्या।
प॒र॒मे व्यो॑म॒न्प्रति॑ष्ठिता।
स य ए॒वं वेद॒ प्रति॑तिष्ठति।
अन्न॑वानन्ना॒दो भ॑वति।
म॒हान्भ॑वति प्र॒जया॑ प॒शुभि॑र्ब्रह्मवर्च॒सेन॑।
म॒हान्की॒र्त्या॥ ६॥ ॥ ६॥

((āṉaṉdo braḥmeti vyájānāt |
āṉandāddhyéva khalvimānīṉ bhūtániṉ jāyánte |
āṉaṉdeṉa jātániṉ jīvánti |
āṉaṉdaṃ prayántyaḇhisaṃviśaṉtīti |
saiṣā bhārgaḇvī váruṇī viḏyā |
paṟame vyómaṉpratiṣṭhitā |
sa ya eṿaṃ veda pratitiṣṭhati |
annávānannāḏo bhávati |
maḥānbhávati prajayá paśubhirbrahmavarcaseṉá |
maḥānkīrtyā || 6 || || 6 ||))

[[9-7-1]]

अन्नं॒ न नि॑न्द्यात्।
त॒द्व्र॒तम्।

प्रा॒णो वा अन्न॑म्।
शरी॑रमन्ना॒दम्।
प्रा॒णे शरी॑रं॒ प्रति॑ष्ठितम्।
शरी॑रे प्रा॒णः प्रति॑ष्ठितः।
तदे॒तदन्न॒मन्ने॒ प्रति॑ष्ठितम्।
स य ए॒तदन्न॒मन्ने॒ प्रति॑ष्ठितं॒ वेद॒ प्रति॑तिष्ठति।
अन्न॑वानन्ना॒दो भ॑वति।
म॒हान्भ॑वति प्र॒जया॑ प॒शुभि॑र्ब्रह्मवर्च॒सेन॑।
म॒हान्की॒र्त्या॥ ७॥ ॥ ७॥

((anna̱ṃ na ni̍ndyāt ।
tadvra̱tam ।
prā̱ṇo vā annä̍m ।
śari̍ramannā̱dam ।
prā̱ṇe śari̍ra̱ṃ prati̍ṣṭhitam ।
śari̍re prā̱ṇaḥ prati̍ṣṭhitaḥ ।
tade̱tadanna̱manne̱ prati̍ṣṭhitam ।
sa ya e̱tadanna̱manne̱ prati̍ṣṭhita̱ṃ veda̱ prati̍tiṣṭhati ।
anna̍vānannā̱do bha̍vati ।
ma̱hānbha̍vati pra̱jaya̍ pa̱śubhi̍rbrahmavarca̱sena̍ ।
ma̱hānkī̱rtyā ॥ 7 ॥ ॥ 7 ॥))

[[9-8-1]]
अन्न॒ं न परि॑चक्षीत।
तद्व्र॒तम्।
आपो॒ वा अन्न॑म्।
ज्योति॑रन्ना॒दम्।
अ॒प्सु ज्योति॒ः प्रति॑ष्ठितम्।
ज्योति॒ष्यापः॒ प्रति॑ष्ठिताः।
तदे॒तदन्न॒मन्ने॒ प्रति॑ष्ठितम्।
स य ए॒तदन्न॒मन्ने॒ प्रति॑ष्ठितं॒ वेद॒ प्रति॑तिष्ठति।
अन्न॑वानन्ना॒दो भ॑वति।
म॒हान्भ॑वति प्र॒जया॑ प॒शुभि॑र्ब्रह्मवर्च॒सेन॑।
म॒हान्की॒र्त्या॥ ८॥ ॥ ८॥

((annaṃ na paricakṣīta |
tadvratam |
āpo vā annam |
jyotirannādam |
aphsu jyotiḥ pratiṣṭhitam |
jyotiṣyāpaḥ pratiṣṭhitāḥ |
tadetadannamanne pratiṣṭhitam |
sa ya etadannamanne pratiṣṭhitaṃ veda pratitiṣṭhati |
annavānannādo bhavati |
mahānbhavati prajayā paśubhirbrahmavarcasena |
mahānkīrtyā || 8 || || 8 ||))

[[9-9-1]]

अन्नं बहु कुर्वीत।

तद्व्रतम्।

पृथिवी वा अन्नम्।

आकाशोऽन्नादः।

पृथिव्यामाकाशः प्रतिष्ठितः।

आकाशे पृथिवी प्रतिष्ठिता।

तदेतदन्नमन्ने प्रतिष्ठितम्।

स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति।

अन्नवानन्नादो भवति।

महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन।

महान्कीर्त्या॥ ९॥ ॥ ९॥

((annaṃ bahu kurvīta |
tadvratam |
pṛthivī vā annam |
ākāśo'nnādaḥ |
pṛthivyāmākāśaḥ pratiṣṭhitaḥ |
ākāśe pṛthivī pratiṣṭhitā |
tadetadannamanne pratiṣṭhitam |
sa ya etadannamanne pratiṣṭhitaṃ veda pratitiṣṭhati |
annavānannādo bhavati |
mahānbhavati prajayā paśubhirbrahmavarcasena |
mahānkīrtyā || 9 || || 9 ||))

[[9-10-1]]

न कंचन वसतौ प्रत्याचक्षीत।

तद्व्रतम्।

तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्।
अराध्यस्मा अन्नमित्याचक्षते।
एतद्वै मुखतोऽन्नꣳ राद्धम्।
मुखतोऽस्मा अन्नꣳ राध्यते।
एतद्वै मध्यतोऽन्नꣳ राद्धम्।
मध्यतोऽस्मा अन्नꣳ राध्यते।
एतद्वा अन्ततोऽन्नꣳ राद्धम्।
अन्ततोऽस्मा अन्नꣳ राध्यते।
य एवं वेद।
क्षेम इति वाचि।
योगक्षेम इति प्राणापानयोः।
कर्मेति हस्तयोः।
गतिरिति पादयोः।
विमुक्तिरिति पायौ।
इति मानुषीस्समाज्ञाः।
अथ दैवीः।
तृप्तिरिति वृष्टौ।
बलमिति विद्युति।
यश इति पशुषु।
ज्योतिरिति नक्षत्रेषु।
प्रजातिरमृतमानन्द इत्युपस्थे।
सर्वमित्याकाशे।
तत्प्रतिष्ठेत्युपासीत।
प्रतिष्ठावान्भवति।
तन्मह इत्युपासीत।
महान्भवति।
तन्मन इत्युपासीत।
मानवान्भवति।
तन्नम इत्युपासीत।

नम्यन्तेँऽस्मै कामाः।
तद्ब्रह्मेत्युपासीत।
ब्रह्मवान्भवति।
तद्ब्रह्मणः परिमर इत्युपासीत।
पर्येणं म्रियन्ते द्विषन्तस्सपत्नाः।
परि येँऽप्रियाँ भ्रातृव्याः।
स यश्चायं पुरुषे।
यश्चासावादित्ये।
स एकः।
स य एवं वित्।
अस्माल्लोकात्प्रेत्य।
एतमन्नमयमात्मानमुपसंक्रम्य।
एतं प्राणमयमात्मानमुपसंक्रम्य।
एतं मनोमयमात्मानमुपसंक्रम्य।
एतं विज्ञानमयमात्मानमुपसंक्रम्य।
एतमानन्दमयमात्मानमुपसंक्रम्य।
इमाँल्लोकन्कामान्नी कामरूप्यनुसंचरन्न्।
एतथ्साम गायन्नास्ते।
हा ३ वु हा ३ वु हा ३ वु।
अहमन्नमहमन्नमहमन्नम्।
अहमन्नादोऽ३ हमन्नादोऽ३ अहमन्नादः।
अहꣳ श्लोककृदहꣳ श्लोककृदहꣳ श्लोककृत्।
अहमस्मि प्रथमजा ऋता३स्य।
पूर्वं देवेभ्यो अमृतस्य ना३भायि।
यो मा ददाति स इदेव मा३वाः।
अहमन्नमन्नमदन्तमा३द्मि।
अहं विश्वं भुवनमभ्यभवाम्।
सुवर्न ज्योतीः।
य एवं वेद।

इत्युपनिषत्॥ १०॥
राध्यते विद्युति मानवान्भवत्येको हा३वु य एवं वेदैकञ्च॥ १०॥

भृगुस्तस्मै यतो विशन्ति तद्विजिज्ञासस्व तत्त्रयोदशान्नं प्राणो मनो विज्ञानमिति विज्ञाय तन्तपसा द्वादश द्वादशानन्द इति सैषा दशान्नं न निन्द्यात्प्राणश्शरीरं अन्नं न परिचक्षीतापो ज्योतिरन्नं बहु कुर्वीत पृथिव्याकाश एकादशैकादश न कञ्चनैकषष्टिर्दश॥ १०॥

((na kaṃcana vasatau pratyācakṣīta |
tadvratam |
tasmādyayā kayā ca vidhayā bahvánnam prāpnuyāt |
arādhyasmā annamityācakṣate |
etadvai mukhato'nnam̐ rāddham |
mukhato'smā ánnam̐ rādhyate |
etadvai madhyato'nnam̐ rāddham |
madhyato'smā ánnam̐ rādhyate |
etadvā antato'nnam̐ rāddham |
antato'smā ánnam̐ rādhyate |
ya évaṃ veda |
kṣema iti vāci |
yogakṣema iti prāṇāpānayoḥ |
karmeti hastayoḥ |
gatiriti pādayoḥ |
vimuktiriti pāyau |
iti mānuṣīssamājñāḥ |
atha daivīḥ |
tṛptiriti vṛṣṭau |
balamiti vidyuti |
yaśa iti paśuṣu |
jyotiriti nákṣatreṣu |
prajātiramṛtamānanda ityupasthe |
sarvamityākāśe |
tatpratiṣṭhetyúpāsīta |
pratiṣṭhávānbhavati |
tanmaha ityúpāsīta |
máhānbhavati |
tanmana ityúpāsīta |
mānávānbhavati |
tannama ityúpāsīta |
namyante'smai kāmāḥ |
tadbrahmetyúpāsīta |
brahmávānbhavati |
tadbrahmaṇaḥ parimara ityúpāsīta |
paryeṇaṃ mriyante dviṣantássapatnāḥ |
pari ye'priyā bhrātṛvyāḥ |

sa yaścāyam puruṣe |
yaścāsāvāditye |
sa ekaḥ |
sa ya evam vit |
asmāllokātpretya |
etamannamayamātmānamupasaṃkramya |
etaṃ prāṇamayamātmānamupasaṃkramya |
etaṃ manomayamātmānamupasaṃkramya |
etaṃ vijñānamayamātmānamupasaṃkramya |
etamānandamayamātmānamupasaṃkramya |
imāṃllokankāmānnī kāmarūpyanusaṃcarann |
etathsāma gāyannāste |
hā 3 vu hā 3 vu hā 3 vu |
ahamannamahamannamahamannam |
ahamannādo'3hamannādo'3ahamannādaḥ |
ahaṃ ślokakṛdahaṃ ślokakṛdahaṃ ślokakṛt |
ahamasmi prathamajā ṛtā3sya |
pūrvaṃ devebhyo amṛtasya nā3bhāyi |
yo mā dadāti sa ideva mā3vāḥ |
ahamannamannamadantamā3dmi |
ahaṃ viśvaṃ bhuvanamabhyabhavām |
suvarna jyotīḥ |
ya evaṃ veda |
ityupaniṣat || 10 ||
rāddhyate vidyuti mānavānbhavatyeko hā3vu ya evaṃ vedaikañca || 10 ||

bhṛgustasmai yato viśanti tadvijijñāsasva tattrayodaśānnaṃ prāṇo mano vijñānamiti vijñāya tantapasā dvādaśa dvādaśānanda iti saiṣā daśānnaṃ na nindyātprāṇaśśarīraṃ annaṃ na paricakṣītāpo jyotirannaṃ bahu kurvīta pṛthivyākāśa ekādaśaikādaśa na kañcanaikaṣaṣṭirdaśa || 10 ||))

[[9-0-0]]

सह नाववतु।
सह नौ भुनक्तु।
सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु मा विद्विषावहै।
ॐ शान्तिः शान्तिः शान्तिः॥

((saha nāvavatu |
saha nau bhunaktu |
saha vīryaṃ karavāvahai |
tejasvi nāvadhītamastu mā vidviṣāvahai |
āūṃ śāntiḥ śāntiḥ śāntiḥ ||))

# Taittirīya-Āraṇyaka

Edited by Subramania Sarma, Chennai

Proofread Version of November 2005

## Chapter 10

[[10-0-0]]

स॒ह ना॑ववतु।

स॒ह नौ᳚ भुनक्तु।

स॒ह वी॒र्यं᳚ करवावहै।

ते॒ज॒स्वि ना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚।

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

((sa̱ha na̍vavatu |
sa̱ha nau̍ bhunaktu |
sa̱ha vī̱ryaṃ̍ karavāvahai |
te̱ja̱svi nā̱vadhī̍tamastu̱ mā vi̍dviṣā̱vahai̎ |
āūṃ śānti̱ḥ śānti̱ḥ śānti̍ḥ ||))

[[10-1-1]]

अम्भ॑स्य पा॒रे भुव॑नस्य॒ मध्ये॒ नाक॑स्य पृ॒ष्ठे म॑ह॒तो मही॑यान्।

शु॒क्रेण॒ ज्योती॑ꣳषि समनु॒प्रवि॑ष्टः प्र॒जाप॑तिश्चरति॒ गर्भे᳚ अ॒न्तः।

यस्मि॑न्नि॒दꣳ सं च॒ वि चैति॒ सर्वं॒ यस्मि॑न्दे॒वा अधि॒ विश्वे॑ निषे॒दुः।

तदे॒व भू॒तं तदु॒ भव्य॑मा इ॒दं तद॒क्षरे᳚ पर॒मे व्यो᳚मन्न्।

येना॑वृ॒तं खं च॒ दिवं᳚ म॒हीं च॒ येना॑दि॒त्यस्तप॑ति॒ तेज॑सा॒ भ्राज॑सा च।

यम॒न्तस्स॑मु॒द्रे क॒वयो॒ वय॑न्ति॒ यद॒क्षरे᳚ पर॒मे प्र॒जाः।

यत॑ः प्रसू॒ता ज॒गत॑ः प्रसू॒ती तोये᳚न जी॒वान्व्यच॑सर्ज॒ भूम्या᳚म्।

यदोष॑धीभिः पु॒रुषा᳚न्प॒शूꣳश्च॒ विवे᳚श भू॒तानि॑ चरा॒चराणि॑।

अत॑ः प॒रं नान्य॒दणी॑यसꣳ हि॒ परा᳚त्प॒रं यन्मह॑तो म॒हान्त᳚म्।

यदे᳚कम॒व्यक्त॒मन॑न्तरूप॒ं विश्वं᳚ पु॒राणं॒ तम॑स॒ः पर॑स्तात्॥ १॥

((ambha̍sya pā̱re bhuva̍nasya̱ madhye̱ nāka̍sya pṛ̱ṣṭhe ma̍ha̱to mahi̎yān |

śu̱kreṇa̱ jyotī̍m̐ṣi samanu̱pravi̍ṣṭaḥ pra̱jāpa̍tiścarati̱ garbhe̍ a̱ntaḥ |
yasmi̍nni̱dam̐ saṃ ca̱ vi caiti̱ sarva̱ṃ yasmi̍ndevā adhi̱ viśve̍ ni̱ṣe̱duḥ |
tade̱va bhū̱taṃ tadu̱ bhavya̍mā i̱daṃ tada̱kṣare̍ para̱me vyo̍mann |
yenā̍vṛ̱taṃ khaṃ ca̱ diva̱ṃ ma̱hīṃ ca̱ yenā̍di̱tyastapa̍ti̱ teja̍sā̱ bhrāja̍sā ca |
yama̱ntassa̍mu̱dre ka̱vayo̱ vaya̍nti̱ yada̱kṣare̍ para̱me pra̱jāḥ |
yata̍ḥ prasū̱tā ja̱gata̍ḥ prasū̱tī toye̍na jī̱vānvyaca̍sarja̱ bhūmyā̎m |
yado̱ṣa̍dhībhiḥ pu̱ruṣā̍npa̱śūm̐śca̱ vive̍śa bhū̱tāni̍ carācara̱ṇi̍ |
ata̍ḥ para̱ṃ nānya̱daṇī̍yasam̐ hi̱ parā̎tpara̱ṃ yanmaha̍to ma̱hāntā̎m |
yade̍kama̱vyakta̱manan̍tarūpa̱ṃ viśva̱ṃ purā̱ṇa̱ṃ tama̍sa̱ḥ parastā̍t || 1 ||))

[[10-1-2]]

त॒दे॒वर्तं तदु॑ स॒त्यमा॑हुस्त॒दे॒व ब्रह्म॑ प॒र॒मं क॑वी॒नाम्।
इ॒ष्टा॒पू॒र्तं ब॑हु॒धा जा॒तं जाय॑मानं वि॒श्वं बि॑भर्ति॒ भुव॑नस्य॒ नाभि॑ः।
त॒दे॒वाग्निस्तद्वा॒युस्तथ्सूर्य॒स्तदु॑ च॒न्द्रमा᳚ः।
त॒दे॒व शु॒क्रम॒मृत॒ं तद्ब्रह्म॒ तदा॒पस्स प्र॒जाप॑तिः।
सर्वे॑ नि॒मे॒षा ज॒ज्ञिरे॑ वि॒द्युत॒ः पुरु॑षा॒दधि॑।
क॒ला मु॑हू॒र्ताः काष्ठा᳚श्चाहोरा॒त्राश्च॑ सर्व॒शः।
अ॒र्ध॒मा॒सा मासा॑ ऋ॒तव॑स्संवथ्स॒रश्च॑ कल्पन्ताम्।
स आप॑ः प्रदु॒घे उ॒भे इ॒मे अ॒न्तरि॑क्ष॒मथो॒ सुव॑ः।
नैन॑मू॒र्ध्वं न ति॒र्यञ्चं॒ न मध्ये॒ परि॑जग्रभत्।
न तस्ये॑शे॒ कश्च॒न तस्य॑ नाम म॒हद्यश॑ः॥ २॥

((tade̱vartaṃ tadu̍ sa̱tyamā̍hu̱stade̱va brahma̍ para̱maṃ ka̍vī̱nām |
i̱ṣṭā̱pū̱rtaṃ ba̍hu̱dhā jā̱taṃ jāya̍mānaṃ vi̱śvaṃ bi̍bharti̱ bhuva̍nasya̱ nābhi̍ḥ |
tade̱vāgnistadvā̱yustathsūrya̱stadu̍ ca̱ndramā̎ḥ |
tade̱va śu̱krama̱mṛta̱ṃ tadbrahma̱ tadā̱passa pra̱jāpa̍tiḥ |
sarve̍ nime̱ṣā ja̱jñire̍ vi̱dyuta̱ḥ puru̍ṣā̱dadhi̍ |
ka̱lā mu̍hū̱rtāḥ kāṣṭhā̎ścāhorā̱trāśca̍ sarva̱śaḥ |
a̱rdha̱mā̱sā māsā̍ ṛ̱tava̍ssaṃvathsa̱raśca̍ kalpantām |
sa āpa̍ḥ pradu̱ghe u̱bhe i̱me a̱ntari̍kṣa̱matho̱ suva̍ḥ |
naina̍mū̱rdhvaṃ na ti̱ryañca̱ṃ na madhye̱ pari̍jagrabhat |
na tasye̍śe̱ kaśca̱na tasya̍ nāma ma̱hadyaśa̍ḥ || 2 ||))

[[10-1-3]]

न सं॒दृशे॑ तिष्ठति॒ रूप॑मस्य न चक्षु॑षा पश्यति॒ कश्च॒नैन᳚म्।
हृ॒दा म॑नी॒षा मन॑सा॒ऽभिक्लृ॑प्तो॒ य ए॑नं वि॒दुरमृ॑ता॒स्ते भ॑वन्ति।
अ॒द्भ्यस्संभू॑तो हिरण्यग॒र्भ इत्य॒ष्टौ।
ए॒ष हि दे॒वः प्र॒दिशोऽनु॒ सर्वा॒ः पूर्वो॑ हि जा॒तस्स उ॒ गर्भे॑ अ॒न्तः।

स वि॒जाय॑मानस्स जनि॒ष्यमा॑णः प्र॒त्यङ्मुखाँ᳚स्तिष्ठति वि॒श्वतो॑मुखः।
वि॒श्वत॑श्चक्षुरु॒त वि॒श्वतो॑मुखो वि॒श्वतो॑हस्त उ॒त वि॒श्वत॑स्पात्।
सं बा॒हुभ्यां॒ नम॑ति॒ सं पत॑त्रै॒र्द्यावा॑पृथि॒वी ज॒नय॑न्दे॒व एकः॑।
वे॒नस्तत्पश्य॒न्विश्वा॒ भुव॑नानि वि॒द्वान्यत्र॒ विश्वं॒ भव॒त्येक॑नीळम्।
यस्मि॑न्नि॒दꣳ सं च॒ वि चैक॒ꣳ स ओत॒ः प्रोत॑श्च वि॒भुः प्र॒जासु॑।
प्र तद्वो॑चे अ॒मृतं॒ नु वि॒द्वान्ग॑न्ध॒र्वो नाम॒ निहि॑तं॒ गुहा॑सु॥ ३॥

((na sa̱mdṛśe̍ tiṣṭhati̱ rūpa̍masya̱ na cakṣu̍ṣā paśyati̱ kaśca̱naina̎m |
hṛdā ma̍nīṣā mana̍sā̱'bhiklṛ̍pto̱ ya e̍naṃ vi̱duramṛ̍tā̱ste bha̍vanti |
a̱dbhyassa̱mbhū̍to hira̱ṇyaga̱rbha itya̱ṣṭau |
e̱ṣa hi de̱vaḥ pra̱diśo'nu̱ sarvā̱ḥ pūrvo̍ hi jā̱tassa u̱ garbhe̍ a̱ntaḥ |
sa vi̱jāya̍mānassa jani̱ṣyamā̍ṇaḥ pra̱tyaṅmukhā̎stiṣṭhati vi̱śvato̍mukhaḥ |
vi̱śvata̍ścakṣuru̱ta vi̱śvato̍mukho vi̱śvato̍hasta u̱ta vi̱śvata̍spāt |
saṃ bā̱hubhyā̱ṃ nama̍ti̱ saṃ pata̍trai̱rdyāvā̍pṛthi̱vī ja̱naya̍nde̱va eka̍ḥ |
ve̱nastatpaśya̱nviśvā̱ bhuva̍nāni vi̱dvānyatra̱ viśva̱ṃ bhava̱tyeka̍nī̱ḻam |
yasmi̍nni̱daṁ̍ saṃ ca̱ vi caika̱ṁ̍ sa ota̱ḥ prota̍śca vi̱bhuḥ pra̱jāsu̍ |
pra tadvo̍ce a̱mṛta̱ṃ nu vi̱dvānga̍ndha̱rvo nāma̱ nihi̍ta̱ṃ guhā̍su || 3 ||))

[[10-1-4]]
त्रीणि॑ प॒दा निहि॑ता॒ गुहा॑सु॒ यस्तद्वेद॑ सवि॒तुः पि॒ता स॑त्।
स नो॒ बन्धु॑र्जनि॒ता स वि॑धा॒ता धामा॑नि॒ वेद॒ भुव॑नानि॒ विश्वा᳚।
यत्र॑ दे॒वा अ॒मृत॑मानशा॒नास्तृ॒तीये॒ धामा᳚न्य॒भ्यैर॑यन्त।
परि॒ द्यावा॑पृथि॒वी य॑न्ति स॒द्यः परि॑ लो॒कान्परि॒ दिश॒ः परि॒ सुव॑ः।
ऋ॒तस्य॒ तन्तुं॑ वित॒तं वि॒चृत्य॒ तद॑पश्य॒त्तद॑भवत्प्र॒जासु॑।
प॒रीत्य॑ लो॒कान्प॒रीत्य॑ भू॒तानि॑ प॒रीत्य॒ सर्वा᳚ः प्र॒दिशो॒ दिश॑श्च।
प्र॒जाप॑तिः प्रथम॒जा ऋ॒तस्या॒त्मना॒ऽऽत्मान॑म॒भिसंब॑भूव।
सद॑स॒स्पति॒मद्भु॑तं प्रि॒यमिन्द्र॑स्य॒ काम्य᳚म्।
सनिं॑ मे॒धाम॑यासिषम्।
उद्दी᳚प्यस्व जातवेदोऽप॒घ्नन्निर्ऋ॑तिं॒ मम॑॥ ४॥

((trīṇi̍ pa̱dā nihi̍tā̱ guhā̍su̱ yastadveda̍ savi̱tuḥ pi̱tā sa̍t |
sa no̱ bandhu̍rjani̱tā sa vi̍dhā̱tā dhāmā̍ni̱ veda̱ bhuva̍nāni̱ viśvā̎ |
yatra̍ de̱vā a̱mṛta̍mānaśā̱nāstṛ̱tīye̱ dhāmā̎nya̱bhyaira̍yanta |
pari̱ dyāvā̍pṛthi̱vī ya̍nti sa̱dyaḥ pari̍ lo̱kānpari̱ diśa̱ḥ pari̱ suva̍ḥ |
ṛ̱tasya̱ tantu̍ṃ vita̱taṃ vi̱cṛtya̱ tada̍paśya̱ttada̍bhavatpra̱jāsu̍ |
pa̱rītya̍ lo̱kānpa̱rītya̍ bhū̱tāni̍ pa̱rītya̱ sarvā̎ḥ pra̱diśo̱ diśa̍śca |
pra̱jāpa̍tiḥ prathama̱jā ṛ̱tasyā̱tmanā̱''tmāna̍ma̱bhisa̱ṃba̍bhūva |
sada̍sa̱spati̱madbhu̍ta̱ṃ pri̱yamindra̍sya̱ kāmya̎m |

sanim̍ me̱dhāma̍yāsiṣam |
uddī̎pyasva jātavedo'pa̱ghnannirṛ̍tim̱ mama̍ || 4 ||))

[[10-1-5]]

प॒शूꣳश्च॒ मह्य॒माव॑ह॒ जीव॑नं च॒ दिशो॑ दिश।
मा नो॑ हिꣳसीज्जातवेदो॒ गामश्वं॒ पुरु॑षं॒ जग॑त्।
अबि॑भ्र॒दग्न॒ आग॑हि श्रि॒या मा॒ परि॑पातय।
पुरु॑षस्य विद्म सहस्रा॒क्षस्य॑ महा॒देवस्य॑ धीमहि।
तन्नो॑ रुद्रः प्रचो॒दया᳚त्।
तत्पुरु॑षाय वि॒द्महे॑ महादे॒वाय॑ धीमहि।
तन्नो॑ रुद्रः प्रचो॒दया᳚त्।
तत्पुरु॑षाय वि॒द्महे॑ वक्रतु॒ण्डाय॑ धीमहि।
तन्नो॑ दन्तिः प्रचो॒दया᳚त्।
तत्पुरु॑षाय वि॒द्महे॑ चक्रतु॒ण्डाय॑ धीमहि॥ ५॥

((pa̱śūm̐śca̱ mahya̱māva̍ha̱ jīva̍nam̐ ca̱ diśo̍ diśa |
mā no̍ him̐sījjātavedo̱ gāmaśvam̱ puru̍ṣam̱ jaga̍t |
abi̍bhra̱dagna̱ āga̍hi śri̱yā mā̱ pari̍pātaya |
puru̍ṣasya vidma sahasrā̱kṣasya̍ mahāde̱vasya̍ dhīmahi |
tanno̍ rudraḥ praco̱dayā̎t |
tatpuru̍ṣāya vi̱dmahe̍ mahāde̱vāya̍ dhīmahi |
tanno̍ rudraḥ praco̱dayā̎t |
tatpuru̍ṣāya vi̱dmahe̍ vakratu̱ṇḍāya̍ dhīmahi |
tanno̍ dantiḥ praco̱dayā̎t |
tatpuru̍ṣāya vi̱dmahe̍ cakratu̱ṇḍāya̍ dhīmahi || 5 ||))

[[10-1-6]]

तन्नो॑ नन्दिः प्रचो॒दया᳚त्।
तत्पुरु॑षाय वि॒द्महे॑ महासे॒नाय॑ धीमहि।
तन्न॑ष्षण्मुखः प्रचो॒दया᳚त्।
तत्पुरु॑षाय वि॒द्महे॑ सुवर्णप॒क्षाय॑ धीमहि।
तन्नो॑ गरुडः प्रचो॒दया᳚त्।
वे॒दा॒त्म॒नाय॑ वि॒द्महे॑ हिरण्यग॒र्भाय॑ धीमहि।
तन्नो᳚ ब्रह्म प्रचो॒दया᳚त्।
ना॒रा॒य॒णाय॑ वि॒द्महे॑ वासुदे॒वाय॑ धीमहि।
तन्नो॑ विष्णुः प्रचो॒दया᳚त्।

वज्रनखाय विद्महे तीक्ष्णदꣳष्ट्राय धीमहि॥ ६॥

((tannȯ nandiḥ pracọdayȁt |
tatpurủṣāya vịdmahė mahāsẹnāyȧ dhīmahi |
tannảṣṣaṇmukhaḥ pracọdayȁt |
tatpurủṣāya vịdmahė suvarṇapạkṣāyȧ dhīmahi |
tannȯ garuḍaḥ pracọdayȁt |
vẹdātmạnāyȧ vịdmahė hiraṇyagạrbhāyȧ dhīmahi |
tannȍ brahma pracọdayȁt |
nārạyaṇāyȧ vịdmahė vāsudẹvāyȧ dhīmahi |
tannȯ viṣṇuḥ pracọdayȁt |
vạjrạnạkhāyȧ vịdmahė tīkṣṇadạm̐ṣṭrāyȧ dhīmahi || 6 ||))

[[10-1-7]]

तन्नो नारसिꣳहः प्रचोदयात्।
भास्कराय विद्महे महद्युतिकराय धीमहि।
तन्नो आदित्यः प्रचोदयात्।
वश्वानराय विद्महे लालीलाय धीमहि।
तन्नो अग्निः प्रचोदयात्।
कात्यायनाय विद्महे कन्यकुमारि धीमहि।
तन्नो दुर्गिः प्रचोदयात्।
सहस्रपरमा देवी शतमूला शताङ्कुरा।
सर्वꣳ हरतु मे पापं दूर्वा दुस्स्वप्ननाशनी।
काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषः परि॥ ७॥

((tannȯ nārasim̐haḥ pracọdayȁt |
bhāskạrāyȧ vịdmahė mahadyutikạrāyȧ dhīmahi |
tannȯ ādityaḥ pracọdayȁt |
vạśvānạrāyȧ vịdmahė lālīlāyȧ dhīmahi |
tannȯ agniḥ pracọdayȁt |
kātyāyạnāyȧ vịdmahė kanyakụmārỉ dhīmahi |
tannȯ durgiḥ pracọdayȁt |
sạhạsrạparảmā dẹvī śatamủlā śạtāṅkủrā |
sarvam̐ haratủ me pāpạm dūrvā dủssvapnạnāśảnī |
kāṇḍȁtkāṇḍātprạrohảntī parủṣaḥparuṣạḥ parỉ || 7 ||))

[[10-1-8]]

एवा नो दूर्वे प्रतनु सहस्रेण शतेन च।
या शतेन प्रतनोषि सहस्रेण विरोहसि।

तस्याँस्ते देवीष्टके विधेमं हविषां वयम्।
अश्वक्रान्ते रथक्रान्ते विष्णुक्राँन्ते वसुन्धरा।
शिरसां धारयिष्यामि रक्षस्व माँ पदेपदे।
भूमिर्धेनुर्धरणी लोकधारिणी।
उद्धृतांऽसि वराहेण कृष्णेन शतबाहुना।
मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम्।
मृत्तिकेँ ब्रह्मदत्ताऽऽसि काश्यपेनाभिमन्त्रिता।
मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम्॥ ८॥

((evā no dūrve pratanu sahasreṇa śatena ca |
yā śatena pratanoṣi sahasreṇa virohasi |
tasyāste devīṣṭake vidhema haviṣā vayam |
aśvakrānte rathakrānte viṣṇukrānte vasundharā |
śirasā dhārayiṣyāmi rakṣasva māṃ padepade |
bhūmirdhenurdharaṇī lokadhāriṇī |
uddhṛtā'si varāheṇa kṛṣṇena śatabāhunā |
mṛttike hana me pāpaṃ yanmayā duṣkṛtaṃ kṛtam |
mṛttike brahmadattā''si kāśyapenābhimantritā |
mṛttike dehi me puṣṭiṃ tvayi sarvaṃ pratiṣṭhitam || 8 ||))

[[10-1-9]]
मृत्तिकेँ प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके।
तयां हतेन पापेन गच्छामि परमां गतिम्।
यत इन्द्र भयामहे ततो नो अभयं कृधि।
मघवञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि।
स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी।
वृषेन्द्रः पुर एतु नस्स्वस्तिदा अभयंकरः।
स्वस्ति न इन्द्रो वृद्धश्रवास्स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिस्स्वस्ति नो बृहस्पतिर्दधातु।
आपाँन्तमन्युस्तृपलप्रभर्मा धुनिश्शिमीवाञ्छरुमाँ ऋजीषी।
सोमो विश्वाँन्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः॥ ९॥

((mṛttike pratiṣṭhite sarvaṃ tanme nirṇuda mṛttike |
tayā hatena pāpena gacchāmi paramāṃ gatim |
yata indra bhayāmahe tato no abhayaṃ kṛdhi |
maghavañchagdhi tava tanna ūtaye vidviṣo vimṛdho jahi |
svastidā viśaspatirvṛtrahā vimṛdho vaśī |

vṛṣendraḥ pura etu nassvastidā abhayaṃkaraḥ |
svasti na indro vṛddhaśravāssvasti naḥ pūṣā viśvavedāḥ |
svasti nastārkṣyo ariṣṭanemissvasti no bṛhaspatirdadhātu |
āpāntamanyustṛpalaprabharmā dhuniśśimivāñcarumām̐ ṛjīṣī |
somo viśvānyatasā vanāni nārvāgindraṃ pratimānāni debhuḥ || 9 ||))

[[10-1-10]]

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतस्सुरुचो वेन आवः।
स बुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः।
स्योना पृथिवि भवा नृक्षरा निवेशनी।
यच्छा नश्शर्म सप्रथाः।
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरिꣳ सर्वभूतानां तामिहोपह्वये श्रियम्।
श्रीर्मे भजतु।
अलक्ष्मीर्मे नश्यतु।
विष्णुमुखा वै देवाश्छन्दोभिरिमाँल्लोकाननपजय्यमभ्यजयन्।
महाꣳ इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु॥ १०॥

((brahma jajñānaṃ prathamaṃ purastādvi sīmatassuruco vena āvaḥ |
sa budhniyā upamā asya viṣṭhāssataśca yonimasataśca vivaḥ |
syonā pṛthivi bhavā nṛkṣarā niveśanī |
yacchā naśśarma saprathāḥ |
gandhadvārāṃ durādharṣāṃ nityapuṣṭāṃ karīṣiṇīm |
īśvarim̐ sarvabhūtānāṃ tāmihopahvaye śriyam |
śrīrme bhajatu |
alakṣmīrme naśyatu |
viṣṇumukhā vai devāśchandobhirimām̐llokānanapajayyamabhyajayan |
mahām̐ indro vajrabāhuḥ ṣoḍaśī śarma yacchatu || 10 ||))

[[10-1-11]]

स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान्द्वेष्टि।
सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते।
कक्षीवन्तं य औशिजम्।
शरीरं यज्ञशमलं कुसीदं तस्मिन्थ्सीदतु योऽस्मान्द्वेष्टि।
चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि।
तेन पवित्रेण शुद्धेन पूता अति पाप्मानमरातिं तरेम।
सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान्।

जहि शत्रूꣳरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः।
सुमित्रा न आप ओषधयस्सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः।
आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन॥ ११॥

((svasti no maghavā karotu hantu pāpmānam yo'smāndveṣṭi |
somānaꣳ svaraṇam kṛṇuhi brahmaṇaspate |
kakṣīvantam ya auśijam |
śarīram yajñaśamalam kusīdam tasminthsīdatu yo'smāndveṣṭi |
caraṇam pavitram vitatam purāṇam yena pūtastarati duṣkṛtāni |
tena pavitreṇa śuddhena pūtā ati pāpmānamarātim tarema |
sajoṣā indra sagaṇo marudbhiḥ somam piba vṛtrahañchūra vidvān |
jahi śatrūꣳrapa mṛdho nudasvāthābhayam kṛṇuhi viśvato naḥ |
sumitrā na āpa oṣadhayassantu durmitrāstasmai bhūyāsuryo'smāndveṣṭi yam ca vayam dviṣmaḥ |
āpo hi ṣṭhā mayobhuvastā na ūrje dadhātana || 11 ||))

[[10-1-12]]
महे रणाय चक्षसे।
यो वश्शिवतमो रसस्तस्य भाजयतेह नः।
उशतीरिव मातरः।
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ।
आपो जनयथा च नः।
हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः।
यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः।
यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्।
तन्न इन्द्रो वरुणो बृहस्पतिस्सविता च पुनन्तु पुनःपुनः।
नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः॥ १२॥

((mahe raṇāya cakṣase |
yo vaśśivatamo rasastasya bhājayateha naḥ |
uśatīriva mātaraḥ |
tasmā aram gamāma vo yasya kṣayāya jinvatha |
āpo janayathā ca naḥ |
hiraṇyaśṛṅgam varuṇam prapadye tīrtham me dehi yācitaḥ |
yanmayā bhuktamasādhūnām pāpebhyaśca pratigrahaḥ |
yanme manasā vācā karmaṇā vā duṣkṛtam kṛtam |
tanna indro varuṇo bṛhaspatissavitā ca punantu punaḥpunaḥ |
namo'gnaye'phsumate nama indrāya namo varuṇāya namo vāruṇyai namo'dbhyaḥ || 12 ||))

[[10-1-13]]

यद॒पां क्रू॒रं यद॑मे॒ध्यं यद॑शा॒न्तं तदप॑गच्छतात्।
अ॒त्या॒श॒नाद॑तीपा॒ना॒द्य॒च्च उ॒ग्रात्प्र॑ति॒ग्रहा᳚त्।
तन्नो॒ वरु॑णो रा॒जा॒ पा॒णिना᳚ ह्यव॒मर्श॑तु।
सो॑ऽहम॑पा॒पो वि॒रजो॒ निर्मु॒क्तो मु॑क्तकि॒ल्बिषः।
नाक॑स्य पृ॒ष्ठमारु॑ह्य॒ गच्छे॒द्ब्रह्म॑ सलो॒कताम्।
यश्चा॒प्सु वरु॑ण॒स्स पु॒नात्व॑घमर्ष॒णः।
इ॒मं मे॑ गङ्गे यमुने सरस्वति॒ शुतु॑द्रि॒ स्तोम॑ꣳ सचता॒ परु॒ष्णि॒या।
अ॒सि॒क्नि॒या म॑रुद्वृधे वि॒तस्त॒याऽऽर्जी॑कीये शृणु॒ह्या सु॒षोम॑या।
ऋ॒तं च॑ स॒त्यं चा॒भी᳚द्धा॒त्तप॒सोऽध्य॑जायत।
तत॒ो रात्रि॑रजायत॒ तत॑ः समु॒द्रो अ॑र्ण॒वः॥ १३॥

((yada̱pāṃ krū̱raṃ yada̍me̱dhyaṃ yada̍śā̱ntaṃ tadapa̍gacchatāt |
a̱tyā̱śa̱nāda̍tīpā̱nā̱dya̱cca u̱grātpra̍ti̱graha̎t |
tanno̱ varu̍ṇo rā̱jā̱ pā̱ṇinā̎ hyava̱marśa̍tu |
so̍'hama̍pā̱po vi̱rajo̱ nirmu̱kto mu̍ktaki̱lbiṣa̱ḥ |
nāka̍sya pṛ̱ṣṭhamāru̍hya̱ gacche̱dbrahma̍ salo̱katām |
yaścā̱phsu varu̍ṇa̱ssa pu̱nātva̍ghamarṣa̱ṇaḥ |
i̱maṃ me̍ gaṅge yamune sarasvati̱ śutu̍dri̱ stomaꣳ̍ sacatā̱ paru̱ṣṇi̱yā |
a̱si̱kni̱yā ma̍rudvṛdhe vi̱tasta̱yā''rjī̍kīye śṛ̱ṇu̱hyā su̱ṣoma̍yā |
ṛ̱taṃ ca̍ sa̱tyaṃ cā̱bhī̎ddhā̱ttapa̱so'dhya̍jāyata |
tato̱ rātri̍rajāyata̱ tata̍ḥ samu̱dro a̍rṇa̱vaḥ || 13 ||))

[[10-1-14]]

स॒मु॒द्राद॑र्ण॒वादधि॑ संवथ्स॒रो अ॑जायत।
अ॒हो॒रा॒त्राणि॑ वि॒दध॒द्विश्व॑स्य मि॒षतो॒ व॒शी।
सू॒र्या॒च॒न्द्र॒मसौ॑ धा॒ता य॑थापू॒र्वम॑कल्पयत्।
दिवं॑ च पृथि॒वीं चा॒न्तरि॑क्ष॒मथो॒ सुवः॑।
यत्पृ॑थि॒व्याꣳ रज॑स्स्व॒मान्तरि॑क्षे वि॒रोद॑सी।
इ॒माꣳस्तदा॒पो व॑रुणः पु॒नात्व॑घमर्ष॒णः।
पु॒नन्तु॒ वस॑वः पु॒नातु॒ वरु॑णः पु॒नात्व॑घमर्ष॒णः।
ए॒ष भू॒तस्य॑ म॒ध्ये भुव॑नस्य गो॒प्ता।
ए॒ष पु॒ण्यकृ॑तां लो॒का॒नेष मृ॒त्योर्हि॑र॒ण्मय᳚म्।
द्यावा॑पृथि॒व्योर्हि॑र॒ण्मय॒ꣳ सꣳश्रि॑त॒ꣳ सुवः॑॥ १४॥

((samudrādārṇavādadhi saṃvathsaro ajāyata ।
ahorātrāṇi vidadhadviśvasya miṣato vaśī ।
sūryācandramasau dhātā yathāpūrvamakalpayat ।
divaṃ ca pṛthivīṃ cāntarikṣamatho suvaḥ ।
yatpṛthivyām̐ rajassvamāntarikṣe virodasī ।
imām̐stadāpo varuṇaḥ punātvaghamarṣaṇaḥ ।
punantu vasavaḥ punātu varuṇaḥ punātvaghamarṣaṇaḥ ।
eṣa bhūtasya madhye bhuvanasya goptā ।
eṣa puṇyakṛtāṃ lokāneṣa mṛtyorhiraṇmayam ।
dyāvāpṛthivyorhiraṇmayam̐ sam̐śritam̐ suvaḥ ॥ 14 ॥))

[[10-1-15]]

स नस्सुवस्सꣳशिशाधि।
आर्द्रं ज्वलति ज्योतिरहमस्मि।
ज्योतिर्ज्वलति ब्रह्माहमस्मि।
योऽहमस्मि ब्रह्माहमस्मि।
अहमस्मि ब्रह्माहमस्मि।
अहमेवाहं मां जुहोमि स्वाहा।
अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः।
वरुणोऽपामघमर्षणस्तस्मात्पापात्प्रमुच्यते।
रजोभूमिस्त्व माꣳ रोदयस्व प्रवदन्ति धीराः।
आक्रान्थ्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा।
वृषा पवित्रे अधि सानो अव्ये बृहथ्सोमो वावृधे सुवान इन्दुः॥ १५॥
पुरस्ताद्यशो निहितं गुहासु मम चक्रतुण्डाय धीमहि तीक्ष्णदꣳष्ट्राय धीमहि परि प्रतिष्ठितं
देभुर्यच्छतु दधातनाद्योऽर्णवस्सुवो राजैकं च॥ १॥

रुद्रो रुद्रश्च दन्तिश्च नन्दिः षण्मुख एव च।
गरुडो ब्रह्म विष्णुश्च नारसिꣳहस्तथैव च।
आदित्योऽग्निश्च दुर्गिश्च क्रमेण द्वादशाम्भसि॥
म म व च म सु वे ना व भा वै कात्यायनाय॥

((sa nassuvassam̐śiśādhi ।
ārdraṃ jvalati jyotirahamasmi ।
jyotirjvalati brahmāhamasmi ।
yo'hamasmi brahmāhamasmi ।
ahamasmi brahmāhamasmi ।
ahamevāhaṃ māṃ juhomi svāhā ।

a̱kārya̱kārya̍vakī̍rṇī ste̱no bhrū̍ṇa̱hā gu̍ruta̱lpagaḥ |
varu̍ṇo̱'pāma̍ghamarṣa̱ṇastasmā̎tpā̱pātpramu̍cyate |
ra̱jobhūmi̍stva̱ māṁ̍ roda̍yasva̱ prava̍danti̱ dhīrā̎ḥ |
ākrā̎nthsamu̱draḥ pra̍tha̱me vidha̍rmañja̱naya̍npra̱jā bhuva̍nasya̱ rājā̎ |
vṛṣā̍ pa̱vitre̱ adhi̱ sāno̱ avye̍ bṛ̱hathsomo̍ vāvṛ̱dhe suvā̱na indu̍ḥ || 15 ||
purastā̱dyaśo̱ nihi̍tam̱ guhā̍su̱ mama̍ cakratuṇḍā̍ya̍ dhīmahi tīkṣṇada̱ṁ̎ṣṭrāya̍
dhīmahi̱ pari̍ pra̱tiṣṭhi̍taṃ debhuryacchatu dadhātanā̱dbhyo̎'rṇa̱vassuvo̱ rājaikaṃ ca
|| 1 ||

ru̱dro̱ ru̱draśca̱ danti̱śca̱ na̱ndi̱ḥ ṣa̱ṇmu̱kha̱ e̱va ca̍ |
ga̱ru̱ḍo̱ bra̱hma̱ vi̱ṣṇu̱śca̱ nā̱ra̱si̱ṁ̍ha̱sta̱thai̱va ca̍ |
ā̱di̱tyo̱'gni̱śca̱ du̱rgi̱śca̱ kra̱me̱ṇa dvāda̱śāmbha̍si ||
ma̱ ma̱ va̱ ca̱ ma̱ su̱ ve̱ nā̱ va̱ bhā̱ vai̱ kā̱tyā̱ya̱nāya̍ ||))

[[10-2-1]]
जा॒तवे॑दसे सुनवाम॒ सोम॑मरातीय॒तो नि॒दहा॑ति॒ वेद॑ः।
स न॑ः पर्ष॒दति॑ दु॒र्गाणि॒ विश्वा॑ ना॒वेव॒ सिन्धुं॑ दुरि॒ताऽत्य॒ग्निः।
ताम॒ग्निव॑र्णां॒ तप॑सा ज्वल॒न्तीं वै॑रोच॒नीं क॑र्मफ॒लेषु॒ जुष्टाॎम्।
दु॒र्गां दे॒वीꣳ शर॑णम॒हं प्रप॑द्ये सु॒तर॑सि तर॒से नम॑ः।
अग्ने॒ त्वं पा॑रया॒ नव्यो॑ अ॒स्मान्थ्स्व॒स्तिभि॒रति॑ दु॒र्गाणि॒ विश्वाॎ।
पूश्च॑ पृ॒थ्वी ब॑हु॒ला न॑ उ॒र्वी भवा॑ तो॒काय॒ तन॑याय॒ शंयोः।
विश्वा॑नि नो दु॒र्गहा॑ जातवेद॒स्सिन्धुं॒ न ना॒वा दु॑रि॒ताऽति॑पर्षि।
अग्ने॑ अत्रि॒वन्मन॑सा गृणा॒नो॑ऽस्माकं॑ बोध्यवि॒ता त॒नूनाॎम्।
पृ॒तना॒जित॒ꣳ सह॑मानमु॒ग्रम॒ग्निꣳ हु॑वेम पर॒माथ्स॒धस्थाॎत्।
स न॑ः पर्ष॒दति॑ दु॒र्गाणि॒ विश्वा॒ क्षाम॑द्देवो अति॑दुरि॒ताऽत्य॒ग्निः।
प्र॒त्नोषि॑ क॒मीड्यो॑ अध्व॒रेषु॑ स॒नाच्च॒ होता॒ नव्य॑श्च॒ सत्सि॑।
स्वां चाॎग्ने त॒नुवं॑ पि॒प्रय॑स्वा॒स्मभ्यं॑ च॒ सौभ॑गमाय॑जस्व।
गोभि॒र्जुष्ट॑मयु॒जो॒ निषि॑क्तं॒ तवेॎन्द्र विष्णो॒रनु॒संच॑रेम।
नाक॑स्य पृ॒ष्ठम॒भि सं॒वसा॑नो॒ वैष्ण॑वीं लो॒क इ॒ह मा॑दयन्ताम्॥ १६॥
दु॒रि॒ताऽत्य॒ग्निश्च॒त्वारि॑ च॥ २॥

((jā̱tave̍dase sunavāma̱ soma̍marātīya̱to nida̍hāti̱ veda̍ḥ |
sa na̍ḥ parṣa̱dati̍ du̱rgāṇi̱ viśva̍ nā̱veva̱ sindhuṃ̍ duri̱tā'tya̱gniḥ |
tāma̱gnivar̍ṇā̱ṃ tapa̍sā jvala̱ntīṃ vai̍roca̱nīṃ ka̍rmapha̱leṣu̱ juṣṭā̎m |
du̱rgāṃ de̱vīṁ̍ śara̍ṇama̱haṃ prapa̍dye su̱tara̍si tara̱se nama̍ḥ |
agne̱ tvaṃ pa̍rayā̱ navyo̍ a̱smānthsva̱stibhi̱rati̍ du̱rgāṇi̱ viśvā̎ |
pūśca̍ pṛ̱thvī ba̍hu̱lā na̍ u̱rvī bhava̍ to̱kāya̱ tana̍yāya̱ śa̱ṃyoḥ |
viśva̍ni no du̱rgaha̍ jātaveda̱ssindhuṃ̱ na nā̱vā du̍ri̱tā'ti̍parṣi |

agnė atri̱vanmanȧsā gṛ̱ṇā̱nȫ'smākam̱ bodhyavi̱tā ta̱nūnā̱̈m ।
pṛ̱ta̱nā̱jitä̱ṁ sahȧmānamu̱gramagniṁ̈ hu̇vema para̱māthsa̱dhasthā̱̈t ।
sa na̍ḥ parṣa̱dati̍ du̱rgā̱ṇi̱ viśvā̱ kṣāmȧddevo ati̍duri̱tā'tya̱gniḥ ।
pra̱tnoṣi̍ ka̱mīḍyȯ adhva̱reṣu̇ sa̱nācca̱ hotā̱ navyȧśca̱ sathsi̍ ।
svāṃ̱ cä̱gne ta̱nuvaṃ̱ pi̱prayȧsvā̱smabhyaṃ̱ ca̱ saubhȧga̱māyȧjasva ।
gobhi̱rju̱ṣṭȧ̱ma̱yujo̱ niṣi̍ktaṃ̱ tavȅndra vi̱ṣṇo̱ranu̱saṃcȧrema ।
nākȧsya pṛ̱ṣṭhama̱bhi saṃ̱vasā̇no̱ vaiṣṇȧvīṃ̱ lo̱ka i̱ha mȧdayantām ॥ 16 ॥
du̱ri̱tā'tya̱gniśca̱tvāri̍ ca ॥ 2 ॥))

[[10-3-1]]

भूरन्नं॑मग्नये॑ पृथि॒व्यै स्वाहा॒ भुवोऽन्नं॑ वा॒यवे॒ऽन्तरि॑क्षाय॒ स्वाहा॒ सुव॒रन्नं॑मादि॒त्याय॑ दि॒वे स्वाहा॒ भूर्भुव॒स्सुव॒रन्नं॑ च॒न्द्रम॑से दि॒ग्भ्यस्स्वाहा॒ नमो॑ दे॒वेभ्य॑स्स्व॒धा पि॒तृभ्यो॒ भूर्भुव॒स्सुव॒रन्न॒मोम्॥ १७॥ ॥ ३॥

((bhūrannȧma̱gnayė pṛ̱thi̱vyai svāhā̱ bhuvo'nnaṃ̇ vā̱yave̱'ntari̍kṣāya̱ svāhā̱ suva̱rannȧmādi̱tyāyȧ di̱ve svāhā̱ bhūrbhuva̱ssuva̱rannaṃ̇ ca̱ndramȧse di̱gbhyassvāhā̱ namȯ de̱vebhyȧssva̱dhā pi̱tṛbhyo̱ bhūrbhuva̱ssuva̱ranna̱mom ॥ 17 ॥ ॥ 3 ॥))

[[10-4-1]]

भूर॒ग्नये॑ पृथि॒व्यै स्वाहा॒ भुवो॑ वा॒यवे॒ऽन्तरि॑क्षाय॒ स्वाहा॒ सुव॑रादि॒त्याय॑ दि॒वे स्वाहा॒ भूर्भुव॒स्सुव॑श्च॒न्द्रम॑से दि॒ग्भ्यस्स्वाहा॒ नमो॑ दे॒वेभ्य॑स्स्व॒धा पि॒तृभ्यो॒ भूर्भुव॒स्सुव॒रग्न॒ ओम्॥ १८॥ ॥ ४॥

((bhūra̱gnayė pṛ̱thi̱vyai svāhā̱ bhuvȯ vā̱yave̱'ntari̍kṣāya̱ svāhā̱ suvȧrādi̱tyāyȧ di̱ve svāhā̱ bhūrbhuva̱ssuvȧśca̱ndramȧse di̱gbhyassvāhā̱ namȯ de̱vebhyȧssva̱dhā pi̱tṛbhyo̱ bhūrbhuva̱ssuva̱ragna̱ om ॥ 18 ॥ ॥ 4 ॥))

[[10-5-1]]

भूर॒ग्नये॑ च पृथि॒व्यै च॑ मह॒ते च॒ स्वाहा॒ भुवो॑ वा॒यवे॑ चा॒न्तरि॑क्षाय च मह॒ते च॒ स्वाहा॒ सुव॑रादि॒त्याय॑ च दि॒वे च॑ मह॒ते च॒ स्वाहा॒ भूर्भुव॒स्सुव॑श्च॒न्द्रम॑से च॒ नक्ष॑त्रेभ्यश्च दि॒ग्भ्यश्च॑ मह॒ते च॒ स्वाहा॒ नमो॑ दे॒वेभ्य॑स्स्व॒धा पि॒तृभ्यो॒ भुर्भुव॒स्सुव॒र्मह॒रोम्॥ १९॥ ॥ ५॥

((bhūra̱gnayė ca pṛ̱thi̱vyai cȧ maha̱te ca̱ svāhā̱ bhuvȯ vā̱yavė cā̱ntari̍kṣāya ca maha̱te ca̱ svāhā̱ suvȧrādi̱tyāyȧ ca di̱ve cȧ maha̱te ca̱ svāhā̱ bhūrbhuva̱ssuvȧśca̱ndramȧse ca̱ nakṣȧtrebhyaśca di̱gbhyaścȧ maha̱te ca̱ svāhā̱ namȯ de̱vebhyȧssva̱dhā pi̱tṛbhyo̱ bhurbhuva̱ssuva̱rmaha̱rom ॥ 19 ॥ ॥ 5 ॥))

[[10-6-1]]

पाहि नो अग्न एन॑से स्वा॒हा।
पाहि नो विश्ववेद॑से स्वा॒हा।

यज्ञं पाहि विभावसो स्वाहा।
सर्वं पाहि शतक्रतो स्वाहा॥ २०॥ ॥ ६॥

((pāhi no agna enase svāhā ।
pāhi no viśvavedase svāhā ।
yajñaṃ pāhi vibhāvaso svāhā ।
sarvaṃ pāhi śatakrato svāhā ॥ 20 ॥ ॥ 6 ॥))

[[10-7-1]]
पाहि नो अग्न एकया।
पाह्युत द्वितीयया।
पाह्यूर्जं तृतीयया।
पाहि गीर्भिश्चतसृभिर्वसो स्वाहा॥ २१॥ ॥ ७॥

((pāhi no agna ekayā ।
pāhyuta dvitīyayā ।
pāhyūrjaṃ tṛtīyayā ।
pāhi gīrbhiścatasṛbhirvaso svāhā ॥ 21 ॥ ॥ 7 ॥))

[[10-8-1]]
यश्छन्दसामृषभो विश्वरूपश्छन्दोभ्यश्छन्दांस्याविवेश।
सताꣳशिक्यः पुरोवाचोपनिषदिन्द्रो ज्येष्ठ इन्द्रियाय ऋषिभ्यो नमो देवेभ्यस्स्वधा पितृभ्यो
भूर्भुवस्सुवश्छन्द ओम्॥ २२॥ ॥ ८॥

((yaśchandasāmṛṣabho viśvarūpaśchandobhyaścandāṃsyāviveśa ।
satāṃśikyaḥ purovācopaniṣadindro jyeṣṭha indriyāya ṛṣibhyo namo
devebhyassvadhā pitṛbhyo bhūrbhuvassuvaśchanda om ॥ 22 ॥ ॥ 8 ॥))

[[10-9-1]]
नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोश्श्रुतं मा च्योढ्वं ममामुष्य ओम्॥
२३॥ ॥ ९॥

((namo brahmaṇe dhāraṇaṃ me astvanirākaraṇaṃ dhārayitā bhūyāsaṃ
karṇayośśrutaṃ mā cyoḍhvaṃ mamāmuṣya om ॥ 23 ॥ ॥ 9 ॥))

[[10-10-1]]
ऋतं तपस्सत्त्यं तपश्श्रुतं तपश्शान्तं तपो दमस्तपश्शमस्तपो दानं तपो यज्ञं तपो
भूर्भुवस्सुवर्ब्रह्मैतदुपास्स्यैतत्तपः॥ २४॥ ॥ १०॥

((ṛtaṃ tapassattyaṃ tapaśśrutaṃ tapaśśāntaṃ tapo damastapaśśamastapo dānaṃ

tapo̱ yajña̱ṃ tapo̱ bhūrbhuva̱ssuva̱rbrahmai̱tadupā̎syai̱tattapa̍ḥ || 24 || || 10 ||))

[[10-11-1]]

यथा̍ वृ॒क्षस्य॑ सं॒पु॑ष्पि॒तस्य दू॒राद्ग॒न्धो वा᳚त्ये॒वं पुण्य॑स्य
क॒र्मणो̍ दू॒राद्ग॒न्धो वा॑ति॒ यथा̍ऽसिधा॒रां क॒र्तेऽव॑हितामव॒क्रामे॒ यद्युवे॒ युवे॒ हवा̍ वि॒ह्वयि॑ष्यामि क॒र्तं
प॑तिष्या॒मीत्ये॒वम॒मृता॑दा॒त्मानं॑ जु॒गुप्से᳚त्॥ २५॥ ॥ ११॥

((yathā̍ vṛ̱kṣasya̍ sa̱mpuṣpi̍tasya dū̱rādga̱ndho vā̎tye̱vaṃ puṇya̍sya
ka̱rmaṇo̍ dū̱rādga̱ndho vā̍ti̱ yathā̍'sidhā̱rāṃ ka̱rte'va̍hitāmava̱krāme̱ yadyuve̱ yuve̱
havā̍ vi̱hvayi̍ṣyāmi ka̱rtaṃ pa̍tiṣya̱mītye̱vama̱mṛta̍dā̱tmāna̍ṃ ju̱gupse̎t || 25 || || 11 ||))

[[10-12-1]]

अ॒णोरणी॑यान्मह॒तो मही॑याना॒त्मा गुहा॑यां॒ निहि॑तोऽस्य ज॒न्तोः।
तम॑क्रतुं पश्यति वीतशो॒को धा॒तुः प्र॒सादा᳚न्महि॒मान॑मीशम्।
स॒प्त प्रा॒णाः प्र॒भव॑न्ति॒ तस्मा᳚त्स॒प्तार्चिष॑स्स॒मिध॑स्स॒प्त जि॒ह्वाः।
स॒प्त इ॒मे लो॒का येषु॒ चर॑न्ति प्रा॒णा गु॒हाश॑यां॒ निहि॑तास्स॒प्तस॑प्त।
अत॑स्समु॒द्रा गि॒रय॑श्च॒ सर्वे॒ऽस्माथ्स्यन्द॑न्ते॒ सिन्ध॑वस्स॒र्व॑रूपाः।
अत॑श्च॒ विश्वा॒ ओष॑धयो॒ रसा᳚च्च॒ येनै॑ष भू॒तस्ति॑ष्ठत्यन्तरा॒त्मा।
ब्र॒ह्मा दे॒वानां᳚ पद॒वीः क॑वी॒नामृषि॒र्विप्रा॑णां महि॒षो मृ॒गाणा᳚म्।
श्ये॒नो गृध्रा॑णा॒ꣳ॒ स्वधि॑ति॒र्वना॑ना॒ꣳ॒ सोम॑ः प॒वित्र॒मत्ये॑ति॒ रेभ॑न्न्।
अ॒जामेकां॒ लोहि॑तशुक्लकृ॒ष्णां ब॒ह्वीं प्र॒जां ज॒नय॑न्ती॒ꣳ॒ सरू॑पाम्।
अ॒जो ह्येको॑ जु॒षमा॑णोऽनु॒शेते॒ जहा᳚त्येनां भु॒क्तभो॑गा॒मजो᳚ऽन्यः॥ २६॥

((a̱ṇoraṇī̍yānmaha̱to mahī̍yānā̱tmā guhā̍yā̱ṃ nihi̍to'sya ja̱ntoḥ |
tama̍kratuṃ paśyati vītaśo̱ko dhā̱tuḥ pra̱sādā̎nmahi̱māna̍mīśam |
sa̱pta prā̱ṇāḥ pra̱bhava̍nti̱ tasmā̎tsaptārciṣa̍ssa̱midha̍ssa̱pta ji̱hvāḥ |
sa̱pta i̱me lo̱kā yeṣu̱ cara̍nti prā̱ṇā gu̱hāśa̍yā̱ṃ nihi̍tāssa̱ptasa̍pta |
ata̍ssamu̱drā gi̱raya̍śca̱ sarve̱'smāthsyanda̍nte̱ sindha̍va̱ssarva̍rūpāḥ |
ata̍śca viśvā̱ oṣa̍dhayo̱ rasā̎cca̱ yenai̍ṣa bhū̱tastiṣṭhatyantarā̱tmā |
bra̱hmā de̱vānā̎ṃ pada̱vīḥ ka̍vī̱nāmṛṣi̱rviprā̍ṇāṃ mahi̱ṣo mṛ̱gāṇā̎m |
śye̱no gṛ̱ddhrā̍ṇā̱ṃ̎ svadhi̍ti̱rvanā̍nā̱ṃ̎ somā̍ḥ pa̱vitra̱matye̍ti̱ rebhā̍nn |
a̱jāmekā̱ṃ lohi̍taśuklakṛ̱ṣṇāṃ ba̱hvīṃ pra̱jāṃ ja̱naya̍ntī̱ṃ̎ sarū̍pām |
a̱jo hyeko̍ ju̱ṣamā̍ṇo'nu̱śete̱ jahā̎tyenāṃ bhu̱ktabho̍gā̱majo̎'nyaḥ || 26 ||))

[[10-12-2]]

ह॒ꣳ॒सश्शु॑चि॒षद्वसु॑रन्तरिक्ष॒सद्धोता॑ वेदि॒षदति॑थिर्दुरोण॒सत्।
नृ॒षद्व॑र॒सदृ॑त॒सद्व्यो॑म॒सद॒ब्जा गो॒जा ऋ॑त॒जा अ॑द्रि॒जा ऋ॒तं बृ॒हत्।
घृ॒तं मि॑मिक्षिरे घृ॒तम॑स्य॒ योनि॑र्घृ॒ते श्रि॒तो घृ॒तमु॑वस्य॒ धाम॑।

अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्।
समुद्रादूर्मिर्मधुमाꣳ उदारदुपाꣳशुना सममृतत्वमानट्।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः।
वयं नाम प्रब्रवामा घृतेनास्मिन्यज्ञे धारयामा नमोभिः।
उप ब्रह्मा शृणवच्छस्यमानं चतुश्शृङ्गोऽवमीद्गौर एतत्।
चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याꣳ आविवेश॥ २७॥

((hamsassucisadvasurantariksasaddhota vedisadatithirduronasat |
nṛṣadvarasadṛtasadvyomasadabjā gojā ṛtajā adrijā ṛtam bṛhat |
ghṛtam mimikṣire ghṛtamasya yonirghṛte śrito ghṛtamuvasya dhāma |
anuṣvadhamāvaha mādayasva svāhākṛtam vṛṣabha vakṣi havyam |
samudrādūrmirmadhumām̐ udāradupām̐śunā samamṛtatvamānaṭ |
ghṛtasya nāma guhyam yadasti jihvā devānāmamṛtasya nābhiḥ |
vayam nāma prabravāmā ghṛtenāsminyajñe dhārayāmā namobhiḥ |
upa brahmā śṛṇavacchasyamānam catuśśṛṅgo'vamīdgaura etat |
catvāri śṛṅgā trayo asya pādā dve śīrṣe sapta hastāso asya |
tridhā baddho vṛṣabho roravīti maho devo martyām̐ āviveśa || 27 ||))

[[10-12-3]]
त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन्न्।
इन्द्र एकꣳ सूर्य एकं जजान वेनादेकꣴ स्वधया निष्टतक्षुः।
यो देवानां प्रथमं पुरस्ताद्विश्वाधियो रुद्रो महर्षिः।
हिरण्यगर्भं पश्यत जायमानꣳ स नो देवश्शुभया स्मृत्यास्संयुनक्तु।
यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्।
न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः।
परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति।
वेदान्तविज्ञानसुनिश्चितार्थास्संन्यासयोगाद्यतयश्शुद्धसत्त्वाः।
ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे।
दह्रं विपापं परमेश्मभूतं यत्पुण्डरीकं पुरमध्यसꣴस्थम्।
तत्रापि दह्रं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्।
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः॥ २८॥

अजोऽन्य आविवेश सर्वे चत्वारि च॥ १२॥

((tridhā hitam paṇibhirguhyamānam gavi devāso ghṛtamanvavindann |
indra ekam̐ sūrya ekam̐ jajāna venādekam̐ svadhayā niṣṭatakṣuḥ |
yo devānām̐ prathamam purastādviśvādhiyo rudro maharṣiḥ |
hiraṇyagarbham paśyata jāyamānam̐ sa no devaśśubhayā smṛtyāssamyunaktu |
yasmātparam nāparamasti kiṃcidyasmānnāṇiyo na jyāyo'sti kaścit |
vṛkṣa iva stabdho divi tiṣṭhatyekastenedam pūrṇam puruṣeṇa sarvam |
na karmaṇā na prajayā dhanena tyāgenaike amṛtatvamānaśuḥ |
pareṇa nākam nihitam guhāyām vibhrājadetadyatayo viśanti |
vedāntavijñānasuniścitārthāssamnyāsayogādyatayaśśuddhasattvāḥ |
te brahmaloke tu parāntakāle parāmṛtātparimucyanti sarve |
daharam vipāpam parameśmabhūtam yatpuṇḍarīkam puramadhyasam̐stham |
tatrāpi daharam gaganam̐ viśokastasminyadantastadupāsitavyam |
yo vedādau svaraḥ prokto vedānte ca pratiṣṭhitaḥ |
tasya prakṛtilīnasya yaḥ parassa maheśvaraḥ || 28 ||
ajo'nya āviveśa sarve catvāri ca || 12 ||))

[[10-13-1]]

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम्।
विश्वं नारायणं देवमक्षरं परमं पदम्।
विश्वतः परमन्नित्यं विश्वं नारायणꣳ हरिम्।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति।
पतिं विश्वस्यात्मेश्वरꣳ शाश्वतꣳ शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्।
नारायणः परो ज्योतिरात्मा नारयणः परः।
नारायणः परं ब्रह्मतत्त्वं नारायणः परः।
नारायणः परो ध्याता ध्यानं नारायणः परः।
यच्च किंचिज्जगथ्सर्वं दृश्यते श्रूयतेऽपि वा॥ २९॥

((sahasraśirṣam devam viśvākṣam̐ viśvaśam̐bhuvam |
viśvam̐ nārāyaṇam devamakṣaram̐ paramam padam |
viśvataḥ paramannityam viśvam nārāyaṇam̐ harim |
viśvamevedam puruṣastadviśvamupajīvati |
patim viśvasyātmeśvaram̐ śāśvatam̐ śivamacyutam |
nārāyaṇam mahājñeyam viśvātmānam parāyaṇam |
nārāyaṇaḥ paro jyotirātmā nārayaṇaḥ paraḥ |
nārāyaṇaḥ param brahmatattvam nārāyaṇaḥ paraḥ |
nārāyaṇaḥ paro dhyātā dhyānam nārāyaṇaḥ paraḥ |
yacca kiṃcijjagathsarvam dṛśyate śrūyate'pi vā || 29 ||))

[[10-13-2]]

अन्तर्बहिश्च तथ्सर्वं व्याप्य नारायणस्स्थितः ।
अनन्तमव्ययं कविꣳ समुद्रेऽन्तं विश्वशम्भुवम् ।
पद्मकोशप्रतीकाशꣳ हृदयं चाप्यधोमुखम् ।
अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति ।
ज्वालमालाकुलं भाती विश्वस्यायतनं महत् ।
सन्ततꣳ सिलाभिस्तु लम्बत्याकोशसन्निभम् ।
तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिँन्थ्सर्वं प्रतिष्ठितम् ।
तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः ।
सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः ।
तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तता ।
सन्तापयति स्वं देहमापादतलमस्तगः ।
तस्य मध्ये वह्निशिखा अणीयोँर्ध्वा व्यवस्थितः ।
नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीता भाँस्वत्यणूपमा ।
तस्याँश्शिखाया मध्ये परमाँत्मा व्यवस्थितः ।
स ब्रह्म स शिवस्स हरिस्सेन्द्रस्सोऽक्षरः परमस्स्वराट् ॥ ३० ॥
अपि वा सन्तता षट्च ॥ १३ ॥

((antarbahiśca tathsarvaṃ vyāpya nārāyaṇassthitaḥ |
anantamavyayaṃ kaviṁ samudre'ntaṃ viśvaśambhuvam |
padmakośapratīkāśaṁ hṛdayaṃ cāpyadhomukham |
adho niṣṭyā vitastyānte nābhyāmupari tiṣṭhati |
jvālamālākulaṃ bhātī viśvasyāyatanaṃ mahat |
santataṁ silābhistu lambatyākośasannibham |
tasyānte suṣiraṁ sūkṣmaṃ tasminthsarvaṃ pratiṣṭhitam |
tasya madhye mahānagnirviśvārcirviśvatomukhaḥ |
so'grabhugvibhajantiṣṭhannāhāramajaraḥ kaviḥ |
tiryagūrdhvamadhaśśāyī raśmayastasya santatā |
santāpayati svaṃ dehamāpādatalamastagaḥ |
tasya madhye vahniśikhā aṇīyōrdhvā vyavasthitaḥ |
nīlatoyadamadhyasthādvidyullekheva bhāsvarā |
nīvāraśūkavattanvī pītā bhāsvatyaṇūpamā |
tasyāśśikhāyā madhye paramātmā vyavasthitaḥ |
sa brahma sa śivassa harissendrasso'kṣaraḥ paramassvarāṭ || 30 ||
api vā santatā ṣaṭca || 13 ||))

[[10-14-1]]

आदि॒त्यो वा ए॒ष ए॒तन्म॒ण्डलं॒ तप॑ति॒ तत्र॒ ता ऋच॒स्तदृ॒चा म॑ण्डल॒ꣳ॑ स ऋ॒चां लो॒को॑ऽथ॒ य ए॒ष ए॒तस्मि॑न्म॒ण्डले॒ऽर्चिर्दी॒प्यते॒ तानि॒ सामा॑नि॒ स सा॒म्नां लो॒को॑ऽथ॒ य ए॒ष ए॒तस्मि॑न्म॒ण्डले॒ऽर्चिषि॒ पुरु॑ष॒स्तानि॒ यजूꣳ॑षि॒ स यजु॑षा मण्डल॒ꣳ॑ स यजु॑षां लो॒कस्सै॒षा त्र॒य्येव॑ वि॒द्या तप॑ति॒ य ए॒षो॑ऽन्तरा॑दि॒त्ये हि॑र॒ण्मय॒ः पुरु॑षः॥ ३१॥ ॥ १४॥

((ā̱di̱tyo vā e̱ṣa e̱tanma̱ṇḍala̱ṃ tapa̍ti̱ tatra̱ tā ṛca̱stadṛ̱cā ma̍ṇḍala̱ꣳ̍ sa ṛ̱cāṃ lo̱ko'tha̱ ya e̱ṣa e̱tasmi̍nma̱ṇḍale̱'rcirdī̱pyate̱ tāni̱ sāmā̍ni̱ sa sā̱mnāṃ lo̱ko'tha̱ ya e̱ṣa e̱tasmi̍nma̱ṇḍale̱'rciṣi̱ puru̍ṣa̱stāni̱ yajūꣳ̍ṣi̱ sa yaju̍ṣā maṇḍala̱ꣳ̍ sa yaju̍ṣāṃ lo̱kassai̱ṣā tra̱yyeva̍ vi̱dyā ta̍pati̱ ya e̱ṣo̍'ntarā̍di̱tye hi̍ra̱ṇmaya̱ḥ puru̍ṣaḥ || 31 || || 14 ||))

[[10-15-1]]

आ॒दि॒त्यो वै तेज॒ ओजो॒ बलं॒ यश॒श्चक्षु॒श्श्रोत्र॑मा॒त्मा मनो॑ म॒न्युर्मनु॑र्मृ॒त्युस्स॒त्यो मि॒त्रो वा॒युरा॑का॒शः प्रा॒णो लो॑कपा॒लः कः किं कं तथ्स॒त्यमन्न॑मममृतो॑ जी॒वो विश्वः॑ कत॒मस्स्व॑यं॒भु ब्रह्मै॒तदमृ॑त ए॒ष पुरु॑ष ए॒ष भू॒ताना॒मधि॑पति॒र्ब्रह्म॑ण॒स्सायु॑ज्य॒ꣳ॑ सलो॒कता॑माप्नोत्ये॒तासा॑मे॒व दे॒वता॑ना॒ꣳ॒ सायु॑ज्यꣳ॑ सा॒र्ष्टिता॑ꣳ समानलो॒कता॑माप्नोति॒ य ए॒वं वे॒दे॑त्युपनि॒षत्॥ ३२॥ ॥ १५॥

((ā̱di̱tyo vai teja̱ ojo̱ bala̱ṃ yaśa̱ścakṣu̱śśrotra̍mā̱tmā mano̍ ma̱nyurmanu̍rmṛ̱tyussa̱tyo mi̱tro vā̱yurā̍kā̱śaḥ prā̱ṇo lo̍kapā̱laḥ kaḥ kiṃ kaṃ tathsa̱tyamanna̍ma̱mṛto̍ jī̱vo viśva̍ḥ kata̱massva̍yaṃ̱bhu brahmai̱tadamṛ̍ta e̱ṣa puru̍ṣa e̱ṣa bhū̱tānā̱madhi̍pati̱rbrahma̍ṇa̱ssāyu̍jya̱ꣳ̍ salo̱katā̍māpnotye̱tāsā̍me̱va de̱vatā̍nā̱ꣳ̱ sāyu̍jya̱ꣳ̍ sā̱rṣṭitā̍ꣳ samānalo̱katā̍māpnoti̱ ya e̱vaṃ vede̍tyupa̱niṣat || 32 || || 15 ||))

[[10-16-1]]

निध॑नपतये॒ नमः।

निध॑नपतान्तिकाय॒ नमः।

ऊर्ध्वा॑य॒ नमः।

ऊर्ध्वलिङ्गा॑य॒ नमः।

हि॒रण्याय॒ नमः।

हि॒रण्यलिङ्गा॑य॒ नमः।

सुवर्णा॑य॒ नमः।

सुवर्णलिङ्गा॑य॒ नमः।

दि॒व्याय॒ नमः।

दि॒व्यलिङ्गा॑य॒ नमः॥ ३३॥

((nidha̍napataye̱ namaḥ |
nidha̍napatāntikāya̱ namaḥ |

ūrdhvāya̱ namaḥ |
ūrdhvaliṅgāya̱ namaḥ |
hiraṇyāya̱ namaḥ |
hiraṇyaliṅgāya̱ namaḥ |
suvarṇāya̱ namaḥ |
suvarṇaliṅgāya̱ namaḥ |
divyāya̱ namaḥ |
divyaliṅgāya̱ namaḥ || 33 ||))

[[10-16-2]]

भवाय॒ नमः।

भवलिङ्गाय॒ नमः।

शर्वाय॒ नमः।

शर्वलिङ्गाय॒ नमः।

शिवाय॒ नमः।

शिवलिङ्गाय॒ नमः।

ज्वलाय॒ नमः।

ज्वललिङ्गाय॒ नमः।

आत्माय॒ नमः।

आत्मलिङ्गाय॒ नमः।

परमाय॒ नमः।

परमलिङ्गाय॒ नमः।

एतथ्सोमस्य॑ सूर्य॒स्य॒ सर्वलिङ्गꣳ स्थाप॒य॒ति॒ पाणिमन्त्रं॑ प॒वि॒त्रम्॥ ३४॥ ॥ १६॥

((bhavāya̱ namaḥ |
bhavaliṅgāya̱ namaḥ |
śarvāya̱ namaḥ |
śarvaliṅgāya̱ namaḥ |
śivāya̱ namaḥ |
śivaliṅgāya̱ namaḥ |
jvalāya̱ namaḥ |
jvalaliṅgāya̱ namaḥ |
ātmāya̱ namaḥ |
ātmaliṅgāya̱ namaḥ |
paramāya̱ namaḥ |
paramaliṅgāya̱ namaḥ |
etathsomasya̍ sūrya̱sya̱ sarvaliṅga꣫m̐ sthāpa̱ya̱ti̱ pāṇimantraṁ pavi̱tram || 34 || || 16 ||))

[[10-17-1]]

स॒द्योजा॒तं प्र॑पद्या॒मि स॒द्योजा॒ताय॒ वै नमो॒ नमः॑ ।
भ॒वेभ॑वे॒ नाति॑भवे भवस्व॒ माम् ।
भ॒वोद्भ॑वाय॒ नमः॑ ॥ ३५॥ ॥ १७॥

((s̱adyojā̱tam pra̍padyā̱mi̱ s̱adyojā̱tāya̱ vai namo̱ nama̍ḥ ।
bha̱vebha̍ve̱ nāti̍bhave bhavasva̱ mām ।
bha̱vodbha̍vāya̱ nama̍ḥ ॥ 35 ॥ ॥ 17 ॥))

[[10-18-1]]
वा॒म॒दे॒वाय॒ नमो᳚ ज्ये॒ष्ठाय॒ नम॑श्श्रे॒ष्ठाय॒ नमो॑ रु॒द्राय॒ नम॒ः काला॑य॒ नम॒ः कल॑विकरणाय॒ नमो॒ बल॑विकरणाय॒ नमो॒ बला॑य॒ नमो॒ बल॑प्रमथनाय॒ नम॒स्सर्व॑भूतदमनाय॒ नमो॑ म॒नोन्म॑नाय॒ नमः॑ ॥ ३६॥ ॥ १८॥

((vā̱ma̱de̱vāya̱ namo̎ jye̱ṣṭhāya̱ nama̍śśre̱ṣṭhāya̱ namo̍ ru̱drāya̱ nama̱ḥ kālā̍ya̱ nama̱ḥ kala̍vikaraṇāya̱ namo̱ bala̍vikaraṇāya̱ namo̱ balā̍ya̱ namo̱ bala̍pramathanāya̱ nama̱ssarva̍bhūtadamanāya̱ namo̍ ma̱nonma̍nāya̱ nama̍ḥ ॥ 36 ॥ ॥ 18 ॥))

[[10-19-1]]
अ॒घोरे᳚भ्योऽथ॒ घोरे᳚भ्यो॒ घोर॒घोर॑तरेभ्यः ।
सर्वे᳚भ्यस्सर्व॒ शर्वे᳚भ्यो॒ नम॑स्ते अस्तु रु॒द्ररू॑पेभ्यः ॥ ३७॥ ॥ १९॥

((a̱ghore̎bhyo'tha̱ ghore̎bhyo̱ ghora̱ghora̍tarebhyaḥ ।
sarve̎bhyassarva̱ śarve̎bhyo̱ nama̍ste astu ru̱drarū̍pebhyaḥ ॥ 37 ॥ ॥ 19 ॥))

[[10-20-1]]
तत्पुरु॑षाय वि॒द्महे॑ महादे॒वाय॑ धीमहि ।
तन्नो॑ रुद्रः प्रचो॒दया᳚त् ॥ ३८॥ ॥ २०॥

((tatpuru̍ṣāya vi̱dmahe̍ mahāde̱vāya̍ dhīmahi ।
tanno̍ rudraḥ praco̱dayā̎t ॥ 38 ॥ ॥ 20 ॥))

[[10-21-1]]
ईशानस्सर्व॑विद्या॒नामीश्वरस्सर्व॑भूता॒नां॒ ब्रह्माधि॑पति॒र्ब्रह्म॒णोऽधि॑पति॒र्ब्रह्मा॑ शि॒वो मे॑ अस्तु सदाशि॒वोम् ॥ ३९॥ ॥ २१॥

((īśānassarva̍vidyā̱nāmīśvarassarva̍bhūtā̱nā̱m
brahmādhi̍pati̱rbrahma̱ṇo'dhi̍pati̱rbrahmā̍ śi̱vo me̍ astu sadāśi̱vom ॥ 39 ॥ ॥ 21 ॥))

[[10-22-1]]
नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये॑

नमो नमः॥ ४०॥ ॥ २२॥

((namo hiraṇyabāhave hiraṇyavarṇāya hiraṇyarūpāya hiraṇyapataye'mbikāpataya umāpataye paśupataye namo namaḥ ॥ 40 ॥ ॥ 22 ॥))

[[10-23-1]]
ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः॥ ४१॥ ॥ २३॥

((ṛtaꣳ satyaṃ paraṃ brahma puruṣaṃ kṛṣṇapiṅgalam ।
ūrdhvaretaṃ virūpākṣaṃ viśvarūpāya vai namo namaḥ ॥ 41 ॥ ॥ 23 ॥))

[[10-24-1]]
सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु।
पुरुषो वै रुद्रस्सन्महो नमोनमः।
विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥ ४२॥ ॥ २४॥

((sarvo vai rudrastasmai rudrāya namo astu ।
puruṣo vai rudrassanmaho namonamaḥ ।
viśvaṃ bhūtaṃ bhuvanaṃ citraṃ bahudhā jātaṃ jāyamānaṃ ca yat ।
sarvo hyeṣa rudrastasmai rudrāya namo astu ॥ 42 ॥ ॥ 24 ॥))

[[10-25-1]]
कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे।
वोचेम शंतमꣳ हृदे।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥ ४३॥ ॥ २५॥

((kadrudrāya pracetase mīḍhuṣṭamāya tavyase ।
vocema śaṃtamaꣳ hṛde ।
sarvo hyeṣa rudrastasmai rudrāya namo astu ॥ 43 ॥ ॥ 25 ॥))

[[10-26-1]]
यस्य वैकङ्कत्यग्निहोत्रहवणी भवति प्रत्येवास्याहुतयस्तिष्ठन्त्यथो प्रतिष्ठित्यै॥ ४४॥ ॥ २६॥

((yasya vaikaṅkatyagnihotrahavaṇī bhavati pratyevāsyāhutayastiṣṭhantyatho pratiṣṭhityai ॥ 44 ॥ ॥ 26 ॥))

[[10-27-1]]
कृणुष्व पाज इति पञ्च॥ ४५॥ ॥ २७॥

((kṛ̣ṇu̱ṣva pāja̱ iti̱ pañca̍ || 45 || || 27 ||))

[[10-28-1]]
अदि॑तिर्दे॒वा ग॑न्ध॒र्वा म॑नु॒ष्या᳚ः पि॒तरो॒ऽसु॑रा॒स्तेषा॑ꣳ स॒र्वभू॒ताना᳚ं मा॒ता मे॒दिनी॑ मह॒ता म॒ही सा॑वि॒त्री गा॑य॒त्री जग॑त्यु॒र्वी पृ॒थ्वी ब॑हु॒ला विश्वा॑ भू॒ता क॑त॒मा काया सा स॒त्येत्य॒मृतेति॑ वसि॒ष्ठः॥ ४६॥ ॥ २८॥

((aditirde̱vā ga̍ndha̱rvā ma̍nu̱ṣyā̎ḥ pi̱taro'su̍rā̱steṣā̍m̐ sarva̱bhū̱tānā̎ṃ mā̱tā me̱dinī̍ maha̱tā ma̱hī sā̍vi̱trī gā̍ya̱trī jaga̍tyu̱rvī pṛ̱thvī ba̍hu̱lā viśva̍ bhū̱tā ka̍ta̱mā kāyā sā sa̱tyetya̱mṛteti̍ vasi̱ṣṭhaḥ || 46 || || 28 ||))

[[10-29-1]]
आपो॒ वा इ॒दꣳ सर्वं॒ विश्वा॑ भू॒तान्याप॑ः प्रा॒णा वा आप॑ः प॒शव॒ आपोऽन्न॒मापोऽमृ॑त॒माप॑ः स॒म्राडापो॑ वि॒राडाप॑ः स्व॒राडाप॒श्छन्दा॒ꣳस्यापो॒ ज्योती॒ꣳष्यापो॒ यजू॒ꣳष्याप॑ः स॒त्यमाप॒ः सर्वा॑ दे॒वता॒ आपो॒ भूर्भुव॒ः सुव॒राप॒ ओम्॥ ४७॥ ॥ २९॥

((āpo̱ vā i̱dam̐ sarva̱ṃ viśva̍ bhū̱tānyāpa̍ḥ prā̱ṇā vā āpa̍ḥ pa̱śava̱ āpo'nna̱māpo'mṛ̍ta̱māpa̍ḥ sa̱mrāḍāpo̍ vi̱rāḍāpa̍ḥ sva̱rāḍāpa̱śchandā̱m̐syāpo̱ jyotī̱m̐ṣyāpo̱ yajū̱m̐ṣyāpa̍ḥ sa̱tyamāpa̱ḥ sarva̍ de̱vatā̱ āpo̱ bhūrbhuva̱ḥ suva̱rāpa̱ om || 47 || || 29 ||))

[[10-30-1]]
आप॑ः पुनन्तु पृथि॒वीं पृ॑थि॒वी पू॒ता पु॑नातु॒ माम्।
पु॒नन्तु॒ ब्रह्म॑ण॒स्पति॒र्ब्रह्म॑ पू॒ता पु॑नातु॒ माम्॥
यदुच्छि॑ष्ट॒मभो᳚ज्यं॒ यद्वा॑ दु॒श्चरि॑तं॒ मम॑।
सर्वं॑ पुनन्तु॒ मामापो॑ऽस॒तां च॑ प्रति॒ग्रह॒ꣳ स्वाहा᳚॥ ४८॥ ॥ ३०॥

((āpa̍ḥ punantu pṛthi̱vīṃ pṛ̍thi̱vī pū̱tā pu̍nātu̱ mām |
pu̱nantu̱ brahma̍ṇa̱spati̱rbrahma̍ pū̱tā pu̍nātu̱ mām ||
yaducchi̍ṣṭa̱mabho̎jya̱ṃ yadva̍ du̱ścari̍ta̱ṃ mama̍ |
sarva̍ṃ punantu̱ māmāpo̍'sa̱tāṃ ca̍ prati̱graha̱m̐ svāhā̎ || 48 || || 30 ||))

[[10-31-1]]
अ॒ग्निश्च मा म॒न्युश्च म॒न्युप॑तयश्च म॒न्यु॑कृ॒तेभ्यः।
पा॒पेभ्यो॑ र॒क्षन्ताम्।
यद॒ह्ना पाप॑मका॒र्षम्।
मन॑सा वा॒चा॑ ह॒स्ताभ्याम्।

पद्भ्यामुदरे॑ण शि॒श्ना।
अह॒स्तद॑वलु॒म्पतु।
यत्किंच॑ दुरि॒तं मयि॑।
इदमहं माममृ॑तयो॒नौ।
सत्ये ज्योतिषि जुहो॑मि स्वा॒हा॥ ४९॥ ॥ ३१॥

((agniśca mā manyuśca manyupatayaśca manyu̍kṛte̱bhyaḥ |
pāpebhyo̍ rakṣa̱ntām |
yadahnā pāpa̍makā̱rṣam |
manasā vāca̍ hastā̱bhyām |
padbhyāmudare̍ṇa śi̱śnā |
aha̱stada̍valu̱mpatu |
yatkiṃca̍ duri̱taṃ mayi̍ |
idamahaṃ māmamṛ̍tayo̱nau |
satye jyotiṣi juho̍mi svā̱hā || 49 || || 31 ||))

[[10-32-1]]
सूर्य॑श्च मा मन्युश्च मन्युपतयश्च मन्यु॑कृते॒भ्यः।
पापे॑भ्यो॑ रक्ष॒न्ताम्।
यद्रात्रिया पाप॑मका॒र्षम्।
मनसा वाचा॑ हस्ता॒भ्याम्।
पद्भ्यामुदरे॑ण शि॒श्ना।
रात्रि॒स्तद॑वलु॒म्पतु।
यत्किंच॑ दुरि॒तं मयि॑।
इदमहं माममृ॑तयो॒नौ।
सूर्ये॑ ज्योतिषि जुहो॑मि स्वा॒हा॥ ५०॥ ॥ ३२॥

((sūryaśca mā manyuśca manyupatayaśca manyu̍kṛte̱bhyaḥ |
pāpebhyo̍ rakṣa̱ntām |
yadrātriyā pāpa̍makā̱rṣam |
manasā vāca̍ hastā̱bhyām |
padbhyāmudare̍ṇa śi̱śnā |
rātri̱stada̍valu̱mpatu |
yatkiṃca̍ duri̱taṃ mayi̍ |
idamahaṃ māmamṛ̍tayo̱nau |
sūrye jyotiṣi juho̍mi svā̱hā || 50 || || 32 ||))

[[10-33-1]]

ओमित्येकाक्ष॑रं ब्र॒ह्म।
अग्निर्दे॑वता ब्रह्म॑ इत्या॒र्षम्।
गायत्रं छन्दं॑ परमात्मं॑ सरू॒पम्।
सायुज्यं वि॑नियो॒गम्॥ ५१ ॥ ॥ ३३ ॥

((omityekākṣa̍raṃ bra̱hma ।
agnirdevatā brahma̍ ityā̱rṣam ।
gāyatraṃ chandaṃ paramātma̍ṃ sarū̱pam ।
sāyujyaṃ vi̍niyo̱gam ॥ 51 ॥ ॥ 33 ॥))

[[10-34-1]]
आया॑तु॒ वर॑दा दे॒वी॒ अ॒क्षरं॑ ब्रह्म॒ सम्मि॑तम्।
गा॒य॒त्रीं॑ छन्द॑सां मा॒तेदं ब्र॑ह्म जु॒षस्व॑ मे।
यदह्ना॑त्कुरु॑ते पा॒पं॒ तदह्ना॑त्प्रति॒मुच्य॑ते।
यद्रात्रिया॑त्कुरु॑ते पा॒पं॒ तद्रात्रिया॑त्प्रति॒मुच्य॑ते।
सर्व॑व॒र्णे म॑हादे॒वि॒ स॒न्ध्यावि॑द्ये स॒रस्व॑ति॥ ५२ ॥ ॥ ३४ ॥

((āyā̍tu̱ vara̍dā de̱vī̱ a̱kṣara̍ṃ brahma̱ sammi̍tam ।
gā̱ya̱trī̍ṃ chanda̍sāṃ mā̱tedaṃ bra̍hma ju̱ṣasva̍ me ।
yadahnā̍tkuru̍te pā̱pa̱ṃ tadahnā̍tprati̱mucya̍te ।
yadrātriyā̍tkuru̍te pā̱pa̱ṃ tadrātriyā̍tprati̱mucya̍te ।
sarva̍va̱rṇe ma̍hāde̱vi̱ sa̱ndhyāvi̍dye sa̱rasva̍ti ॥ 52 ॥ ॥ 34 ॥))

[[10-35-1]]
ओजो॑ऽसि॒ सहो॑ऽसि॒ बल॑मसि॒ भ्राजो॑ऽसि दे॒वाना॒ं धाम॒नामा॑ऽसि॒ विश्व॑मसि वि॒श्वायु॒स्सर्व॑मसि स॒र्वायुरभिभूरों गायत्रीमावा॑हया॒मि॒ सवित्रीमावा॑हया॒मि॒ सरस्वतीमावा॑हया॒मि॒ छन्दर्षीना॑वा॑हया॒मि॒ श्रियमावा॑हया॒मि॒ गायत्रिया गायत्रीच्छन्दो विश्वामित्र ऋषिस्सविता देवताऽग्निर्मुखं ब्रह्मा शिरो विष्णुर्हृदयꣳरुद्रश्शिखा पृथिवी योनिः प्राणापानव्यानोदानसमाना सप्राणा श्वेतवर्णा सांख्यायनसगोत्रा गायत्री चतुर्विꣳशत्यक्षरा त्रिपदा॑ षटकु॒क्षि॒ः पञ्चशीर्षोपनयने वि॑नियो॒ग॒ः।
ओं भूः।
ओं भुवः।
ओꣳ सुवः।
ओं महः।
ओं जनः।
ओं तपः॥

ओं॑ स॒त्यम्।
ओं तथ्स॑वि॒तुर्वरे॓ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि।
धियो॒ यो नः॑ प्रचो॒दया॓त्।
ओमापो॒ ज्योती॒ रसो॒ऽमृतं॒ ब्रह्म॒ भूर्भुव॒स्सुव॒रोम्॥ ५३॥ ॥ ३५॥

((ojo̍'si̱ saho̍'si̱ bala̍masi̱ bhrājo̍'si de̱vānā̱m dhāma̱nāmā̍'si̱ viśva̍masi
vi̱śvāyu̱ssarva̍masi sa̱rvāyurabhibhūroṃ gāyatrīmāvā̍hayā̱mi̱ savitrīmāvā̍hayā̱mi̱
sarasvatīmāvā̍hayā̱mi̱ chandarṣīnāvā̍hayā̱mi̱ śriyamāvā̍hayā̱mi̱ gāyatriyā
gāyatrīcchando viśvāmitra ṛṣissavitā devatā'gnirmukhaṃ brahmā śiro
viṣṇurhṛdayam̐rudraśśikhā pṛthivī yoniḥ prāṇāpānavyānodānasamānā saprāṇā
śvetavarṇā sāṃkhyāyanasagotrā gāyatrī caturvim̐śatyakṣarā tripadā̍ ṣa̱ṭakuḵṣi̱ḥ
pañcaśīrṣopanayane vi̍niyo̱ga̱ḥ |
oṃ bhūḥ |
oṃ bhuvaḥ |
om̐ suvaḥ |
oṃ mahaḥ |
oṃ janaḥ |
oṃ tapaḥ ||
om̐ sa̱tyam |
oṃ tathsa̍vi̱turvarē̎ṇya̱ṃ bhargo̍ de̱vasya̍ dhīmahi |
dhiyo̱ yo na̍ḥ pracodayā̎t |
omāpo̱ jyotī̱ raso̱'mṛta̱ṃ brahma̱ bhūrbhuva̱ssuva̱rom || 53 || || 35 ||))

[[10-36-1]]
उ॒त्तमे॑ शिख॑रे जा॒ते॒ भू॒म्यां प॑र्वत॒मूर्ध॑नि।
ब्रा॒ह्मणे॓भ्योऽभ्य॑नुज्ञा॒ता॒ ग॒च्छ दे॑वि य॒थासु॑खम्।
स्तुतो मया वरदा वे॑दमा॒ता॒ प्रचोदयन्ती पवने॓ द्विजा॒ता।
आयुः पृथिव्यां द्रविणं ब्र॑ह्मव॒र्च॒सं॒ मह्यं दत्त्वा प्रजातुं ब्र॑ह्मलो॒कम्॥ ५४॥ ॥ ३६॥

((u̱ttame̍ śikha̍re jā̱te̱ bhū̱myā̱ṃ pa̍rvata̱mūrdha̍ni |
brā̱hmaṇē̎bhyo'bhya̍nujñā̱tā̱ ga̱ccha de̍vi ya̱thāsu̍kham |
stuto mayā varadā ve̍damā̱tā̱ pracodayantī pavanē̎ dvijā̱tā |
āyuḥ pṛ̱thivyāṃ draviṇaṃ bra̍hmava̱rca̱sa̱ṃ mahyaṃ dattvā prajātuṃ bra̍hmalo̱kam
|| 54 || || 36 ||))

[[10-37-1]]
घृ॒णि॒स्सूर्य॑ आदि॒त्यो न प्रभा॑ वा॒त्यक्ष॑रम्।
मधु॑ क्षरन्ति॒ तद्र॑सम्।
स॒त्यं वै तद्र॒समापो॒ ज्योती॒ रसो॒ऽमृतं॒ ब्रह्म॒ भूर्भुव॒स्सुव॒रोम्॥ ५५॥ ॥ ३७॥

((ghṛ̱ṇi̱ssūrya̍ ādi̱tyo na prabhā̍ vā̱tyakṣa̍ram |

madhu̍ kṣaranti̱ tadra̍sam ।
sa̱tyaṃ̱ vai tadrasa̱māpo̱ jyotī̱ raso̱'mṛtaṃ̱ brahma̱ bhūrbhuva̱ssuva̱rom ॥ 55 ॥ ॥ 37 ॥))

[[10-38-1]]

ब्रह्म॑मेतु॒ माम्।
मधु॑मेतु॒ माम्।
ब्रह्म॑मे॒व मधु॑मेतु॒ माम्।
यास्ते॑ सोम प्र॒जा व॒थ्सोऽभि॒ सो अ॒हम्।
दुष्ष्व॑प्न॒हन्दु॑रुष्षह।
यास्ते॑ सोम प्रा॒णाꣳस्ताञ्जु॑होमि।
त्रिसु॑पर्ण॒मया॑चितं ब्राह्म॒णाय॑ दद्यात्।
ब्र॒ह्म॒ह॒त्यां वा ए॒ते घ्नन्ति।
ये ब्रा॒॑ह्म॒णास्त्रिसु॑पर्णं॒ पठ॑न्ति।
ते सोमं॒ प्राप्नु॑वन्ति।
आ॒स॒ह॒स्रात्प॒ङ्क्तिं पुन॑न्ति।
ओम्॥ ५६॥ ॥ ३८॥

((brahma̍metu̱ mām ।
madhu̍metu̱ mām ।
brahma̍me̱va madhu̍metu̱ mām ।
yāste̍ soma pra̱jā va̱thso'bhi̱ so a̱ham ।
duṣṣva̍pna̱handu̍ruṣṣaha ।
yāste̍ soma prā̱ṇām̐stāñju̍homi ।
trisu̍parṇa̱maya̍citaṃ brāhma̱ṇāya̍ dadyāt ।
bra̱hma̱ha̱tyāṃ vā e̱te ghna̍nti ।
ye brā̎hma̱ṇāstrisu̍parṇaṃ̱ paṭha̍nti ।
te somaṃ̱ prāpnu̍vanti ।
ā̱sa̱ha̱srātpa̱ṅktiṃ puna̍nti ।
om ॥ 56 ॥ ॥ 38 ॥))

[[10-39-1]]

ब्रह्म॑ मे॒धयाॎ।
मधु॑ मे॒धयाॎ।
ब्रह्म॑मे॒व मधु॑ मे॒धयाॎ।
अ॒द्या नो॑ देव सवितः प्र॒जाव॑त्सावी॒स्सौभ॑गम्।
परा॑ दुष्ष्वप्नि॑यꣳ सुव।
विश्वा॑नि देव सवितर्दु॒रि॒तानि॒ परा॑सुव।

यद्भद्रं तन्म आसुव।
मधु वाता ऋतायते मधुं क्षरन्ति सिन्धवः।
माध्वींर्नस्सन्त्वोषधीः।
मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः।
मधु द्यौरस्तु नः पिता।
मधुं मान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः।
माध्वीर्गावो भवन्तु नः।
य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्।
भ्रूणहत्यां वा एते घ्नन्ति।
ये ब्राह्मणास्त्रिसुपर्णं पठन्ति।
ते सोमं प्राप्नुवन्ति।
आसहस्रात्पङ्क्तिं पुनन्ति।
ओम्॥ ५७॥ ॥ ३९॥

((brahmȧ me̱dhaya̋ |
madhu̇ me̱dhaya̋ |
brahmȧme̱va madhu̇ me̱dhaya̋ |
a̱dyā no̍ deva savitaḥ pra̱jāva̍tsāvī̱ssaubha̍gam |
parȧ du̱ṣṣvapni̍yam̐ suva |
viśva̍ni deva savitarduri̱tāni̱ parȧsuva |
yadbha̱dra̱m tanma̱ āsu̍va |
madhu̱ vātȧ ṛ̱tāya̱te madhu̇ kṣaranti̱ sindha̍vaḥ |
mādhvi̋rnassa̱ntvoṣa̍dhīḥ |
madhu̱ nakta̍mu̱toṣasi̱ madhu̇ma̱tpārthi̍va̱m̐ raja̍ḥ |
madhu̱ dyaurȧstu naḥ pi̱tā |
madhu̇ mānno̱ vana̱spati̱rmadhu̇mām̐ astu̱ sūrya̍ḥ |
mādhvī̱rgāvo̍ bhavantu naḥ |
ya i̱mam trisu̍parṇa̱maya̍citam brāhma̱ṇāya̍ dadyāt |
bhrū̱ṇa̱ha̱tyām vā e̱te ghna̍nti |
ye bra̋hma̱ṇāstrisu̍parṇa̱m paṭha̍nti |
te soma̱m prāpnu̍vanti |
ā̱sa̱ha̱srātpa̱ṅktim punȧnti |
om || 57 || || 39 ||))

[[10-40-1]]
ब्रह्मं मेधवाँ।
मधुं मेधवाँ।
ब्रह्ममेव मधुं मेधवाँ।

ब्रह्मा दे॒वानां᳚ पद॒वीः क॒वीना॒मृषि॒र्विप्रा॑णां महि॒षो मृ॒गाणा᳚म्।
श्ये॒नो गृध्रा॑णा॒ꣳ॒ स्वधि॑ति॒र्वना॑ना॒ꣳ॒ सोम॑ः प॒वित्र॒मत्ये॑ति॒ रेभ॑न्न्।
ह॒ꣳ॒सश्शु॑चि॒षद्व॑सुरन्तरिक्ष॒सद्धोता॑ वेदि॒षदति॑थिर्दुरोण॒सत्।
नृ॒षद्व॑र॒सदृ॑त॒सद्व्यो॑म॒सद॒ब्जा गो॒जा ऋ॑त॒जा अ॑द्रि॒जा ऋ॒तं बृ॒हत्।
ऋ॒चे त्वा॑ रु॒चे त्वा॒ समित्स्र॑वन्ति स॒रितो॒ न धेना᳚ः।
अ॒न्तर्हृ॒दा मन॑सा पू॒यमा॑नाः।
घृ॒तस्य॒ धारा॑ अ॒भिचा॑कशीमि।
हि॒र॒ण्ययो॑ वेत॒सो मद्ध्य॑ आसाम्।
तस्मि᳚न्थ्सुप॒र्णो म॑धु॒कृत्कु॑ला॒यी भज॑न्नास्ते॒ मधु॑ दे॒वता᳚भ्यः।
तस्या॑सते॒ हर॑यस्स॒प्त तीरे᳚ स्व॒धां दुहा॑ना अ॒मृत॑स्य॒ धारा᳚म्।
य इ॒दं त्रिसु॑पर्ण॒मया॑चितं ब्राह्म॒णाय॑ द॒द्यात्।
वी॒र॒ह॒त्यां वा ए॒ते घ्न॑न्ति।
ये ब्रा᳚ह्म॒णास्त्रिसु॑पर्णं॒ पठ॑न्ति।
ते सोमं॒ प्राप्नु॑वन्ति।
आ॒स॒ह॒स्रात्प॒ङ्क्तिं॒ पुन॑न्ति।
ओम्॥ ५८॥ ॥ ४०॥

((brahma̍ me̱dhavā̎ ।
madhu̍ me̱dhavā̎ ।
brahma̍me̱va madhu̍ me̱dhavā̎ ।
bra̱hmā de̱vānā̎ṃ pada̱vīḥ ka̱vī̱nāmṛṣi̱rvipra̍ṇāṃ mahi̱ṣo mṛ̱gāṇā̎m ।
śye̱no gṛddhra̍ṇā̱ṃ̱ svadhi̍ti̱rvana̍nā̱ṃ̱ soma̍ḥ pa̱vitra̱matye̍ti̱ rebha̍nn ।
ha̱ṃ̱saśśu̍ci̱ṣadvasu̍rantarikṣa̱saddhotā̍ vedi̱ṣadati̍thirduroṇa̱sat ।
nṛ̱ṣadva̍ra̱sadṛ̍ta̱sadvyo̍ma̱sada̱bjā go̱jā ṛ̍ta̱jā a̍drijā ṛ̱taṃ bṛ̱hat ।
ṛ̱ce tvā̍ ru̱ce tvā̱ samitsra̍vanti sa̱rito̱ na dhenā̎ḥ ।
a̱ntarhṛ̱dā mana̍sā pū̱yamā̍nāḥ ।
ghṛ̱tasya̱ dhārā̍ a̱bhicā̍kaśīmi ।
hi̱ra̱ṇyayo̍ veta̱so maddhya̍ āsām ।
tasmi̎nthsupa̱rṇo ma̍dhu̱kṛtku̍lā̱yī bhaja̍nnāste̱ madhu̍ de̱vatā̎bhyaḥ ।
tasyā̍sate̱ hara̍yassapta tīre̎ sva̱dhāṃ duhā̍nā a̱mṛta̍sya̱ dhārā̎m ।
ya i̱daṃ trisu̍parṇa̱maya̍citaṃ brāhma̱ṇāya̍ dadyāt ।
vī̱ra̱ha̱tyāṃ vā e̱te ghna̍nti ।
ye brā̎hma̱ṇāstrisu̍parṇa̱ṃ paṭha̍nti ।
te soma̱ṃ prāpnu̍vanti ।
ā̱sa̱ha̱srātpa̱ṅktiṃ̱ puna̍nti ।
om ॥ 58 ॥ ॥ 40 ॥))

[[10-41-1]]

मे॒धा दे॒वी जु॒षमा॑णा न॒ आगा᳚द्वि॒श्वाची॑ भ॒द्रा सु॑मन॒स्यमा॑ना।
त्वया॒ जुष्टा॑ नु॒दमा॑णा दु॒रुक्ता᳚न्बृ॒हद्व॑देम वि॒दथे॑ सु॒वीरा᳚ः।
त्वया॒ जुष्ट॑ ऋ॒षिर्भ॑वति दे॒वि त्वया॒ ब्रह्मा॑ ग॒तश्री॑रु॒त त्वया᳚।
त्वया॒ जुष्ट॑श्चि॒त्रं वि॑न्दते वसु॒ सा नो॑ जुषस्व॒ द्रवि॑णो न मेधे॥ ५९॥ ॥ ४१॥

((me̱dhā de̱vī ju̱ṣamā̍ṇā na̱ āgā̎dvi̱śvāci̍ bha̱drā su̍mana̱syamā̍nā |
tvayā̱ juṣṭā̍ nu̱damā̍ṇā du̱ruktā̎nbṛ̱hadva̍dema vi̱dathe̍ su̱vīrā̎ḥ |
tvayā̱ juṣṭa̍ ṛ̱ṣirbha̍vati devi̱ tvayā̱ brahmā̍ ga̱taśrī̍ru̱ta tvayā̎ |
tvayā̱ juṣṭa̍ści̱traṃ vi̍ndate vasu̱ sā no̍ juṣasva̱ dravi̍ṇo na medhe || 59 || || 41 ||))

[[10-42-1]]
मे॒धां म॒ इन्द्रो॑ ददातु मे॒धां दे॒वी सर॑स्वती।
मे॒धां मे॑ अ॒श्विना॑वु॒भावाध॑त्तां॒ पुष्क॑रस्रजा।
अ॒प्स॒रासु॑ च॒ या मे॒धा ग॑न्ध॒र्वेषु॑ च॒ यन्मन॑ः।
दैवी᳚ मे॒धा सर॑स्वती॒ स मां᳚ मे॒धा सु॒रभि॑र्जुषता॒ꣳ॒ स्वाहा᳚॥ ६०॥ ॥ ४२॥

((me̱dhāṃ ma̱ indro̍ dadātu me̱dhāṃ de̱vī sara̍svatī |
me̱dhāṃ me̍ a̱śvinā̍vu̱bhāvādha̍ttāṃ̱ puṣka̍rasrajā |
a̱psa̱rāsu̍ ca̱ yā me̱dhā ga̍ndharve̱ṣu̍ ca̱ yanmana̍ḥ |
daivī̎ me̱dhā sara̍svatī̱ sa mā̎m̐ me̱dhā su̱rabhi̍rjuṣatā̱m̐ svāhā̎ || 60 || || 42 ||))

[[10-43-1]]
आ मां᳚ मे॒धा सु॒रभि॑र्वि॒श्वरू॑पा॒ हिर॑ण्यवर्णा॒ जग॑ती जग॒म्या।
ऊर्ज॑स्वती॒ पय॑सा॒ पिन्व॑माना॒ सा मां᳚ मे॒धा सु॒प्रती॑का जुषन्ताम्॥ ६१॥ ॥ ४३॥

((ā mā̎m̐ me̱dhā su̱rabhi̍rvi̱śvarū̍pā̱ hira̍ṇyavarṇā̱ jaga̍tī jaga̱myā |
ūrja̍svatī̱ paya̍sā̱ pinva̍mānā̱ sā mā̎m̐ me̱dhā su̱pratī̍kā juṣantām || 61 || || 43 ||))

[[10-44-1]]
मयि॑ मे॒धां मयि॑ प्र॒जां मय्य॒ग्निस्तेजो॑ दधातु॒ मयि॑ मे॒धां मयि॑ प्र॒जां मयीन्द्र॑ इन्द्रि॒यं द॑धातु॒ मयि॑ मे॒धां
मयि॑ प्र॒जां मयि॒ सूर्यो॒ भ्राजो॑ दधातु॥ ६२॥ ॥ ४४॥

((mayi̍ me̱dhāṃ mayi̍ pra̱jāṃ mayya̱gnistejo̍ dadhātu̱ mayi̍ me̱dhāṃ mayi̍ pra̱jāṃ
mayīndra̍ indri̱yaṃ da̍dhātu̱ mayi̍ me̱dhāṃ mayi̍ pra̱jāṃ mayi̱ sūryo̱ bhrājo̍ dadhātu ||
62 || || 44 ||))

[[10-45-1]]
अपै॑तु मृ॒त्युर॒मृतं॑ न॒ आग॑न्वैवस्व॒तो नो॒ अभ॑यं कृणोतु।
प॒र्णं॒ वन॒स्पते॑रिवा॒भि न॑श्शीयता॒ꣳ॒ र॒यिस्सच॑तां न॒श्शाची॒पति॑ः॥ ६३॥ ॥ ४५॥

((apaitu mṛtyurạmṛtaṃ na̱ āgānvaivasvạto no̱ abhayaṃ kṛṇotu ।
pa̱rṇaṃ vana̱spaterivā̱bhi naśśīyatām̐ ra̱yissacatāṃ na̱śśacīpatiḥ ॥ 63 ॥ ॥ 45 ॥))

[[10-46-1]]
परं मृत्यो̱ अनु̱ परेहि̱ पन्थां̱ यस्ते̱ स्व इतरो दे̱वयानात्।
चक्षुष्मते शृण्व̱ते ते ब्रवीमि̱ मा नः प्र̱जाꣳ रीरिषो̱ मोत वी̱रान्॥ ६४॥ ॥ ४६॥

((paraṃ mṛtyo̱ anu̱ parehi̱ panthāṃ yaste̱ sva itaro deva̱yānāt ।
cakṣuṣmate śṛṇva̱te te bravīmi̱ mā naḥ pra̱jām̐ ririṣo̱ mota vī̱rān ॥ 64 ॥ ॥ 46 ॥))

[[10-47-1]]
वातं प्रा̱णं मनसा̱ऽन्वारभामहे प्र̱जापतिं̱ यो भुवनस्य गो̱पाः।
स नो मृ̱त्योस्त्रायतां̱ पात्वꣳहसो̱ ज्योग्जी̱वा ज̱राम॑शीमहि॥ ६५॥ ॥ ४७॥

((vātaṃ prāṇaṃ manasā̱'nvārabhāmahe pra̱jāpatiṃ̱ yo bhuvanasya go̱pāḥ ।
sa no mṛ̱tyostrāyatāṃ̱ pātvam̐haso̱ jyogjī̱vā ja̱rāmaśīmahi ॥ 65 ॥ ॥ 47 ॥))

[[10-48-1]]
अ̱मु̱त्र̱भू̱याद̱ध य̱द्यम̱स्य बृह̱स्पते अ̱भिश॒स्ते॒रमु॑ञ्चः।
प्रत्यौहतामश्विना मृत्युमस्मद्दे̱वानामग्ने भि̱षजा̱ शचीभिः॥ ६६॥ ॥ ४८॥

((a̱mu̱tra̱bhūyā̱dadha̱ yadya̱masya̱ bṛhaspate a̱bhiśaste̱ramuñcaḥ ।
pratyauhatāma̱śvinā mṛtyumasmadde̱vānāmagne bhi̱ṣajā̱ śacībhiḥ ॥ 66 ॥ ॥ 48 ॥))

[[10-49-1]]
हरि̱ꣳ हरन्तमनुयन्ति दे̱वा विश्वस्येशानं वृषभं मतीनाम्।
ब्रह्म̱ सरूपमनु मे̱दमागा̱दयनं मा विवधी̱र्विक्रमस्व॥ ६७॥ ॥ ४९॥

((hari̱m̐ haranta̱manuyanti de̱vā viśva̱syeśānam vṛṣa̱bhaṃ matīnām ।
brahma̱ sarūpa̱manu me̱damāgā̱dayanaṃ mā vivadhī̱rvikramasva ॥ 67 ॥ ॥ 49 ॥))

[[10-50-1]]
शल्कैर̱ग्निमिन्धा̱न उ̱भौ लो̱कौ सनेम̱हम्।
उ̱भयोर्लो̱कयोर्ऋ̱ध्वाऽति मृ̱त्युं तराम्य̱हम्॥ ६८॥ ॥ ५०॥

((śalkaira̱gnimindhā̱na u̱bhau lo̱kau sanema̱ham ।
u̱bhayorlo̱kayorṛdhvā'ti mṛ̱tyuṃ tarāmya̱ham ॥ 68 ॥ ॥ 50 ॥))

[[10-51-1]]
मा छिदो मृत्यो̱ मा वधी̱र्मा मे̱ बलं̱ विवृहो̱ मा प्रमोषीः।

प्रजां मा मे रीरिष आयुरुग्र नृचक्षसं त्वा हविषा विधेम॥ ६९॥ ॥ ५१॥

((mā chido mṛtyo mā vadhīrmā me balaṃ vivṛho mā pramośīḥ |
prajāṃ mā me rīriṣa āyurugra nṛcakṣasaṃ tvā haviṣā vidhema || 69 || || 51 ||))

[[10-52-1]]
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।
मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥ ७०॥ ॥ ५२॥

((mā no mahāntamuta mā no arbhakaṃ mā na ukṣantamuta mā na ukṣitam |
mā no vadhīḥ pitaraṃ mota mātaraṃ priyā mā nastanuvo rudra rīriṣaḥ || 70 || || 52 ||))

[[10-53-1]]
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते॥ ७१॥ ॥ ५३॥

((mā nastoke tanaye mā na āyuṣi mā no goṣu mā no aśveṣu rīriṣaḥ |
vīrānmā no rudra bhāmito vadhīrhaviṣmanto namasā vidhema te || 71 || || 53 ||))

[[10-54-1]]
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।
यत्कामस्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम्॥ ७२॥ ॥ ५४॥

((prajāpate na tvadetānyanyo viśvā jātāni pari tā babhūva |
yatkāmaste juhumastanno astu vayam̐ syāma patayo rayīṇām || 72 || || 54 ||))

[[10-55-1]]
स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी।
वृषेन्द्रः पुर एतु नस्स्वस्तिदा अभयंकरः॥ ७३॥ ॥ ५५॥

((svastidā viśaspatirvṛtrahā vimṛdho vaśī |
vṛṣendraḥ pura etu nassvastidā abhayaṃkaraḥ || 73 || || 55 ||))

[[10-56-1]]
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥ ७४॥ ॥ ५६॥

((tryambakaṃ yajāmahe sugandhiṃ puṣṭivardhanam |
urvārukamiva bandhanānmṛtyormukṣīya māmṛtāt || 74 || || 56 ||))

[[10-57-1]]

ये ते॑ स॒हस्र॑म॒युतं॒ पाशा॒ मृत्यो॒ मर्त्या॑य॒ हन्त॑वे।
तान्य॒ज्ञस्य॑ मा॒यया॒ सर्वा॒नव॑यजामहे॥ ७५॥ ॥ ५७॥

((ye te̍ sa̱hasra̍ma̱yutam̱ pāśā̱ mr̥tyo̱ martyā̍ya̱ hanta̍ve ।
tānya̱jñasya̍ māyayā̱ sarvā̱nava̍yajāmahe ॥ 75 ॥ ॥ 57 ॥))

[[10-58-1]]
मृ॒त्यवे॒ स्वाहा॑ मृ॒त्यवे॒ स्वाहा᳚॥ ७६॥ ॥ ५८॥

((mr̥̱tyave̱ svāhā̍ mr̥̱tyave̱ svāhā᳚ ॥ 76 ॥ ॥ 58 ॥))

[[10-59-1]]
दे॒वकृ॑त॒स्यैन॑सोऽव॒यज॑नमसि॒ स्वाहा᳚।
म॒नु॒ष्य॑कृत॒स्यैन॑सोऽव॒यज॑नमसि॒ स्वाहा᳚।
पि॒तृकृ॑त॒स्यैन॑सोऽव॒यज॑नमसि॒ स्वाहा᳚।
आ॒त्मकृ॑त॒स्यैन॑सोऽव॒यज॑नमसि॒ स्वाहा᳚।
अ॒न्यकृ॑त॒स्यैन॑सोऽव॒यज॑नमसि॒ स्वाहा᳚।
अ॒स्मत्कृ॑त॒स्यैन॑सोऽव॒यज॑नमसि॒ स्वाहा᳚।
यद्दि॒वा च॒ नक्तं॒ चैन॑श्चकृ॒म तस्या॑व॒यज॑नमसि॒ स्वाहा᳚।
यथ्स्व॒पन्त॑श्च॒ जाग्र॑त॒श्चैन॑श्चकृ॒म तस्या॑व॒यज॑नमसि॒ स्वाहा᳚।
यथ्सु॒षु॒प्त॑श्च॒ जाग्र॑त॒श्चैन॑श्चकृ॒म तस्या॑व॒यज॑नमसि॒ स्वाहा᳚।
यद्वि॒द्वाꣳस॒श्चावि॑द्वाꣳस॒श्चैन॑श्चकृ॒म तस्या॑व॒यज॑नमसि॒ स्वाहा᳚।
एनस एनसोऽवयजनम॑सि स्वा॒हा॥ ७७॥ ॥ ५९॥

((de̱vakr̥̍ta̱syainā̍so'va̱yajā̍namasi̱ svāhā᳚ ।
ma̱nu̱ṣyā̍kr̥ta̱syainā̍so'va̱yajā̍namasi̱ svāhā᳚ ।
pi̱tr̥kr̥̍ta̱syainā̍so'va̱yajā̍namasi̱ svāhā᳚ ।
ā̱tmakr̥̍ta̱syainā̍so'va̱yajā̍namasi̱ svāhā᳚ ।
a̱nyakr̥̍ta̱syainā̍so'va̱yajā̍namasi̱ svāhā᳚ ।
a̱smatkr̥̍ta̱syainā̍so'va̱yajā̍namasi̱ svāhā᳚ ।
yaddi̱vā ca̱ naktam̱ cainā̍ścakr̥̱ma tasyā̍va̱yajā̍namasi̱ svāhā᳚ ।
yathsva̱pantā̍śca̱ jāgrā̍ta̱ścainā̍ścakr̥̱ma tasyā̍va̱yajā̍namasi̱ svāhā᳚ ।
yathsu̱ṣuptā̍śca̱ jāgrā̍ta̱ścainā̍ścakr̥̱ma tasyā̍va̱yajā̍namasi̱ svāhā᳚ ।
yadvi̱dvām̐sa̱ścāvi̍dvām̐sa̱ścainā̍ścakr̥̱ma tasyā̍va̱yajā̍namasi̱ svāhā᳚ ।
enasa enaso'vayajanamā̍si svā̱hā ॥ 77 ॥ ॥ 59 ॥))

[[10-60-1]]
यद्वो॑ देवाश्चकृ॒म जि॒ह्वया॑ गु॒रु मन॑सो वा॒ प्रयु॑ती दे॒वहे॑डनम्।

अरा॑ वा॒यो नो॑ अ॒भि दु॑च्छु॒ना॒यते॒ तस्मि॒न्तदेनो॑ वसवो॒ निधे॑तन॒ स्वाहा॑॥ ७८॥ ॥ ६०॥

((yadvó devāścakṛma jihvayā́ guru manáso vā prayútī devahéḍanam ।
arā́ vāyo nó abhi dúcchunāyate tasmintadenó vasavo nidhétana svāhā́ ॥ 78 ॥ ॥ 60 ॥))

[[10-61-1]]
कामोऽकार्षी॑न्नमो॒ नमः।
कामोऽकार्षीत्कामः करोति नाहं करोमि कामः कर्ता नाहं कर्ता काम॑ः का॒रयिता नाहं॑ का॒रयिता एष ते काम कामा॑य स्वा॒हा॥ ७९॥ ॥ ६१॥

((kāmo'kārṣī̎nnamo namaḥ ।
kāmo'kārṣītkāmaḥ karoti nāhaṃ karomi kāmaḥ kartā nāhaṃ kartā kāmáḥ kārayitā nāhám kārayitā eṣa te kāma kāmáya svāhā ॥ 79 ॥ ॥ 61 ॥))

[[10-62-1]]
मन्युरकार्षी॑न्नमो॒ नमः।
मन्युरकार्षीन्मन्युः करोति नाहं करोमि मन्युः कर्ता नाहं कर्ता मन्यु॑ः का॒रयिता नाहं॑ का॒रयिता एष ते मन्यो मन्य॑वे स्वा॒हा॥ ८०॥ ॥ ६२॥

((manyurakārṣī̎nnamo namaḥ ।
manyurakārṣīnmanyuḥ karoti nāhaṃ karomi manyuḥ kartā nāhaṃ kartā manyúḥ kārayitā nāhám kārayitā eṣa te manyo manyáve svāhā ॥ 80 ॥ ॥ 62 ॥))

[[10-63-1 ]]
तिलाञ्जुहोमि सरसाꣳ सपिष्टान्गन्धार मम चित्ते रम॑न्तु स्वा॒हा॥
गावो हिरण्यं धनमन्नपानꣳ सर्वे॑षाꣳ श्रि॑यै स्वा॒हा॥
श्रियं च लक्ष्मीं च पुष्टिं च कीर्ति॑ं चाऽऽनृ॒ण्यताम्।
ब्रह्मण्यं ब॑हुपुत्रताम्।
श्रद्धामेधे प्रजास्संदद॑ातु स्वा॒हा॥ ८१॥ ॥ ६३॥

((tilāñjuhomi sarasāꣳ sapiṣṭāngandhāra mama citte ramántu svāhā ॥
gāvo hiraṇyaṃ dhanamannapānaꣳ sarveṣāꣳ śríyai svāhā ॥
śriyaṃ ca lakṣmīṃ ca puṣṭiṃ ca kīrtiṃ́ cā''nṛṇyatām ।
brahmaṇyaṃ báhuputratām ।
śraddhāmedhe prajāssaṃdadátu svāhā ॥ 81 ॥ ॥ 63 ॥))

[[10-64-1]]
तिलाः कृष्णास्ति॑लाश्श्वे॒तास्तिलास्सौम्या व॑शानु॒गाः।
तिलाः पुनन्तु॑ मे पा॒पं यत्किञ्चिद्दुरितं म॑यि स्वा॒हा॥

चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः।
गोस्तेयꣳ सुरापानं भ्रूणहत्या तिला शान्तिꣳ शमयन्तु स्वाहा॥
श्रीश्च लक्ष्मीश्च पुष्टीश्च कीर्तिं चाऽऽनृण्यताम्।
ब्रह्मण्यं बहुपुत्रताम्।
श्रद्धामेधे प्रज्ञा तु जातवेदस्संददातु स्वाहा॥ ८२॥ ॥ ६४॥

((tilāḥ kṛṣṇāstilāśśvetāstilāssaumyā vaśānugāḥ ।
tilāḥ punantu me pāpam yatkiñcidduritam mayi svāhā ॥
corasyānnam navaśrāddham brahmahā gurutalpagaḥ ।
gosteyam̐ surāpānam bhrūṇahatyā tilā śāntim̐ śamayantu svāhā ॥
śrīśca lakṣmīśca puṣṭīśca kīrtim cā''nṛṇyatām ।
brahmaṇyam bahuputratām ।
śraddhāmedhe prajñā tu jātavedassamdadātu svāhā ॥ 82 ॥ ॥ 64 ॥))

[[10-65-1]]
प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा।
वाङ्मनश्चक्षुश्श्रोत्रजिह्वाघ्राणरेतो बुद्ध्याकूतिस्संकल्पा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा।
त्वक्चर्ममाꣳसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा।
शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घशिश्नोपस्थपायवो मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा।
उत्तिष्ठ पुरुष हरित पिङ्गल लोहिताक्षि देहि देहि ददापयिता मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ ८३॥ ॥ ६५॥

((prāṇāpānavyānodānasamānā me śudhyantām jyotiraham virajā vipāpmā bhūyāsam̐ svāhā ।
vāṅmanaścakṣuśśrotrajihvāghrāṇareto buddhyākūtissamkalpā me śudhyantām jyotiraham virajā vipāpmā bhūyāsam̐ svāhā ।
tvakcarmamām̐sarudhiramedomajjāsnāyavo'sthīni me śudhyantām jyotiraham virajā vipāpmā bhūyāsam̐ svāhā ।
śiraḥpāṇipādapārśvapṛṣṭhorūdarajaṅghaśiśnopasthapāyavo me śudhyantām jyotiraham virajā vipāpmā bhūyāsam̐ svāhā ।
uttiṣṭha puruṣa harita piṅgala lohitākṣi dehi dehi dadāpayitā me śudhyantām jyotiraham virajā vipāpmā bhūyāsam̐ svāhā ॥ 83 ॥ ॥ 65 ॥))

[[10-66-1]]
पृथिव्यप्तेजो वायुराकाशा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा।

शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा।
मनोवाक्कायकर्माणि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा।
अव्यक्तभावैरहंकारैर्ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा।
आत्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा।
अन्तरात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा।
परमात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा।
क्षुधे स्वाहा।
क्षुत्पिपासाय स्वाहा।
विविट्ट्यै स्वाहा।
ऋग्विधानाय स्वाहा।
कषोत्काय स्वाहा।
क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीर्नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानꣳ स्वाहा।
अन्नमयप्राणमयमनोमयविज्ञानमयमानन्दमयमात्मा मे
शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ ८४॥ ॥ ६६॥

((pṛthivyaptejo vāyurākāśā me śudhyantām jyotiraham virajā vipāpmā bhūyāsam̐ svāhā |
śabdasparśarūparasagandhā me śudhyantām jyotiraham virajā vipāpmā bhūyāsam̐ svāhā |
manovākkāyakarmāṇi me śudhyantām jyotiraham virajā vipāpmā bhūyāsam̐ svāhā |
avyaktabhāvairahaṃkārairjyotiraham virajā vipāpmā bhūyāsam̐ svāhā |
ātmā me śudhyantām jyotiraham virajā vipāpmā bhūyāsam̐ svāhā |
antarātmā me śudhyantām jyotiraham virajā vipāpmā bhūyāsam̐ svāhā |
paramātmā me śudhyantām jyotiraham virajā vipāpmā bhūyāsam̐ svāhā |
kṣudhe svāhā |
kṣutpipāsāya svāhā |
viviṭṭyai svāhā |
ṛgvidhānāya svāhā |
kaṣotkāya svāhā |
kṣutpipāsāmalaṃ jyeṣṭhāmalakṣmīrnāśayāmyaham |
abhūtimasamṛddhiṃ ca sarvānnirṇuda me pāpmānam̐ svāhā |
annamayaprāṇamayamanomayavijñānamayamānandamayamātmā me
śudhyantām jyotiraham virajā vipāpmā bhūyāsam̐ svāhā || 84 || || 66 ||))

[[10-67-1]]
अग्नये स्वाहा।

विश्वे॑भ्यो दे॒वेभ्य॒स्स्वाहा᳚।
ध्रु॒वाय॑ भू॒माय॒ स्वाहा᳚।
ध्रु॒व॒क्षित॑ये॒ स्वाहा᳚।
अ॒च्यु॒त॒क्षित॑ये॒ स्वाहा᳚।
अ॒ग्नये᳚ स्वि॒ष्ट॒कृ॒ते॒ स्वाहा᳚।
धर्मा॑य॒ स्वाहा᳚।
अध॑र्माय॒ स्वाहा᳚।
अ॒द्भ्यस्स्वाहा᳚।
ओ॒ष॒धि॒व॒न॒स्प॒तिभ्य॒ः स्वाहा᳚॥ ८५॥

((a̱gnaye̱ svāhā̎ |
viśvē̎bhyo de̱vebhya̱ssvāhā̎ |
dhru̱vāya̍ bhū̱māya̱ svāhā̎ |
dhru̱va̱kṣita̍ye̱ svāhā̎ |
a̱cyu̱ta̱kṣita̍ye̱ svāhā̎ |
a̱gnayē̎ svi̱ṣṭa̱kr̥te̱ svāhā̎ |
dharmā̍ya̱ svāhā̎ |
adha̍rmāya̱ svāhā̎ |
a̱dbhyassvāhā̎ |
o̱ṣa̱dhi̱va̱na̱spa̱tibhya̱ḥ svāhā̎ || 85 ||))

[[10-67-2]]
र॒क्षो॒दे॒व॒ज॒ने॒भ्य॒स्स्वाहा᳚।
गृह्या᳚भ्य॒स्स्वाहा᳚।
अ॒व॒साने᳚भ्य॒स्स्वाहा᳚।
अ॒व॒सान॑पतिभ्य॒स्स्वाहा᳚।
स॒र्व॒भू॒तेभ्य॒स्स्वाहा᳚।
कामा॑य॒ स्वाहा᳚।
अ॒न्तरि॑क्षाय॒ स्वाहा᳚।
यदेज॑ति॒ जग॑ति॒ यच्च॒ चेष्ट॑ति॒ नाम्नो॑ भा॒गोऽयं नाम्ने॒ स्वाहा᳚।
पृ॒थि॒व्यै॒ स्वाहा᳚।
अ॒न्तरि॑क्षाय॒ स्वाहा᳚॥ ८६॥

((ra̱kṣo̱de̱va̱ja̱ne̱bhya̱ssvāhā̎ |
gr̥hyā̎bhya̱ssvāhā̎ |
a̱va̱sānē̎bhya̱ssvāhā̎ |

a̠va̠sānȧpatibhya̠ssvāhā̈ ।
sa̠rva̠bhū̠tebhya̠ssvāhā̈ ।
kāmȧya̠ svāhā̈ ।
a̠ntarȉkṣāya̠ svāhā̈ ।
yadejȧti̠ jagȧti̠ yacca̠ ceṣṭȧti̠ nāmnȯ bhā̠go'ya̠m nāmne̠ svāhā̈ ।
pr̠thi̠vyai svāhā̈ ।
a̠ntarȉkṣāya̠ svāhā̈ ॥ 86 ॥))

[[10-67-3]]

दि॒वे स्वाहा᳚।
सूर्या॑य॒ स्वाहा᳚।
च॒न्द्रम॑से॒ स्वाहा᳚।
नक्ष॑त्रेभ्य॒स्स्वाहा᳚।
इन्द्रा॑य॒ स्वाहा᳚।
बृह॒स्पत॑ये॒ स्वाहा᳚।
प्र॒जाप॑तये॒ स्वाहा᳚।
ब्रह्म॑णे॒ स्वाहा᳚।
स्व॒धा पि॒तृभ्य॒स्स्वाहा᳚।
नमो॑ रु॒द्राय॑ पश॒ुपत॑ये॒ स्वाहा᳚॥ ८७॥

((di̠ve svāhā̈ ।
sūryȧya̠ svāhā̈ ।
ca̠ndramȧse̠ svāhā̈ ।
nakṣȧtrebhya̠ssvāhā̈ ।
indrȧya̠ svāhā̈ ।
br̥ha̠spatȧye̠ svāhā̈ ।
pra̠jāpȧtaye̠ svāhā̈ ।
brahmȧṇe̠ svāhā̈ ।
sva̠dhā pi̠tr̠bhya̠ssvāhā̈ ।
namȯ ru̠drāyȧ paśu̠patȧye̠ svāhā̈ ॥ 87 ॥))

[[10-67-4]]

दे॒वेभ्य॒स्स्वाहा᳚।
पि॒तृभ्य॑स्स्व॒धाऽस्तु॑।
भू॒तेभ्यो॒ नम॑ः।
म॒नु॒ष्ये᳚भ्यो॒ हन्ता᳚।
प्र॒जाप॑तये॒ स्वाहा᳚।
प॒र॒मे॒ष्ठिने॒ स्वाहा᳚।

यथा कूपश्शतधारस्सहस्रधारो अक्षितः।
एवा मे अस्तु धान्यꣳ सहस्रधारमक्षितम्।
धनधान्यै स्वाहा।
ये भूताः प्रचरन्ति दिवानक्तं बलिमिच्छन्तो वितुदस्य प्रेष्याः।
तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहा॥ ८८॥
ओषधिवनस्पतिभ्यस्स्वाहाऽन्तरिक्षाय स्वाहा नमो रुद्राय पशुपतये स्वाहा वितुदस्य प्रेष्या एकं च॥ ६७॥

((devebhyassvāhā |
pitṛbhyassvadhā'stu |
bhūtebhyo namaḥ |
manuṣyebhyo hantā |
prajāpataye svāhā |
parameṣṭhine svāhā |
yathā kūpaśśatadhārassahasradhāro akṣitaḥ |
evā me astu dhānyam̐ sahasradhāramakṣitam |
dhanadhānyai svāhā |
ye bhūtāḥ pracaranti divānaktam balimicchanto vitudasya preṣyāḥ |
tebhyo balim puṣṭikāmo harāmi mayi puṣṭim puṣṭipatirdadhātu svāhā || 88 ||
oṣadhivanaspatibhyassvāhā'ntarikṣāya svāhā namo rudrāya paśupataye svāhā vitudasya preṣyā ekaṃ ca || 67 ||))

[[10-68-1]]
ओं तद्ब्रह्म।
ओं तद्वायुः।
ओं तदात्मा।
ओं तथ्सत्यम्।
ओं तथ्सर्वम्।
ओं तत्पुरोर्नमः।
अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु।
त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्द्रस्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः।
त्वं तदाप आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम्॥ ८९॥ ॥ ६८॥

((oṃ tadbrahma |
oṃ tadvāyuaḥ |
oṃ tadātmā |
oṃ tathsatyam |
oṃ tathsarvam |

oṃ̐ tatpuro̠rnamaḥ |
antaścarati̍ bhūte̠ṣu̠ guhāyāṃ vi̍śvamū̠rtiṣu |
tvaṃ yajñastvaṃ vaṣaṭkārastvamindrastvam̐ rudrastvaṃ viṣṇustvaṃ brahma tvaṃ̐ prajā̠patiḥ |
tvaṃ ta̍dāpa̠ āpo̠ jyotī̠ raso̠'mṛtaṃ̠ brahma̠ bhūrbhuva̠ssuva̠rom || 89 || || 68 ||))

[[10-69-1]]
श्र॒द्धायां॑ प्रा॒णे निवि॑ष्टो॒ऽमृतं॑ जुहोमि।
श्र॒द्धाया॑मपा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि।
श्र॒द्धायां॑ व्या॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि।
श्र॒द्धाया॑मुदा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि।
श्र॒द्धाया॑ꣳ समा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि।
ब्रह्म॑णि म आ॒त्माऽमृ॑त॒त्वाय॑।
अ॒मृ॒तो॒प॒स्तर॑णमसि।
श्र॒द्धायां॑ प्रा॒णे निवि॑ष्टो॒ऽमृतं॑ जुहोमि।
शि॒वो मा॑ वि॒शाप्र॑दा॒हाय।
प्रा॒णाय॒ स्वाहा॑।
श्र॒द्धाया॑मपा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि।
शि॒वो मा॑ वि॒शाप्र॑दा॒हाय।
अ॒पा॒नाय॒ स्वाहा॑।
श्र॒द्धायां॑ व्या॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि।
शि॒वो मा॑ वि॒शाप्र॑दा॒हाय।
व्या॒नाय॒ स्वाहा॑।
श्र॒द्धाया॑मुदा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि।
शि॒वो मा॑ वि॒शाप्र॑दा॒हाय।
उ॒दा॒नाय॒ स्वाहा॑।
श्र॒द्धाया॑ꣳ समा॒ने निवि॑ष्टो॒ऽमृतं॑ जुहोमि।
शि॒वो मा॑ वि॒शाप्र॑दा॒हाय।
स॒मा॒नाय॒ स्वाहा॑।
ब्रह्म॑णि म आ॒त्माऽमृ॑त॒त्वाय॑।
अ॒मृ॒ता॒पि॒धा॒नम॑सि॥ ९०॥ ॥ ६९॥

((śra̠ddhāyāṃ̐ prā̠ṇe nivi̍ṣṭo̠'mṛtaṃ̐ juhomi |

śra̱ddhāyā̍mapā̱ne ni̍viṣṭo̱'mṛtaṃ juhomi |
śra̱ddhāyā̎ṃ vyā̱ne nivi̍ṣṭo̱'mṛtaṃ juhomi |
śra̱ddhāyā̍mudā̱ne nivi̍ṣṭo̱'mṛtaṃ juhomi |
śra̱ddhāyā̎ṃ samā̱ne nivi̍ṣṭo̱'mṛtaṃ juhomi |
brahma̍ṇi ma ā̱tmā'mṛ̍ta̱tvāya̍ |
a̱mṛ̱to̱pa̱stara̍ṇamasi |
śra̱ddhāyā̎ṃ prā̱ṇe nivi̍ṣṭo̱'mṛtaṃ juhomi |
śi̱vo ma̍ vi̱śāpra̍dāhāya |
prā̱ṇāya̱ svāhā̎ |
śra̱ddhāyā̍mapā̱ne nivi̍ṣṭo̱'mṛtaṃ juhomi |
śi̱vo ma̍ vi̱śāpra̍dāhāya |
a̱pā̱nāya̱ svāhā̎ |
śra̱ddhāyā̎ṃ vyā̱ne nivi̍ṣṭo̱'mṛtaṃ juhomi |
śi̱vo ma̍ vi̱śāpra̍dāhāya |
vyā̱nāya̱ svāhā̎ |
śra̱ddhāyā̍mudā̱ne nivi̍ṣṭo̱'mṛtaṃ juhomi |
śi̱vo ma̍ vi̱śāpra̍dāhāya |
u̱dā̱nāya̱ svāhā̎ |
śra̱ddhāyā̎ṃ samā̱ne nivi̍ṣṭo̱'mṛtaṃ juhomi |
śi̱vo ma̍ vi̱śāpra̍dāhāya |
sa̱mā̱nāya̱ svāhā̎ |
brahma̍ṇi ma ā̱tmā'mṛ̍ta̱tvāya̍ |
a̱mṛ̱tā̱pi̱dhā̱nama̍si || 90 || || 69 ||))

[[10-70-1]]

श्र॒द्धायां᳚ प्रा॒णे निवि॑श्या॒मृत॑ꣳ हु॒तम्।
प्रा॒णमन्ने॒॑नाप्यायस्व।
श्र॒द्धाया॑मपा॒ने निवि॑श्या॒मृत॑ꣳ हु॒तम्।
अ॒पा॒नमन्ने॒॑नाप्यायस्व।
श्र॒द्धायां᳚ व्या॒ने निवि॑श्या॒मृत॑ꣳ हु॒तम्।
व्या॒नमन्ने॒॑नाप्यायस्व।
श्र॒द्धाया॑मुदा॒ने निवि॑श्या॒मृत॑ꣳ हु॒तम्।
उ॒दा॒नमन्ने॒॑नाप्यायस्व।
श्र॒द्धाया॑ꣳ समा॒ने निवि॑श्या॒मृत॑ꣳ हु॒तम्।
स॒मा॒नमन्ने॒॑नाप्यायस्व॥ ९१॥ ॥ ७०॥

((śra̱ddhāyā̎ṃ prā̱ṇe nivi̍śyā̱mṛtaṃ hu̱tam |
prā̱ṇamanne̍nāpyāyasva |
śra̱ddhāyā̍mapā̱ne nivi̍śyā̱mṛtaṃ hu̱tam |
a̱pā̱namanne̍nāpyāyasva |
śra̱ddhāyā̎ṃ vyā̱ne nivi̍śyā̱mṛtaṃ hu̱tam |

vyā̱namannė̍nāpyāyasva ।
śra̱ddhāyā̍mudā̱ne nivi̍śyā̱mṛtaṁ̐ hu̱tam ।
u̱dā̱namannė̍nāpyāyasva ।
śra̱ddhāyāṁ̐ samā̱ne nivi̍śyā̱mṛtaṁ̐ hu̱tam ।
sa̱mā̱namannė̍nāpyāyasva ॥ 91 ॥ ॥ 70 ॥))

[[10-71-1]]

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च॑ समा॒श्रितः।
ईशस्सर्वस्य जगतः प्रभुः प्रीणाति॑ वि॒श्वभुक्॥ ९२॥ ॥ ७१॥

((aṅguṣṭhamātraḥ puruṣo'ṅguṣṭhaṃ ca̍ samā̱śritaḥ ।
īśassarvasya jagataḥ prabhuḥ prīṇāti̍ viśva̱bhuk ॥ 92 ॥ ॥ 71 ॥))

[[10-72-1]]

वाङ्म॑ आ॒सन्न्।
न॒सोः प्रा॒णः।
अ॒क्ष्योश्चक्षु॑ः।
कर्ण॑यो॒श्श्रोत्र॑म्।
बा॒हु॒वोर्बल॑म्।
ऊ॒रु॒वोरोज॑ः।
अरि॑ष्टा॒ विश्वा॒न्यङ्गा॑नि त॒नूः।
त॒नुवा॑ मे स॒ह नम॑स्ते अस्तु॒ मा मा॑ हिꣳसीः॥ ९३॥ ॥ ७२॥

((vāṅma̍ ā̱sann ।
na̱soḥ prā̱ṇaḥ ।
a̱kṣyoścakṣu̍ḥ ।
karṇa̍yo̱śśrotra̍m ।
bā̱hu̱vorbala̍m ।
ū̱ru̱voroja̍ḥ ।
ari̍ṣṭā̱ viśvā̱nyaṅgā̍ni ta̱nūḥ ।
ta̱nuvā̍ me sa̱ha nama̍ste astu̱ mā mā̍ hiṁ̐sīḥ ॥ 93 ॥ ॥ 72 ॥))

[[10-73-1]]

वय॑स्सुप॒र्णा उप॑सेदु॒रिन्द्रं॑ प्रि॒यमे॑धा॒ ऋष॑यो॒ नाध॑मानाः।
अप॑ ध्वा॒न्तमू॑र्णु॒हि पू॒र्द्धि चक्षु॑र्मुमु॒ग्ध्य॑स्मान्नि॒धये॑ऽव ब॒द्धान्॥ ९४॥ ॥ ७३॥

((vaya̍ssupa̱rṇā upa̍sedu̱rindraṃ̍ pri̱yame̍dhā̱ ṛṣa̍yo̱ nādha̍mānāḥ ।
apa̍ dhvā̱ntamū̍rṇu̱hi pū̱rddhi cakṣu̍rmumu̱gdhya̍smānni̱dhaye̍'va ba̱ddhān ॥ 94 ॥ ॥ 73 ॥))

[[10-74-1]]
प्राणानां ग्रन्थिरसि रुद्रो मा॑ विशा॒न्तकः।
तेनान्नेना᳚प्याय॒स्व॥ ९५॥ ॥ ७४॥

((prāṇānāṃ granthirasi rudro mā̍ viśā̱ntakaḥ |
tenānnenā̎pyāya̱sva || 95 || || 74 ||))

[[10-75-1]]
नमो रुद्राय विष्णवे मृत्यु॑र्मे पा॒हि॥ ९६॥ ॥ ७५॥

((namo rudrāya viṣṇave mṛtyu̍rme pā̱hi || 96 || || 75 ||))

[[10-76-1]]
त्वम॑ग्ने॒ द्युभि॒स्त्वमा॑शुशु॒क्षणि॒स्त्वम॒द्भ्यस्त्वमश्म॑न॒स्परि॑।
त्वं वने᳚भ्य॒स्त्वमोष॑धीभ्य॒स्त्वं नृ॒णां नृ॑पते जायसे॒ शुचि॑ः॥ ९७॥ ॥ ७६॥

((tvama̍gne̱ dyubhi̱stvamā̍śuśu̱kṣaṇi̱stvama̱dbhyastvamaśma̍na̱spari̍ |
tvaṃ vane̎bhya̱stvamoṣa̍dhībhya̱stvaṃ nṛ̱ṇāṃ nṛ̍pate jāyase̱ śuci̍ḥ || 97 || || 76 ||))

[[10-77-1]]
शि॒वेन॑ मे॒ सन्ति॑ष्ठस्व स्यो॒नेन॑ मे॒ सन्ति॑ष्ठस्व सुभू॒तेन॑ मे॒ सन्ति॑ष्ठस्व ब्रह्मवर्च॒सेन॑ मे॒ सन्ति॑ष्ठस्व
य॒ज्ञस्यर्द्धि॒मनु॒ सन्ति॑ष्ठस्वोप॑ ते यज्ञ॒ नम॒ उप॑ ते॒ नम॒ उप॑ ते॒ नमः॥ ९८॥ ॥ ७७॥

((śi̱vena̍ me̱ santi̍ṣṭhasva syo̱nena̍ me̱ santi̍ṣṭhasva subhū̱tena̍ me̱ santi̍ṣṭhasva
brahmavarca̱sena̍ me̱ santi̍ṣṭhasva ya̱jñasyarddhi̱manu̱ santi̍ṣṭha̱svopa̍ te yajña̱
nama̱ upa̍ te̱ nama̱ upa̍ te̱ namaḥ || 98 || || 77 ||))

[[10-78-1]]
स॒त्यं प॒रं परꣳ॑ स॒त्यꣳ स॒त्येन॒ न सु॑व॒र्गाल्लो॒काच्च्य॑वन्ते क॒दाचन स॒ताꣳ हि स॒त्यं तस्मा᳚थ्स॒त्ये र॑मन्ते॒
तप॒ इति॒ तपो॒ नानश॑नात्प॒रं यद्धि प॒रं तप॒स्तद्दु॒र्धर्॑षं तद्दु॒राध॑र्षं तस्मा॒त्तप॑सि रमन्ते॒ द॒म इति॒ निय॑तं
ब्रह्मचा॒रिण॒स्तस्मा॒द्दमे॑ रमन्ते॒ श॒म इत्यर॑ण्ये मुन॒यस्तमा॒च्छमे॑ रमन्ते दा॒नमिति॒ सर्वा॑णि भू॒तानि॑
प्र॒शꣳस॑न्ति दा॒नान्नाति॑दु॒श्चरं॒ तस्मा᳚द्दा॒ने र॑मन्ते ध॒र्म इति॒ धर्मे॑ण॒ सर्व॑मि॒दं परि॑गृहीतं ध॒र्मान्नाति॑दु॒ष्करं॒
तस्मा᳚द्ध॒र्मे र॑मन्ते प्र॒जन॒ इति॑ भू॒याꣳस॒स्तस्मा॒द्भूयि॑ष्ठाः प्रजा॑यन्ते॒ तस्मा॒द्भूयि॑ष्ठाः प्र॒जन॑ने रमन्ते॒ऽग्नय॒
इत्या॑ह॒ तस्मा॑द॒ग्नय॒ आधा॑तव्याः अग्निहो॒त्रमित्या॑ह॒ तस्मा॑दग्निहो॒त्रे र॑मन्ते य॒ज्ञ इति॑ य॒ज्ञो हि
दे॒वास्तस्मा᳚द्य॒ज्ञे र॑मन्ते मान॒समिति॑ विद्वाꣳस॒स्तस्मा᳚द्वि॒द्वाꣳस॑ ए॒व मा॑न॒से र॑मन्ते न्या॒स इति॑ ब्र॒ह्मा
ब्र॒ह्मा हि प॒रः प॒रो हि ब्र॒ह्मा तानि॒ वा ए॒तान्यव॑राणि॒ पराꣳ॑सि न्या॒स ए॒वात्य॑रेचय॒द्य ए॒वं
वेदे᳚त्युप॒निष॑त्॥ ९९॥ ॥ ७८॥

((satyam param paraṃ satyaṃ satyena na suvargāllokāccyavante kadācana satāṃ hi satyam tasmāthsatye ramante tapa iti tapo nānaśanātparam yaddhi param tapastaddurdharṣam taddurādharṣam tasmāttapasi ramante dama iti niyatam brahmacāriṇastasmāddame ramante śama ityaraṇye munayastamācchame ramante dānamiti sarvāṇi bhūtāni praśaṃsanti dānānnātiduścaram tasmāddāne ramante dharma iti dharmeṇa sarvamidam parigṛhītam dharmānnātiduṣkaram tasmāddharme ramante prajana iti bhūyāṃsastasmādbhūyiṣṭhāḥ prajāyante tasmādbhūyiṣṭhāḥ prajanane ramante'gnaya ityāha tasmādagnaya ādhātavyāḥ agnihotramityāha tasmādagnihotre ramante yajña iti yajño hi devāstasmādyajñe ramante mānasamiti vidvāṃsastasmādvidvāṃsa eva mānase ramante nyāsa iti brahmā brahmā hi paraḥ paro hi brahmā tāni vā etānyavarāṇi parāṃsi nyāsa evātyarecayadya evam vedetyupaniṣat || 99 || || 78 ||))

[[10-79-1]]

प्राजापत्यो हारुणिस्सुपर्णेयः प्रजापतिं पितरमुपससार किं भगवन्तः परमं वदन्तीति तस्मै प्रोवाच सत्येन वायुरावाति सत्येनादित्यो रोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्माथ्सत्यं परमं वदन्ति तपसा देवा देवतामग्र आयन्तपसर्षयस्सुवरन्वविन्दन्तपसा सपत्नान्प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदन्ति दमेन दान्ताः किल्बिषमवधून्वन्ति दमेन ब्रह्मचारिणस्सुवरगच्छन्दमो भूतानां दुराधर्षं दमे सर्वं प्रतिष्ठितं तस्माद्दमः परमं वदन्ति शमेन शान्ताश्शिवमाचरन्ति शमेन नाकं मुनयोऽन्वविन्दञ्छमो भूतानां दुराधर्षञ्छमे सर्वं प्रतिष्ठितं तस्माच्छमः परमं वदन्ति दानं यज्ञानां वरूथं दक्षिणा लोके दातारꣳ सर्वभूतान्युपजीवन्ति दानेनारातीरपानुदन्त दानेन द्विषन्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्ति धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति प्रजननं वै प्रतिष्ठा लोके साधु प्रजायास्तन्तुं तन्वानः पितृणामनृणो भवति तदेव तस्या अनृणं तस्मात्प्रजननं परमं वदन्त्यग्नयो वै त्रयी विद्या देवयानः पन्था गार्हपत्य ऋक्पृथिवी रथन्तरमन्वाहार्यपचनं यजुरन्तरिक्षं वामदेव्यमाहवनीयस्साम सुवर्गो लोको बृहत्तस्मादग्नीन्परमं वदन्त्यग्निहोत्रꣳ सायं प्रातर्गृहाणां निष्कृतिस्स्विष्टꣳ सुहुतं यज्ञक्रतूनां प्रायणꣳ सुवर्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदन्ति यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेनासुरानपानुदन्त यज्ञेन द्विषन्तो मित्रा भवन्ति यज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदन्ति मानसं वै प्राजापत्यं पवित्रं मानसेन मनसा साधु पश्यति मानसा ऋषयः प्रजा असृजन्त मानसे सर्वं प्रतिष्ठितं तस्मान्मानसं परमं वदन्ति न्यास इत्याहुर्मनीषिणो ब्रह्माणं ब्रह्मा विश्वः कतमस्स्वयंभुः प्रजापतिस्संवथ्सर इति संवथ्सरोऽसावादित्यो य एष आदित्ये पुरुषस्स परमेष्ठी ब्रह्मात्मा याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति पर्जन्येनौषधिवनस्पतयः प्रजायन्त ओषधिवनस्पतिभिरन्नं भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा शान्तिश्शान्त्या चित्तं चित्तेन

स्मृति॒ꣳ॒ स्मृत्या॒ स्मार॒ꣳ॒ स्मारे॑ण वि॒ज्ञानं॑ वि॒ज्ञाने॑ना॒त्मानं॑ वेदयति॒ तस्मा॑द॒न्नं दद॒न्थ्सर्वा᳚ण्ये॒तानि॑ द॒दा॒त्यन्ना᳚त्प्रा॒णा भ॑वन्ति भू॒ताना᳚ं प्रा॒णैर्म॑नो॒ मन॑सश्च वि॒ज्ञानं॑ वि॒ज्ञाना॑दान॒न्दो ब्र॑ह्म यो॒निस्स वा ए॒ष पुरु॑षः पञ्च॒धा प॑ञ्चा॒त्मा ये॒न सर्व॑मि॒दं प्रोतं॑ पृथि॒वी चा॒न्तरि॑क्षं च॒ द्यौश्च॒ दिश॑श्चावान्तरदि॒शाश्च॒ स वै सर्व॑मि॒दं जग॒त्स स॒ भूत॑ꣳ स भ॒व्यं जि॑ज्ञासक्लृ॒प्त ऋ॑त॒जा रयि॑ष्ठाश्श्र॒द्धा स॒त्यो मह॑स्वान्त॒पसो॒वरि॑ष्ठा॒द्ज्ञात्वा॑ तमे॒वं मन॑सा हृ॒दा च॒ भूयो॑ न मृ॒त्युमुप॑याहि वि॒द्वान्तस्मा᳚न्न्या॒सम॑षां तप॑सामतिरि॒क्तमाहु॑ः वसु॒रण्वो॑ वि॒भूर॑सि प्रा॒णे त्वम॑सि संधा॒ता ब्रह्म॑न्त्वम॑सि वि॒श्वधृत्ते॑जो॒दास्त्वम॑स्य॒ग्निर॑सि वर्चो॒दास्त्वम॑सि॒ सूर्य॑स्य द्युम्नो॒दास्त्वम॑सि च॒न्द्रम॑स उपया॒मगृ॑हीतोऽसि ब्र॒ह्मणे᳚ त्वा॒ मह॒स ओमित्या॒त्मानं॑ युञ्जीतै॒तद्वै म॑होप॒निष॑दं दे॒वानां॒ गुह्य॒ं य ए॒वं वेद॑ ब्र॒ह्मणो॑ महि॒मान॑माप्नोति॒ तस्मा᳚द्ब्र॒ह्मणो॑ महि॒मान॑मित्युप॒निष॑त्॥ १००॥ ॥ ७९॥

((prājā̱pa̱tyo hārúṇissupa̱rṇeyáḥ pra̱jāpátiṃ pi̱tara̱mupásasāra̱ kiṃ bhágava̱ntaḥ pára̱mamaṃ vada̱ntīti̱ tasmai̱ próvāca sa̱tyená vā̱yurāváti sa̱tyenādi̱tyo rócate di̱vi sa̱tyaṃ vā̱caḥ prati̱ṣṭhā sa̱tye sa̱rvaṃ prati̱ṣṭhita̱ṃ tasmāthsa̱tyaṃ pára̱mamaṃ vadánti̱ tapásā de̱vā de̱vatā̱magrá āya̱ntapa̱sarṣáya̱ssuva̱ranvávinda̱ntapásā sa̱patnānpraṇu̱dā̱mārā̱tī̱stapási sa̱rvaṃ prati̱ṣṭhita̱ṃ tasmā̱ttapáḥ para̱mamaṃ vadánti̱ damena dā̱ntāḥ ki̱lbiṣámavadhū̱nvanti̱ damena brahmacā̱riṇa̱ssuvára̱gacchandamó bhū̱tānāṃ̍ durā̱dharṣa̱ṃ dame sa̱rvaṃ prati̱ṣṭhita̱ṃ tasmā̱ddamáḥ para̱mamaṃ vadánti̱ śamena śā̱ntāśśi̱vamā̱carànti̱ śamena nā̱kaṃ mu̱nayo̱'nvavinda̱ñcchamó bhū̱tānāṃ̍ durā̱dharṣa̱ñchame sa̱rvaṃ prati̱ṣṭhita̱ṃ tasmā̱cchamáḥ para̱mamaṃ vadanti dā̱naṃ ya̱jñānā̱ṃ varūtha̱ṃ dakṣi̱ṇā lo̱ke dā̱tāraṃ̍ sarvabhū̱tānyúpajī̱vanti dā̱nenārā̱tī̱rapánudanta dā̱nená dviṣa̱nto mi̱trā bhávanti dā̱ne sa̱rvaṃ prati̱ṣṭhita̱ṃ tasmā̎ddā̱naṃ pára̱mamaṃ vadánti dharmo viśvásya̱ jagátaḥ prati̱ṣṭhā lo̱ke dha̱rmiṣṭhaṃ̍ pra̱jā úpasa̱rpanti dha̱rmeṇa pā̱pamápa̱nudáti dha̱rme sa̱rvaṃ prati̱ṣṭhita̱ṃ tasmā̎ddharma̱ṃ pára̱mamaṃ vadánti pra̱janána̱ṃ vai prati̱ṣṭhā lo̱ke sā̱dhu pra̱jāyā̎sta̱ntuṃ tanvā̱naḥ pi̱tṝ̱ṇāmánṛ̱ṇo bhavati̱ tade̱va ta̱syā anṛ̱ṇa̱ṃ tasmā̱tprajanána̱ṃ para̱mamaṃ vadántyagnayo̱ vai trayī̎ vi̱dyā deva̱yāna̱ḥ panthā̎ gā̱rhapa̱tya ṛ̱kpṛ̱thi̱vī ra̱thanta̱ramánvāhārya̱pacána̱ṃ yaju̱ra̱ntarikṣa̱ṃ vā̱made̱vyamāhavanīya̱ssāmá suva̱rgo lo̱ko bṛ̱hattasmā̱dagnīnpára̱mamaṃ vadántyagniho̱traṃ̍ sāya̱ṃ prā̱targṛ̱hāṇā̱ṃ niṣkṛ̱ti̱ssviṣṭaṃ̍ suhu̱taṃ yajñakratū̱nā̱ṃ prāyáṇaṃ̍ suva̱rgasyá lo̱kasya̱ jyoti̱stasmā̱dagniho̱traṃ pára̱mamaṃ vadánti yajña iti yajñena̱ hi de̱vā diva̱ṃ ga̱tā yajñenāsú̱rā̱napánudanta ya̱jñená dvi̱ṣa̱nto mi̱trā bhávanti ya̱jñe sa̱rvaṃ prati̱ṣṭhita̱ṃ tasmā̎dyajña̱ṃ pára̱mamaṃ vadánti mā̱na̱saṃ vai prājā̱pa̱tyaṃ pa̱vitra̱ṃ mā̱nase̱na mana̱sā sā̱dhu páśyati mā̱na̱sā ṛ̱ṣaya̱ḥ pra̱jā ásṛjanta mā̱na̱se sa̱rvaṃ prati̱ṣṭhita̱ṃ tasmā̎nmā̱na̱saṃ pára̱mamaṃ vadánti nyā̱sa i̱tyāhu̱rmanī̱ṣiṇo̎ bra̱hmāṇa̱ṃ bra̱hmā viśváḥ kata̱massváya̱mbhuḥ pra̱jāpáti̱ssaṃvathsa̱ra iti̱ sa̱ṃvathsa̱ró'sāvādi̱tyo ya e̱ṣa ā̍di̱tye purúṣa̱ssa pára̱meṣṭhī brahmā̱tmā yābhi̱rādi̱tyastapáti ra̱śmibhi̱stābhi̱ḥ pa̱rjanyó varṣati pa̱rjanyenauṣadhivanaspa̱taya̱ḥ prajā̍yanta o̱ṣadhivanaspa̱tibhi̱rannaṃ̍ bhava̱tyannena prā̱ṇāḥ prā̱ṇairbala̱ṃ bale̱na tapa̱stapásā śra̱ddhā śra̱ddhayā̍ me̱dhā me̱dhayā̍ manī̱ṣā mánī̱ṣayā̱ mano̱ manásā̱ śānti̱śśāntyá ci̱tta̱ṃ ci̱ttena̱ smṛti̱ṃ̱ smṛ̱tyā̱ smā̱raṃ̱ smāre̱ṇa vijñāna̱ṃ vijñāne̱nā̱tmānaṃ̍ vedayati̱ tasmā̱danna̱ṃ dada̱nthsarvā̎ṇye̱tāni dadā̱tyannā̎tprā̱ṇā bhávanti bhū̱tānāṃ̍ prā̱ṇairmano̱

manasaśca vijñānaṃ vijñānādānando brahma yonissa vā eṣa puruṣaḥ pañcadhā pañcātmā yena sarvamidaṃ protaṃ pṛthivī cāntarikṣaṃ ca dyauśca diśāścāvāntaradiśāśca sa vai sarvamidaṃ jagatsa sa bhūtaṁ sa bhavyaṃ jijñāsaklṛpta ṛtajā rayiṣṭhāśśraddhā satyo mahasvāntapasovariṣṭhādjñātvā tamevaṃ manasā hṛdā ca bhūyo na mṛtyumupayāhi vidvāntasmānnyāsameṣāṃ tapasāmatiriktamāhuḥ vasuraṇvo vibhūrasi prāṇe tvamasi saṃdhātā brahmantvamasi viśvadhṛttejodāstvamasyagnirasi varcodāstvamasi sūryasya dyumnodāstvamasi candramasa upayāmagṛhīto'si brahmaṇe tvā mahasa omityātmānaṃ yuñjītaitadvai mahopaniṣadaṃ devānāṃ guhyaṃ ya evaṃ veda brahmaṇo mahimānamāpnoti tasmādbrahmaṇo mahimānamityupaniṣat || 100 || || 79 ||))

[[10-80-1]]

तस्यैवं विदुषो यज्ञस्यात्मा यजमानश्श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदश्शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमश्शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद्यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यथ्संचरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यथ्सायं प्रातरत्ति तथ्समिधं यत्प्रातर्मध्यंदिनꣳ सायं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये संवथ्सराश्च परिवथ्सराश्च तेऽहर्गणास्सर्ववेदसं वा एतथ्सत्रं यन्मरणं तदवभृथ एतद्वै जरामर्यमग्निहोत्रꣳ सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यꣳ सलोकतामाप्नोत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत्॥ १०१॥ ॥ ८०॥

अम्भस्येकपञ्चाशदुत्तरशतं जातवेदसे चतुर्दश भूरन्नं भूरग्नये भूरग्नये चैकमेकं पाहि पाहि चत्वारि चत्वारि यश्छन्दसां द्वे नमो ब्रह्मण ऋतं तपो यथा वृक्षस्यैकमेकमणोरणीयाꣳश्चतुस्त्रिꣳशत्सहस्रशीर्षꣳ षड्विꣳशतिरादित्यो वा एष आदित्यो वै तेज एकमेकं निधनपतये त्रयोविꣳशतिस्सद्योजातं त्रीणि वामदेवायैकमघोरेभ्यस्तत्पुरुषाय द्वे द्वे ईशानो नमो हिरण्यबाहव एकमेकमृतꣳ सत्यं द्वे सर्वो वै चत्वारि कद्रुद्राय त्रीणि यस्य वैकङ्कती कृणुष्व पाजोऽदितिरापो वा इदमेकमेकमापः पुनन्तु चत्वार्यग्निश्च सूर्यश्च नव नवोमिति चत्वार्यायातु पञ्चौजोऽसि दशोत्तमे चत्वारि घृणिस्त्रीणि ब्रह्ममेतु मां यास्ते ब्रह्महत्यां द्वादश ब्रह्म मेधयाऽद्या न इमं भ्रूणहत्यां ब्रह्म मेधवा ब्रह्मा देवानामिदं वीरहत्यामेकान्न विꣳशतिरेकान्न विꣳशतिर्मेधा देवी मेधां म इन्द्रश्चत्वारि चत्वार्या मां मेधा द्वे मयि मेधामेकमपैतु परं वातं प्राणममुत्रभूयाद्धरिꣳ शल्कैरग्निं मा छिदो मृत्यो

मा नो॑ म॒हान्तं॒ मा न॑स्तो॒के प्रजा॑पते स्वस्तिदा त्र्य॑म्बकं॒ ये ते॑ स॒हस्र॑मयु॒तं द्वे द्वे॑ मृत्य॑वे॒ स्वाहैकं॑ दे॒वकृ॑त॒स्यैका॑द॒श यद्वो॑ देवाः॒ कामोऽकार्षी॒न्मन्युरकार्षीद्द्वे द्वे तिला॑ञ्जुहो॒मि गावश्श्रियं प्र॒जाः पञ्च॒ तिलाः कृष्णाश्चोर॑स्य॒ श्रीः प्रज्ञातु जातवे॑द॒स्स॒प्त प्राणवा॒क्त्वक्छिर उत्ति॒ष्ठ पञ्च॒ पृथि॒वीशब्द॒मनोवाग्व्यक्तात्माऽन्तरात्मा परमात्मा मे॑ क्षु॒धेऽन्नमय॒ पञ्च॒दशा॒ग्नये॒ स्वाहैकं॑चत्वारि॒ꣳशद॒दो॑न्तद्ब्रह्म नवं॑ श्र॒द्धायां॑ प्रा॒णे निवि॑ष्टो॒ऽमृतं॑ जुहो॒मि च॒तुर्विꣳशतिश्श्र॒द्धायां॑ प्रा॒णे निवि॒श्या॒मृत॑ꣳ हु॒तन्दशाङ्गुष्ठमात्रः पुरुषो द्वे वाङ्म॑ आ॒सन्न॒ष्टौ वय॑स्सुप॒र्णाः प्राणानां ग्रन्थिरसि द्वे द्वे॒ नमो रुद्रायैकं॑ त्वम॑ग्ने द्यु॒भिर्द्वे॒ शिवेन॑ मे॒ सन्ति॑ष्ठस्व स॒त्यं प्रा॑जापत्यस्तस्यै॒वमेकमेक॒मशीतिः ॥ ८० ॥

अम्भ॑स्यपा॒रे स्व॒स्ति न॑ः पा॒हि नो॑ अग्न एक॑याऽऽदि॒त्यो वा ए॒ष ऋ॒तꣳ स॒त्यमोमित्या मा॑ मे॒धा मा न॑स्तो॒के तिला॑ञ्जुहो॒मि श्र॒द्धायां॑ प्रा॒णे निवि॑श्य॒ तस्यै॒वमेकोत्त॑रश॒तम्॥ १०१ ॥

((tasyai̱vaṃ vi̱duṣo̍ yaj̃nasyātmā yaja̍mānaśśra̱ddhā patnī̱ śarī̍ramiḏhmamuro̱ vedi̱rlomā̍ni ba̱rhirve̱daśśikhā̱ hṛda̍yaṃ̱ yūpa̱ḥ kāma̱ ājyaṃ̍ ma̱nyuḥ pa̱śustapo̱'gnirdama̍śśamayi̱tā dakṣi̍ṇā̱ vāgghotā̎ prā̱ṇa u̍dgātā cakṣu̍radhva̱ryurmano̱ brahmā̱ śrotra̍ma̱gnīdyāva̱ddhriya̍te̱ sā dīkṣā yadaśnā̍ti̱ taddhavi̱ryatpibā̍ti̱ tada̍sya somapā̱naṃ yadrama̍te̱ tadu̍pa̱sado̱ yathsa̱ṃcara̍tyupa̱viśa̍tyu̱ttiṣṭha̍te ca̱ sa pra̍va̱rgyo̍ yanmukhaṃ̱ tadā̍hava̱nīyo̱ yā vyāhṛ̍tirahu̱tiryada̍sya vi̱jñānaṃ̱ tajju̱hoti̱ yathsā̱yaṃ prā̱tarā̍tti̱ tathsa̱midhaṃ̱ yatprā̱tarma̱dhyaṃdi̍naꣳ sā̱yaṃ ca̱ tāni̱ savanā̍ni̱ ye a̍horā̱tre te da̍rśapūrṇa̱mā̱sau ye̎'rddhamā̱sāśca̱ māsā̎śca̱ te cā̍turmā̱syāni̱ ya ṛ̱tava̱ste pa̍śuba̱ndhā ye saṃ̍vathsa̱rāśca̍ parivathsa̱rāśca̱ te'ha̍rga̱ṇāssa̍rvaveda̱saṃ vā e̱tathsa̱traṃ̱ yanmara̍ṇaṃ̱ tada̍va̱bhṛtha̍ e̱tadvai ja̍rāmaryamagniho̱traꣳ sa̱traṃ ya e̱vaṃ vi̱dvānu̍da̱gaya̍ne pra̱mīya̍te de̱vānā̍me̱va ma̍hi̱mānaṃ̍ ga̱tvā''di̱tyasya̱ sāyu̍jyaṃ̱ gaccha̱tyatha̱ yo da̍kṣi̱ṇe pra̱mīya̍te pitṛ̱ṇāme̱va ma̍hi̱mānaṃ̍ ga̱tvā ca̱ndrama̍sa̱ḥ sāyu̍jyaꣳ salo̱kata̍māpnotye̱tau vai sū̎ryācandra̱masō̎rmahi̱mānau̍ brāhma̱ṇo vi̱dvāna̱bhija̍yati̱ tasmā̎dbra̱hmaṇo̍ mahi̱mānā̍māpnoti̱ tasmā̎dbra̱hmaṇo̍ mahi̱mānā̍mityupa̱niṣat ॥ 101 ॥ ॥ 80 ॥

ambha̱syekapañcā̱śadu̍ttaraśa̱taṃ jā̱tave̍dase̱ catu̍rdaśa̱ bhūrannaṃ̱ bhūra̱gnaye̱ bhūra̱gnaye̱ caikā̍mekaṃ̱ pāhi pā̱hi ca̱tvāri̍ catvāri̱ yaśchanda̍sā̱ṃ dve namo̱ brahmā̍ṇa ṛ̱taṃ̱ tapo̱ yathā̍ vṛ̱kṣasyaikā̍mekama̱ṇoraṇī̍yāꣳ̱ śca̍tu̍strim̐śatsahasraśī̍rṣaꣳ̱ ṣa̱ḍviꣳśatirādi̱tyo vā e̱ṣa ā̍di̱tyo vai teja̱ ekā̍mekaṃ̱ nidhā̍napataye̱ trayo̍viꣳśatissa̱dyojā̱taṃ trīṇi̱ vāmade̱vāyaikā̍ma̱ghore̎bhya̱statpuru̍ṣāya̱ dve dve̱ īśāno namo hira̱ṇyabāhava ekā̍mekamṛ̱taꣳ sa̱tyaṃ dve sarvo̱ vai ca̱tvāri̱ kadru̱drāya̱ trīṇi̱ yasya̱ vaikā̍ṅkatī kṛ̱ṇu̱ṣva pājo'di̍ti̱rāpo̱ vā i̱damekā̍meka̱māpā̍ḥ punantu ca̱tvāryagniśca sūryaśca navā̍ na̱vomiti̍ ca̱tvāryāyā̍tu̱ pañcaujo̍'si daśo̱ttame̍ ca̱tvāri̱ ghṛ̱ṇistrīṇi̱ brahmā̍metu̱ mām yāste̎ brahmaha̱tyāṃ dvādā̍śa̱ brahmā̍ me̱dhayā̱'dyā nā̍ i̱maṃ bhrū̍ṇaha̱tyāṃ brahmā̍ me̱dhavā̎ bra̱hmā de̱vānā̍mi̱daṃ vī̍raha̱tyāmekā̱nna viꣳśati̱rekā̱nna viꣳśatirme̱dhā de̱vī me̱dhāṃ ma̱ indrā̍ścatvāri̍ catvā̱ryā māṃ̍ me̱dhā dve mayi̍

medhāmekamapaitu param vātam prāṇamamutrabhūyāddharim śalkairagnim mā chido mṛtyo mā no mahāntam mā nastoke prajāpate svastidā tryambakam ye te sahasramayutam dve dve mṛtyave svāhaikam devakṛtasyaikādaśa yadvo devāḥ kāmo'kārṣīnmanyurakārṣīmdve dve tilāñjuhomi gāvaśśriyam prajāḥ pañca tilāḥ kṛṣṇāścorasya śrīḥ prajñātu jātavedassapta prāṇavāktvakchira uttiṣṭha pañca pṛthivīśabdamanovāgvyaktātmā'ntarātmā paramātmā me kṣudhe'nnamaya pañcadaśāgnaye svāhaikacatvārimśardontadbrahma nava śraddhāyām prāṇe niviṣṭo'mṛtam juhomi caturvimśatiśśraddhāyām prāṇe niviśyāmṛtam hutandaśāṅguṣṭhamātraḥ puruṣo dve vāṅma āsannaṣṭau vayassuparṇāḥ prāṇānām granthirasi dve dve namo rudrāyaikam tvamagne dyubhirdve śivena me santiṣṭhasva satyam prājāpatyastasyaivamekamekamaśītiḥ || 80 ||

ambhasyapāre svasti naḥ pāhi no agna ekayā''dityo vā eṣa ṛtam satyamomityā mām medhā mā nastoke tilāñjuhomi śraddhāyām prāṇe niviśya tasyaivamekottaraśatam || 101 ||))

[[10-0-0]]

सह नाववतु।

सह नौ भुनक्तु।

सह वीर्यं करवावहै।

तेजस्वि नावधीतमस्तु मा विद्विषावहै।

ॐ शान्तिः शान्तिः शान्तिः॥

((saha nāvavatu |
saha nau bhunaktu |
saha vīryam karavāvahai |
tejasvi nāvadhītamastu mā vidviṣāvahai |
āūṃ śāntiḥ śāntiḥ śāntiḥ ||))